CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 879 Subject: Puranic lit.

Title: Bhāgavata with Bhāvārthadīpikā

Author: Śrīdhara Svāmi Scribe: -

Date of the work: - Date of the Ms.: V.S. 1920.

Place of the work: - Place of the Ms.: -

Size: 11" by 5" Extent: 234 foll. (no. 1 missing)

Language: Sanskrit Script: Devanagari

Remarks: Begins abruptly.

तयोगमायावैभवस्यानन्तानामात्मतत्त्वोपदेशपूर्वकंक्रीडार्थंभूतलेवतारितानां चाधिकारि
णां सुरांशानां मोक्षलापदेशेन तत्तदधिकारिपदप्रापणपूर्वकं च ब्रह्मलाघन्तश्रद्धायनिजप
दारेक्षो निरूप्यते। तत्र कुरुक्षेत्रयात्रायामविरक्तस्य वसुदेवस्य कर्मणा कर्मनिर्हारा यथा
स्यान्न स्वदृश्यतामित्येवं कर्मयोगं पृष्टवतो नारदादिभिः कर्मयोगो निरूपितः। कर्मणा कर्मनि
र्हारएषसाधुनिरूपितः॥ यज्ञश्रद्धयाप्तवित्तेन शुक्लेनेज्येति पूरुषमित्यादिना। तेन च विशुद्धस
त्वस्य श्रीकृष्णेरामोपरमेश्वरत्वेन ज्ञानवतः षडुत्तरनवतमाध्याये श्रीकृष्णेनात्मतत्त्वमुपदिष्टं॥
वयोवः सममवेतार्थं तातेतदुपमन्महे। यन्नः पुत्रान् समुद्दिश्य तत्त्वग्राम उदाहृत इत्यादिना। त
त्र विषयसंतोगातिशयेन पुनस्त्रिरोहितमासीत्। तदेवंदानीं नारदमुखेन प्रथमे पंचाध्याये निर्हृ

ध्यते। तत्र प्रथमाध्याये वैराग्योत्पादनाय यदुकुलस्य ब्रह्मशापापदेशेनाथक्रन्त विषयसुख
नामध्य नित्यता प्रतिपाद्यते। ततश्चतुर्भिर्निमिजायंतेयसंवादेन सपरिकर परमतत्त्वनिरूपणं।
ततः षष्ठे भगवदुद्धवसंवादः॥ ततस्त्रयोविंशत्याध्यायैरुद्धवं प्रति भगवतस्तत्त्वनिरूपणं। ततो द्वाभ्यां मौ
सलक्रीडेत्येवमेकत्रिंशताध्यायैरेकादशस्कंधप्रवृत्तिः। तत्र च यथामति व्याख्यानमारभ्यते। त
त्र मौसलप्रसंगार्थं पूर्वस्कंधार्थमनुवदति श्लोकद्वयेन। कृत्वेति॥ बा॥ श्रीशुक उवाच॥ ॥कृत्वा दै
त्यवधं कृष्णः सरामो यदुभिर्वृतः। भुवोऽवतारयद्भारं जविष्ठं जनयन्कलिं॥१॥ अवतारयत् अव ए टी०
तारयदित्यडागमोऽदृष्टश्छान्दसः। जविष्ठं वेगवत्तरं। हिंसापर्यवसायिनमित्यर्थः। कलिं कलहं। एतद्विवृ २
णोति। ये कोपिता इति॥ बा॥ ये कोपिताः सुबहु पांडुसुताः सपत्नैर्दुर्द्यूतहेलनकचग्रहणादिभिस्ता

न्। कृत्वा निमित्तमितरेतरतः समेतान् हत्वा नृपान्निरहरत्क्षितिभारमीशः॥२॥ सपत्नैर्दुर्योधनादि
भिः कोपिताः कोपं कारिताः। सुबहु यथा भवति तथा बहुवारानित्यर्थः। तदेवाह। दुर्द्यूतहेलन
कचग्रहणादिभिरिति। दुर्द्यूतं कपटद्यूतं। हेलनमवज्ञा। कचग्रहणं। आदिशब्देन द्रौपद्याः के
शाकर्षणं। एतानि आदिर्येषां गरदानजतुगृहदाहादीनां तैः। कृत्वा ये कोपिताः तान् पांडुसुतान्
निमित्तं कृत्वा इतरेतरतः परस्परं निमित्तं कृत्वेत्यर्थः। ये तावत्कपटदेव्याः श्रुतनादयस्तानतस्त्रयमेव
हतवान्। ये तु देश्या बांधवाश्च भूनाः स्थितान् परस्परनिमित्तं विधाय हत्वा भारमपाकृतवानित्य
र्थः। अपि चान्नृनारेत्यादि॥ बा॥ भूभारराजपृतनायदुभिर्निरस्य गुप्तैः स्वबाहुभिरचिंतयदप्रमे
यः। मन्येऽवनेर्ननु गतोऽप्यगतं हि भारं यद्यादवं कुलमहो अविषह्यमास्ते॥३॥ अत्रत्याश्च तु वो भारह

ताराज्ञः पृतनाः राज्ञां पृतनाः सेनाः॥ राज्ञस्तेषां पृतनाश्चेति वा॥ स्वबाहुभिर्गुप्तैः परिरक्षितैर्यदुभिः वि
वाह्यादिच्छलेन निरस्य हत्वा॥ बाहुभिरिति बहुवचनं वस्तुतश्चतुर्भुजाभिप्रायेण॥ ननु चैवं सुस्थि
कीर्षतीति ज्ञात्वा कथं तस्मै यादवा नद्रुह्यंतीति तत्राह। अप्रमेयः प्रमातुमशक्यः॥ चिंतामाह। नचि
तिवितर्को। अवनेर्भूमेर्भारो यद्यपि लोकप्रतीत्या गतः तथा मध्यदमगतमेव मन्ये। यद्यस्मात्। अवि
षह्यं सोढुमशक्यं। यद्यादवं कुलमिदं नैनैव स्वं वंशान्स्वयं हननमनुचितमिति सूचितं। तदीदृ
मध्यन्येर्धात्यतामिति चेत्तत्राह। नैवेति॥ ब॥ नैवान्यतः परिभवोस्य भवेत्कथंचिन्मत्संश्रयस्य विभ ए टी०
वोन्नहनस्य नित्यं। अंतः कलिं यदुकुलस्य विधाय वेणुस्तंबस्य वह्निमिव शांतिमुपैमि धाम॥ ४॥ अस्य २
तः देवादिभ्योपि यादवकुलस्य परिभवस्तिरस्कारो न भवति। कुतः॥ मत्संश्रयस्य मां संश्रयस्येत इ

ति मत्संश्रयं कुलं तस्य। किंचानित्यं विभवोन्नहनस्य विभवे उद्गतं रागादिभिरुच्छृंखलस्य। यद्वा।
तदीदृक् किमिति संहर्त्तव्यं। तत्राह। विभवोन्नहनस्येति। तस्मादेवं करिष्यामीत्याह। अंतः कलिमि
ति। शांतिमुपशमं उपेति। वर्त्तमानसामीप्ये वर्त्तमानवद्वा। उपेष्यामि। तदनंतरं च धाम वैकुंठाख्यं
उपेष्यामीत्यर्थः॥ ब॥ एवं व्यवसितो बुध्या सत्यसंकल्प ईश्वरः॥ शापव्याजेन विप्राणां संजह्रे स्वकुलं
विभुः॥ पश्यवसितः कृतनिश्चयः॥ संजह्रे उपसंहृतवान्॥ तदेवमतः प्रयोजनं सर्वं संपाद्य स्वलोकं
उगामेत्याह। स्वमूर्त्येति श्लोकद्वयेन॥ ब॥ स्वमूर्त्या लोकलावण्यनिर्मुक्त्या लोचनं नृणां। गीर्भिस्ताः
स्मरतां चित्तं पदैस्तानीक्षतां क्रियाः॥ ६॥ आच्छिद्य कीर्त्तिं सुश्लोकां वितत्य ह्यंजसा नु कौ। तमोनया तरिष्यं
।तीत्यगात्स्वं पदमीश्वरः॥ ७॥ लोकानां लावण्यस्य निर्मुक्तिः स्यागो यया। यामपेक्ष्य लोके स्वलावण्यं नाद्री

त्यर्थः। यद्वा। लोकेभ्यो लावण्यस्य निर्मुक्तिर्दानं यतः। यस्य संपर्केण लोका लावण्यवंतो भवंतीत्यर्थः। तया स्वमूर्त्या
नृणां लोचनमाच्छिद्य आकृष्य। ततोन्यत्र अवलोकनार्थं लोचनस्याप्रवृत्तेः। तथा स्वगीर्भिः तानि गिरः स्मरतां
चित्तं वाच्छिद्य। तथा पदैस्तत्र तत्रांकितैः तानि पदानि ईक्षमाणानां अन्यतो गमनादिकाः क्रियाश्चा
च्छिद्य। तदानीं तदीनानां सर्वेषां बहुरादिप्रवृत्तीः स्वैकनिष्ठाः कृत्वेत्यर्थः। किंच। इत उपरि जनिष्यमाणानां
संसारतरणाय क्षोणे पृथिव्यां शोभनाः श्लोकाः कवीनां यस्यां तां सुश्लोक्यां कां स्वकीर्त्तिं वितत्य विस्तार्य जन
या कीर्त्या अंजसा सुखेनैव तरनिश्चितं तमः सुरिष्यंतीत्यभिप्रेत्य ईश्वरः स्वपदं स्वस्थानम् अगादिति। ननु ब्रह्म टी॰
ण्येभ्यः अदातृभ्यो वा असेवकेभ्यो वा विप्राः कुप्यंति। वृष्णयस्तु न तथेत्याह। ब्रह्मण्यानामित्यादिना॥ ॥ ४
८॥ ॥राजोवाच॥ ॥ब्रह्मण्यानां वदान्यानां नित्यं वृद्धोपसेविनां। विप्रशापः कथमभूद्वृष्णीनां कृष्णचे

तसां॥ ८ किंच। कोपे जातेपि कृष्णचेतसां कथमभूत् क[illegible]प्रादुर्भूदित्यर्थः। अतः स्पष्टनिमित्तस्याभावात् निमि
त्तांतरं पृच्छति। यन्निमित्त इति॥ ९॥ यन्निमित्तः स वै शापो यादृशो द्विजसत्तम। कथमेकात्मनां भेद एतत्स
र्वं वदस्व मे॥ एकात्मनां एकचित्तानां कथं भेदः कलहः। ईश्वरेच्छैवात्र निमित्तमिति परिहरति। बिभ्रदि
ति॥ १०॥ बिभ्रद्वपुः सकलसुंदरसंनिवेशं कर्माचरन् भुवि सुमंगलमाप्तकामः। आस्थाय धाम रममाण
उदारकीर्त्तिः संहर्तुमैच्छत कुलं स्थितकृत्यशेषः॥ १० सकलानां सुंदरवस्तूनां संनिवेशो विन्यासविशे
षो यस्मिंस्तत् वपुर्बिभ्रत्। तर्हि किं अतिसौंदर्यात् विषयपरः। न। सुमंगलं कर्म आचरन्। तर्हि किं कयापि
कामनया। न। आप्तकामः। तर्हि किमिति कर्माचरति। धाम द्वारकाख्यं दृढमास्थाय रममाणः। प्रदेरममा
णान् कर्म ग्राहयितुमित्यर्थः। ननु किमाप्तकामस्य पृथिव्या कर्मनिर्वा। तत्राह। उदारकीर्त्तिः उदारा बहु

फलप्रदा कीर्तिर्यस्य सः। कीर्तिर्वितानार्थमित्यर्थः॥ एवं परमैश्वर्येण वर्त्तमान एव कुलं संहर्तुमैच्छत्। तत्कस्य
हेतोः तत्राह। स्थितः सन्ये नारदरणे विशेषो यस्य सः। ईश्वरेच्छयोत्थितं ब्रह्मशापनिमित्तं वक्तुमाह। कर्मा
णीति॥ ॥ कर्माणि पुण्यनिवहानि सुमंगलानि गायज्जगत्कलिमलापहराणि कृत्वा। कालात्मना निवस
ता यदुदेवगेहे पिंडारकं समगमन् मुनयो निसृष्टाः॥११॥ कर्मार्थमाहूताः कर्माणि कृत्वा निसृष्टा मुनयः पिं
डारकं समगमन्नित्यन्वयः। निसृष्टाः प्रस्थापिताः। द्रुवेक्षामुदारकीर्त्तितां विहृत एवन् कर्माणि विशिनष्टि। पु
ण्यनिवहानीत्यादि त्रिभिः पदैः। कानि विदश्वमेधादीनि कर्माणि पुण्यमेव वहन्ति नयन्तीति। अत्रोपलालनादीनि ए०टी०
हतकालं सुखमेव कुर्वन्ति। प्रायश्चित्तादीनि तु पापमेव हरंति एतानि तु सर्वतोमुखानीत्याह। पुण्यनिव ५
हानि कीर्तनादिना पुण्यानि निवहंति प्रापयंतीति तथा। सुमंगलानि स्वतः सुखात्मकानि। गायज्जगत

कलिमलापहराणि कृत्वा। मुनिप्रस्थापने हेतुः। कालात्मना संहारकालरूपेण यदुदेवगेहे वसुदेव
गृहे निवसता। स्वकुलं संजिहीर्षतेत्यर्थः॥ पिंडारकं ततो नातिदूरे तीर्थविशेषं॥ ॥ विश्वामित्रोऽसितः क
ण्वो दुर्वासा भृगुरंगिराः। कश्यपो वामदेवोऽत्रिः वसिष्ठो नारदादयः॥१२॥ क्रीडंतस्तानुपव्रज्य कुमारा यदु
नंदनाः। उपसंगृह्य पप्रच्छुरविनीता विनीतवत्॥१३॥ उपसंगृह्य पादग्रहणं कृत्वा। प्रश्नप्रकारमाह द्वयेन।
तेवेषयित्वेति॥ ॥ ते वेषयित्वा स्त्रीवेषैः सांबं जांबवतीसुतं। एषा पृच्छति वो विप्रा अंतर्वत्न्यसितेक्षणा॥१४॥
प्रष्टुं विलज्जती साक्षात् प्रब्रूतामोघदर्शनाः। प्रसोष्यंती पुत्रकामा किंस्वित्संजनयिष्यति॥१५॥ हे अमोघदर्श
नाः विप्राः एषा अंतर्वत्नी गर्भिणी वः युष्मान् साक्षात् प्रष्टुं विलज्जती विलज्जमाना अस्मन्मुखेन पृच्छति। प्रसो
ष्यंती आसन्नप्रसवा। किंस्वित्संजनयिष्यति। कन्यां वा पुत्रं वा तत्प्रब्रूत॥ ॥ एवं प्रलब्धा मुनयः तानूचुः

कुपितान्नृप।जनयिष्यतिवोमंदामुशलंकुलनाशनं॥१६॥प्रलब्धावंचिताः॥व॥तच्छ्रुत्वातेतिसंत्रस्ताविमुच्यस
हसोदरं।सांबस्यददृशुस्तस्मिन्मुशलंखल्वयस्मयं॥१७॥तस्मिन्नुदरेअयस्मयंलोहमयं॥व॥किंकृतंमं
दभाग्यैर्नःकिंवदिष्यंतिनोजनाः।इतिविह्वलितागेहानादायमुशलंययुः॥१८॥मंदभाग्यैरस्माभिःकिमेतत्कृ
तं।नोस्मान्किंवदिष्यंतीतिविह्वलाःसंतोमुशलमादायगेहान्ययुः॥व॥तच्चोपनीयसदसिपरिम्लानमु
खश्रियः।राज्ञःआवेदयांचक्रुःसर्वयादवसंनिधौ॥१९॥राज्ञेउग्रसेनायनृपाय॥व॥श्रुत्वामोघंविप्रशा
पंदृष्ट्वाचमुशलंनृप।विस्मिताभयसंत्रस्ताबभूवुर्द्वारकौकसः॥२०॥ तच्चूर्णयित्वामुशलंयदुराजःसआ ए टी० ६
हुकः।समुद्रसलिलेप्रास्यत्लोहंचास्यावशेषितं॥२१॥आहुकःउग्रसेनःसोपिश्रीकृष्णमपृष्ट्वैवप्रा
स्यत्प्रक्षिप्तवान्।अस्यमुशलस्यचूर्णीक्रियमाणस्यावशेषितंलोहंचप्रास्यत्॥व॥कश्चिन्मत्स्योग्र

सील्लोहंचूर्णानितरलैस्ततः।उह्यमानानिवेलायांलग्नान्यासन्किलैरकाः॥२२॥तरलैस्तरंगैः॥व॥मत्स्योगृ
हीतोमत्स्यघ्नैर्जालेनान्यैःसहार्णवे।तस्योदरगतंलोहंशल्येषुलुब्धकोकरोत्॥२३॥अन्यैर्मत्स्यैःसह।शल्ये
शराग्रे॥व॥भगवान्ज्ञातसर्वार्थईश्वरोपितदन्यथा।कर्तुंनैच्छद्विप्रशापंकालरूप्यन्वमोदत॥२४॥ज्ञातः
सर्वेर्थायेनसः।ईश्वरोपिसमर्थोपिसन्तदन्यथाकर्तुंनैच्छत्।किंचान्वमोदतायतःकालरूपी॥व॥ ॥
॥इतिश्रीभागवतेमहापुराणेएकादशस्कंधेयदुकुलशापोनामप्रथमोध्यायः॥ ॥व॥ ।द्वितीयेनि
मिज्ञायंतेसंवादेनाहनारदः।धर्मान्भागवतान्शुद्धान्वसुदेवायपृच्छते॥१ श्रीशुकउवाच॥ ॥
गोविंदभुजगुप्तायांद्वारवत्यांकुरूद्वह।अवात्सीन्नारदोभीक्ष्णंकृष्णोपासनलालसः॥१॥अभीक्ष्णंवस्था
पितोपिपुनःपुनरत्रवासीदित्यर्थः।ननुनारदस्यदक्षादिशापान्नैकत्रवासेसंभवइत्याशंक्याह।गोविं

द्भुजगुप्तायामिति। न तस्यां शापादेः प्रभावस्त्यार्थः॥ कृष्णोपासने लालसा अत्युत्कंठा यस्य सः॥ यद्गजनेमुक्ता
नामपीदृशामौत्सुक्यं तं को नाम न भजेदित्याह॥ कोन्विति॥ ब॥ को नु राजन्निंद्रियवान् मुकुंदचरणांबुजं। न भजे
त्सर्वतोमृत्युरुपास्यममरोत्तमैः॥२॥ इंद्रियवानिति इंद्रियवत्त्वमात्रमेव यत्राधिकारिविशेषणमित्यर्थः॥ सर्वत
सर्वेष्वपि लोकेषु मृत्युर्यस्य सः॥ब॥ तमेकदा तु देवर्षिं वसुदेवो गृहागतं। अर्चितं सुखमासीनमभिवाद्येदम
ब्रवीत्॥३॥ ॥वसुदेव उवाच॥ ॥भगवन् भवतो यात्रा स्वस्तये सर्वदेहिनां। कृपणानां यथा पित्रोरुत्तम
श्लोकवर्त्मनां॥४॥ यथा पित्रोर्यात्रा आगमनमपत्यानां स्वस्तये मंगलाय। यथा चोत्तमश्लोकस्य वर्त्मभूता — एटी०
नां महतां यात्रा कृपणानां स्वस्तये। तथा भगवद्रूपस्य भवतो यात्रा सर्वदेहिनां स्वस्तये इति। देवैरपि मह — ७
तामुपमानमनुचितमित्याह। भूतानामिति॥ब॥ भूतानां देवचरितं दुःखाय च सुखाय च। सुखायैव हि

साधूनां त्वादृशामच्युतात्मनां॥५॥ देवानां चरितमतिवृष्ट्यादि भूतानां दुःखायापि भवति। त्वादृशां त्वयास
दृशानां। अच्युत आत्मनि येषां। किंच सुखं कुर्वंतोपि देवास्तु भजनानुसारेण कुर्वंति न तथा साधवस्त्या
दृशा भजंतीति॥ब॥ भजंति ये यथा देवान् देवा अपि तथैव तान्। छायेव कर्मसचिवाः साधवो दीनवत्स
लाः॥६॥ छायेव यथा पुरुषो यावत्करोति तावदेव तस्य छायापि। तथा कर्मसचिवाः कर्मसहायाः॥ब॥
ब्रह्मंस्तथापि पृच्छामो धर्मान् भागवतांस्तव। यान् श्रुत्वा श्रद्धया मर्त्यो मुच्यते सर्वतो भयात्॥७॥ तदेवं
यद्यपि भगवत आगमनमात्रेणैव वयं कृतार्थास्तथापि पृच्छामः। तवेति तव यैर्धर्मैः प्रसन्नो भगवांस्ता
नित्यर्थः। ननु च त्वमपि किमन्यो भगवत्प्रसादपात्रमसि। तत्राह। अहं किलेति॥ब॥ अहं किल पुरानं
तं प्रजार्थो भुवि मुक्तिदं। अपूजयं न मोक्षाय मोहितो देवमायया॥८॥ भुवि प्रजार्थः आराधयं पुत्रला

प्रयोजनाः सन् प्रजितवान्। किलेति स्मृतीष्टदेवो भगवद्भक्तं मन्दं स्मरति॥ब॥ यथा विचित्रव्यसनाद्भवद्भिर्विश्वतो
भयात्। मुच्येमह्यंजसेवाद्धा तथा नः शाधि सुव्रत॥९॥ अतो यथा मुच्येत तथा नोऽस्मान् शाधि शिक्षय। विचित्रा
णि व्यसनानि यास्मिन् तस्मात्संसारात्। तथा विश्वतः सर्वतो भयं यस्मिन् तस्मात्। भवद्भिर्देहवृत्तिः। अं
जसा अनायासेन। अद्धा साक्षात्॥ब॥ ॥श्रीशुक उवाच॥ ॥राजन्नेवं कृतप्रश्नो वसुदेवेन धीमता। प्री
तस्तमाह देवर्षिर्हरेः संस्मारितो गुणैः॥१०॥ हरेर्गुणैर्वर्णनीयैश्च प्रस्तुतैर्हरिं संस्मारित इत्यर्थः। प्रीतिमा
विष्करोति। सम्यगिति त्रिभिः॥ब॥ ॥श्रीनारद उवाच॥ ॥सम्यगेतद्व्यवसितं भवता सात्वतर्षभ। य एटी०
त्पृच्छसे भागवतान् धर्मांस्त्वं विश्वभावनान्॥११॥ पृच्छसे पृच्छसि। विश्वं भावनान् सर्वशोधकान्॥ब॥ श्रुतो ८
ऽनुपठितो ध्यात आदृतो वानुमोदितः। सद्यः पुनाति सद्धर्मो देवविश्वद्रुहोऽपि हि॥१२॥ आदृतः आस्तिक्ये

नटद्दीतः। अनुमोदितः परैः क्रियमाणः संस्तुतः। सद्धर्मो भागवतधर्मः। हे देव वसुदेवेत्यर्थः। यद्वा। देवेभ्यो
विश्वस्मै च द्रुह्यन्तीति ये तानपि। किं च। त्वया मम महानुपकारः कृत इत्याह। त्वयेति॥ब॥ त्वया परमकल्या
णः पुण्यश्रवणकीर्त्तनः। स्मारितो भगवानद्य देवो नारायणो मम॥१३॥ पुण्ये श्रवणकीर्त्तने यस्य सः॥ब॥
अत्राप्युदाहरन्तीममितिहासं पुरातनम्। आर्षभाणां च संवादं विदेहस्य महात्मनः॥१४॥ अत्रापि भगवद्ध
र्मनिर्णयेऽपि। विदेहस्य जनकस्य। आर्षभाणामुत्पत्तिं सान्वयं विविच्य कथयन्ति सप्तभिः। प्रियव्रत इति
॥ब॥ प्रियव्रतो नाम सुतो मनोः स्वायंभुवस्य यः। तस्याग्नीध्रस्ततो नाभिरृषभस्तत्सुतः स्मृतः॥१५॥ तमा
हुर्वासुदेवांशं मोक्षधर्मविवक्षया। अवतीर्णं सुतशतं तस्यासीद्ब्रह्मपारगम्॥१६॥ मोक्षमार्गविवक्षया मो
क्षधर्माणां प्रवर्त्तनेच्छया अवतीर्णं वासुदेवांशमाहुः। तस्य च वेदपारगं सुतशतमासीत्। तेषामृषभ

सुतानां मध्ये नवयोगेश्वराणां चरितं वक्तुं इतरेषां चरितं ततो विविद्याद् तेषामिति ॥ब॥ तेषां वै भरतो ज्येष्ठो
नारायणपरायणः । विख्यातं वर्षमेतद्यन्नाम्ना भारतमद्भुतं ॥१७ एतत् अजनाभं नाम वर्षं यस्य नाम्ना भा-
रतमित्यद्भुतं विख्यातमासीत् । एतेन तस्य धर्मातिरेको निरूपितः ॥ब॥ स भुक्तभोगां त्यक्त्वेमां निर्गतस्तप-
सा हरिं । उपासीनस्तत्पदवीं लेभे वै जन्मभिस्त्रिभिः ॥१८ इमां पृथ्वीं गेहात् निर्गतः । हरिमुपासीनः सेवमा-
नः सन् ॥ब॥ तेषां नव नवद्वीपपतयोऽस्य समंततः । कर्मतंत्रप्रणेतार एकाशीतिर्द्विजातयः ॥१९ नव सु-
ताः नवद्वीपपतयः । नवानां ब्रह्मावर्तादिखंडानां पतयः । अस्य भारतवर्षस्य । एकाशीति सुताः कर्ममा- ए टी०
र्गप्रवर्तका ब्राह्मणा अभवन् ॥ब॥ नवाभवन्महाभागा मुनयो ह्यर्थशंसिनः । श्रमणा वातरशना आत्म- ए
विद्याविशारदाः ॥२० अर्थशंसिनः परमार्थनिरूपकाः । श्रमणाः श्रमवंतः आत्माभ्यासे रत अमाऽयर्थाः ।

वातरशना दिगंबराः । आत्मविद्यायां विशारदा निष्णाताः ॥ब॥ कविर्हरिरंतरिक्षः प्रबुद्धः पिप्पलायनः ।
आविर्होत्रोथ द्रुमिलश्चमसः करभाजनः ॥२१ तेषां पारमहंस्यचरित्रमाह द्वाभ्यां । त एत इति ॥ब॥ त ए-
ते भगवद्रूपं विश्वं सदसदात्मकं । आत्मनोऽव्यतिरेकेण पश्यंतो व्यचरन्महीं ॥२२ भगवद्रूपं विश्वं पश्यं-
तः सदसदात्मकं स्थूलसूक्ष्मं रूपं । तच्च स्वाव्यतिरेकेण पश्यंतः ॥ब॥ अव्याहतेष्टगतयः सुरसिद्धसा-
ध्यगंधर्वयक्षनरकिंनरनागलोकान् । मुक्ताश्चरंति मुनिचारणभूतनाथविद्याधरद्विजगवां भुवनानि
कामं ॥२३ अव्याहता अप्रतिहता इष्टा अभिप्रेता गतिर्येषां ते । मुक्ता अनासक्ताः ॥ब॥ त एकदा निमेः
सत्रं उपजग्मुर्यदृच्छया । वितायमानमृषिभिः अजनाभे महात्मनः ॥२४ महात्मनो निमेः वितायमानं
अनुष्ठीयमानं । अजनाभे भारतवर्षे ॥ब॥ तान् दृष्ट्वा सूर्यसंकाशान् महाभागवतान्नृपः । यजमानो

ग्नयो विप्राः सर्व एवोपतस्थिरे॥२५॥ यजमानो नेमिः। अग्नय आहवनीयादयः। विप्रा ऋत्विगादयः॥ब॥ वि
देहस्तानभिप्रेत्य नारायणपरायणान्। प्रीतः संपूजयांचक्र आसनस्थान्यथार्हतः॥२६॥ अभिप्रेत्य ज्ञा
त्वा॥ब॥ तान्रोचमानान्स्वरुचा ब्रह्मपुत्रोपमान्नव। पप्रच्छ परमप्रीतः प्रश्रयावनतो नृप॥२७॥ स्वरुचैव
रोचमानान्न त्वाभरणादिप्रकाशैः। ब्रह्मपुत्रोपमान्सनत्कुमारादिसदृशान्। परमप्रीत्या दर्शनमभि
नंदति द्वाभ्यां। मन्य इति॥ब॥ ॥जनक उवाच॥ ॥मन्ये भगवतः साक्षात्पार्षदान्वो मधुद्विषः। विष्णो
र्भूतानि लोकानां पावनाय चरंति हि॥२८॥ ननु भगवतः पार्षदानां कथमत्रोपलब्धिस्तत्राह। विष्णोरिति। प॰टी॰
विष्णुभक्ता लोकपावनार्थं सर्वत्र पर्यटंतीत्यर्थः। मया दुर्लभं लब्धं अहो भाग्यमित्याह। दुर्लभ इति॥ब॥ १०
दुर्लभो मानुषो देहो देहिनां क्षणभंगुरः। तत्रापि दुर्लभं मन्ये वैकुंठप्रियदर्शनं॥२९॥ बहवो देहा भ

वंति तेषां देहिनो जीवास्तेषां क्षणभंगुरोपि मानुषो देहो दुर्लभः परमपुरुषार्थसाधनत्वात्। वैकुंठ
प्रियो येषां वैकुंठस्यैवा प्रियास्तेषां दर्शनं॥ब॥ अत आत्यंतिकं क्षेमं पृच्छामो भवतोनघाः। संसारे
स्मिन्क्षणार्धोपि सत्संगः शेवधिर्नृणां॥३०॥ हे अनघा निरवद्याः भवतः युष्मान् आत्यंतिकं क्षेमं पृ
च्छामः॥ब॥ धर्मान्भागवतान्ब्रूत यदि नः श्रुतये क्षमं। यैः प्रसन्नः प्रपन्नाय दास्यत्यात्मानमप्यजः
॥३१॥ तदर्थं च भागवतान्ब्रूत। यदि नोऽस्माकं श्रुतये श्रवणाय क्षमं योग्यं भवति। कथंभूतान्। यै
र्धर्मैः प्रपन्नाय भक्ताय अजो हरिः आत्मानमपि दास्यति तान्॥ब॥ ॥श्रीनारद उवाच॥ ॥एवं
ते निमिना पृष्टा वसुदेव महत्तमाः। प्रतिपूज्याब्रुवन्प्रीत्या ससदस्यर्त्विजं नृपं॥३२॥ सदस्यैः ऋ
त्विग्भिश्च वर्तमानं। तेपि भगवद्धर्मश्रवणपरा बभूवुरित्यर्थः। भगवद्धर्मतत्क्रमायात तत्तरण

तिवा। ब्रह्मकर्मवितारेद्धात्तत्कप्रातिस्थगकमातू॥१८॥ तं क्रमेणाच्युत वार्त्तमेव प्रश्नान्निमिर्नृप। एकैक
स्योत्तरं प्रोचुः कविमुख्या मुनीश्वराः॥१९ प्रथममाद्यं तिकं त्वेमं कथयति। मन्य इति॥३॥ ॥कविरु
वाच॥ ॥मन्येऽकुतश्चिद्भयमच्युतस्य पादांबुजोपासनमत्र नित्यं। उद्विग्नबुद्धेरसदात्मभावाद्वि
श्वात्मना यत्र निवर्त्तते भीः॥३३॥ न कुतश्चिद्भयं यस्मात् तदकुतश्चिद्भयं तत्। अत्र संसारे। असदा
त्मभावात्। असति देहादावात्मभावनातः नित्यं सर्वदा उद्विग्नबुद्धेः विश्वात्मना सर्वथा निःशेषं य
त्र पादांबुजोपासने भीः निवर्त्तते तत्। भागवतधर्मलक्षणमाह। ये वै इति॥३॥ ये वै भगवता प्रोक्ता ए८।०
उपाया ह्यात्मलब्धये। अंजः पुंसामविदुषां विद्धि भागवतान्हि तान्॥३४॥ धर्मचादिमुखेन वर्णाश्रमादि ११
धर्मस्तिका अतिरहस्यत्वात् सुमुखेनैव भगवता अविदुषामपि पुंसां अंजः सुखेनैवात्मलब्धये ये उपा

याः प्रोक्ताः तान् भागवतान् धर्मान् विद्धि। अंजः पादेनोक्तं सुकरत्वं विवृणोति। यानिति॥३॥ यानास्था
य नरो राजन्न प्रमाद्येत कर्हिचित्। धावन्निमील्य वा नेत्रे न पतेन्न स्खलेदिह॥३५॥ यानास्थाय आश्रित्य
योगादिष्विव न प्रमाद्येत् विघ्नैर्न विहन्यते। किंच। नेत्रे निमील्य धावन्न पतेत् इह भागवतधर्मेषु न
स्खलेत्। निमीलनं नाम अज्ञानं। यथाहुः। श्रुतिस्मृती उभे नेत्रे विप्राणां परिकीर्त्तिते। एकेन विकलः
काणो द्वाभ्यामंधः प्रकीर्त्तितः। इति। अज्ञात्वापीत्यर्थः। तथा पादन्यासस्थानमतिक्रम्य शीघ्रपरतः
पादन्यासेन गतिर्धावनं। तद्वदत्रापि किंचित् किंचिदतिक्रम्यापि शीघ्रमनुष्ठानं धावनं तथानुतिष्ठन्
पि न स्खलेत् न प्रत्यवायी स्यात्। तथा न पतेत् फलान्न भ्रश्येत्। ब्राह्मणादीनामुक्तान् धर्मान् कांश्चि
दकुर्वाणो भागवतान् धर्मान् श्रवणकीर्त्तनादीन् कुर्वाणः तत्फलं प्राप्नुयादिति भावः। ननु चेतेप

वभागवताःधर्माःईश्वरेर्पितानिसर्वकर्माण्यपीत्याह।कायेनेति॥३६॥कायेनवाचामनसेंद्रियैर्वाबुद्ध्या
त्मनावानुसृतस्वभावात्।करोतियद्यत्सकलंपरस्मैनारायणायेतिसमर्पयेत्तत्॥३६॥आत्मनाचि
त्तेनाहंकारेणवा।अनुसृतोयःस्वभावस्तस्मात्।अयमर्थः।नकेवलंविधितःकृतमेवेतिनियमःस्व
भावानुसारिलौकिकमपीति।तथाचभगवद्गीतासु॥यत्करोषियदश्नासियज्जुहोषिददासियत्॥
यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पणमिति।यद्वा॥कायादीनामेवकर्मनात्मनःइत्याशंक्याह
अध्यासेनानुसृतात्ब्राह्मणत्वादिस्वभावात्यद्यत्करोतीत्यर्थः।तत्सकलंपरस्मैपरमेश्वरायना एटी०
रायणायेतिसमर्पयेत्।तथासतिसकलंकर्मापिभागवतोधर्मोभवतीतिभावः।ननुकिमेवंप १२
रमेश्वरभजनेन।अज्ञानकल्पितभयस्यज्ञानैकनिवर्त्यत्वादित्याशंक्याह।भयमिति॥३७॥भयं

द्वितीयाभिनिवेशतःस्यादीशादपेतस्यविपर्ययोऽस्मृतिः।तन्माययातोबुधआभजेत्तंभक्त्यैकयेशंगु
रुदेवतात्मा॥३७॥यतोभयंतन्मययाभवेत्।अतोबुधोबुद्धिमांस्तमेवभजेत्।ननुभयंदेहाद्यभिनि
वेशतोभवति।सचदेहाहंकारःस्वस्वरूपास्मरणात्।किमत्रतस्यमायाकरोति।अतआह।ईशा
दपेतस्यापि।ईशविमुखस्यतन्माययाअस्मृतिः।ततोविपर्ययोदेहोस्मीति।ततोद्वितीयाभिनि
वेशात्भयंभवति।एवंद्विप्रसिद्धलौकिकीअपिमायायाः।उक्तंचभगवता।दैवीह्येषागुणमयीममामा
याऽदुरत्यया॥मामेवयेप्रपद्यंतेमायामेतांतरंतितेइति।एकयाअव्यभिचारिण्याभक्त्याभजेत्।किंचगुरु
देवतात्मागुरुरेवदेवताईश्वरःआत्माप्रेष्ठश्चयस्यतथादृष्टिःसन्नित्यर्थः।ननुविषयाविष्टचित्तस्यकु
तोऽव्यभिचारिणीभक्तिःसंभवति।कुतस्तरामभयं।तत्रनतावद्विषयोनामवास्तवोऽस्तिकिंतुमनोवि

लासमात्रं। अतो मनोनियमनेन तज्जातादभयं स्यादित्याह। अविद्यमानोपीति॥ब॥ अविद्यमानोप्यवभाति
हि द्वयो ध्यातुर्धिया स्वप्नमनोरथौ यथा। तत्कर्मसंकल्पविकल्पकं मनो बुधो निरुंध्यादभयं ततः स्यात्॥
॥३८ द्वयः द्वैतप्रपंचः। ध्यातुः पुंसः धिया मनसा। स्वप्नश्च मनोरथश्च यथेच्चयथः। तत्तस्मात्कर्माणि सं
कल्पयति। यत्तन्मनस्तन्निरुंध्यात् नियच्छेत्। ततश्चैकया तत्कृपया तज्जातादभयं स्यादित्यर्थः। एतदत्यंताश
क्यमित्याशंक्य सुगमं मार्गमाह। शृण्वन्निति॥ब॥ शृण्वन् सुभद्राणि रथांगपाणेर्जन्मानि कर्माणि च
यानि लोके। गीतानि नामानि तदर्थकानि गायन् विलज्जो विचरेदसंगः॥३९ तदर्थकानि तानि जन्मानि एटी०
कर्माणि च अर्थो येषां तानि। एतान्यपि सत्कल्येन ज्ञातुमशक्यानीत्याशंक्याह। यानि लोके गीतानि प्रसि १३
द्धानि तानि शृण्वन्नेव गायंश्च विचरेत्। असंगो निःस्पृहः। एवं च तज्जतः पुंसः प्राप्तप्रेमलक्षणभक्तियो

गस्य संसारधर्मातीतां गतिमाह। एवमिति॥ब॥ एवंव्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः।
हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति लोकबाह्यः॥४० एवंव्रतं दृढं यस्य सः। स्वप्रियस्य हरेर्नाम
कीर्त्या जातानुरागः प्रेम यस्य सः। अत एव द्रुतचित्तः श्लथहृदयः। कथं चित्तत्कपराजितं भगवंतमाक
लय्योच्चैः हसति। एतावंतं कालमुपेक्षितोस्मीति रोदिति। अथोत्सुक्याद्धो इति क्रोशति हे हरे इमाम तुष्ट
हाणेति। अतिहर्षेण गायति। जितं जितमिति नृत्यति। किं दाम्भिकवत् परानुप्रकाशयितुं। न। उन्मादवत्
ग्रहगृहीतवत् लोकबाह्यः विवशः। किं च। खमिति॥ब॥ खं वायुमग्निं सलिलं महीं च ज्योतींषि सत्वानि दि
शो द्रुमादीन्। सरित्समुद्रांश्च हरेः शरीरं यत्किंच भूतं प्रणमेदनन्यः॥४१ सत्वानि भूतानि। आकाशादिकं
विभूतमात्रं हरेः शरीरं मत्वा प्रणमेतत्। सर्वात्मना यां लिङ्ग। नन्वियमारूढयोगानामपि बहुजन्मनि

दुर्लभा गतिः कथं नामकीर्तनमात्रेणैकस्मिन्नेव जन्मनि भवेत् इत्याशंक्य सदृष्टांतमाह। भक्तिरिति॥ ३॥ भ
क्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एककालः। प्रपद्यमानस्य यथाश्नतः स्युः तुष्टिः पुष्टिः क्षुदपा
योऽनुघासं॥ ४२ प्रपद्यमानस्य हरिं भजतां त्रयं स्यात्। भक्तिः प्रेमलक्षणा। परेशानुभवः प्रेमास्पदभगवद्रूपस्फू
र्त्तिः। तया निर्वृतस्य ततोऽन्यत्र गृहादिषु विरक्तिश्चेत्येष त्रिकः एककालः भजनसमयकाल एव स्यात्। यथा
श्नतो भुंजानस्य तुष्टिः सुखं। पुष्टिः उदरभरणं। क्षुन्निवृत्तिश्च प्रतिग्रासं स्युः। उपलक्षणमेतत्। प्रतिसिक्थ
मपि यथा स्युस्तद्वत्। एवमेकैकस्मिन् भजने किंचित्किंचित्प्रेमादित्रिके जायमाने अनुवृत्त्या भजतः परमप्रेमा — ए टी ०
दि जायते। बहुधा सन्नोजिन इव। परमतुष्ट्यादि। ततश्च भगवत्प्रसादेन कृतार्थो भवतीत्याह। इत्यच्युतां — १४
घ्रिमिति॥ ३॥ इत्यच्युतांघ्रिं भजतोऽनुवृत्त्या भक्तिर्विरक्तिर्भगवत्प्रबोधः। भवंति वै भागवतस्य राजंस्ततः

परां शांतिमुपैति साक्षात्॥ ४३ भागवतस्य भवंतीत्युक्ते तस्य लक्षणं पृच्छति। अथेति॥ ३॥ ॥जनक उवा
च॥ ॥अथ भागवतं ब्रूत यद्धर्मो यादृशो नृणां। यथाचरति यद्ब्रूते यैर्लिंगैर्भगवत्प्रियः॥ ४४ यद्धर्मः यस्मिन्
धर्मे परिनिष्ठितः। यादृशः यत्स्वभावः। यथाचरति वर्त्तते ब्रूते च। यैश्च लिंगैः भगवतः प्रियो भवति। यद्धर्म
इत्यस्योत्तरमाह त्रयेण। सर्वभूतेष्विति॥ ३॥ ॥हरिरुवाच॥ ॥सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः॥ ४५ आत्मनः स्वस्य सर्वेषु भूतेषु ब्रह्मभावेन समन्वयं यः पश्येत्।
तथा ब्रह्मरूपे आत्मन्यधिष्ठाने भूतानि च यः पश्येत्। यद्वा। आततत्वाच्च मातृत्वाच्चात्मा हि परमो हरिरिति
तंत्रोक्तेः। आत्मनो हरेः सर्वभूतेषु मशकादिष्वपि नियंतृत्वेन वर्त्तमानस्य भगवद्भावं निरतिशयैश्वर्यमे
व यः पश्येत्। न तु तस्य तारतम्यं तथा आत्मनि हरावेव भूतानि च पश्येत्। कथंभूते। भगवति अच्युते स्व

यादिरूपे। नत्वनर्जडमलिनत्वं तामसत्वेनाज्ञाद्यादिप्रसक्त्याऐश्वर्यादिप्रच्युतिं पश्येत्। स सर्वत्र परिच्छि
न्नं भगवत्तत्वं पश्यन् भागवतोत्तम इत्यर्थः॥ब॥ ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च। प्रेम मैत्रीकृ
पोपेक्षा यः करोति स मध्यमः॥४६ प्रेम च मैत्री च कृपा च उपेक्षा च ताः। ईश्वरादिषु चतुर्षु यः करोति स
मध्यमो भागवतः॥ एवंभूतस्य भेददर्शनात्॥ ब॥ अर्चायामेव हरये पूजां यः श्रद्धयेहते। न तद्भ
क्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः॥४७ अर्चायां प्रतिमायां। पूजामीहते करोति। न तद्भक्तेषु अन्येषु
च सत्कारं न करोति। प्राकृतः प्रारब्धभक्तिः। अधुनैवारब्धभक्तिः शनैः शनैरुत्तमो भविष्यतीत्यर्थः॥ उ एटी०
त्तरश्लोकैः अन्यदपि उत्तमभागवतस्यैव लक्षणमाह। गृहीत्वापीति॥ब॥ गृहीत्वापीन्द्रियैर १५
र्थान् यो न द्वेष्टि न हृष्यति। विष्णोर्मायामिदं पश्यन् स वै भागवतोत्तमः॥४८। श्रीवासुदेवाविष्टचित्तो न

हृष्यति तावदिंद्रियैरर्थान् गृहीत्वापीत्यपिशब्दार्थः॥ किंच। इदं विश्वं। किंच॥ब॥ देहेंद्रियप्राणमनोधियां
यो जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः॥ संसारधर्मैरविमुह्यमानः स्मृत्या हरेर्भागवतप्रधानः॥४९ देहादीनां सं
सारधर्मैर्जन्माप्ययादिभिर्यो हरेः स्मृत्या अविमुह्यमानः स भागवतप्रधानः। तत्र देहस्य जन्माप्ययौ। प्राणस्य
क्षुत्। मनसो भयं। बुद्धेस्तर्षः स्पृहा। इंद्रियाणां कृच्छ्रं श्रमः तैः॥ब॥ न कामकर्मबीजानां यस्य चेतसि संभवः।
वासुदेवैकनिलयः स वै भागवतोत्तमः॥५० कामाश्च कर्माणि च बीजानि च वासनाः तेषां। वासुदेव एको नि
लय आश्रयो यस्य सः॥ एतेन गृहीत्वापीत्यादि रहितश्चरतीति यथा चरतीत्यस्योत्तरमुक्तं। यैर्लिंगैर्भगवत्
प्रिय इत्यस्योत्तरमाह। न यस्येति॥ब॥ न यस्य जन्मकर्मभ्यां न वर्णाश्रमजातिभिः। सज्जतेऽस्मिन्नहंभावो
देहे वै स हरेः प्रियः॥५१ जन्म सत्कुलं। कर्म तपआदि। जातयः अनुलोमप्रतिलोमजाः मूर्धावसिक्तादयः

अस्मिन् देहे। अहंकाररहितैः कुलकर्मादिलिंगैः हरेः प्रियो भवतीत्यर्थः॥ ५१॥ न यस्य स्वः पर इति वित्तेष्वा-
त्मनि वा भिदा। सर्वभूतसमः शांतः स वै भागवतोत्तमः॥ ५२॥ वित्तेषु स्वीयं परकीयमिति। आत्मनि स्वः प-
र इति किंच॥ ५२॥ त्रिभुवनविभवहेतवेऽप्यकुंठस्मृतिरजितात्मसुरादिभिर्विमृग्यात्। न चलति भगवत्प-
दारविंदाल्लवनिमिषार्द्धमपि यः स वैष्णवाग्र्यः॥ ५३॥ त्रिभुवनविभवहेतवे त्रैलोक्यराज्यार्थमपि लवार्द्धम-
पि निमिषार्द्धमपि भगवत्पदारविंदात् तज्ज्ञनाद्यो न चलति स वैष्णवाग्र्यः। न तु लवार्द्धं तज्ज्ञो परमे वेत्ता वा तु भा०११
लात्मो भवेत्। न कुतो न चलेत्तत्राह। अकुंठस्मृतिः भगवत्पदतोऽन्यत्सारं नास्तीत्येवंरूपा अकुंठा अनप- टी०
गता स्मृतिर्यस्य सः॥ भगवत्पदारविंदादन्यत्सारं नास्तीति कुतः। अत आह। अजित एवात्मा येषां तथा- १६
भूतैः सुरादिभिरपि दुर्लभत्वात्। किंतु केवलं मृग्यात्। तदपेक्षया सर्वस्य तुच्छत्वं स्मरन्नयो न चलतीत्यर्थः॥

अपि च विषयाग्निसंधिना चलनं कामेनाति संतापे सति भवेत्। सत्यं भगवत्सेवानिवृत्तो न संभवतीत्याह। भ-
गवत इति॥ ५३॥ भगवत उरुविक्रमांघ्रिशाखानखमणिचंद्रिकया निरस्ततापे। हृदि कथमुपसीदतां पुनः स
प्रभवति चंद्र इवोदितेऽर्कतापः॥ ५४॥ उरुविक्रमौ च तौ अंघ्री च तयोः शेषाः अंगुलयः तासु नखानि च तानि
मणयश्च तेषां चंद्रिका शीतला दीप्तिः तया निरस्तः कामादितापो यस्मिंस्तस्मिन् उपसीदतां हृदि कथं पु-
नः स तापः प्रभवति। चंद्रे उदिते सति अर्कस्य ताप इव। न यस्य स्वपर इत्यादिना श्लोकत्रयेण उत्तरस्योत्तरस्यो-
त्तरमुत्कर्षं वेदितव्यं। यद्भूतेषु सर्वेषु हरिनामानीति ज्ञातव्यं। उत्कृष्टतम सर्वलक्षणमाह। विसृजतीति॥ ५४॥
विसृजति हृदयं न यस्य साक्षाद्धरिरवशाभिहितोऽप्यघौघनाशः॥ प्रणयरसनया धृतांघ्रिपद्मः स भवति
भागवतप्रधान उक्तः॥ ५५॥ हरिरेव साक्षात् स्वयं यस्य हृदयं न विसृजति। न मुंचति। कथंभूतः। अवशेनापि

अविदितमात्रोप्यघौघंनाशयतीतियावत्। तत्किंनविस्मरति। यतः प्रण॰॰॰यरशनया धृतं हृदयेनवि
वं अङ्घ्रिपद्मंयस्यसभागवतप्रधानंउक्तोभवति॥ब॥ ॥ ॥इतिश्रीभागवतेमहापुराणेएकादशस्कं
धेजनकजायंतेयसंवादेद्वितीयोऽध्यायः॥ ॥ब॥ ॥मायातत्तरणंब्रह्मकर्मप्रश्नवशस्थये। तृतीयेव
र्ण्यंत्तमार्षभैर्मुनिभिः पृथक्॥१ विष्णोर्मायामिदं पश्यन्नित्युक्तं। अतोमायांपृच्छति॥ परस्येति॥ब॥ ॥
जनकउवाच॥ ॥परस्याविष्णोरीशस्यमायिनामपिमोहिनीं। मायांवेदितुमिच्छामोभवंतोनुब्रुवंतुनः
॥१ हेभगवंतः। नन्वहंकलक्षणोभागवतोभूत्वाउक्तार्थःस्याः॥ किंबहुभिःप्रश्नैरतआह। नानुतृप्यइति। ए॰टी॰
ब॥ नानुतृप्येजुषन्युष्मद्वचोहरिकथामृतं। संसारतापनिस्तप्तोमर्त्यस्तत्तापभेषजं॥२ संसारतापेनि १७
तरांतप्तोहंतस्यतापस्यभेषजंहरिकथामृतरूपं युष्मद्वचोजुषमाणोनानुतृप्यामि। मायायाःस्वरूपे

निरूपणादसंभवात्सृष्ट्यादिकार्यद्वारेणनिरूपयितुमाह॥ एभिरिति॥ब॥ ॥अंतरिक्षउवाच॥ ॥एभि
र्भूतानिभूतात्मामहाभूतैर्महाभुज। ससर्जोच्चावचान्याद्यःस्वमात्रात्मप्रसिद्धये॥३ आद्यपुरुषोयया
भूतात्मा भूतानामात्माकारणभूतः एभिःसृष्टैर्महाभूतैरुच्चावचानिससर्ज। एषामायाभगवतइतिव
रमश्लोकस्यप्रतिश्लोकमनुषंगः। किमर्थंससर्ज। स्वमात्रात्मप्रसिद्धये। स्वमिमीतेप्रतिमिमीतेयउपा
धेस्तस्यमातातस्यात्मनोजीवस्यप्रकृष्टायै। यद्वा। स्वांशभूतानांजीवानांमात्राप्रसिद्धयेविषयभोगाय।
आत्मप्रसिद्धये। मोक्षायचेत्यर्थः। तदुक्तंवेदस्तुतौ। बुद्धींद्रियमनःप्राणान्जनानामसृजत्प्रभुः। मात्रा
र्थंचभवार्थंचआत्मनेकल्पनायचेति॥ब॥ एवंसृष्टानिभूतानिप्रविष्टःपंचधातुभिः। एकधादशधात्मानं
विभजन्जुषतेगुणान्॥४ एवंजीवोपकारार्थंपंचधातुभिर्महाभूतैःसृष्टानिभूतान्यंतर्यामिरूपेणप्र

विष्टः॥ एकधा। मनसा। दशधा बाह्येंद्रियरूपेण। आत्मानं विसृजन् गुणान् तत्तद्विषयान् जुषते। जोषयतीत्यर्थः
यद्वा। तमात्मानं प्रति गुणान् विसृजन् जुषते अस्येव ते प्रीयत इत्यर्थः॥७॥ गुणैर्गुणान् स भुंजान आत्मप्रद्यो
तितैः प्रभुः॥ मन्यमान इदं सृष्टमात्मानमिह सज्जते॥ प्रसज्ज। वः आत्मना अंतर्यामिणा प्रद्योतितैः गुणैरिंद्रियैः
गुणान् विषयान् भुंजान इदं सृष्टं शरीरं आत्मानं मन्यमान इह शरीरादौ सज्जते। अत एव संसरतीति। ननु भुं
जानः कथं सज्जते। भुंजानो भोगसमासोऽपि मुच्यत इति चेत्तत्राह। कर्माणीति॥८॥ कर्माणि कर्मभिः कुर्वन्
सनिमित्तानि देहभृत्। तत्तत्कर्मफलं गृह्णन् भ्रमतीह सुखेतरं॥ कर्मभिः कर्मेंद्रियैः सनिमित्तानि क ए.टी०
र्माणि कुर्वन् सुखेतरं दुःखात्मकं कर्मफलं। कथं गृह्णन् तत्कियंतं कालं भ्रमतीति तत्राह॥८॥ इत्थं कर्मग २८
तीर्गच्छन् बह्वभद्रवहाः पुमान्। आभूतसंप्लवात् सर्गप्रलयावश्नुते वशः॥७॥ बह्वभद्राणि वहंतीति ति

याताः सर्गप्रलयौ उत्पत्तिमरणे। एवं मायामयीं सृष्टिमुक्त्वा प्रलयं दर्शयितुमारभते॥१०॥ धात्रुपप्लव आ
सन्ने व्यक्तं द्रव्यगुणात्मकं। अनादिनिधनः कालो ह्यव्यक्तायोपकर्षति॥८॥ धातूनां महाभूतानामुपप्लवे
विनाशे हेतौ आसन्ने व्यक्तं कार्यं द्रव्यं स्थूलं गुणाः सूक्ष्मः तदात्मकं। अव्यक्ताय अव्यक्तं प्रति नेतुमाक
र्षति। नाशहेतुमाह। शतवर्षेति॥१०॥ शतवर्षा ह्यनावृष्टिर्भविष्यत्युल्बणा भुवि। तत्कालोपचितोष्णा
र्को लोकांस्त्रीन् प्रतपिष्यति॥११॥ एतस्मिन् काले उपचितः श्वासो उष्मश्वासावर्कस्य। यद्वा। तेन कालेनोप
चितमुष्णत्वं यस्य सः॥१२॥ पातालतलमारभ्य संकर्षणमुखानलः। दहन्नूर्ध्वशिखो विष्वग्वर्द्धते वायुने
रितः॥१०॥ ऊर्ध्वशिखः। उच्चज्वालः। विष्वक् परितः॥१३॥ संवर्तको मेघगणो वर्षति स्म शतं समाः। धारा
भिर्हस्तिहस्ताभिर्लीयते सलिले विराट्॥११॥ सांवर्तकः प्रलयकर्ता धाराभिर्गजबिंदुभिः हस्तिहस्तैः

नि: तत्वमाणनि॥ ब॥ ततो विराजमुत्सृज्य वैराजः पुरुषो नृप। अव्यक्तं विशते सूक्ष्मं निरिंधन इवानलः॥१२
ततउपाधिलयात् विराजः पुरुषो ऽव्यक्तं कारणं प्रविशति। न तु ब्रह्मणा सह ते सर्वे सं प्राप्ते प्रतिसंच
रे। परस्यांते कृतात्मानः प्रविशंति परं पदं। इति स्मृतेः। यावदधिकारमवस्थितिरधिकारिणामिति न्या
याच्च वैराजस्य शास्त्रानिषेधस्य च ब्रह्मणः परमत्वागवतश्चाप्यो रुद्र एव संगच्छते। नान्येषामिवकारणमात्रे
प्रवेशः। सत्यं। अश्वमेधादिना सत्यलोकं गतानाम मुक्तानामावृत्तिश्रवणात्। अव्यक्तं च ब्रह्मणोपि
प्रसूतौ लयः पुनरुत्पत्तिश्चेति मोक्षदो बल्यस्य च नायेव मुक्तमिच्च विरोधः। यद्वा। केनापि प्रमाणेन एटी०
न युज्यत इत्यव्यक्तं। ब्रह्मैव। तत्प्रवेशेन च मोक्ष एवोक्त इति द्रष्टव्यं। एवं विराजो लयमुक्त्वा तत्कार १९
णानां महदादिपृथिव्यंतानां प्रातिलोम्येन लयमाह। वायुनेति॥ ब॥ वायुना हृतगंधा भूः सलि

लत्वाय कल्पते। सलिलं तद्धृतरसं ज्योतिष्ट्वायोपकल्पते॥१३ वायोर्हि गंधरसहारित्वं प्रसिद्धं। सांव
र्तकेन वायुना हृतगंधा अत एव गंधस्याप्यावर्तकस्य ग तच्चात् सलिलत्वाय कल्पते। सलिले ली
यत इत्यर्थः। तत् सलिलं वायुनैव हृतो यस्य तत्॥ ब॥ हृतरूपं तु तमसा वायौ ज्योतिः प्रलीयते।
हृतस्पर्शो ऽवकाशेन वायुर्नभसि लीयते॥१४ तमसश्च रूपतिरस्कारित्वं प्रसिद्धं। सांवर्तकेन तम
साप्यवकाशेनाकाशेनाप्यवकारणेन॥ ब॥ कालात्मना हृतगुणं नभ आत्मनि लीयते॥१४ काला
त्मना शब्दस्य कालत एव नाशः। तद्रूपेणात्मना ईश्वरेणात्मनि तामसाहंकारे॥ ब॥ इंद्रियाणि
मनो बुद्धिः सह वैकारिकैर्नृप। प्रविशंति ह्यहंकारं स्वगुणैरहमात्मनि॥१५ इंद्रियाणि बुद्धिश्च
राजसाहंकारं। मनो वैकारिकैर्देवैः सह सात्विकाहंकारं। एवं त्रिविधैः स्वगुणैः स्वकार्यैः सहितः

अहंकारः आत्मनि महति। सवप्रज्ञता विविद्ध इत्यर्थः॥ ब॥ एषा माया भगवतः सर्गस्थित्यंतकारिणी। त्रिव
र्णा वर्णितास्माभिः किं भूयः श्रोतुमिच्छसि॥१६ त्रिवर्णा त्रिगुणमाया श्रवणेन तज्ज्ञानं तन्निवृत्त्यु
पाय श्रवणे स्वयं छंदयति किं भूय इति। एवमन्तकं पि तस्य तन्निवृत्त्युपायमेव पृच्छति॥ ब॥ ॥जनक
उवाच॥ ॥यथैमेश्वरीं मायां दुस्तरामकृतात्मभिः। तरंत्यंजः स्थूलधियो महर्ष इदमुच्यतां॥१७ यद्यपि
तन्मायया तोद्बुधाः आसज्जेत्रमिति सक्तिस्तत्तारकत्वेनोक्तैव। तथापि किं सक्तिरेवाच्योपिवा तत्रोपा
योस्तीति ज्ञातुं पुनः प्रश्नः। अकृतात्मभिरवशीकृतांतःकरणैः स्थूलधियः स्थूले शरीरे अहंधीर्यये ए॰टी॰
षां ते सक्तिव्यतिरेकेण नास्त्ययत्नोपाय इत्यभिप्रेत्य सक्तिमेव सत्साधनं निरूपयति। तत्र प्रथमं वैरा २०
ग्यद्वारा गुरूपसत्तिमाऽऽह चउर्भिः कर्माणीति॥ ब॥ ॥प्रबुद्ध उवाच॥ ॥कर्माण्यारभमाणानां

दुःखहत्यै सुखाय च। पश्येत्पाकविपर्यासं मिथुनीचारिणां नृणां॥१८ दुःखहत्यै दुःखप्रतीकाराय। पा
कविपर्यासं फलवैपरीत्यं। मिथुनीचारिणां मिथुनीभूय प्रवर्त्तमानानां कर्मभिः साधिता अपि वित्ता
दयो न सुखदेतवे इति च पश्येद्विद्यादित्याह। नित्यार्त्तिदेनेति॥ ब॥ नित्यार्त्तिदेन वित्तेन दुर्लभेनात्ममृत्यु
ना। गृहापत्याप्तपशुभिः का प्रीतिः साधितैश्चलैः॥१९ आत्मनः स्वस्य मृत्युरूपेण चलैः अनित्यैः आ
पायिभिः॥ ब॥ एवं लोकं परं विद्यान्नश्वरं कर्मनिर्मितं। सतुल्यातिशयध्वंसं यथा मंडलवर्त्तिनां॥२०
एवं लोकं परमिति कर्मनिर्मितत्वान्नश्वरं। तथा च श्रुतिः। तद्यथेह कर्मजितो लोकः क्षीयते एवमेवा
मुत्र पुण्यजितो लोकः क्षीयत इति। किंच॥ वर्त्तमाने समये पि दुःखदत्वं पश्येदित्याह। सतुल्यातिश
यध्वंसं स्पर्द्धतुल्येन अतिशायेन ध्वंसेन च वर्त्तमानं। अतः तुल्ये स्पर्द्धा अतिशये असूया ध्वंसात् शोचने

नयादिकं चापरिहार्यमित्यर्थः। यथा खंडमंडलपतीनां मिथःस्पर्द्धादितद्वत्॥ ब॥ तस्माद्गुरुं प्रपद्येत जि
ज्ञासुः श्रेय उत्तमं। शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयं॥ २१ उत्तमं श्रेयो ज्ञातुमिच्छुः। शाब्दे ब्रह्मणि
वेदाख्ये न्यायतो निष्णातं तत्वज्ञं। अन्यथा संशयनिरासकत्वायोगात्। परे च ब्रह्मण्यपरोक्षानुभवेन
च निष्णातं। अन्यथा बोधसंचारायोगात्। परं ब्रह्मनिष्णातद्योतकमाह। उपशमाश्रयमिति॥ ब॥ तत्र भा
गवतान्धर्मान्शिक्षेद्गुर्वात्मदैवतः। अमाययानुवृत्त्या यैस्तुष्येदात्मात्मदो हरिः॥ २२ गुरुरेवात्मा दैवतं
च यस्य सः। अनुवृत्त्या सेवया। यैर्धर्मैः। तुष्येत्। आत्मा आत्मदश्चोपासकानां॥ ब॥ सर्वतो मनसोऽसंग ए टी०
मादौ संगं च साधुषु। दयां मैत्रीं प्रश्रयं च भूतेष्वद्धा यथोचितं॥ २३ यथोचितमिति दीनेषु दयां समेषु मै २१
त्रीमुत्तमेषु च प्रश्रयं च शिक्षेदित्यर्थः॥ ब॥ शौचं तपस्तितिक्षां च मौनं स्वाध्यायमार्ज्जवं। ब्रह्मचर्यमहिंसां

च समत्वं द्वंद्वसंज्ञयोः॥ २४ शौचं बाह्यं मृज्जलादिभिः। आभ्यंतरं चादंभमानादिभिः शिक्षेत्। तपः स्वधर्माच
रणं। तितिक्षां क्षमां। मौनं वृथा वागनुच्चारणं। स्वाध्यायं अधिकारानुरूपं वेदपाठादिकं। आर्ज्जवं स्वच्छ
तां। ब्रह्मचर्यं यस्य यादृग्युचितं। ननु स्वदारनियमादि। अहिंसां भूतेष्वद्रोहं। द्वंद्वसंज्ञयोः शीतोष्णसुख
दुःखादिरूपयोर्हर्षविषादराहित्यं॥ ब॥ सर्वत्रात्मेश्वरान्वीक्षां कैवल्यमनिकेततां। विविक्तचीरवसनं
संतोषं येन केनचित्॥ २५ आत्मेश्वरान्वीक्षां सच्चिद्रूपेणात्मेक्षां। नियंतृरूपेणेश्वरान्वीक्षां च। कैवल्यमेकां
तशीलत्वं। अनिकेततां। गृहाद्यभिमानराहित्यं। विविक्तचीरवसनं। विजनेपतितानां वा वल्कलानां परि
धानं॥ ब॥ श्रद्धां भागवते शास्त्रेऽनिंदामन्यत्र चापि हि। मनोवाक्कर्मदंडं च सत्यं शमदमावपि॥ २६ भाग
वते भगवत्प्रतिपादके। अन्यत्र शास्त्रादौ च अनिंदां। मनसः प्राणायामैः। वाचो मौनेन। कर्मणानी

ह्याद्वंद्वं।सत्यं यथार्थभाषणं।शमदमोंऽतःकरणबाह्येंद्रियनिग्रहौ॥बा॥श्रवणं कीर्त्तनं ध्यानं हरेरद्भु
तकर्मणः।जन्मकर्मगुणानां च तदर्थेऽखिलचेष्टितं॥२७हरेर्जन्मकर्मगुणानां श्रवणादि।तदर्थेद्द्युद्वे
ग्रोनस्तवकर्म॥बा॥इष्टं दत्तं तपो जप्तं वृत्तं यच्चात्मनः प्रियं।दारान् सुतान् गृहान् प्राणान् यत्परस्मै निवे
दनं॥२८विशेषतश्च यजनादि यत् तत्तदर्थे शिक्षेत्।इष्टं दत्तमित्यादयो भावे निष्ठा।वृत्तं सदाचारः।आ
त्मनः प्रियं गंधपुष्पादि।दारादीनपि यालस्य परस्मै परमेश्वराय निवेदनं तत्सेवकतया समर्पणं यत् तच्छि
क्षेत्॥बा॥एवं कृष्णात्मनाथेषु मनुष्येषु च सौहृदं।परिचर्यां चोभयत्र महत्सु नृषु साधुषु॥२९कृष्ण एवात्मा ए॰टी॰
त्मा नाथश्च येषां कृष्णआत्मनो जीवस्य नाथो येषामिति वा तेषु।उभयत्र स्थावरेजंगमे च या परिचर्या तां। २२
विशेषतो नृषु।तत्रापि साधुषु स्वधर्मशीलेषु।ततोऽपि महत्सु भागवते॥बा॥परस्परानुकथनं पावनं भ

गवद्यशः।मिथो रतिर्मितस्तुष्टिः निर्वृतिर्मिथ आत्मनः॥३०तैश्च सह संगम्य यत्पावनं भगवद्यशः तस्य
परस्परानुकथनं शिक्षेत्।यद्वा।यशः प्रति।तत्र संस्पर्द्धादिपरित्यागेन मिथो या रतिः रमणं।या च तुष्टिः सु
खं।या च निर्वृत्तिः समस्तदुःखनिवृत्तिः तां च शिक्षेत्।एवं वर्त्तमानानां परमानंदप्राप्तिमाह।स्मरंत इति द्व
येन॥बा॥स्मरंतः स्मारयंतश्च मिथोऽघौघहरं हरिं।भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुं॥३१भक्त्या
साधनभक्त्या संजातया प्रेमलक्षणया भक्त्या॥बा॥क्वचिद्रुदंत्यच्युतचिंतया क्वचिद्धसंति नंदंति वदंत्यलौ
किकाः।नृत्यंति गायंत्यनुशीलयंत्यजं भवंति तूष्णीं परमेत्य निर्वृताः॥३२अजं हरिं अनुशीलयंति।तल्लीलां
अभिनयंति।एवं परं प्राप्य निर्वृताः संतः तूष्णीं भवंति।उपसंहरति।इतीति॥बा॥इति भागवतान्धर्मान्
शिक्षन् भक्त्या तदुत्थया।नारायणपरो मायामंजस्तरति दुस्तरां॥३३भागवतधर्मैः शिक्षितया भक्त्या नारायणप

रोमायां तरतीत्युक्ते पृच्छति। नारायण इत्येति॥ ॥ ॥जनक उवाच॥ ॥नारायणाभिधानस्य ब्रह्मणः परमात्म
नः। निष्ठामर्हथ नो वक्तुं यूयं हि ब्रह्मवित्तमाः॥ २४ निष्ठां स्वरूपं। अयं भावः। ब्रह्मैव तावन्नारायण इति भगवानि
ति परमात्मेति चोच्यते। तदुक्तं। वदंति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयं। ब्रह्मेति परमात्मेति भगवानिति। शब्द्यते।
तथा नारायणो भगवति तदिदं विश्वमाहितं। गृहीतमायोरुगुणः सर्गादावगुणः स्वतः। इत्यादिषु तत्र किमेभिः
शब्दैः निर्विशेषं तदेव वस्तूच्यते। अस्ति वा कोपि विशेषो वा इति तत्रोत्तरं॥ ॥ ॥पिप्पलायन उवाच॥ ॥स्थित्यु
द्भवप्रलयहेतुरहेतुरस्य यत्स्वप्नजागरसुषुप्तिषु सद्बहिश्च। देहेंद्रियासुहृदयानि चरंति येन संजीवितानि त एटी०
द्विद्धि परं नरेंद्र॥ २५ अयमर्थः। अस्य विश्वस्य स्थित्युद्भवप्रलयानां हेतुः स्वयं च अहेतुः हेतुरहितः। स नारायण इ २३
ति परमेव तत्त्वमवेहि। स्वप्नजागरसुषुप्तिषु यत् वर्त्तते देहेंद्रियप्राणमनांसि येन संजीवितानि संति चरंति प्र
× सत्स्वनुवर्त्तमानं यत्। वस्तु ति च। तुरीयं त्रिषु संतमिति। बहिश्च समाधावपि। यत् सत् तद्ब्रह्मेति। परमेव तत्त्वमवेहि। स्वप्नजागरसुषुप्तिषु अन्व

वर्त्ततीति तत्परमात्मेति परमेव तत्त्वं अवेहि। उक्तं हि। अचेतना अपि प्रकृतिः प्रगाढमात्मोपकंठे सकलं तनोति
अचेतनं संचलतीव लोहं स्वयं यथा भ्रामकसंनिधाने। एवं लक्षणे देहे नारायणादिनामाभिधीयमानम
पि परं एकमेव तत्त्वं अवेहि। अवेहीत्यनेन विषयत्वं प्राप्तं निषेधयति॥ ॥ नैतन्मनो विशति वागुत चक्षु
रात्मा प्राणेंद्रियाणि च यथानलमर्चिषः स्वाः। शब्दोपि बोधकनिषेधतयात्ममूलमर्थोक्तमाह यदृते न नि
षेधसिद्धिः॥ २६ एतत्परं तत्त्वं मनो न विशति। न विषयीकरोति। वागुत वागपि। चक्षुश्च आत्मा बुद्धिः प्राण
श्च क्रियाशक्त्या न प्राप्नोति। अन्यानींद्रियाणि। यथा अनलं स्वाः स्वांशभूताः अर्चिषो विस्फुलिंगादयः न
प्रकाशयंति। न दहंति च। तथा जडा अमी मनआदिस्वविषयीक्रियमाणस्यात्मप्रकाशस्य तद्वृत्तिप्रकाश
स्य न तत्प्रकाशविशयत्वं। प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो वि

रितितथा॥यतोवाचोनिवर्त्तन्तेअप्राप्यमनसासहेतिश्रुतेः॥ननुतंत्वौपनिषदंपुरुषंपृछामीतिश्रुतेः॥श्रुत्याश
ब्दगोचरत्वंप्रतीयते।तत्राह।शब्देपीति।शब्देपिआत्ममूलंआत्मनिप्रमाणं।ततश्चार्थोक्तिंअर्थाद्युक्तंयथा
भवति।तथाह।नसाक्षात्।कुतः।बोधकनिषेधतयास्वस्यैवबोधकनिषेधरूपत्वात्।यद्वाचानभ्युदितंये
नवागभ्युद्यतेतदेवब्रह्मत्वंविद्धियन्मनोनमनुतेनचक्षुषापश्यति।कश्चिन्नैनमितिश्रुतेः॥ननुतर्हिनै
वस्त्वादूकिमिदमुच्यते।अर्थोक्तिमात्रेतितत्राह।यतइति।यथातथादेशोनेतिनेति।अस्थूलमणुं।यतोवा
चोनिवर्त्तन्तेअप्राप्यमनसासहेति।यतश्चावधिभूतंब्रह्मऋतेविनासिद्धिर्नास्ति।सर्वस्यनिषेधस्यसावधित्वा प०टी०
त्।नदेवादहृस्वोनस्थूलोनकृशोनदीर्घोनखंनवायुर्नजलंनभूमिः।नाग्निर्नवाहंनमतिर्नचित्तंसच्चिद्घना २४
नंदमयश्चकोपि।नात्माशिशुर्नैवयुवानवृद्धोनचैषदेवासुरमानवोपि।नासन्नसन्नापिचगुणत्वबद्धःसमास

तिष्ठत्यसरोमरालः॥नपीतरक्तासितशुक्लवर्णोनिर्जातिवर्णाश्रमलिंगदेहः।नोष्णोनशीतोस्तिसमस्तरूपःस
त्पुरुषःसर्वमयोप्यसंगःइति।ननुतर्हिप्रमाणाविषयत्वात्नास्तिब्रह्मेतिप्रसज्यते।अतआह॥ब॥सत्वं
रजस्तमइतित्रिवृदेकमादौसूत्रंमहानहमितिप्रवदंतिजीवं।ज्ञानक्रियार्थफलरूपतयोरुशक्तिब्रह्मै
वभातिसदसच्चतयोःपरंयत्॥२७सतुस्थूलंकार्यं।असत्सूक्ष्मंकारणं।तत्सर्वंब्रह्मैवभाति।कुतः।य
त्।यस्मात्तयोःसदसतोःपरंकारणं।कार्यकारणभिन्नंनभवति।वाचारंभणमितिश्रुतेः।ननुकथ
मेकंबहुविधस्यकारणं।तत्राह।उरुशक्तिःअनेकशक्तिमत्।उरुर्महतीमायालक्षणःशक्तिर्यस्यत
दितिवा।बहुधात्मानमेवमेवदर्शयति।आदौऽपरेकंब्रह्मतदेवसत्वंरजस्तमइतित्रिवृत्प्रधानंप्रकृतिंव
दंति।ततःक्रियाशक्त्यासूत्रंज्ञानशक्त्यामहान्तिततदेवप्रवदंति।ततःअहंचअहमितिजीवोपाधिश्च

हंकारश्च प्रवदंति। ततश्च ज्ञानक्रियार्थफलरूपतया। ज्ञानशब्देन देवता क्रिया इंद्रियाणि। अर्थविषयाः त
फलं तत्प्रकाशः सुखादि। तद्रूपतया ब्रह्मैव साति। न हि सर्वरूपेण स्वतोऽस्य समानस्य ब्रह्मणः स्वसिद्धौ
प्रमाणापेक्षेति भावः। ननु सर्वात्मकं चेद्ब्रह्म तर्हि सर्वस्य कार्यस्य जन्मादिविकारवत्त्वात्। ब्रह्मणोपि त
त्प्रसंगः स्यात्। अत आह॥ ३॥ नात्मा जजान न मरिष्यति नैधतेसौ न क्षीयते सवनविद्व्यभिचारिणां हि। स
र्वत्र शश्वदनपाय्युपलब्धिमात्रं प्राणो यथेंद्रियबलेन विकल्पितं सत्॥ ३८॥ आत्मा ब्रह्म न जजान न जातः। ज
न्मासावादेव तदनंतरास्तित्वलक्षणो विकारो नास्ति। नैधते न वर्द्धते। इत्थं सावादेव देहाकारेण विपरिणामो प॰टी॰
निरस्तः कृतः। हि यस्मात् व्यभिचारिणां आगमापायिनां बालयुवादिदेहानां सवनवित्। तत्तत्कालद्रष्टा॥ २५
न ह्यवस्थावतां द्रष्टा तदवस्थो भवतीत्यर्थः। ननु निरवस्थः कोसावात्मा। अत आह। उपलब्धिमात्रमिति। नन्वा

यानंतर्हि क्षणिकत्वं। नेत्याह। सर्वत्रेति। सर्वत्र देशे शश्वत् सर्वदा। अनपायि अनुवर्त्तमानं। ननु नीलज्ञा
ने जातेपीतं ज्ञानं नष्टमिति। प्रतीतेर्न ज्ञानस्यानपायित्वं। अत आह। इंद्रियबलेनेति। एकमेव ज्ञानं इंद्रियब
लेन विविधं कल्पितं। नीलाद्याकाराः हि तस्य एव जायंते। नश्यंति च। न ज्ञानमिति भावः। व्यभिचारिषु अव्यभि
चारे दृष्टांतः। प्राणो यथा एकः दशधा प्रतीयते। दृष्टांतं विवृण्वन् इंद्रियालये न निर्विकारात्मोपलब्धिं दर्शयति
॥ ३॥ अंडेषु पेशिषु तरुष्वविनिश्चितेषु प्राणो हि जीवमुपधावति तत्र तत्र। सन्ने यदिंद्रियगणे हमि च प्रसु
प्ते कूटस्थ आशयमृते तदनुस्मृतिर्नः॥ ३९॥ अंडेषु अंडजेषु। पेशिषु जरायुजेषु। तरुषूद्भिज्जेषु। अविनिश्चितेषु स्वेदजेषु
उपधावति अनुवर्त्तते। एवं दृष्टांते न निर्विकारित्वं प्रदर्श्य दार्ष्टांतिकेपि दर्शयति। कथं। तदेव आत्मा सविका
र इव प्रतीयते। यदा जागरे इंद्रियगणः। यदा च स्वप्ने तत्संस्कारवान् अहंकारः। यदा सुषुप्तं तदा तस्मिन् प्रसु

श्रेंद्रियगणे मनसि लीने देहे अभिमाने अहंकारे च सन्ने द्रष्टुः निर्विकार एव आत्मा। कुतः। आशयभूते लिंगशरीरस्योप

धिं विना विकारहेतोरुपाधेरभावादित्यर्थः। न च अहंकारपर्यंतस्य सर्वस्य लये शून्यमेवावशिष्येत्। कुतः तदाह द्र

ष्टुरात्मा। अत्र आह। तद्द्रष्टुः स्मृतिलिंगः। तस्य विशेषणं नदृशनिस्पर्शनादिशून्यस्यापि सुखात्मनः सुषुप्तिसाक्षि

णः स्मृतिर्लिंगं स्मात्कं भवति। एतावंतं कालं सुखमहं स्वाप्सं न किंचिदवेदिषमिति। अतोऽननुभूतस्यास्मरणा

त् अस्त्येव सुषुप्तावात्मानुभावः। विषयसंबंधाभावात् न स्पष्ट इति भावः। तथा च श्रुतिः॥ यद्वै तन्न पश्यति प

श्यन्वै तद्द्रष्टव्यं न पश्यति। न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते विनाशित्वात् इति श्रुतेः। ननु यदि सुषुप्तौ शुद्धो द्र ए०टी०

ष्टात्मानुभवो भवेत्। कथं पुनरपि संसारः स्यात्। अविद्यातत्संस्काराणां विद्यमानत्वादिति चेत् कदा तर्हि त २६

न्निवर्तकोऽनुभवो भवेत्। अत आह॥ ७॥ यर्ह्यब्जनाभचरणैषणयोरुभक्त्या चेतोमलानि विधमेद्गुणकर्मजा

नि। तस्मिन् विशुद्ध उपलभ्यत आत्मतत्त्वं साक्षाद्यथामलदृशोः सवितृप्रकाशः॥ ४०॥ यर्हि यदा वित्तैषणादि

विहाय केवलमब्जनाभस्यैव चरणैषणाचरणसेवेच्छा तया या उरुभक्तिस्तया उमानु चेतसो मलानि विधमे।

त् नाशयेत्। चेत एव वा कर्तृ स्वगतानि मलानि तया भक्त्या क्षालयेत्। तदा तस्मिन् शुद्धे चेतसि स्वातिसाक्षा

द्यवधानेन आत्मतत्त्वमुपलभ्यते। अमलदृशोः सद्योः यथा पूर्वमेव सिद्धः सवितृप्रकाशः। इति भक्तेः

कर्मयोगाधीनत्वात् तत्पृच्छति॥ ७॥ ॥राजोवाच॥ ॥कर्मयोगं वदत नः पुरुषो येन संस्कृतः। विधूयेहा

शु कर्माणि नैष्कर्म्यं विंदते परं॥ ४१॥ नैष्कर्म्यं कर्मनिवृत्तिसाध्यं ज्ञानं। प्रश्नांतरमाह॥ ७॥ एवं प्रश्नमृषीन्पू

र्वमपृच्छं पितुरंतिके। नाब्रुवन्ब्रह्मणः पुत्रास्तत्र कारणमुच्यतां॥ ४२॥ पृष्टमप्यर्थं पितुः इक्ष्वाकोः ब्रह्मणः पु

त्राः सनकादयः सर्वज्ञा अपि नाब्रुवन् गहनत्वद्योतनाय प्रथमे द्वितीयप्रश्नस्योत्तरमाह॥ ७॥ आविर्होत्र उ॥

कर्माकर्मविकर्मेतिवेदवादोनलौकिकः।वेदस्यचेश्वरात्मत्वात्तत्रमुह्यंतिसूरयः॥४३॥कर्मविहितं।अकर्म
तद्विपरीतंनिषिद्धं।विकर्म।विगतंकर्मविहिताकरणं।एतत्त्रयंवेदवादः।वेदैकगम्यंनलौकिकतः।वेदस्यई
श्वरत्वात्ईश्वराद्उद्भूतत्वात्।अपौरुषेयत्वादित्यर्थः।पुंवाक्येहिवक्तुरभिप्रायतोर्थज्ञानंशक्यं।अपौरुषे
येतुकेवलं।वाक्यस्वपर्येणैवतात्पर्यावधारणंतच्चदुःकरमिति।तत्रकर्मादौविदुषोपिमुह्यंतिकिमुता
न्येअतःतवतत्राबालावान्नैवाक्रवन्निति।दुर्ज्ञेयंवेदतात्पर्यमाह॥ब॥परोक्षवादोवेदोयंबालानामनु
शासनं।कर्ममोक्षायकर्माणिविधत्तेह्यगदंयथा॥४४॥यत्रान्यथास्थितोर्थःसंगोपायित्वमन्यथाचोच्यते एटी०
सपरोक्षवादः।तथाचश्रुतिः।तंवाएतंचतुर्द्धंतंसंतं।चतुर्द्धेत्याचक्षतेपरोक्षेणपरोक्षप्रियाइवहिदेवा २७
इति।नापरोक्षवादत्वमेवाह।कर्ममोक्षायेति।नत्वस्वर्गाद्यर्थंकर्माणिविधत्तेनकर्ममोक्षार्थंतत्राह।बाला

नामनुशासनंयथाभवतितथा।अत्रदृष्टांतः।अगदं।औषधंयथापिताबालमौषधंपाययन्खंडलड्डुका
दिभिःप्रलोभयन्पाययति।ददातिचतानि।नैतावताअगदस्यपानस्यतल्लाभःप्रयोजनं।अपित्वारोग्यं।तथा
वेदोप्यवांतरफलैःप्रलोभयन्कर्ममोक्षायैवकर्माणिविधत्ते।ननुकर्ममोक्षश्चेत्पुरुषार्थःतर्हिप्रथम
मेवकर्मत्यज्यतां।न।तदकरणेप्रत्यवायोस्तीत्यतआह॥४५॥नाचरेद्यस्तुवेदोक्तंस्वयमज्ञोजितेंद्रियः।विक
र्मणाह्यधर्मेणमृत्योर्मृत्युमुपैतिसः॥अपअजितेंद्रियत्वात्अज्ञः।स्वयंनाचरेत्।तर्हिविकर्मणाकमना
चरणलक्षणेनाधर्मेण।मृत्योरनंतरमृत्युमेवप्राप्नोति।तथाचश्रुतिः।मृत्वापुनर्मृत्युमापद्यतेअद्यमानः
स्वकर्मभिरिति।तस्माद्वेदोक्तमेवकुर्वाणः।नतुनिषिद्धं।नतुकर्माणिक्रियमाणेतस्मिन्नासक्तिःतत्फ
लंचस्यात्।नत्वनैःकर्म्यरूपासिद्धिःअतआह॥४६॥वेदोक्तमेवकुर्वाणोनिःसंगोर्पितमीश्वरे।नैःकर्म्यां

लभतेसिद्धिंसेवनार्थफलस्त्विति॥४६॥ निःसंगः अनभिनिवेशवान्। ईश्वरेर्पितं नच फलोद्देशेन। नच फलस्यैव
तत्वात्। कर्मणि कृतं फलस्यादेव। नरोचनार्थमिति। कर्मणि रुच्युत्पादनार्थं अगदपाने खंडलड्डुकादिवत्। त
तश्च कर्मणि रुच्या वेदार्थं सम्यग्विचारयति। तदा चयो वा एतदक्षरमविदित्वा गार्ग्य अस्माल्लोकात्प्रैति स कृ
पणः इत्यनात्मज्ञस्य कृपणतां तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति। ब्रह्मचर्येण तपसा श्रद्धयाय
ज्ञेनानाशकेन चेति। यज्ञादीनां ज्ञानशेषतां चावधार्य निःकामेषु कर्मसु प्रवर्त्तते। ततश्च स्वर्गकामो यजेते
त्यादिभिः कामितश्चेत् स्वर्गादिः फलत्वेनावगमात्। अकामितोसौ स्वर्गो न भवतीति नैःकर्म्यसिद्धिरवभवती पत्री०
ति तावत्। वैदिकं कर्मयोगमुक्त्वा तांत्रिकमाह॥ प्रथमप्रश्नस्य परिहारं प्रपंचयति॥ ब॥ य आशु हृदयंग्रंथिं २८
निर्जिहीर्षुः परात्मनः। विधिनोपचरेद्देवं तंत्रोक्तेन च केशवं॥४७॥ परात्मनः परस्येवसतः आत्मनो जीवस्य हृद

यग्रंथिं अहंकारबंधं निर्जिहीर्षुः सन् तंत्रोक्तेन च विधिना प्रकारेण तं यजेत्। तत्र मागमः। चकाराद्वैदिकेन
सह। समुच्चयमाह। तमेव विधिमाह॥ ब॥ लब्ध्वानुग्रह आचार्यात्तेन संदर्शितागमः। महापुरुषमभ्यर्चे
न्मूर्त्याभिमतयात्मनः॥४८॥ तेनाचार्येण संदर्शितआगमः। अर्चाप्रकारो यस्य सः॥ ब॥ शुचिः सन्मुखमा
सीनः प्राणसंयमनादिभिः। पिंडं विशोध्य संन्यासकृतरक्षोर्चयेद्धरिं॥४९॥ मूर्तेः सन्मुखमासीनः। आदि
शब्देन भूतशुद्ध्यादिभिः पिंडं देहं विशोध्य सन्निर्न्यासैः कृतारक्षायेन सः॥ ब॥ अर्चादौ हृदये वापि यथाल
ब्धोपचारकैः। द्रव्यक्षित्यात्मलिंगानि निःपाद्य प्रोक्ष्य चासनं॥५०॥ आदावेव द्रव्याणि पुष्पादीनि। जंत्वादिशो
धनेन क्षितिसंमार्जनादिना आत्मानमव्यग्रतया। लिंगं मूर्तिं। अंबुलेपक्षालनादिना निःपाद्य योग्यानि कृ
त्वा॥ ब॥ पाद्यादीनुपकल्प्याथ संनिधाप्य समाहितः। हृदयादिकृतन्यासो मूलमंत्रेण चार्चयेत्॥५१॥ पाद्यादी

निपात्राण्युपकल्प्यसंनिधाप्य।हृदिस्थितंश्रीमूर्तौध्यात्वाहृदयादिभिःहृदयंशिरःशिखाकवचनेत्रास्त्रमंत्रैःमूल
मंत्रेणचदेवस्यतत्त्वासोमूलमंत्रेणार्चयेत्॥ब॥सांगोपांगांसपार्षदांतांतांमूर्तिंस्वमंत्रतः।पाद्यार्घ्याचमनीयै
र्वैःस्नानवासोविभूषणैः॥पर अंगानिहृदयादीनि।उपांगानिसुदर्शनादीनि।तत्सहितांसपार्षदांसपरिवारां॥
केरुपचारैरर्चेत।तदाह।पाद्यश्चाष्टेनमधुपर्कमाचमनंच॥ब॥गंधमाल्याक्षतस्रग्धूपदीपोपहारकैः।सांगं
संपूज्यविधिवत्स्तवैःस्तुत्वानमेद्धरिं॥पर अस्तुताखिलकारंकारे।नत्तुपूज्ञायां।नास्तकेरर्चयेद्धिस्मृंनकेतक्वा
मद्देश्वरं।इतिनिबध्नात्।उपहारैर्नैवेद्यं॥ब॥आत्मानंतन्मयंध्यायन्मूर्तिंसंपूजयेद्धरेः।शेषमादायशिरसा ए॰टी॰
स्वधाम्न्युद्वास्यसत्कृतं॥पर शेषांनिर्माल्यं।स्वधाम्निस्वस्थाने।देवंहृदि।मूर्तिंकरंडके।उद्वास्यस्थापयित्वा।इत्र २९
विधिंसमापयेदितिशेषः।तांत्रिकंकर्मयोगंउपसंहरतिएवमिति॥ब॥एवमग्न्यर्कतोयादावतिथौहृदयेचयः॥

यजतीश्वरमात्मानमचिरान्मुच्यतेहिसः॥५५॥ ॥इतिश्रीभागवतेमहापुराणेएकादशस्कंधेवसुदेवनार
दसंवादेतृतीयोऽध्यायः॥ ॥ब॥ ॥चतुर्थेत्ववतारेहाप्रश्नस्योत्तरमुक्तवान्।जयंतीनंदनोनाम्नाद्रुमिलोनव
सत्तमः॥१॥आत्मनःअवलिमतयामूर्त्याद्युपचयनेनात्मनः।प्रियमवतारंपूजयेदित्युक्तेअवतारज्ञानमपेक्षितं।त
थास्तवैःस्तुत्वानमेद्धरिमित्युक्तेगुणकर्मज्ञानंचापेक्षितं।अतःपृच्छतिराजा॥ब॥ ॥राजोवाच॥ ॥यानियानी
हकर्माणियैर्यैःस्वच्छंदजन्मभिः।चक्रेकरोतिकर्तावाहरिस्तानिब्रुवंतुनः॥१॥त्वयापृष्टानिकालत्रयसंबंधीनिसक
लावतारगुणकर्माणिकथयितुमशक्यानि।संक्षेपतस्तुकानिचित्कथयिष्यामीत्याह॥ब॥ ॥द्रुमिलउवाच॥
योवाअनंतस्यगुणाननंताननुक्रमिष्यन्सतुबालबुद्धिः।रजांसिभूमेर्गणयेत्कथंचित्कालेननैवाखिलश
क्तिधाम्नः॥२॥अनुक्रमयिष्यन्गणयितुमिच्छतियःसतुबालानामिवबुद्धिर्यस्यसमंदमतिः।कालेनमहता

कोऽपि महामतिस्तान्नामिगणयेदपि। अखिलशक्तिधाम्नः सर्वशक्त्याश्रयस्य भगवतो गुणाननेव गणयेत्। तथा च
श्रुतिः। विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसीत्यादि। तत्रादौ पुरुषावतारमाह॥३॥ भूतैर्य
दा पंचभिरात्मसृष्टैः पुरं विराजं विरचय्य तस्मिन् स्वांशेन विष्टः पुरुषाभिधानमवाप नारायण आदिदेवः॥
यदा आत्मसृष्टैर्भूतैः विराजं ब्रह्मांडं आत्मनः पुरं निर्माय तस्मिन् स्वांशेन जीवरूपेण यदा प्रविष्टो नारायणः
तदा पुरुषाभिधानं अवाप। लीलया प्रविष्टो न तु लोकत्वेन। प्रभूतगुणस्य जीवस्य तत्र लोकत्वात्। अस्य गु
णकर्माण्याह द्वयेन॥३॥ यत्काय एष भुवनत्रयसंनिवेशो यस्येंद्रियैस्तनुभृतामुभयेंद्रियाणि। ज्ञानं स्वतः एका०
श्वसनतो बलमोज ईहा सत्वादिभिः स्थितिलयोद्भव आदिकर्ता॥ यस्याधिष्ठेयः कायः एष काय इति सप्तमी ३०
वा। तनुभृतां समष्टिव्यष्टिजीवानां ज्ञानकर्मेंद्रियाणि। यस्य स्वतः स्वरूपभूतात् सत्वात् तनुभृतां ज्ञानं। यतः श्व

तः सिद्धं ज्ञानमिति वा। यस्य श्वसनतः प्राणात्। बलं देहशक्तिः। ओजः इंद्रियशक्तिः। ईहा क्रिया। यस्य सत्वादिभिः
विश्वं स्थितिलयोद्भवे आदिकर्त्ता। आदिकर्त्तेत्यनेन तत्पूर्वकं कर्त्रंतरमपि सूचितं। तद्दर्शयितुं गुणावतारद्वा
रा चराचरसृष्ट्यादिकर्तृत्वमाह॥३॥ आदावभूच्छतधृती रजसास्य सर्गे विष्णुः स्थितौ क्रतुपतिर्द्विजधर्मसेतुः।
रुद्रोऽप्ययाय तमसा पुरुषः स आद्य इत्युद्भवस्थितिलयाः सततं प्रजासु॥५॥ यस्येत्यनुषंगः। यस्य रजसा अं
शभूतः सर्गकार्ये शतधृतिर्ब्रह्मा अभूत्। स्थितौ च विष्णुः। यस्य सत्वेनेति शेषः। क्रतुपतिश्च फलदाता द्वि
जानां तद्धर्माणां च सेतुः पालकश्चेत्यर्थः। यस्य तमसो अप्ययाय रुद्रोऽभूत्। एतैर्ब्रह्मादिभिर्निमित्तभू
तैः प्रजासु उद्भवादयो यतो भवंति। स आद्यः पुरुष इत्यन्वयः। नरनारायणावतारमाह॥३॥ धर्मस्य दक्षदु
हितर्यजनिष्ट मूर्त्यां नारायणो नर इति प्रवरः प्रशांतः। नैःकर्म्यलक्षणमुवाच चचार कर्म योऽद्यापि चास्ते

षिवर्यनिषेविताङ्घ्रिः॥६॥ धर्मस्य भार्यायां दक्षदुहितरि मूर्त्तिसंज्ञायां नारायणो नर इति मूर्त्तिद्वयेन अजनि जातः।
तच्चरितमाह। केनैष्कर्म्यं आत्मस्वरूपं लक्ष्यते येन। तत्कर्म कर्मनिवृत्तिरूपं वा। नारदादिभ्य उवाच स्वयं चचार
वा। योऽद्यापि कमविरतमास्ते। ऋषिवर्यैः निषेविताङ्घ्रिर्यस्य सः। भगवदवतारत्वद्योतकं परमोपदेशमं दर्शयि
तुमितिहासमाह। दशभिः॥७॥ इन्द्रो विशंक्य मम धाम जिघृक्षतीति कामं न्ययुङ्क्त सगणं स बदर्युपाख्यं। गत्वा
प्सरोगणवसन्तसुमन्दवातैः स्त्रीप्रेक्षणेषुभिरविध्यदतन्महिज्ञः॥७॥ धाम स्थानं। तपसा स्वर्गादीन् जिघृक्षतीति विशं
क्य तपोनाशाय कामं सपरिवारं प्रेषयामास। स कामः बदरिकाश्रमं बदर्युपाख्याय तेयः तस्याश्रमं। अ एटी०
प्सरोगणादिभिः सह गत्वा स्त्रीणां प्रेक्षणान्येव इषवो बाणाः तैः अविध्यत् ताडितवान्। न तस्य महिमानं जानातीत्य ३१
तन्महिज्ञः॥८॥ विज्ञाय शक्रकृतमक्रममादिदेवः प्राह प्रहस्य गतविस्मय एजमानान्। मा भैष्ट विभो मदन

मारुतदेववध्वो गृह्णीत नो बलिमशून्यमिमं कुरुध्वं॥८॥ मा भैष्टेति पाठः। अक्रमं अपराधं। अहं धीर इति विस्मयो
गर्वः तद्रहितः। एजमानान् शापेन सिया कंपमानान्। भो विभो समर्थाः हे देववध्वः मा भैष्ट। बलिं आतिथ्यं। तान् प्रा
र्थयते। इममस्माकमाश्रमं यं आतिथ्यात् विना वेश्मस्यं प्रायं स्यादिति भावः॥९॥ ॥श्रीशुक उवाच॥ ॥इत्थं ब्रु
वत्यभयदे नरदेव देवाः सव्रीडनम्रशिरसः सघृणं तमूचुः। नैतद्विभो त्वयि परेऽविकृते विचित्रं स्वारामधीरनि
करानतपादपद्मे॥१०॥ हे नरदेव। अभयदे श्रीनारायणे इत्थं ब्रुवति सति देवाः कामादयः सव्रीडानि नम्राणि
शिरांसि येषां ते लज्जानरेणो वा वनतशिरस्का इत्यर्थः। सघृणं यथा भवति तथा कृपां जनयन्तो विशेषतः इ
त्यर्थः। कृपायुक्तमिति वा। मायातः परे अतो विकृते। स्वारामाः आत्मतृप्ता धीराश्च। तेषां निकरे राशौ नतं पादपद्मं य
स्य तस्मिन्। त्वयि एतत् तुष्ट्य क्रोधाभावकंपादि न चित्रं। अस्माकं च अपराधस्य वरणं स्वभावत्वान्न चित्रमित्यर्थः॥

।७॥ यांसेवतांसुरसताबहवोंतरायाः स्वौकोविलंघ्यपरमंब्रजतांत्वदंतो। नान्यस्यबर्हिषिबलीन्ददतांस्वलागा
न्यत्नेपदंत्वमविता यदिविघ्नहर्त्री॥१०॥ यांसेवतांसेवमानानां। सुरैरिंद्रादिभिः रुताअंतराया विघ्नाभवंति। कु
स्मादित्यत आह। स्वौक इति। स्वस्थानं स्वर्गमतिक्रम्यपरमंतवस्थानंब्रजतां। नान्यस्यत्वामसेवमानस्य। कुतः
बर्हिषियज्ञे स्वलागान् पुरोडाशादीन् बलीन् करान् ऋषिकरइवराज्ञे। इंद्रादिभ्यो ददतः। तर्हिकिंमद्भक्तोवि
घ्नैर्नभवति। नभगवत्सेवको वराकैंतरायैर्हतएव। तर्हिकिंमद्भक्तस्यैवेति। नेत्याह। धन्य इति। यदीतिनिश्चये। य
तः त्वंसुराधीश्वरान्अविता। रक्षकः। अतोसोविघ्नानांहर्त्रिपदमंक्षिधत्ते। कुतः। भुनक्ति यिविघ्नशंकेतिभावः एरी०
त्वदनन्यानांकेवलंतपश्चरतांहृयीगतिः। अस्माकंवशंयांतिक्रोधस्यवा। तत्रास्मद्दृशाः कामोपभोगमपि ३२
तावदभवंति। क्रोधवशाद्भुनरतिमंदाइत्याह॥७॥ उद्वृत्तिकालगुणमारुतजैध्वरोध्यानस्मानपार

जलधीनतितीर्यकेवित्रां क्रोधस्ययांतिविफलस्यवशंपदेगोर्मज्जंतिडस्वरतपश्चहथोत्सृजंति॥११॥ उद्वृत्ति
कालगुणाश्वशीतोष्णवर्षाणिमारुतश्चप्राणोबाह्योवा। जैर्ध्याजिह्वालोगाश्च एतानस्मात् अपारजलधि
रूपान् अतितीर्यविलंघ्य गोः पदेमज्जंति। कुतः। यतः क्रोधस्यविफलस्यवशंयांति। गच्छंति। किंवाजलेमज्जं
ता यथाविवशाः संतोमस्त्वकारोपितंसारंप्रथमंभुस्तृजंति। तथाहृथानमोऽध्ययनचलोगायशापादिनाउच्य
रंतपः त्वसृजंति। भोभगवान्सर्वसाधनसंपन्नाः अपिवसेवादीनाः संसारंनतरंतीतिभावः॥७॥ इतिप्रणतां
तेषांश्रियोअद्भुतदर्शिताः। दर्शयामासस्थश्रूषांस्वर्चिताः कुर्वतीविश्वं॥१२॥ श्रियः योगनिर्मिताः। श्रीः शुश्रू
षांकुर्वतीः। स्वर्चिताः सुष्टुअलंकृताः। तेषांलावण्यादिदर्पोपशमायदर्शयामास॥७॥ तेदेवाभुवराहस्थाः श्रि
यः श्रीरिवरूपिणी। गंधेनभुसुद्धसासांरूपोदार्यदतश्रियः॥१३॥ रूपिणीमूर्त्तिमती। श्रीरिवताः श्रीर्दृष्ट्वातासां

रूपसौंदर्येणाहृताः श्रीः कीर्तिर्येषां ते॥ ब॥ तानाह देवदेवेशः प्रणतान् प्रहसन्निव। आसामेकतरां वृद्धिं सवर्णां स्व
र्गभूषणां॥१४॥ वृध्वं वृणीध्वं। नन्वस्माकं वयं वराकाः क्व चेमाः रूपसौंदर्य इति चेत्तत्राह। सवर्णां समानरूपां। नैकाप्यस्म
दस्वरूपेति चेत्। मास्तु वा। तथापि स्वर्गभूषणारूपां॥ ब॥ ॐमित्यादेशमादाय नत्वा तं सुरबंदिनः। उर्वशीमप्सरःश्रे
ष्ठां पुरस्कृत्य दिवं ययुः॥१५॥ सुरबंदिनः देवदूत्यः॥ ब॥ इंद्रायानम्य सदसि शृण्वतां त्रिदिवौकसां। ऊचुर्नारायण
बलं शक्रस्तत्रास विस्मितः॥१६॥ इंद्राय इंद्रं प्रति। नारायणबलं ऊचुः। शक्रः तत्रास त्रासं प्राप्तः। विस्मितश्च। अत्र वि
स्मितत्रासे विता। अथानघ्यवताराननूतच्चरितानि चाह॥ ब॥ हंसस्वरूप्यवदच्युत आत्मयोगं दत्तः कुमार एटी०
ऋषभो भगवान् पिता नः। विष्णुः शिवाय जगतां कलयावतीर्णस्तेनाहृता मधुभिदा श्रुतयो हयास्ये॥१७॥ दत्तः ३२
दत्तात्रेयः। कुमारः सनकादिः। नः पिता ऋषभश्च। विष्णुरेव कलयावतीर्णः सन् आत्मयोगमवदत्। तेन विष्णु

नाहृयास्ये हयग्रीवावतारे। मधुभिदा सताः ततः श्रुतयः आहृताः॥ ब॥ गुप्तोऽप्यये मनुरिलौषधयश्च मात्स्ये क्रौ
डे हतो दितिज उद्धरतांभसः क्ष्मां। कौर्मे धृतोद्रिरमृतोन्मथने स्वपृष्ठे ग्राहात्प्रपन्नमिभराजममुंचदार्तं॥१८॥
इला पृथ्वी। अपि धयश्च गुप्ताः। क्रोडे वराहावतारे। ग्राहात् गजेंद्रं अमुंचत् मोचयामास। एवमादौ यत्रावतार
नामनास्ति। तत्र विष्णुः शिवाय जगतां कलयावतीर्ण इत्यनुवर्तनीयं॥ ब॥ संस्तुन्वतोब्धिपतितान् श्रमणानृ
षींश्च शक्रं च वृत्रवधतस्तमसि प्रविष्टं। देवस्त्रियोऽसुरगृहे पिहिता अनाथा जघ्नेऽसुरेंद्रमभयाय सतां नृसिं
हे॥१९॥ संस्तुन्वतः स्तुतिं कुर्वाणान् ऋषीन् वालिखिल्यान्। कश्यपार्थं समिदाहरणे गोःपदे निमग्नान्। इंद्रे
णोपहसितान्। उद्धृत्यापदो मोचयत्। तमसि ब्रह्महत्यायां प्रविष्टं मोचयामास। असुरगृहे पिहितान् निरु
द्धा या देवस्त्रियः ताश्चामुंचयत् अनेकावतारैः॥ ब॥ देवासुरे युधि च दैत्यपतीन् सुरार्थे हत्वांतरेषु भुवनान्यद

धकलाभिः॥ भूत्वाथ वामन इमामहरद्बलेः क्ष्मां याच्ञाछलेन समदाददितेः सुतेभ्यः॥२०॥ अनंतरे भुसर्वमथंतरे
भ्रुकलाभिः भूत्वा त्रिभिः भुवनानि अदधात्। अपालयत् इमां क्ष्मां समदात् ददौ॥ब॥ निःक्षत्रियामकृत गां च त्रि
सप्तकृत्वो रामस्तु हैहयकुलाप्ययभार्गवाग्निः॥ सोऽब्धिं बबंध दशवक्त्रमहन् सलंकं सीतापतिर्जयति लोकम
लघ्नकीर्तिः॥२१॥ हैहयानां कुलस्याप्ययाय भार्गवरूपोऽग्निः। स रामो दाशरथिः सन् सलंकायां स्थितं। स च ज
यति वर्त्तमानकालीनोवतार इत्यर्थः॥ भाविनं रामकृष्णावतारमाह॥ब॥ भूमेर्भरावतरणाय यदुष्वजन्मा
जातः करिष्यति सुरैरपि दुःकराणि। वादैर्विमोहयति यज्ञकृतोतदर्हान् शूद्रान् कलौ क्षितिभुजो न्यहनि ए०टी०
ष्यदंते॥२२॥ बुद्धावतारमाह॥ वादैरिति॥ब॥ अतदर्हान् यज्ञानर्हान् दैत्यान् विमोहयिष्यति। कल्क्यवतार ३४
माह॥ शूद्रानिति न्यहनिष्यत् निहनिष्यति॥ब॥ एवंविधानि कर्माणि जन्मानि च जगत्पतेः। भूरीणि भूरियशसो

सो वर्णितानि महाबाहो॥२३॥ ॥ ॥इति श्रीभागवते महापुराणे एकादशस्कंधे वसुदेवनारदसंवादे
चतुर्थोऽध्यायः॥ ॥ब॥ ॥पंचमे भक्तिहीनानां का वै निष्ठा युगे युगे। पूजाविधिरिति प्रश्नद्वयस्योत्तरमु
च्यते॥१॥ यां सेवतां सुरकृता बहवोंतराया इत्यनेन श्रीहरिभक्ताः विघ्नमूर्ध्नि पदं दत्वा परां गतिं यांति॥ अभक्ता
नां तु विघ्ना न भवंति। किंतु तद्धितेषां का गतिर्भवतीति पृच्छति॥ब॥ ॥राजोवाच॥ ॥भगवंतं हरिं प्रायो
न भजंत्यात्मवित्तमाः। तेषामशांतकामानां का निष्ठाविजितात्मनां॥२॥ हे आत्मवित्तमाः अविजितात्मनां
अतएव अशांतकामानां का निष्ठा किं प्राप्यं॥ स्वजनकस्य ऋषेर्भगवतो नारदात् तु पुरुषो देहेन दुर्गतिं याती
ति वक्तुं भगवतः सकाशात् वर्णाश्रमाणामुत्पत्तिमाह॥ब॥ ॥चमस उवाच॥ ॥मुखबाहूरुपादेभ्यः पु
रुषस्याश्रमैः सह। चत्वारो जज्ञिरे वर्णा गुणैर्विप्रादयः पृथक्॥३॥ गुणैः सत्वेन विप्राः सत्वरजोभ्यां क्षत्रि

यः। रजस्तमोभ्यां वैश्याः। तमसा शूद्र इति॥ ३॥ य एषां पुरुषं साक्षादात्मप्रभवमीश्वरं। न भजंत्यवजानंति स्थाना
द्भ्रष्टाः पतंत्यधः॥ ३ एतेषां मध्ये ये अज्ञत्वात्स्वप्रभवं पितरं श्रीहरिं येन भजंति। ये च ज्ञात्वाप्यवजानंति। ते स्थाना
त् वर्णाश्रमात्। तदभजने कृतघ्नतामध्याद्धा ईश्वरमिति। तत्र ये अज्ञाः ते भवद्विधानामनुग्राह्या इत्याह॥ ३॥
दूरे हरिकथाः केचिद्दूरे वाच्युतकीर्तनाः॥ स्त्रियः शूद्रादयश्चैव तेनुकंप्या भवादृशां॥ ४ दूरे हरिकथा तत्र
वर्णां यषां ते। अत एव दूरे अच्युतकीर्तनं येषां ते। ज्ञानकालोवड विदग्धाः॥ अविकित्स्यत्वात् उपेक्षा इत्याशये
नाह॥ ३॥ विप्रो राजन्यवैश्यो वा हरेः प्राप्ताः पदांतिकं। श्रौतेन जन्मना वापि मुह्यंत्याम्नायवादिनः॥ ५ श्रौतेनजउप एटी० ३५
नयनाख्येन। उपलक्षणमेतत्। अध्ययनादिनापि हरेः पदांतिकं तद्भजनोत्तमाधिकारं प्राप्ता अपि मुह्यंति। क
र्मफलेषु सज्जंते। कुतः। आम्नायेषु वादाः अर्थवादाः ते मोद कर्माणि विद्यंते येषां। तदुक्तं गीतासु। यामिमां पुष्पितां

वाचं प्रवदंत्यविपश्चितः। वेदवादरताः पार्थ नान्यदस्तीति वादिनः॥ इत्यादिना। भक्तिमार्गदाढ्यायि तेषां मोदं प्र
पंचयति सार्द्धनिंदति॥ ३॥ कर्मण्यकोविदाः स्तब्धा मूर्खाः पंडितमानिनः। वदंति चाटुकान्मूढा यया माध्व्या गि
रोत्सुकाः॥ ६ अकोविदाः यथा कर्म प्रतिबंधकं न भवति। तथा कर्तुमज्ञाः॥ अशक्ताः न चाभिज्ञान् पृच्छंति। यत
स्तब्धाः अनम्राः। स्तब्धत्वे हेतुः॥ यतो मूर्खा अपि पंडितमानिनः पंडिता वयमिति मानवंतः। तथा च श्रुतिः। अ
पाम सोमममृता अभूम। अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति। यत्र न चोष्णं न शीतं स्यान्न
ग्लानिर्न चाप्यरातय इत्यादिकया मध्व्या गिरा प्रसक्ताः संतो मूढाः चाटुकान् वदंति। अप्सरोभिः सह विह
रिष्यामः। इत्यादि प्रियवाक्यानि वदंति। किंच। तेषां कर्मासक्तिनिवेशात् कामक्रोधदंभादयो वर्द्धंत इति श्राद
त्रयेण॥ ३॥ रजसा घोरसंकल्पाः कामुका अहिमन्यवः। दांभिका मानिनः पापा विहसंत्यच्युतप्रियान्॥ ७ घो

रत्नलिप्सारादिः संकल्पो येषां ते। अद्विवन्मन्यर्येषां ते। कामुकत्वं प्रपंचयति॥ब॥वदंति तेऽन्योन्यमुपासितस्त्रियो
गृहेषु मैथुन्यपरेषु चाशिषः। यजंत्यसृष्टान्नविधानदक्षिणं वृत्त्यै परं घ्नंति पशूनतद्विदः॥७॥उपासिताः स्त्रियो यैः
नत्तद्दहाः ते मैथुन्यपरेषु मिथुनविषयमेव परं तत्त्वं येषु गृहेषु आशिषो वदंति। इदमद्य मया लब्धमिमं प्राप्स्ये
मनोरथं। इदमस्तीदमपि मे भविष्यति पुनर्धनं इत्याकाराः। दांभिकतां प्रपंचयति। यजंतीति। असृष्टान्नविधानद
क्षिणं। न सृष्टान्नसंपातो अन्नविधानं दक्षिणा यथा भवति तथा यजंति। तदा च वृत्त्यै आजीविकार्थं परं केवलं पशून्
घ्नंति। अतद्विदः हिंस्राः तेषां दोषानभिज्ञाः। मानितां प्रपंचयति॥ब॥श्रिया विभूत्याऽभिजनेन विद्यया त्यागेन रूपे एटी०
ण बलेन कर्मणा। जातस्मयेनांधधियः सहेश्वरान् सतोऽवमन्यंति हरिप्रियान् खलाः॥९॥श्रिया धनादिसंपदा॥ ३६
विभूत्या ऐश्वर्येण। श्रिया इति। जातो यः स्मयो गर्वः तेनांधा धीर्येषां ते ईश्वरसहितान् सतः सत्पुरुषान् अवमन्यंते।

किंच। एवं वर्तमाना अपि वेदतात्पर्यं तत्त्वार्थं स्फुटमपि न जानंतीत्याह॥ब॥सर्वेषु शश्वत्तनुभृत्स्ववस्थितं यथा खमात्मा
नमभीष्टमीश्वरं। वेदोपगीतं च न शृण्वतेऽबुधा मनोरथानां प्रवदंति वार्त्तया॥१०॥केन रूपेणावस्थितं। तदाह। आ
त्मानं ईश्वरं। आत्मतया ईश्वरतया चावस्थितमेवमप्यसंगतामाह। यथा खं पुरुषार्थमाह। अभीष्टं स्फुटं चमाह
वेदोपगीतं चेति। तच्छृण्वतः यतो मनोरथानां व्यवायामिषमद्यसेवाविषयाणां वार्त्तया प्रवदंति। ननु व्यवायादीना
मपि श्रुतौ सायस्त्रिपेयानुक्तशेषसत्रयेदिष्ट्यादिना विहितत्वात् किमेवं निंद्यते। अत आह॥ब॥लोके व्यवा
यामिषमद्यसेवा नित्या हि जंतोर्न हि तत्र चोदना। व्यवस्थितिस्तेषु विवाहयज्ञसुराग्रहैरासु निवृत्तिरिष्टा॥११॥
व्यवायः स्त्रीसंगः। नित्या रागत एव नित्यप्राप्ताः। जंतोः प्राणिमात्रस्य। अतः तत्र तासु चोदनाविधिर्नास्ति। नन्वस
तासु पेयादिविधिर्दर्शितः। सत्यं। नायमपूर्वो विधिः। रागतः प्राप्तत्वात्। किंतु। नियमविधिरूपेण रागिणामप्य

नुष्ठानमात्रं क्रियते। तदाह। व्यवस्थितिरिति। तेषु व्यवायादिष्वाकेः विवादयज्ञसुराग्रहैः। विवाहविषय एव व्यवायः का
र्यः। नान्यत्र। यज्ञ एव मामिषासवा। सौत्रामण्यां सुराग्रहं गृह्णामीति तिष्ठते। तत्र मद्यसेवेति नियमः क्रियते। नन्व
त्र नियमविधिरपि नित्यप्राप्तत्वात्। अतो निवृत्तिः परिसंख्यैव। आसु व्यवायामिषमद्यसेवासु विधिरिष्टः। कथं तर्हि
व्यवास्थितिरित्युक्तं। उच्यते। न तावत्परिसंख्याविधिना निवृत्तिरुच्यते। तथा सति स्वार्थत्यागः परार्थकल्पना। प्राप्त
बाधश्चेति दोषत्रयं स्यात्। अतः क्वचित् प्राप्स्यतोऽप्यर्थस्य प्रापणमनर्थकमित्यपूर्वविधिद्वारान्यनिवृत्तिः फलतो
भवति। तद्यथा। इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्त इत्यत्र। रशनालिंगतो गर्दभाश्वाभिधानीमादत्त एटी०
इत्यत्र रशनालिंगतो गर्दभस्याश्वाभिधानीरशनाद्वये प्राप्तो मंत्रस्यापूर्वविधिद्वारा परिसंख्यायते। यथोक्तं तंत्रवा २१
र्तिके। अप्राप्तविधिरेवायमतो मंत्रस्य निश्चितः। परिसंख्याफलेनोक्तो न विशेषः। ऽनुष्ठितिरिति। क्वचित्तु रागतो

नित्यप्राप्तांशाऽहरणलक्षणस्य नियमफलस्याप्यलाभावात् नियमविधिद्वारा फलतः परिसंख्या भवति। यथा पंच
पंचनखा भक्ष्या इति। तथात्र रागतो नित्यप्राप्तस्य व्यवायादेः विवाहादिनियमो नान्यत्रेच्छाद्वारा परिसंख्यैवेति।
नन्वयं यद्यप्यनुष्ठानमात्रमेतद्भवेत्। तर्हि स्ववशानां तत्तयोत्तार्थे संनिधौ नोपगच्छति। घोरायां भ्रूणहत्यायां पच्य
ते नात्र संशयः। इत्यादिदोषश्रवणं न स्यात्। नैष दोषः। मनसि कामे सत्यपि तस्यामरुच्या द्वेषादिना वा तामन
पगच्छतो दोषश्रवणोपपत्तिरिति सर्वमनवद्यं। तदेवं व्यवायादि मनोरथाकुलितत्वात् असंश्लिष्टमात्मानं नष्ट
एवेत्युक्तं। इदानीं धनस्यापि धर्मद्वारा परमात्मप्रापकस्य दृष्टोपभोगार्थविनियोगान्नात्मज्ञानगंधोऽपीत्याह।
॥ ७॥ धनं च धर्मैकफलं यतो वै ज्ञानं सविज्ञानमनुप्रशांति। गृहेषु युंजंति कलेवरस्य मृत्युं न पश्यंति दुरं
तवीर्यं॥ २१॥ धर्मैकफलं यस्य तत्। तदुक्तं। यतो धर्मात् सविज्ञानं अपरोक्षज्ञानसहितं दृढं परोक्षज्ञानं सव

ति। कथंभूतं। अत्र शांतिः अत्र अनंतरमेव प्रत्यक्षा शांतिर्निर्वाणलक्षणा यस्य तत्। एवंभूतं धनं गृहेषु देहाद्यर्थं
युंजंति। किंच। धनवत्तया यापि व्यवायाद्यस्य तु स्नानं न यथेष्टं। अपि चान्यथैवेत्याह। यदिति॥ ब॥ यद्घ्राणभक्षो विहि
तः सुरायाः तथा पशोरालभनं न हिंसा। एवं व्यवायः प्रजया न रत्या इमं विशुद्धं न विदुः स्वधर्मं॥१३ यस्मात् सुरायाः घ्रा
णः पशोः अवघ्राणमेव विहितं न पानं। तथा पशोरप्यालंभनमेव विहितं न हिंसा। अयमर्थः। तत्तद्देवतोद्देशेन तत्र
स्थानीय मांसकल्पनं नामालभनं। वायव्यं श्वेतमालभेतेत्यादिश्रुतिः। अत्र चालभनमेव विहितं न तु हिंसा। अ
तो न यथेष्टभक्षणं स्यादुक्तेत्यर्थः। व्यवायोपि प्रजयानिमित्तभूतया न तु रत्यै। अतो मनोरथवादिनः इमं विशुद्धं स्व एका०
धर्मं न विदुरिति। एवं भगवत्पराङ्मुखानां बहुदोषतां प्रपंच्य तन्निष्ठां प्रपंचयति। ये त्विति पंचभिः॥ ब॥ ये त्वनेवं ३८
विदोऽसंतः स्तब्धाः सदभिमानिनः। पशून् द्रुह्यंति विस्रब्धाः प्रेत्य खादंति ते च तान्॥१४ अनेवंविदः न एवं धर्मं विदंति

ये ते। विस्रब्धाः निःशंकाः। अनेन मनोरथो न विघ्नतीति विश्वस्ताः। तदानींतनपोषणेन वा तैः पशुभिर्विश्वस्तास्ते च प
शवः। प्रेत्य च तत्र तान् खादंति। मां स भक्षयिता अमुत्र यस्य मांसमिहाम्यहं। एतन्मांसस्य मांसत्वं प्रवदंति मनीषिणः
इति वचनात्॥ ब॥ द्विषंतः परकायेषु स्वात्मानं हरिमीश्वरं। मृतके सानुबंधेऽस्मिन् बद्धस्नेहाः पतंत्यधः॥१५
अभिचारादिना द्विषंतः मृतके देहे सानुबंधे पुत्रादिसहिते। अज्ञाः स्वचं स्नेहरज्जुकंपिताः पतंति। तत्त्वज्ञास्तु स्वत
रंति। ये तु नाद्यं तमस्ताः न च तत्त्वज्ञास्ते अंतरालवर्तिनः। पतंतीत्याह। य इति॥ ब॥ ये कैवल्यमसंप्राप्ता ये चा
तीताश्च मूढतां। त्रैवर्गिका ह्यक्षणिका आत्मानं घातयंति ते॥१६ कैवल्यं तत्त्वज्ञानं असंप्राप्ताः। अत्र हेतुः। त्रिव
र्गप्रधानाः अक्षणिकाः। उपशांतिक्षणरहिताः। देहादौ स्नेहैर्बद्धो वा तिष्ठय मेवात्मानं घातयंतीति। घातयंति
तदाह। एत इति॥ ब॥ एत आत्महनोऽशांता अज्ञाने ज्ञानमानिनः। सीदंत्यकृतकृत्या वै कालध्वस्तमनोरथाः॥१७

आत्महनः आत्मापकारकर्तारः। अज्ञानेकर्माणि। तथा च श्रुतिः। असुर्या नाम ते लोका अंधेन तमसावृताः। तांस्ते
प्रेत्याभिगच्छंति ये के चात्महनो जनाः॥ ब॥ हित्वेत्यात्ममायारचिता गृहापत्यसुहृत्स्त्रियः। तमो विशंत्यनिच्छंतो वासु
देवपराङ्मुखाः॥१८ या गृहापत्यसुहृत्स्त्रियस्ता हित्वा। तदेवं हरिभक्तिः कर्तव्येति स्थिते तत्र विशेषं पृच्छति। क
स्मिन्काल इति॥ ब॥ ॥राजोवाच॥ ॥कस्मिन्काले स भगवान्किंवर्णः कीदृशो नृभिः। नाम्ना वा केन विधिना
पूज्यते तदिहोच्यतां॥१९ किंवर्णः कीदृग्वर्णवान्। कीदृशः कीदृगाकारः केश वा नाम्ना। केन विधिना॥ ब॥ ॥
॥करभाजन उवाच॥ ॥कृतं त्रेता द्वापरं च कलिरित्येषु केशवः। नानावर्णाभिधाकारो नानेव विधिनेज्यते एटी०
॥२० एषु कृतादिषु कालेषु नानाप्रकारा वर्णाभिधा नामानि आकारा यस्य सः। नानेव विधिना। विधिना मार्गेण ३९
तदेव वर्णादिचतुष्टयमाह। कृत इत्यादिना॥ ब॥ कृते शुक्लश्चतुर्बाहुर्जटिलो वल्कलांबरः। कृष्णाजिनोप

वीताक्षं बिभ्रद्दंडकमंडलुं॥२१ कृष्णाजिनादीन्बिभ्रदिति ब्रह्मचारिवेषो दर्शितः॥ ब॥ मनुष्यास्तु तदा शांता नि
र्वैराः सुहृदः समाः। यजंति तपसा देवं शमेन च दमेन च॥२२ तपसा ध्यानलक्षणेन॥ ब॥ हंसः सुपर्णो वैकुंठो ध
र्मो योगेश्वरोऽमलः। ईश्वरः पुरुषोऽव्यक्तः परमात्मेति गीयते॥२३ त्रेतायां रक्तवर्णोसौ चतुर्बाहुस्त्रिमेखलः। हिर
ण्यकेशस्त्रय्यात्मा स्रुक्स्रुवाद्युपलक्षणः॥२४ त्रिगुणा दीक्षांगभूता मेखला यस्य सः। यज्ञमूर्तिरित्यर्थः। हिरण्य
केशः पिंगकेशः॥ ब॥ तं तथा मनुजा देवं सर्वदेवमयं हरिं। यजंति विद्यया त्रय्या धर्मिष्ठा ब्रह्मवादिनः॥२५ त्रय्या वि
द्यया वेदोक्तकर्मभिः॥ ब॥ विष्णुर्यज्ञः पृश्निगर्भः सर्वदेव उरुक्रमः। वृषाकपिर्जयंतश्च उरुगाय इतीर्यते॥२६
पृश्निगर्भः तस्याः पृश्नेः पुत्रः। वृषाकपिः श्रुतः स्मृतः सन् वर्षति कामान् आकंपयति क्लेशान् इति वृषाकपिः
जयत्येव सर्वदा जयंतः॥ ब॥ द्वापरे भगवान्श्यामः पीतवासा निजायुधः। श्रीवत्सादिभिरंकैश्च लक्षणैरुपल

क्षितः ॥ २७ ॥ श्यामः अतसीपुष्पसंकाशः। निजानि चक्रादीन्यायुधानि यस्य सः। श्रीवत्सो नाम दक्षिणस्तनाग्रे रोम्णां
दक्षिणावर्तः स आदिर्येषां करचरणादिगतपद्मादीनां तैः अंकैः। आंगिकैश्चिह्नैः। लक्षणैः बाह्यैः कौस्तुभादिभिः
॥ब॥ तं तदा पुरुषं मर्त्या महाराजोपलक्षणं। यजंति वेदतंत्राभ्यां परं जिज्ञासवो नृप ॥ २८ ॥ महाराजोपलक्ष
णं छत्रचामरादिचिह्नं। वेदतंत्राभ्यां। वैदिकेनागमिकेन च मार्गेण यजंतीत्यन्वयेति। परं ईश्वरं ज्ञातुमिच्छवः।
नामान्याह नम इति ॥ब॥ नमस्ते वासुदेवाय नमः संकर्षणाय च। प्रद्युम्नायानिरुद्धाय तुभ्यं भगवते नमः ॥
२९ नारायणाय ऋषये पुरुषाय महात्मने। विश्वेश्वराय विश्वाय सर्वभूतात्मने नमः ॥ ३० इति द्वापर उर्वीश ए०टी०
स्तुवंति जगदीश्वरं। नानातंत्रविधानेन कलावपि तथा शृणु ॥ ३१ नानातंत्रविधानेनेति। कलौ तंत्रमार्गस्य प्रा ५०
धान्यं दर्शयति ॥ब॥ कृष्णवर्णं त्विषाकृष्णं सांगोपांगास्त्रपार्षदं। यज्ञैः संकीर्तनप्रायैर्यजंति हि सुमेधसः ॥ ३२ ॥

कृष्णतां या वर्त्तयति। त्विषां कांत्या अकृष्णं। इंद्रनीलमणिवदुज्ज्वलं। यद्वा त्विषा कृष्णं कृष्णावतारं। अनेन क
लौ कृष्णावतारस्य प्राधान्यं दर्शयति। अंगानि हृदयादीनि। उपांगानि कौस्तुभादीनि। पार्षदाः सुनंदादयः। तत्स
हितं। यज्ञैः अर्चनैः संकीर्त्तनं नामोच्चारणं स्तुतिश्च। तत्प्रधानैः सुमेधसो विवेकिनः। स्तुतिमाह। ध्येयमिति ॥ब॥
ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिंचिनुतं शरण्यं। भृत्यार्तिहं प्रणतपाल भवाब्धिपोतं वं
दे महापुरुष ते चरणारविंदं ॥ ३३ हे प्रणतपाल हे महापुरुष ते चरणारविंदं वंदे। कथंभूतं। ध्येयं। ध्यानयो
ग्यं। सदेति सर्वत्र संबध्यते। ध्येयत्वे हेतुः। परिभवघ्नं। इंद्रियकुटुंबादिभिर्यः परिभवस्तिरस्कारः तं हंतीति तथा।
किंच अभीष्टदोहं। मनोरथपूरकं। किंच। तीर्थास्पदं। गंगाद्याश्रयत्वेन परमपावनं। शिवविरिंचिनुतं वान्यो
तैः स्तुतं। महत्तमं। ननु तोष्टताथैः किमर्थं तान्यानुतं। तत्राह। शरण्यं। आश्रययोग्यं सुखात्मकमित्यर्थः। त

हिब्रह्मादिभिस्त्वयंभ्रान्तस्य कथं गोचरः स्यात्। स्वयासिद्धिं। यस्य कस्यापि स्वल्पमात्रस्यार्त्तिंहंति। न केवलमा
गंतु कार्त्तिमात्रं हंति किंतु भवाब्धिपोतं। संसारार्णवतारकं च। इदानीं च स्वयं आप्तकामत्वात् नैरपेक्ष्यं। स
त्कार्थं च सापेक्षतां च दर्शयन् श्रीरामावतारं स्तौति। त्यक्तेति॥ ब॥ त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं
धर्मिष्ठ आर्यवचसा यदगादरण्यं। मायामृगं दयितयेप्सितमन्वधावद्वंदे महापुरुष ते चरणारविंदं॥ ३४ अर्थः
सुदुस्त्यजायाः सुरैः ईप्सितायाः राज्यलक्ष्मीं त्यक्त्वा इति नैरपेक्ष्यता। यदिति यच्छब्दार्थः। यः अरण्यमगात्। किंश
त्यवैकल्यदर्शनेन। धर्मिष्ठः। कुतः। आर्यस्य गुरोर्दशरथस्य वचसा॥ किंच। एवं राज्यं त्यक्त्वापि। सक्तवान्स्येत्येन एटी०
दयितया। सीतया ईप्सितं मायामृगं स्वर्णकारं योन्वधावत्। तस्य चारविंदं वंदे। यद्वा। हे धर्मिष्ठेति संबोधनं। तथा ४२
च विवक्षितत्वादार्यपदेन संधिर्न भवति। तथा यदगादिति चरणारविंदमेवोच्यते। यच्च मायामृगमन्वधावत्।

तन्नैव चारविंदं वंदे। इत्यन्वयो वा। अन्यत्समानं॥ ब॥ एवं युगानुरूपाभ्यां भगवान्युगवर्तिभिः। मनुजैरिज्यते राज
न्श्रेयसामीश्वरो हरिः॥ ३५ युगानुरूपाभ्यां नामरूपाभ्यां। एतेषु च चतुर्युगेषु कलिरेव श्रेष्ठ इत्याह। कलिमिति।
॥ ब॥ कलिं सभाजयंत्यार्या गुणज्ञाः सारभागिनः। यत्र संकीर्तनेनैव सर्वः स्वार्थोऽभिलभ्यते॥ ३६ गुणज्ञाः कले
र्गुणान् जानंति ये। ननु दोषाणां बहुत्वात् कथं सभाजयंति। तत्राह। सारभागिनः। गुणांशग्राहिणः। ननु कोसौ
गुणस्तमाह। यत्रेति। तदुक्तं। ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन्। यदाप्नोति तदाप्नोति कलौ संकीर्त्य
केशवमिति॥ ब॥ न ह्यतः परमो लाभो देहिनां भ्राम्यतामिह। यतो विंदेत परमां शांतिं नश्यति संसृतिः॥ ३७
तस्मात्कलौ संकीर्तनात्परमो लाभो नास्ति। यतः संकीर्तनात्। किंच। कृतादिष्विति॥ ब॥ कृतादिषु प्रजा राज
न्कलाविच्छंति संभवं। कलौ खलु भविष्यंति नारायणपरायणाः॥ ३८ क्वचित्क्वचिन्महाराज द्रविडेषु च भू

रिद्राः। ताम्रपर्णी नदी यत्र कृतमाला पयस्विनी॥ ३९ कावेरी च महापुण्या प्रतीची च महानदी। ये पिबंति जलं ता
नां मनुजा मनुजेश्वर। प्रायो भक्ता भगवति वासुदेवेऽमलाशयाः॥ ४० अमलाः संतः प्रायशो भगवति भक्ता भवं
ति। भक्तस्य विधिनिषेधनिवृत्तेः कृतकृत्यतामाह। देवर्षीति॥ श्लो॥ देवर्षिभूताप्तनृणां पितॄणां न किंकरो नायमृणी
च राजन्। सर्वात्मना यः शरणं शरण्यं गतो मुकुंदं परिहृत्य कर्तुं॥ ४१ आप्ताः पोष्याः कुटुंबिनः। इतरे देवादयः पंच
यज्ञदेवताः एतेषां यथा अभक्तः ऋणी। अत एव तेषां किंकरः। तदर्थं नित्यं पंचयज्ञादि कथ्यते तथा च स्मृतिः। ही
नजातिं परिक्षीणमृणार्थं कर्म कारयेदिति। अयं तु न तथा। कोसौ यः सर्वभावेन श्रीमुकुंदं शरणं गतः। कर्तं कृ एटी०
त्यं परिहृत्य यद्वा। कर्तं भेदं परिहृत्य। स तर्हि भेदनेन यस्मात् वासुदेवः सर्वमिति बुद्धिरित्यर्थः। विहितकर्मनिवृत्ति ४२
मुक्त्वा निषेधनिमित्त प्रायश्चित्तनिवृत्तिमाह। स्वपादमूलमिति॥ श्लो॥ स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य

हरिः परेशः॥ विकर्म यच्चोत्पतितं कथंचित् धुनोति सर्वं हृदि संनिविष्टः॥ ४२ अन्यस्मिन् देहादौ देवतांतरे वा त्यक्तो
भावो येन। अत एव तस्य विकर्मणि प्रवृत्तिर्न संभवति। यच्च कथंचित् प्रमादादिना उत्पतितं भवेत्। तदपि तत्रा
हृद्धरिर्धुनोति। ननु अयमस्मान्न मन्यते तत्राह परेशः। ननु च श्रुतिस्मृती ममैवाज्ञे इति भगवद्वचनात् स्वाज्ञा
भंगं कथं सहेत तत्राह। प्रियस्य। ननु तायं पापक्षयार्थं भजते तत्राह॥ हृदि संनिविष्टः। न हि वस्तुशक्तिरर्थि
तामपेक्षते इत्यर्थः॥ श्लो॥ ॥श्रीनारद उवाच॥ ॥धर्मान् भागवतानित्थं श्रुत्वाथ मिथिलेश्वरः। जायंतेयान्
मुनीन् प्रीतः सोपाध्यायो ह्यपूजयत्॥ ४२ जायंतेयान् जायंत्याः पुत्रान्। कविप्रमुखान्॥ श्लो॥ ततोंतर्दधिरे
सिद्धाः सर्वलोकस्य पश्यतः। राजा धर्मानुपातिष्ठन्नवाप परमां गतिं॥ ४३ उपातिष्ठन् अनुतिष्ठन्॥ श्लो॥ त्व
मप्येतान् महाभाग धर्मान् भागवतांश्रुतान्। आस्थितः श्रद्धया युक्तो निःसंगो यास्यसे परं॥ ४४॥ शास्त्रप्रक्रिये

यस्मात्कृष्णःसुतोवांअतएवकृतार्थावित्याह।युवयोरिति॥ब॥युवयोःखलुदंपत्योर्यशसापूरितंजगत्।पुत्रतामग
मद्यद्वांभगवानीश्वरोहरिः॥४५॥वांयुवयोःनतुसर्वकर्मार्पणादिभागवतधर्मैःअन्येषामिवयुवयोःसत्त्वशु
द्धिरापादनीया।पुत्रोपलालनेनैवभागवतधर्मनिष्पत्तेरित्याह॥दर्शनेति॥ब॥दर्शनालिंगनालापैःशयना
सनभोजनैः।आत्मावांपावितःकृष्णेपुत्रस्नेहंप्रकुर्वतोः॥४६॥कृष्णेपुत्रइतिस्नेहंप्रकुर्वतोर्वांतस्यदर्शना
दिभिः।आत्मापावितः।शोधितः।एतदेवकैमुत्यन्यायेनस्फुटयति।वैरेणेति॥ब॥वैरेणयंनृपतयःशिशुपा
लपौंड्रशाल्वादयोगतिविलासविलोकनाद्यैः।ध्यायंतआकृतधियःशयनासनादौतत्साम्यमापुरनुरक्तधि एटी०
यांपुनःकिं॥४७॥शयनादौवैरेणापिध्यायंतःतस्यगतिविलासाद्यैःआकृतधियःतत्तदाकाराधीर्येषां ४२
तेतत्साम्यमापुः।किंपुनर्वक्तव्यमनुरक्तधियांतत्साम्यंभवतीति।नन्वत्रस्नेहश्चेन्मोहहेतुःतदपिसर्वेषुचे

दंस्यात्त्राह।मापत्यबुद्धिरिति॥ब॥मापत्यबुद्धिमकृथाःकृष्णेसर्वात्मनीश्वरे।मायामनुष्यभावेनगूढैश्वर्येपरेऽव्य
ये॥४८॥अपत्यमितिबुद्धिंमाकृथाः।अडागमःश्छांदसः।ननुकथमीश्वरोमानुषःस्यात्।कथंवातस्यविश्वसृ
ष्ट्यादिकर्तुःपूतनाशोषणादिकर्मआश्चर्यवन्निरूप्यतेतत्राह।भूभारेति॥ब॥भूभारासुरराजन्यहंतवेगु
प्तयेसतां।अवतीर्णस्यनिर्वृत्यैयशोलोकेवितन्यते॥४९॥भूभाररूपाअसुराएवयेराजन्यास्तेषांहंतवेतान्
हंतुमित्यर्थः।सतांनिर्वृत्यैमोक्षाय॥ब॥ ॥श्रीशुकउवाच॥ ॥एतच्छ्रुत्वामहाभागोवसुदेवोऽतिविस्मितः
देवकीचमहाभागाजहतुर्मोहमात्मनः॥५०॥इतिहासमिमंपुण्यंधारयेद्यःसमाहितः।सविधूयेहशमलं
ब्रह्मभूयायकल्पते॥५१॥इहास्मिन्नेवदेहेशमलंमोहंविधूयब्रह्मत्वायकल्पते॥ब॥ ॥ ॥इतिश्रीभा
गवतेमहापुराणेएकादशस्कंधेवसुदेवनारदसंवादोनामपंचमोऽध्यायः॥ ॥ब॥ ॥षष्ठेब्रह्मादि

भिः स्तुवा गंतुं विज्ञापितुं तद्धरिं। उद्धवः प्रार्थयामास स्वधाम नयमामिति॥ १ अतः परमतिविस्तारेणात्मविद्यां निरू
पयितुं तत्प्रस्तावमाह॥ अथेति॥ ब॥ ॥श्रीशुक उवाच॥ ॥अथ ब्रह्मात्मजैर्देवैः प्रजेशैरावृतोऽभ्यगात्। भ
वश्च भूतभव्येशो ययौ भूतगणैर्वृतः॥ १ आत्मजैः सनकादिभिः। अभ्यगात् द्वारकामिति चतुर्थेनान्वयः॥ ब॥ इं
द्रो मरुद्भिर्भगवानादित्या वसवोऽश्विनौ। ऋभवोऽङ्गिरसो रुद्रा विश्वे साध्याश्च देवताः॥ २ गंधर्वाप्सरसो नागाः सि
द्धचारणगुह्यकाः। ऋषयः पितरश्चैव सविद्याधरकिंनराः॥ द्वारकामुपसंजग्मुः सर्वे कृष्णदिदृक्षवः॥ ३ नन्व
तेषामुपेंद्रादिरूपं नित्यं भगवंतं पश्यंतां कोयमिति दिदृक्षा। अत आह वपुषेति॥ ब॥ वपुषा येन भगवान्नरलो एटी०
कमनोरमः। यशो वितेने लोकेषु सर्वलोकमलापहं॥ ४ येन वपुषा नरलोकमनोरमः सन्। सर्वलोकेषु य ४४
शो वितेने। तदतिसुंदरं वपुः दिदृक्षवः॥ ब॥ तस्यां विभ्राजमानायां समृद्धायां महर्द्धिभिः। व्यचक्षतावितृप्ता

क्षाः कृष्णमद्भुतदर्शनं॥ ५ व्यचक्षत अपश्यन्॥ ब॥ स्वर्गोद्यानोद्भवैर्माल्यैश्छादयंतो यदूत्तमं। गीर्भिश्चित्रपदार्था
भिस्तुष्टुवुर्जगदीश्वरं॥ ६ स्वर्गोद्यानसमुद्भवैर्माल्यैः। चित्राणि शृंखलबंधप्रायाणि पदानि अर्थाश्च यासु ताभि
र्गीर्भिः॥ ब॥ ॥देवा ऊचुः॥ ॥नताः स्म ते नाथ पदारविंदं बुद्धींद्रियप्राणमनोवचोभिः। यत् चिंत्यतेंतर्हृदि
भावयुक्तैर्मुमुक्षुभिः कर्ममयोरुपाशात्॥ ७ बुद्धींद्रियादिभिः दर्शनादिना प्राणेन च बलदेहेन दंडवत्प्रणि
पातेन नता वयं। नमस्कृतवंतः स्मेति विस्मये। यथाऽङ्गदोऽस्यां पिदास्यां जातुस्यां अस्मात्रिरस्मादृशा। मतभाव
वसाचेति श्रवणमोक्षांगईरिताः। स्मश शोके च विस्मयाय विशेषणं। कर्ममयादुरुपाशात् मुमुक्षुभिः भावयुक्तैरपि
यतः केवलं ध्येयं तद्धृदि चिंतितं। न तु कृतार्थास्ते ततु वयं नताः स्म अहो भाग्यमित्यर्थः। नन्वममापि दृशा दृष्टकर्मकरणात्
कुतो मत्पदारविंदचिंतनं मुमुक्षुभिः क्रियते तत्राह। त्वमिति॥ ब॥ त्वं माययात्रिगुणयात्मनि दुर्विभाव्यं व्यक्तं सृ

जन्यवमितुंप्रमितगुणस्त्वं।नैतैर्भवानजितकर्मभिरज्यतेवैयत्स्वेसुखेव्यवहितेभिरतोनवद्यः॥८॥हेअजितआत्मा
मिदानींतनमिदमल्पंकर्म।यत्क्रमहदादिप्रपंचंसृजसि।पालयसिसंहरसिच।तदप्यात्मन्येवनपृथक्॥ डवि
नाशेंमनसाप्यचेरवितर्क्यतिगुणस्त्वं तत्त्वामायागुणेषुनियंतृत्वेनस्थितः।अथचएतैः कर्मभिर्भवान्नाज्य
तेनलिप्यते।कुतः।योभवाननवद्यःरागादिरहितः करणादिरहितः।यतःस्वेआत्मरूपेसुखेअव्यवहितेअ
नावृतेअभिरतः।अतस्त्वं कर्मकृद्भवन्नपिआत्मारामःपरमेश्वरइतिमुमुक्षुभिश्चिंत्यसेइतिभावः।नचात्मा
रामस्यकिंकर्मकरणेन।अतआह।शुद्धिरिति॥ब॥शुद्धिर्नृणांनतुतथेड्यदुराशयानांविद्याश्रुताध्ययन प०टी०
दानतपःक्रियाभिः।सत्त्वात्मनामृषभतेयशसिप्रवृद्धसच्छ्रद्धयाश्रवणसंभृतयायथास्यात्॥९॥हेईड्यहेऋ ४५
षभदुराशयानांरागिणांविद्योपासनाश्रुतंश्रवणविद्यादिभिः।तथाशुद्धिर्नभवति।सत्त्वात्मनांभक्तानांतेय

शसिश्रवणेनसंभृतयापरिपुष्टयाप्रवृद्धयासच्छ्रद्धयायथास्यात् परमपावनस्ययशसोवितानायतवक
र्मावरणमितिभावः॥ब॥स्यान्नस्तवांघ्रिरशुभाशयधूमकेतुःक्षेमाययोमुनिभिरार्द्रहृदोह्यमानः।यःसा
त्वतैःसमविभूतयआत्मवद्भिर्व्यूहेर्चितःसवनशःस्वरतिक्रमाय॥१० तदेवचद्यशआहैवशुद्धिहेतुः।अ
स्माभिस्तुतवांघ्रिर्हिष्टः।अतस्तवांघ्रिर्नोस्माकंअशुभाशयानांविषयवासनानांधूमकेतुस्तद्दाहकःस्या
त्।कथंभूतःक्षेमाययोमोक्षाययमुनिभिर्मुमुक्षुभिःप्रेमार्द्रहृदाउह्यमानः॥चिंत्यमानः।यश्चसात्वतैर्भक्तैःस
मविभूतयेसमानैश्वर्यायवसुदेवादिव्यूहेर्चितः।तेषुचव्यूहेषुकैश्चिदात्मविद्भिःधीरैःस्वरतिक्रमायस्व
र्गमतिक्रम्यवैकुंठप्राप्तयेसवनशस्त्रिकालंअर्चितः॥ब॥यश्चिंत्यतेप्रयतपाणिभिरध्वराग्नौत्रय्यानिरु
क्तविधिनावहविर्गृहीत्वा।आध्यात्मयोगउतयोगिभिरात्ममायांजिज्ञासुभिःपरमभागवतैःपरीष्टः॥११॥

किंच। प्रयतपाणिभिः संयतहस्तैः हविर्गृहीत्वा। अध्वराग्नौ आहवनीयाग्नौ याज्ञिकैर्यद्ध्रियते। ननु देवतायै हवि
र्गृहीतं स्यात् तां ध्यायेद्धविषं हरिश्चन्तीति वचनात् तन्न देवता ध्रियते तत अत आह। अव्यानिरुक्तेन विधिना इंद्रादि
रूपेणैव यज्ञपुरुष ध्रियते इत्यर्थः। उत किंच। आध्यात्मयोगे अधिकारयोगे योगिभिरपि आत्मनस्तवमाया
अणिमादिसिद्धिलिप्सुभिः तत्कामैर्ध्रियते। परमभागवतैर्मुमुक्षुभिः यः परीष्टः सर्वतः इज्जितः। स तवांघ्रिर्नोऽ
स्मनायधूमकेतुः स्यादिति पूर्वेणैवान्वयः॥ एतेषां च मुनिसत्त्वादीनां षण्णां सेवकानां मध्ये परमभागवतेषु भक्त्या
अर्पितपरप्रीतिरधिके इति भवंति॥७॥ पर्युष्टया तव विभो वनमालयेयं संस्पर्द्धिनी भगवती प्रतिपत्तिवत् श्रीः॥ य ए०टी०
स्सुप्रणीतममुया अर्हणमाददन्नो भूयात्सदांघ्रिरशुभाशयधूमकेतुः॥८॥ इड भावः छांदसः॥ अहं यत्रवसामि ४६
तत्रैव वक्षसि पर्युषितापीयं वसतीति प्रतिपत्तिवत् श्रीः संस्पर्द्धमाना भवति। तथा तां स्पर्द्धमानां श्रियमाना

द्रव्ययोभवान्पर्युषितयापि अमुयैव वनमालया भक्तैरर्पितेयमतिप्रीत्या सुप्रणीतं सुष्ठु संपादितं यथा
भवति तथा। अर्हणं इज्यां अददत् स्वीकृतवान्। सुप्रणीतमित्यर्हणविशेषणं वा। तद्यत। वांघ्रिर्नोऽस्म
नाशायधूमकेतुर्भूयात् आयह्वा॥ यांघ्रिः अमुया सुप्रणीतमर्हणमाददत् स नोऽस्मनाशायधूमकेतुर्भूयादि
त्यन्वयः। अथ चैवं संबंधः। एतेभ्यो ध्यानार्चनादिनिष्ठेभ्योपि च यशसि प्रवृद्ध इच्छबुद्धावंत एव तत्तार्थः। भग
वतो यशः। प्रियचादिभ्याक्तः॥ पर्युष्टकया वक्षः कांता विश्वस्मात् परितः सर्वांगेषु उष्टया कांतया शोभितया
वनमालया वक्षसि। एकदेशे वर्तमानाः श्रीः संस्पर्द्धमाना भवति। तथा च्यानाय मधुव्रतैः बद्धभावलि
तया कीर्तिमय्या वनमालयेव योभवान् सुप्रणीतमर्हणमाददत्। इत्यादि पूर्ववत् बद्धरणस्य लक्ष्मपस्त
पातः प्रसिद्ध एवेति सुवंतः प्रार्थ्यते। केतुरिति॥७॥ केतुस्त्रिविक्रमयुतस्त्रिपतत्पताको यस्ते भयाभय

करोस्सुरदेवचम्वोः। स्वर्गायिसाधुषुखलेष्वितरायभूमन्नूपादः पुनातुभगवान्भजतामघंनः॥२२॥ बलिर्बंधनेत्रि
विक्रमे स्तुतः तत्र द्वितीयक्रमे सत्यलोकं गतस्तत्र पादकेतुः अत्युच्छ्रितो विजयध्वज इव। तत्संपादयति। त्रि
पतत्पताकः त्रिधा पतंतीति त्रिषु लोकेष्वापतंती गंगा एव पताका यस्य सः। तथा असुरदेवचम्वोः तस्सेन
योरुभयोर्भयाभयकरः। साधुषु सुरेषु स्वर्गायि खलेषु असुरेषु इतराय अधोगमनाय। एवंकेचनरूपस्तपाद
स भजतां नः अघं पुनातु शोधयतु। अयाद्दिति पाठे इति कर्मणि षष्ठी। अयाद्भजतोस्मान्पुनातु। तथा
चश्रुतिः। चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुःकृतानि। तेन पवित्रेण शुद्धेन पूता अपि पाप्मानमर प०१०
तिं तरेम। लोकस्य द्वारमर्चिमत्पवित्रं ज्योतिष्मद्भ्राजमानं महद्यत् अमृतस्य धारा बहुधा दोहमानं चरणं नो ५७
लोके सुधां दधातु चितिः॥ नन्वसुरे देवासुरादयः परस्परं जयंति जीयंते। किमहं तत्र त्वमत आह॥ नसीति॥

नस्योतगाव इव यस्य वशे भवंति ब्रह्मादयस्तनुभृतो मिथुरर्द्यमानाः। कालस्य ते प्रकृतिपूरुषयोः परस्य
शं नस्तनोतु चरणं पुरुषोत्तमस्य॥२४ मिथुर्मिथुः। अर्द्यमानाः युद्धादिभिः। पीड्यमानाः ब्रह्मादयोपि य
स्य तव वशे भवंति। नन्वजये पराजये वा स्वतंत्राः। के इव। नासिकायां ओताः नासिकामाविध्य प्रोता गावो ब
लीवर्दा इव कृताः। कालस्य कलयितुः प्रवर्तकस्य। तदेव कृतः। प्रकृतिपुरुषयोरपि परस्य। तस्य ते पुरु
षोत्तमस्य पादो नः शं तनोतु। प्रकृतिपुरुषाभ्यां परत्वमुपपादयंतिः कालत्वेन पुरुषोत्तमत्वमाह। अस्येति
अस्यासि हेतुरुदयस्थितिसंयमानां अव्यक्तजीवमहतामपि कालमाहुः। सोयं त्रिणाभिरखिलापचये
प्रवृत्तः कालो गभीररय उत्तमपूरुषस्त्वं॥२५ अजेभ्य एव गताः उदयादीनां हेतुरसि। कुतः। अव्यक्तं प्रकृतिः
जीवः पुरुषः महान् महत्तत्त्वं तेषां कालं नियंतारं चाहुः। अक्षरात्परतः पर इति श्रुतेः। महतः परमथ

क्रमथक्रान्तपुरुषः परः। अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तमः इति। त्वमेव पद्मद्याद्विद्वारा जगत्सृष्ट्यादि
देत्वरिथकं। तत्केन प्रकारेण तदाह। यत्र इति॥ ब॥ यत्रः पुमान् समधिगम्य ययास्य वीर्यं धत्ते महान्तमि
वगर्भममोघवीर्यः। सोयं तयानुगत आत्मन आण्डकोशं हैमं ससर्ज बहिरावरणैरुपेतं॥ २६ यत्र पुरु
षो वीर्यं समधिगम्य प्राप्य ययामायया सह महान्तं तं धत्ते। अस्य विश्वस्य गर्भमिव सोयमहान्। तयैव माय
यानुगतः सन् आत्मनः सकाशात् आण्डकोशं ससर्ज च यानुगत इति पाठेपि तया मायया च याधिष्ठितः सन्नि
ति। नचैवं स्वतमीश्वरत्वं ममक्रतो वगतं सर्वव्यजिज्ञासादाह॥ तदिति॥ ब॥ तत्तस्थुषश्च जगतश्च सवानधीशो यन्मा एदा०
ययोत्थगुणविक्रियायोपनीतानूर्थान्जुषन्नपि हृषीकपते न लिप्तः येन्ये स्वतः परिहृतादपि बिभ्यति स्म ५८
॥२७ तत्तस्मात्तस्थुषः स्थावरस्य जगतो जंगमस्य च सवानधीशः। यद्यस्मात् मायया उत्थाउद्गुणनितायाग

णविक्रियाइन्द्रियवृत्तिः तयोपनीतात् अर्थान् विषयान् जुषन् जुषमाणोपि हे हृषीकेशपते न लिप्तस्त्वं। ये
त्वन्ये जीवा योगिनो वा स्वतः परिहृतादपि अविद्यमानात् अयुक्ताद्वा। विषयजोषणाद्बिभ्यति। वासनामात्रेण
बध्यन्ते इत्यर्थः। अलिप्तत्वमाह। स्मायेति॥ ब॥ स्मायावलोकलवदर्शितभावहारिभ्रूमंडलप्रहितसौर
तमंत्रशौंडैः। पत्न्यस्तु षोडशसहस्रमनंगबाणैर्यस्येन्द्रियं विमथितुं करणैर्न विभ्व्यः॥ २८ स्मायावलोको मंद
स्मितविलसितावलोकः तस्य लवाकटाक्षः तेन दर्शितो यो भावो भिप्रायः तेन मनोहारि यद्भ्रूमंडलं तेन प्र
हिताः प्रेरिताः ये सौरता मंत्राः तत्र शौंडैः प्रगल्भैः अनंगबाणैः कामस्य बाणैः संमोहनैः करणैः कामकलाभिः षोडश
सहस्रं पत्न्यः यस्येन्द्रियं मनः विमथितुं क्षोभयितुं न विभ्व्यः न समर्थाः। सर्ववान्नालिप्त इति पूर्वेणैवान्वयः॥
ब॥ विभ्व्यः सवामृतकथोदवहास्त्रिलोक्याः पादावनेजसरितः शमलानि हंतुं। आनुश्रवं श्रुतिभिरंघ्रि

ऊमंगसंगैस्तीर्थद्वयंशुचिषदस्तउपस्पृशंति॥१९॥तस्मात्त्वदमृतरूपायाकथातदेवउदर्कंवदतीतितथाकीर्त्ति
नद्यःतथापादावनेजसरितोगंगाद्याश्चत्रिलोक्याःशमलानिहंतुंविधृताःकेनप्रकारेण।आनुश्रवंतुरोरुच्चार
णमनुश्रूयते।इच्छनुश्रवोवदः।तत्रसर्वंकीर्त्तिरूपंतीर्थंश्रुतिभिःश्रवणेंद्रियैःअंघ्रिजंचांगसंगैः।एवंशुचिषद
श्चाश्रमधर्मस्थिताःतवतीर्थद्वयमुपस्पृशंति।सर्वंतदिति॥व॥ ॥श्रीशुकउ॥ ॥इत्यभिष्टूयविबुधैःसेशःश
तधृतिर्हरिं।अभ्यभाषतगोविंदंप्रणम्यांबरमाश्रितः॥२०॥विबुधैःसह॥व॥ ॥ब्रह्मोवाच॥ ॥भूमेर्भारावता
रायपुराविज्ञापितःप्रभो।त्वमस्माभिरशेषात्मन्तत्तथैवोपपादितं॥२१॥धर्मश्चस्थापितःसत्सुसत्यसंधेषुवैत्व एटी०
या।कीर्त्तिश्चदिक्षुविक्षिप्तासर्वलोकमलापहा॥२२॥विक्षिप्ताविस्तारिता॥व॥अवतीर्ययदोर्वंशेबिभ्रद्रूपमनु ४९
त्तमं।कर्माण्युद्दामवृत्तानिहितायजगतःकृथाः॥२३॥उद्दामानिवृत्तानिविक्रमायेषुतानिकर्माणि॥व॥यानिते

चरितानीशमनुष्याःसाधवःकलौ।शृण्वंतःकीर्त्तयंतश्चतरिष्यंत्यंजसातमः॥२४॥यदुवंशेऽवतीर्णस्यभवतः
पुरुषोत्तम।शरच्छतंव्यतीयायपंचविंशाधिकंविभो॥२५॥नाधुनातेखिलाधारदेवकार्यविशेषितं।कुलंचवि
प्रशापेननष्टप्रायमभूदिदं॥२६॥ततःस्वधामपरमंविशस्वयदिमन्यसे।सलोकाँल्लोकपालान्नःपाहिवैकुंठकिं
करान्॥२७॥ ॥श्रीभगवानुवाच॥ ॥अवधारितमेतन्मेयदात्थविबुधेश्वराः।कृतंवःकार्यमखिलंभूमेर्भारोवता
रितः॥२८॥तदिदंयादवकुलंवीर्यशौर्यश्रियोद्धतं।लोकंजिघृक्षद्रुद्धंमेवेलयेवमहार्णवः॥२९॥वीर्यशौर्ययुक्त
श्रिया॥व॥यद्यसंहृत्यदृप्तानांयदूनांविपुलंकुलं।गंतास्म्यनेनलोकोयमुद्वेलेनविनंक्ष्यति॥३०॥उद्वेलेनलं
घितमर्यादेन॥व॥इदानींनाशआरब्धःकुलस्यद्विजशापजः।यास्यामिभवनंब्रह्मन्नेतदंतेतवानघ॥३१॥
विकुंठंयास्यन्ततवभवनंयास्यामि॥व॥ ॥श्रीशुकउवाच॥ ॥इत्युक्तोलोकनाथेनस्वयंभूःप्रणिपत्यतं

सहदेवगणैर्देवाः स्वधाम प्रत्यपद्यत॥२२ अथ तस्यां महोत्पातान् द्वारवत्यां समुत्थितान्। विलोक्य भगवानाह यदु
वृद्धान्समागतान्॥२३॥ ॥श्रीभगवानुवाच॥ ॥एते वै सुमहोत्पाता व्युत्तिष्ठंतीह सर्वतः॥ शापश्च नः कु
लस्यासीद्ब्राह्मणेभ्यो दुरत्ययः॥२४ न वस्तव्यमिहास्माभिर्जिजीविषुभिरार्यकाः॥ प्रभासं सुमहत्पुण्यं यास्या
मोद्यैव मा चिरं॥२५ प्रभासं यास्याम इति वदतो यमभिप्रायो भगवतः। एते देवांशाः स्वाधिकारानेवार्हंतीति न स
द्योमोक्षं द्वारवत्यां तु मृताः मृता एव मुच्येरन्। तस्मादस्य फलं प्रभासं नेष्यामीति॥ ब॥ यत्र स्नात्वा दक्ष
शापात् गृहीतो यक्ष्मणोडुराट्। विमुक्तः किल्बिषात्सद्यो भेजे भूयः कलोदयं॥२६ दक्षशापात् यक्ष्मणा गृही ए टी०
तो उडुराट् चंद्रो यत्र स्नात्वा स्नानमात्रेण वा किल्बिषात्तस्माद्रोगरूपात्सद्यो विमुक्तः सन् भूयः कलावृद्धिं भे ५०
जे॥ ब॥ वयं च तस्मिन्नाप्लुत्य तर्पयित्वा पितॄन्सुरान्। भोजयित्वा उशितो विप्रान्नानागुणवतांधसा॥२७ उशि

जः कनीयान्। अंधसा अन्नेन॥ ब॥ तेषु दानानि पात्रेषु श्रद्धयोप्त्वा महांति वै। वृजिनानि तरिष्यामो दानैर्नौभिरि
वार्णवं॥२८ उप्त्वेति यथा सुक्षेत्रे उप्तं बीजं बहुफलं भवति। तथा दानं सत्पात्र इति द्योतयति॥ ब॥ ॥श्रीशु
कउवाच॥ ॥एवं भगवतादिष्टा यादवाः कुरुनंदन। गंतुं कृतधियस्तीर्थं स्यंदनान्समयूयुजन्॥२९
तन्निरीक्ष्योद्धवो राजन् श्रुत्वा भगवतोदितं। दृष्ट्वारिष्टानि घोराणि नित्यं कृष्णमनुव्रतः॥४० विविक्त उपसंग
म्य जगतामीश्वरेश्वरं। प्रणम्य शिरसा पादौ प्रांजलिस्तमभाषत॥४१॥ ॥उद्धव उवाच॥ ॥देवदेवेश यो
गेश पुण्यश्रवणकीर्तन। संहृत्यैतत्कुलं नूनं लोकं संत्यक्ष्यते भवान्॥४२ लोकं मर्त्यलोकं॥ ब॥ विप्रशापं सम
र्थोपि प्रत्यहन्न यदीश्वरः। तेन ज्ञातमद्य हे देव वैकुंठं यास्यसे भवान्॥४३ न प्रत्यहन् न प्रतिहतवान्॥ ब॥ ना
हं तवांघ्रिकमलं क्षणार्धमपि केशव। त्यक्तुं समुत्सहे नाथ स्वधाम नय मामपि॥४४ तव विक्रीडितं कृष्ण नृणां

परममंगलं।कर्णपीयूषमास्वाद्यत्यजंत्यन्यस्पृहांजनाः॥४५ शय्यासनाटनस्थानस्नानक्रीडाशनादिषु।
कथंत्वां।प्रियमात्मानंवयंभक्तास्त्यजेमहि॥४५ शय्यादिषुत्वांभक्ताःनित्यंसेवितवंतोवयंकथंत्यजेमाय
तुमशक्नुवन्प्रार्थयति।नमायाभयादियाह।त्वयेति॥ब॥त्वयोपभुक्तस्रग्गं।धवासोलंकारचर्चिताः।
उच्छिष्टभोजिनोदासास्तवमायांजयेमहि॥४६ चर्चिताश्चलंकृताः।हितिनिश्चितं।जयेमसंन्यासिनोहित्व
लचयादिक्लेशैःकथंचित्तरंति।वयंत्वनायासेनैवतरिष्यामइत्याह।वातारशनाइति॥ब॥वातारशनायेऋष
यःश्रमणाऊर्द्ध्वमंथिनः।ब्रह्माख्यंधामतेयांतिशांताःसंन्यासिनोमलाः॥४७ ऊर्द्ध्वमंथिनःऊर्द्ध्वमंथिनः एटी०
ऊर्द्ध्वरेतसः।।ब॥वयंत्विहमहायोगिन्भ्रमंतःकर्मवर्त्मसु।त्वद्वार्त्तयातरिष्यामस्तावकैर्दुस्तरंतमः॥ ५२
४८ तावकैर्भक्तैःसहत्वद्वार्त्तया।दुस्तरंतमःसंसारं॥ब॥स्मरंतःकीर्त्तयंतस्तेकृतानिगदितानिच।गति

त्स्मितेक्षणक्ष्वेलैर्यन्नृलोकविडंबनं॥४९ क्ष्वेलीपरिहासः।क्ष्वेलैकवचं॥ब॥एवंविज्ञापितोराजन्भग
वानदेवकीसुतः।एकांतिनंप्रियंभक्तमुद्धवंसमभाषत॥५० एकांतिनमित्यादिषुस्वालिप्रायावंचने
हेतुः॥ब॥ ॥ ॥इतिश्रीभागवतेमहापुराणेएकादशस्कंधेभगवदुद्धवसंवादेषष्ठोऽध्यायः॥
सप्तमेतूद्धवख्यात्मज्ञानसिद्ध्यैहरिःस्वयं।अवधूतेतिहासोक्त्यागुरूनष्टाववर्णयत्॥१॥ ॥श्रीभगवा
नुवाच॥ ॥यदात्थमांमहाभागतच्चिकीर्षितमेवमे।ब्रह्माभवोलोकपालाःस्वर्वासंमेभिकांक्षिणः॥१य
दात्वंसंहृत्यैतत्कुलमितिस्वर्वासंवैकुंठवासंप्रति॥ब॥मयानिष्पादितंह्यत्रदेवकार्यमशेषतः।यद
र्थमवतीर्णोहमंशेनब्रह्मणार्थितः॥२ त्वंचसर्वत्यागेनात्मनिष्ठोभवेति।वक्तुमाह।कुलमितित्रयेण॥ब॥
कुलंवैशापनिर्दग्धंनंक्ष्यत्यन्योन्यविग्रहात्।समुद्रःसप्तमेह्न्येतांपुरींचप्लावयिष्यति॥३ यर्ह्येवायंमयात्य

क्तो लोकोयं नष्टमंगलः। न विश्वस्य चिरात्साधो पापनाकलिनेरितः॥४ तदैवायं नष्टमंगलो भविष्यति॥ बा॥
नवसत्यं त्वयैवेद मयाप्युक्तो महीतले। उन्नोधर्मरुचिर्भद्र भविष्यति कलौ युगे॥५ नवसत्यमेव त्वया॥ बा॥ त्वं
तु सर्वं परित्यज्य स्नेहं स्वजनबंधुषु। मय्यावेश्य मनः सम्यक् समदृग्विचरस्व गां॥६ ननु गुणदोषास्यां विष
मे लोके। कुतः समदृष्टिः स्यां। अत आह। यदिदमिति॥ बा॥ यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः। नश्व
रं गृह्यमाणं च विद्धि मायामनोमयं॥७ मनआदिभिर्गृह्यमाणं मनोमयत्वान्मायेति विद्धि। तदपि नश्वरं च विद्धि
मनोमयत्वेदेवः॥ बा॥ पुंसो युक्तस्य नानार्थो भ्रमः स गुणदोषभाक्। कर्माकर्मविकर्मेति गुणदोषधियो भि एटी०
दा॥८ अयुक्तस्य विक्षिप्तमनसः। नानार्थो विदविषयो भ्रमः स भ्रम एव गुणदोषभाक्। ननु वेदेनैव विधिनि ५२
षेधाभ्यां भ्रमस्य सत्यतोक्ता नेत्। भ्रमविजृंभिततद्गुणदोषबुद्धेः पुंसः कर्मविहितं अकर्मतल्लोपः विकर्मनि

षिद्धमिति भेदा भेदः। अविद्यावद्विषयो वेद इत्यर्थः॥ बा॥ तस्माद्युक्तेंद्रियग्रामो युक्तचित्त इदं जगत्। आत्मनी
क्षस्व विततमात्मानं मय्यधीश्वरे॥९ कथमात्मनि परिच्छिन्ने विततं जगदीक्षणीयं तत्राह। आत्मानमिति। म
यि ब्रह्मणि तद्रूपे स्वस्य। नन्वेवं युक्तचित्तत्वेन कर्माकरणे देवादयो विघ्नान् करिष्यंति। तत्राह। ज्ञानेति। बा॥
ज्ञानविज्ञानसंयुक्तः आत्मभूतः शरीरिणां। आत्मानुभवतुष्टात्मा नांतरायैर्विहन्यते॥१० ज्ञानं वेदतात्पर्य
निश्चयः। विज्ञानं तदर्थानुभवः। ताभ्यां सम्यक् युक्तः ततश्च आत्मानुभवेनैव तुष्टचित्तः। अतः शरीरिणां दे
वादीनामात्मभूतः अंतरायैर्न प्रतिहन्यते। अयं भावः। यावद्वस्तु भवं यथा संभवं कर्माणि क्रियादेव। तदनं
तरं सर्वेषामात्मभूतत्वात्। न कोपि विघ्नानाचरतीति। तथा च श्रुतिः। तस्य ह न देवाश्च नाभूत्या ईशते आत्मा
ह्येषां स भवतीति। न चोत्पन्नज्ञानस्यापि यथेष्टाचरणप्रसंगः स्यादाह। दोषबुद्ध्येति॥ बा॥ दोषबुद्ध्या भयातीत

वो निषेधाच्च निवर्त्तते। गुणबुध्या च विहितं न करोति यथा ....र्भकः॥ २१ गुणदोषबुध्यतीतोपि प्राक्तनसंस्का
रात् निषेधान्निवर्त्तत एव। किंतु न दोषबुध्या। विहितं च प्रायशः करोति। न गुणबुध्या। यथार्भकः॥ संकल्पवि
कल्परहितः किंचित्करोति। कुतश्चिन्निवर्त्तते। एवंभूतस्य न पुनः संसार इत्याह। सर्वभूतेति॥ ब॥ सर्वभूतसु
हृच्छांतो ज्ञानविज्ञाननिश्चयः। पश्यन्मदात्मकं विश्वं न विपद्येत वै पुनः॥ २२ न विपद्येत पुनः संसरेत्॥ ब॥ ॥
श्रीशुक उवाच॥ ॥इत्यादिष्टो भगवता महाभागवतो नृप। उद्धवः प्रणिपत्याह तत्त्वजिज्ञासुरच्युतं॥ २३ एवं
गुणसर्वं परित्यज्येत्याद्युपदेशं आत्मनो योग्यं मन्यमानः पृच्छति। योगेशेति॥ ब॥ ॥उद्धव उवाच॥ ॥योगेशयो ए टी०
गविन्यास योगात्मन् योगसंभव। निःश्रेयसाय मे प्रोक्तस्त्यागः सन्न्यासलक्षणः॥ २४ त्यागफलदायिन् योगवि ५२
दांन्यासो नाम अतिगोप्यो निःस्पृहविशेषः। यद्वा। योगविन्यस्यते क्रियते यस्मिन्। योगात्मन् योगे आत्मा प्रकटो न

वति। योगस्वरूपेति वा। योगश्च संभवो यस्मात्। चतुर्भिरितैः संबोधनैः स्वमहिम्ना केवलं च योपदिष्टं तत्र मदधि
कारं पर्यालोच्य निद्योतितं। तदाह। निःश्रेयसायेति। नवारोग्याद्यर्थं सर्वस्वदानादिवदयं त्यागः। किंतु। सन्न्यास
लक्षणः प्रव्रज्यापत्तिरूपः॥ ब॥ त्यागोयं दुःकरो भूमन् कामानां विषयात्मभिः। सुतरां त्वयि सर्वात्मन् नभक्तैरिति
मे मतिः॥ २४ सोहं ममाहमिति मूढमतिर्विगाढस्त्वन्मायया विरचितात्मनि सानुबंधे। तत्त्वंजसा निगदितं भवता
यथाहं संसाधयामि भगवन्ननुशाधि भृत्यं॥ २५ यं प्रति त्यागाद्युपदिष्टं सोहं मूढमतिः कुतः। ममेति अहमिति
च सानुबंधे पुत्रादिसहिते त्वन्मायया विरचिते आत्मनि देहे विगाढो मग्नः। अतः तत् भवता निगदितं। यथाहमंज
सा साधयामि। तथा भृत्यं मामनुशाधि शासनेः शिक्षय। मया संक्षेपतः उक्तं विस्तरतश्च व्याख्यातुं पृच्छेति। वेद तत्राह। स
त्यस्येति॥ ब॥ सत्यस्य ते स्वदृश आत्मन आत्मनोन्यं वक्तारमीश विबुधेष्वपि नानुचक्षे। सर्वे विमोहितधियः स्वमा

ययेमे ब्रह्मादयस्तत्तस्ततो बहिरर्थभावा॥२६ स्वदृशः स्वप्रकाशस्य सत्यस्य आत्मनः आत्मनो मां प्रविष्टा रंतेव
स्तः अन्यं। नाद्यवस्ते। न पश्यामि। स्वदृशः स्वप्रकाशस्य स्वतः सिद्धज्ञानात्मनो मम इति वा। कुत इत्यत आह। स
र्व इति। बहिरर्थभावाः विषये स्वर्थबुद्धयः॥ब॥ तस्माद्भवंतमनवद्यमनंतपारं सर्वज्ञमीश्वरमकुंठविकुंठधि
ष्ण्यं। निर्विण्णधीरहमिह वृजिनाभितप्तो नारायणं नरसखं शरणं प्रपद्ये॥२७ केचित् दुःशीला भवंति। केचित्सेवि
ताः फलकाले विनश्यंति। केचिदन्याः। केचिद्रक्षणेऽसमर्थाः। केचित्तु स्थानभ्रष्टाः तथा हि त्वर्थमनवद्यमि
त्यादीनि पंच विशेषणानि। नास्त्यंतः कालतः पारं च देशतो यस्य। तं कालादिभिरकुंठो विकुंठलोको धिष्ण्यं स्थानं ए टी०
यस्य। हे भगवन्। स्फुटं निर्विद्देहेदुः। वृजिनैर्दुःखैरभितप्तः। हकार गौरवाय हकारो बुक्क इव पवनीयः। नरं च नवद्य ५४
वादीनि कृतो मम। तत्राह। नारायणमिति। अंबुकं पितामाह। नरसखं। नरो जीवस्तयेन्ते विक्षिप्यते इंद्रियैरि

ति नरो जीवः तस्य सखायं सर्वं तच्छरणं प्रपद्ये। तदेव मसंभावनाविपरीतभावनाभ्यां उपदिष्टं तत्त्वं अनवगा
हमानं प्रति तन्निहृत्तये गुरूपदेशं विनान्वयव्यतिरेकाभ्यां मेव तत्त्वप्रतिपत्तिर्भवतीति दर्शयितु माह। प्रा
येणेति॥ब॥ ॥श्रीभगवानुवाच॥ ॥प्रायेण मनुजा लोके लोकतत्त्वविचक्षणाः। समुद्धरंति ह्यात्मानमा
त्मनैवाशुभाशयात्॥२९ लोकतत्त्वस्य विचक्षणाः परीक्षकाः। अशुभाशयात्। विषयवासनातः तदुपपादय
ति। आत्मन इति॥ब॥ आत्मनो गुरुरात्मैव पुरुषस्य विशेषतः। यत्प्रत्यक्षानुमानाभ्यां श्रेयोसावनुविंदति॥१
८ पश्वादिशरीरेष्वात्मैव हिताहितगुरुः। तत्र पुरुषत्वं दर्शयति पुरुषत्वं चेति॥ब॥ पुरुषत्वे च मां धीराः सांख्ययो
गविशारदाः। आविस्तरां प्रपश्यंति सर्वशक्त्युपबृंहितं॥२८ तथा च श्रुतिः। पुरुषत्वे चाविःस्तरामात्मा यद्धि प्र
ज्ञानेन संपन्नतमो विज्ञानं वदति विज्ञानं पश्यति। अथ स नं वेद लोकोलोको मर्त्येमामृतमीप्सत्येवं संपन्नोथे

तरेषां पशूनामज्ञानापि पाथसे एवाभिज्ञानमिति। अतः पुरुषत्वं स्तौति। एकेति॥ ब॥ एकद्वित्रिचतुःपादो बहु
पादस्तथापदः। बह्व्यः संति पुरः सृष्टास्तासां मे पौरुषी प्रिया॥१९ अनुमानमाह। अत्रेति॥ ब॥ अत्र मां मार्ग
यंत्यद्धा युक्ता हेतुभिरीश्वरं। गृह्यमाणैर्गुणैर्लिंगैः अग्राह्यमनुमानतः॥२० अत्र पौरुष्यां पुरि। अप्रमत्ता धी
रा। बुद्धयः अग्राह्यं ग्राह्येभ्यो हंकारादिव्यतिरिक्तं मां अद्धा साक्षान्मृगयंति। मार्गणे द्वयप्रकारमाह। गृह्यमाणै
र्बुद्ध्यादिभिः गुणैर्हेतुभिः। जडानां प्रकाशः स्वप्रकाशमेकं विना न घटत इति अनुपपत्तिमुखेन लक्षकैः। त
था तैरेव लिंगैर्व्याप्तिमुखेनानुमानतः। ईश्वरं प्रवर्त्तकं मृगयंते। बुद्ध्यादिकरणानि कर्तृप्रयोज्यानि। करण एका०
त्वात् वास्यादिवदिति। तदुक्तं। भगवान् सर्वभूतेषु लक्षितः स्वात्मना हरिः। दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैर ५५
नुमापकैरिति। नचैतावता आनुमानिक आत्मेति मंतव्यं। देहादिव्यतिरिक्तत्वं पदार्थशुद्धमात्रस्यैवानुमानेन

विवक्षितत्वात्। तयोऽन्वयव्यतिरेकाभ्यां असंभावनादिनिवृत्तावितिहासमाह। अत्रापीति॥ ब॥ अत्राप्युदा
हरंतीममितिहासं पुरातनं। अवधूतस्य संवादं यदोरमिततेजसः॥२१ अवधूतं द्विजं कंचिच्चरंतमकुतोभयं।
निरीक्ष्य तरुणं राजा यदुः पप्रच्छ धर्मवित्॥२२॥ ॥यदुरुवाच॥ ॥कुतो बुद्धिरियं ब्रह्मन्नकर्तुः सुविशार
दा। यामासाद्य भवान् लोके विद्वांश्चरति बालवत्॥२३ सुविशारदा अतिनिपुणा सर्वलोकवैलक्षण्यमेवा
ह। प्राय इति॥ ब॥ प्रायो धर्मार्थकामेषु विवित्सायां च मानवाः। हेतुनैव समीहंते आयुषो यशसः श्रियः॥२४
धर्मादिषु विवित्सायां आत्मविचारेषु च मानवाः समीहंते। प्रवर्त्तंते। तत्रापि आयुरादेर्हेतुना कामनयैव॥ ब॥
त्वं तु कल्पः कविर्दक्षः सुभगोऽमितभाषणः। न कर्त्ता नेहसे किंचित् जडोन्मत्तपिशाचवत्॥२५ त्वं तु न कस्यचि
त्कर्मणः कर्त्ता भवति न च किंचिदीहसे इच्छसि। तत्तु अशक्त्या अज्ञानाद्वा। अनैपुण्येन वा। विरूपत्वेन वा॥

श्रवा।मितयावा।एभिः अहासीन्यं चयदतएव तन्नुनचयीत्याह।कल्प इत्यादिना।महानानंदस्य तवकृतश्रतिम्ह
छति।जनेष्विति।।ब।।जनेषु दह्यमानेषु कामलोभदवाग्निना।नतप्यसेग्निना मुक्तो गंगांभस्थ इव द्विपः।।२६त्वं
हिनः पृच्छतां ब्रह्मन्नात्मन्यानंदकारणं।ब्रूहि स्पर्शविहीनस्य भगवतः केवलात्मनः।।२७ स्पर्शविहीनस्य विषय
भोगरहितस्य।अग्रहेतुः।केवलात्मनः कलत्रादिशून्यस्य।।ब।। ।।श्रीभगवाच।। ।।यदुनैवं महाभागब्रह्मण्ये
नसुमेधसा।पृष्टः सभाजितः प्राह प्रश्रयावनतं द्विजः।।२८।। ।।अवधूत उवाच।। ।।संति मे गुरवो राजन्ब
हवो बुद्ध्युपाश्रिताः।यतो बुद्धिमुपादाय मुक्तोटामीह तान्शृणु।।२९ बुद्ध्यैवोपाश्रिता नतूपदेशेन। एटी०
अटामि पर्यटामि।तानाह।पृथिवीति।।ब।।पृथिवी वायुराकाशमापोग्निश्चंद्रमा रविः।कपोतोजगरः सिंधुः प ५६
तंगो मधुकृद्गजः।।३०मधुहा हरिणो मीनः पिंगला कुररोर्भकः।कुमारी शरकृत्सर्प ऊर्णनाभिः सुपेशकृत्।।३१

शोभनं रूपं करोतीति सुपेशकृत्।।ब।।एते मे गुरवो राजन्चतुर्विंशतिराश्रिताः।शिक्षा वृत्तिभिरेतेषामन्वशि
क्षमिहात्मनः।।३२ मे मया आश्रिताः तदाह।एतेषां वृत्तिभिः आत्मनुशिक्षाः शिक्षणीयान् अर्थान् हेयोपा
देयान् अन्वशिक्षं अग्रहं।शिक्षितवानस्मि।।ब।।यतो यदनुशिक्षामि यथा वा नाहुषात्मज।तत्तदा पुरुषव्या
घ्र निबोध कथयामि ते।।३३ नाहुषो ययातिः।शिक्षितेः क्रमो शिक्षितवानित्याह।भूतैरिति।।ब।।भूतैराक्रम्य
माणोपि धीरो दैववशानुगैः।तद्विद्वान्न चलेन्मार्गादन्वशिक्षं क्षितेर्व्रतं।।३४आक्रम्यमाणः पीड्यमानः
तद्विद्वान्भूतानां दैववशवर्तित्वं विद्वान्।व्रतं नियमं।पर्वतरूपा वृक्षरूपा च या पृथ्वी तस्याः शिक्षितमा
ह।शश्वदिति।।ब।।शश्वत्परार्थसर्वेहः परार्थैकांतसंभवः।साधुः शिष्येत भूभृत्तो नगशिष्यः परात्म
तां।।३५सर्वदा परार्थाः परोपकारार्था सर्वा ईहा यस्य सः।परार्थ एव एकांततः संभवो जन्म यस्य सः।भू

स्तन्नः पर्वतात्। तस्य हि सर्वस्वतृणनिर्झरप्रस्रवक्रियाः परोपकारार्थ एव यथा तद्वत् नगशिष्यः वृक्षशिष्यः
सन् परात्मतां पराधीनात्मतां यथा वृक्षो परैरेव खंड्योत्पाद्य चानयनमप्यनुमन्यते तद्वत्। वायुरपि द्वि
विधः। प्राणो बाह्यश्च। तत्र प्राणस्य गुरुत्वमाह। प्राणवृत्त्यैवेति॥ ब॥ प्राणवृत्त्यैव संतुष्येन्मुनिर्नैवेंद्रिय
प्रियाः। ज्ञानं यथा न नश्येत नावकीर्येत वाङ्मनः॥ ३९ प्राणेच्छाहारादिमात्रेणैव तुष्येत। रूपरसादीनिं
द्रियविषयांस्तु नापेक्षेत। तथा मुनिरपि न वेदिंद्रियार्थः। प्राणवृत्तेः अकरणे मनोवैकल्येन ज्ञाननाशः स्या
त्। अतो देहनिर्वाहः कर्तव्यः। गुणलिप्सायां तु वाङ्मनश्च विक्षिप्येत अतो नाधिकं लिप्स्येदित्याह। ज्ञानमिति एटी०
ज्ञानं यथा न नश्येत। मनो वाक् यथा नावकीर्येत। न विक्षिप्येत् बहिर्निर्गच्छेत्। विषयाननुसेवमानोपि तेषु नास ५१
क्तिर्बाह्याह्वायोः शिक्षितमित्याह। विषयेष्विति॥ ब॥ विषयेष्वाविशन्योगी नानाधर्मेषु सर्वतः। गुणदोष

व्यपेतात्मा न विषज्जेत वायुवत्॥ ४०॥ नानाधर्मेषु शीतोष्णादिधर्मकेषु न हि वायुर्वनेरदने वा सज्जते तद्वत्
यथा वायुर्गंधादिधर्मयोगेन प्रतीयमानोपि न तद्धर्मवान् तथा देहादिधर्मयोगेन प्रतीयमानोप्यात्मा न त
द्धर्मवानिति संभावितं। वायोरेव शिक्ष्यांतरमाह। पार्थिवेष्विति॥ ब॥ पार्थिवेष्विह देहेषु प्रविष्टस्तद्गुणाश्र
यः। गुणैर्न युज्यते योगी गंधैर्वायुरिवात्मदृक्॥ ४१॥ तद्गुणाश्रयः देहधर्मान् बाल्यादीनाश्रित्य वर्तमानः। गुणै
स्तैरेव। एकस्यैवाद्वितीयस्यात्मनः अंतर्बहिः स्थिरत्वेन वर्तमानत्वमसंगत्वं च इतीयं शुद्धिः। आकाशाच्छिक्षितेत्या
ह। अंतर्हितश्चेति द्वयेन॥ ब॥ अंतर्हितश्च स्थिरजंगमेषु ब्रह्मात्मभावेन समन्वयेन। व्याप्त्याव्यवच्छेदमसंगमा
त्मनो मुनिर्नभस्त्वं विततस्य भावयेत्॥ ४२॥ अंतर्हितश्च देहांतर्गतोपि मुनिः आत्मनो देहाद्यसंगं अत एवा
व्यवच्छेदकं च आकाशवत् भावयेत्। कुतः। स्थिरजंगमेषु समन्वयेन व्याप्त्या तया। किं मणिषु सूत्रस्येव व्या

त्मिः॥ विततस्य सर्वगतस्य॥ तत्कृतः। ब्रह्मात्मभावेन। ब्रह्मस्वरूपभावनया बहिर्ब्रह्मभावेनांतरात्मभावेनय
समन्वयः ऐक्यभावः॥ तेन। मन्वेतस्य वैकथं संभवति। तत्राह। तस्येव तत्तुल्यत्वं संभावयेत्। यथा नभसः सर्व
गतस्य न घटादिभिः संगः परिच्छेदो वा। एवमात्मनि संभवतीति॥ किंच। कूटस्थस्यात्मनो भागमापाद्य देहादि
संबंध इत्याह। तेजोबन्नेति॥ बा॥ तेजोबन्नमयैर्भावैर्मेघैर्वायुरिनेरितैः। नस्पृश्यते नभस्तद्वत् कालसृष्टैर्गु
णैः पुमान्॥४३॥ तेजोबन्नमयैः तेजश्च आपश्च अन्नं पृथिवी च तन्मयैः कालसृष्टैर्गुणैः देहादिभिः पुमा
न् संस्पृश्यते इति नभोवत्संभवतीति। स्वच्छत्वादिभिर्गुणैः उदकं जगत्पुनातीति तद्गुणमयाशिक्षिता ए०टी०
इत्याह। स्वच्छ इति॥ बा॥ स्वच्छः प्रकृतितः स्निग्धो माधुर्यस्तीर्थभूर्नृणाम्। मुनिः पुनात्यपां मित्रं ईक्षोपस्पर्शकीर्त ५८
नैः॥४४॥ स्वच्छः निर्मलः प्रकृतितः स्वभावतः स्निग्धः जनेषु अनुरागवान्। माधुर्यः मधुरालापी तीर्थभूः तीर्थस्था

नं। अपां मित्रं उदकवत् ल्यैः ईक्षादिभिः पावेसखायं पापात्पुनाति। स्वच्छत्वादिगुणैः अर्थात् उदकसादृश्यं ज्ञा
तव्यं। अग्नेः शिक्षितमाह। तेजस्वीति॥ बा॥ तेजस्वी तपसादीप्तो दुर्धर्षोदरभाजनः। सर्वभक्ष्योपि युक्तात्मा
नादत्ते मलमग्निवत्॥४५॥ तेजस्वी ज्ञानातिशयात्। विशेषतस्तपसादीप्तः दुर्धर्षः अक्षोभ्यः सचासौ उदरभा
जनश्च अपरिग्रहः। युक्तात्मा ब्रह्मनिः॥ अग्नेरेव शिष्यांतरमाह। क्वचिदिति॥ बा॥ क्वचित् छन्नः क्वचित् स्पष्टः
उपास्यः श्रेय इच्छतां। भुंक्ते सर्वत्र दातॄणां दहन् प्रागुत्तराशुभं॥४६॥ यथाग्निः परेच्छयैव हविर्भुङ्क्ते इति तथा मु
निरिति। प्रागुत्तराशुभं संचितं भविष्यच्च पापं। आत्मनः देहोपाधिकमेवोच्चनीचत्वादि न स्वाभाविकमित्यग्निदृष्टां
तेन संभावितमित्याह। स्वमाययेति॥ बा॥ स्वमायया सृष्टमिदं सदसल्लक्षणं विभुः। प्रविष्ट ईयते तत्तत्स्वरूपो
ऽग्निरिवैधसि॥४७॥ स्वमायया अविद्यया सृष्टं सदसल्लक्षणं देवतिर्यगादिरूपं विप्रक्षत्रादिरूपं वा। आत्मनो

जन्मादिषड्विकारास्तावच्चंद्रदृष्टांतेन संभावित इत्याह। विसर्गाद्या इति॥ ७॥ विसर्गाद्याः श्मशानांता भावा देह-
स्य नात्मनः। कलानामिव चंद्रस्य कालेनाव्यक्तकर्मणा॥ ४८॥ विसर्गो जन्म श्मशानं नाशः। अत्र ज्योतिःशास्त्रप्रक्रि-
या। अपमंडलं चंद्रस्तेजोमंडलमादित्यः। तयोरेकत्र नक्षत्रावस्थाने चंद्रो न दृश्यते। चक्षुषा आदित्यमंडलेन
समदेशस्थितेन। व्यवधानात् सा अमावास्या। अथ षष्टिघटिकाभिश्चंद्रो नक्षत्रांतरं गच्छति। आदित्यश्चंद्रयो
र्द्वादशभिरहोरात्रैः। अतः प्रतिपदमारभ्य विषमस्थित्यादित्यमंडलस्य पंचदशः पंचदशो भागः। आद्यमंडले प्रति
बिंबितो दृश्यते। सा कलेत्युच्यते। एवं पंचदशाह्निचयोर्द्वादशभिर्नक्षत्रैः अंतरमिति राशिचक्रस्य सप्तविंशतिन ९८।०
क्षत्रात्मकस्य मध्ये सन्मुखो चंद्रादित्यौ तिष्ठतः। तदा संपूर्णप्रतिबिंबं स्वच्छायालोकितं दृश्यते। सा पूर्णिमा। त ५९
था अमावास्या प्रतिबिंबेन सह षोडशकलश्चंद्र उपचर्यते। ततः पुनः प्रतिपदमारभ्य मंडलयोर्विषमीभाव

त् तु कलाह्रासः। तत्र यथा कलानामेवोत्पत्त्यादयो नाप्यमंडलस्य। तथात्मनोपीत्याह। कलानामिवेति
सिंहावलोकनेनाग्निदृष्टांतेनैव देहानां क्षणभंगुरतया वैराग्यं शिक्षितमित्याह। कालेति॥ ८॥ का
लेन ह्योघवेगेन भूतानां प्रभवाप्ययौ। नित्यावपि न दृश्येते आत्मनोग्नेर्यथार्चिषां॥ ४९॥ ओघवेगो यस्य ते
न आत्मनः संबंधिनां भूतानां देहानामित्यर्थः। अर्चिषां ज्वालानां। आदित्याच्छिक्षितमाह। गुणैरिति॥ ९॥
गुणैर्गुणानुपादत्ते यथाकालं विमुंचति। न तेषु युज्यते योगी गोभिर्गा इव गोपतिः॥ ५०॥ गुणैरिंद्रियैर्गुणा
न्विषयानुपादत्ते। यथाकालं विमुंचति च। न तेषु युज्यते। लग्नमिति दत्तमिति वाभिनिवेशं न करोति। गा
भी रश्मिभिः गोः जलानि गोः पतिः सूर्यो यथा। स्वतो भेदभ्रमस्य आत्मनो भेदप्रतीतिरुपाधिवशात् इत्यादित्य
दृष्टांतेनैव संभावितमित्याह॥ १०॥ बुध्यते स्वे न भेदेन व्यक्तिस्थ इव तद्गतः। लक्ष्यते स्थूलमतिभिरात्मा चावस्थि

तार्कवत्॥४७॥ स्वेस्वरूपेस्थितः आत्मा स्वदेहेन न बध्यते। अलिप्यत्कीति व्यक्तिरूपाधिः। व्यक्तिस्थः उपाधेः प्रतिबिं-
बितस्तु तद्गत इव तदुपाधिं प्रविष्ट इव स्वदेहं स्थूलमतिर्निलक्षिते। अर्कवदित्ययः। कपोताच्छिक्षितमाह नाति-
स्नेहेति॥बा॥ नातिस्नेहः प्रसंगो वा कर्त्तव्यः क्वापि केनचित्। कुर्वन् विंदते संतापं कपोत इव दीनधीः॥४८॥ स्ने-
हः प्रीतिः। प्रसंगः उपलालनाद्यासक्तिः। क्तिः। दृष्टांतं प्रपंचयति। कपोत इति॥बा॥ कपोतः कश्चनारण्ये कृ-
तनीडो वनस्पतौ। कपोत्या भार्यया सार्द्धमुवास कतिचित्समाः॥४९॥ तयोर्मिथः स्नेहप्रसंगो दर्शयति॥ कपो-
तावितित्रयेण॥बा॥ कपोतौ स्नेहगुणितहृदयौ गृहधर्मिणौ। दृष्टिं दृष्ट्यांगमंगेन बुद्धिं बुद्ध्या बबंधतुः॥५०॥ स्ने- प॰दा॰
हगुणितं निबद्धं हृदयं ययोस्तौ॥बा॥ शय्यासनाटनस्थानवार्ताक्रीडाशनादिकं। मिथुनीभूय विश्रब्धौ चेर- ६०
तुर्वनराजिषु॥५१॥ विश्रब्धौ निःशंकौ॥बा॥ यं यं वांछति सा राजन् तर्पयंत्यनुकंपिता। तं तं समनयत्कामं स-

कृच्छ्रेणाप्यजितेंद्रियः॥५२॥ सा कपोती तर्पयंती सहासवीक्षितालापादिभिः प्रीणयंती अतएव तेनानुकंपि-
ता सती यं यं वांछति तं तं कामं कृच्छ्रेणापि समनयत् संपादयामास। राजन्निति। वंयथेतिहूवितं॥बा॥ क-
पोती प्रथमं गर्भं बिभ्रती काल आगते। अंडानि सुषुवे नीडे स्वपत्युः सन्निधौ सती॥५३॥ तेषु काले व्यजायं-
त रचितावयवा हरेः। शक्तिभिर्दुर्विभाव्याभिः कोमलांगतनूरुहाः॥५४॥ तेषुजलसरितेषु अंडेषु हरेः स्वला-
वकर्मादिशक्तिभिः रचितावयवाः पक्षिणः कोमलान्यंगानि तनूरुहाश्च येषां॥बा॥ प्रजाः पुपुषतुः प्री-
तौ दंपती पुत्रवत्सलौ। शृण्वंतौ कूजितं तासां निर्वृतौ कलभाषितैः॥५५॥ तासां पतत्रैः सुस्पर्शैः कूजितैर्मु-
ग्धचेष्टितैः। प्रत्युद्गमैरदीनानां पितरौ मुदमापतुः॥५६॥ पतत्रैः पक्षैः। अदीनानां हृष्टानां॥बा॥ स्नेहानुबद्धहृ-
दयावन्योन्यं विष्णुमायया। विमोहितौ दीनधियौ शिशून् पुपुषतुः प्रजाः॥५७॥ शिशून् बालानूढाः प्रजा अनु-

॥७॥ एकदा जग्मतुस्तासामन्नार्थं तौ कुटुंबिनौ। परितः कानने तस्मिन्नर्थिनौ चेरतुश्चिरं॥५८॥ दृष्ट्वा तान्लुब्ध
कः कश्चिद्यदृच्छातो वनेचरः॥ जगृहे जालमातत्य चरतः स्वालयांतिके॥५९॥ स्वालयांतिके चरतः क्रीडतः॥
तान् कपोतपुत्रान्॥ आतत्य प्रसार्य॥ब॥ कपोतश्च कपोती च प्रजापोषे सदोत्सुकौ। गतौ पोषणमादाय स्व
नीडमुपजग्मतुः॥६०॥ उत्सुकावादेव चतत्पोषणार्थं गतौ संतौ पोषणं लब्ध्वा॥ब॥ कपोती स्वात्मजान्वीक्ष्य बा
लकान्जालसंवृतान्। तानभ्यधावत्क्रोशंती क्रोशतो भृशदुःखिता॥६१॥ सासकृत्स्नेहगुणिता दीनचित्ता
जमायया। स्वयं चाबध्यत शिचा बद्धान्पश्यंत्यपस्मृतिः॥६२॥ शिचा जालेन॥छ॥ कपोतः स्वात्मजान्बद्धानात्म 九८।०
नोप्यधिकान्प्रियान्। भार्यां चात्मसमां दीनो विललापातिदुःखितः॥६३॥ अनुरूपां भार्यां च। विललाप। शो ६१
चाविलापमाह। अहो इति त्रयेण॥ब॥ अहो मे पश्यतापायमल्पपुण्यस्य दुर्मतेः। अतृप्तस्याकृतार्थस्य
गृहस्त्रैवर्गिको हतः॥६४॥ अतृप्तस्य गृहसुखेष्वकृतार्थस्य अदृष्टमसंपादयतः॥ब॥ अनुरूपानुकूला च यस्य मे
पतिदेवता॥ शून्ये गृहे मां संत्यज्य पुत्रैः स्वर्याति साधुभिः॥६५॥ सोहं शून्ये गृहे दीनो मृतदारो मृतप्रजः॥ जिजी
विषे किमर्थं वा विधुरो दुःखजीवितः॥६६॥ तांस्तथैवावृतान्शिग्भिर्मृत्युग्रस्तान्विचेष्टतः। स्वयं च कृपणः शिक्षु
पश्यन्नप्यबुधोपतत्॥६७॥ तानावृतान्पश्यन्नपि शिक्षु जालेषु॥ब॥ तं लब्ध्वा लुब्धकः क्रूरः कपोतं गृहमे
धिनं। कपोतकान्कपोतीं च सिद्धार्थः प्रययौ गृहं॥६८॥ दार्ष्टांतिके योजयति॥ एवमिति॥ब॥ एवं कुटुंब्यशांतात्मा
द्वंद्वारामः पतत्रिवत्। पुष्णन्कुटुंबं कृपणः सानुबंधोवसीदति॥६९॥ एवं गृहासक्तिस्चिरस्थामपि अनर्थहेतुः।
मनुष्यस्य तु अतिनिंदितेत्याह। यः प्राप्येति॥ब॥ यः प्राप्य मानुषं देहं मुक्तिद्वारमपावृतं। गृहेषु खगवत्सक्तस्त
मारूढच्युतं विदुः॥७०॥ ॥इति श्रीभागवते महापुराणे एकादशस्कंधे च व्यक्तगीते कपोताख्यानं नाम

सप्तमोऽध्यायः॥ ॥ ॥ब॥ अष्टमे जन्मगारादिभ्यो नवभ्यः शिक्षितं हरिः॥ अवधूतगिरा प्राह विवेकायोद्धवं प्रति॥१॥
प्रारब्धकर्मयोगेन सुखादेरवश्यता विचार्य तु तदर्थोद्यमे रागद्वेषयोर्हठात् न कर्तव्य इति। अजगराच्छिक्षितमा
ह॥ सुखमित्यादिना॥ब॥ सुखमैंद्रियकं राजन् स्वर्गे नरक एव च। देहिनां स्याद्यथा दुःखं तस्मान्नेच्छेत तद्बुधः॥
१॥ यत्तु ऐंद्रियकं सुखं तत् स्वर्गे नरके च सर्वत्रैव। यथा दुःखं। तस्मात् बुधस्तन्नेच्छेत्। शरीरनिर्वाहमात्रं त्वयथाल
ब्धेन कर्तव्यमित्याह॥ब॥ ग्रासमृष्टमृष्टं विरसं महांतं स्तोकमेव वा। यदृच्छयैवापतितं ग्रसेदाजगरोऽक्रियः॥२॥ आ
जगरः अजगरवृत्तिः अक्रियः उदासीनः। यदा नापतति तदा किं कर्तव्यं तत्राह। शयीतेति॥ब॥ शयीताहानि भूरीणि पटी०
निराहारोऽनुपक्रमः। यदि नोपनमेद्ग्रासो महाहिरिव दिष्टभुक्॥३॥ अनुपक्रमः निरुद्यमः। दिष्टभुक् दैवमेव ग्रा ६२
पकमिति धैर्यवान्। ननु समर्थोपि शयीतेव किं। तत्राह। ओज इति॥ब॥ ओजः सहो बलयुतं बिभ्रद्देहमकर्मकं॥श

यानो वीतनिद्रश्च नेहेतेंद्रियवानपि॥४॥ ओजः इंद्रियबलं सहो मनोबलं। बलं शारीरमेव। तद्युक्तमपि देहं अक
र्मकं एव बिभ्रत् शयान एव भवेत्। वीतनिद्रः स्वार्थे हत्त दृष्टिश्च भवतु। न तु नेहेत। इंद्रियवानपीति दर्शनादि
व्यापारं निवारयति। समुद्राच्छिक्षितमाह। मुनिरिति॥ब॥ मुनिः प्रसन्नगंभीरो दुर्विगाह्यो दुरत्ययः। अनंतपारो
ह्यक्षोभ्यः स्तिमितोद इवार्णवः॥५॥ बहिः प्रसन्नः स्यात् आसावंतर्गंभीरश्च दुर्विगाह्यः। एवंभूत इति परिकलयितु
मशक्यः। अलंघ्याभिप्रायत्वात्। दुरत्ययः। अनतिक्रमणीयः। तेजस्वित्वात्। अनंतपारः कालतो देशतश्चापरि
छेद्यस्वरूपाविर्भावात्। अक्षोभ्यः अविकार्यः। रागाद्यभावात् स्तिमितोदः निश्चलोदको अर्णवो यथा। तद्वदेतैर्गु
णैर्नवेदियर्थः॥ किंच॥ब॥ समृद्धकामो हीनो वा नारायणपरो मुनिः। नोत्सर्पेत न शुष्येत सरिद्भिरिव सागरः॥७॥
वर्षासु सरिद्भिः समृद्धोपि सागरो यथा नोत्सर्पेत। ग्रीष्मे तद्विहीनोपि न शुष्येत। तथा समृद्धकामः हीनो वा नह

ष्येन्नशोचेदित्यर्थः। अत्रेदं तु॥ नारायणपरो न विषयपरः। रूपगंधस्पर्शशब्दरसैः पंचभिर्विषयैर्मोहिताः पतंगमधु
करगजहरिणमीना हताः अतस्तेष्वनासक्तः पंचैते गुरवः। तदुक्तं। पतंगमातंगकुरंगभृंगमीना हताः पंचभि
रेव पंच। एकः प्रमादी स कथं न हन्यते यः सेवते पंचभिरेव पंच। तत्र रूपविलासमोहितो नश्यतीति पतंगाच्छिक्षि
तमाह। दृष्ट्वेति॥ ७॥ दृष्ट्वा स्त्रियं देवमायां तद्भावैरजितेंद्रियः। प्रलोभितः पतत्यंधे तमस्यग्नौ पतंगवत्॥ ७ तस्या
भावैः प्रलोभितः। स्त्रियमुपलक्षिणीकृत्यैतत्प्रपंचयति। योषिदिति॥ ८॥ योषिद्धिरण्याभरणाम्बरादिकेषु द्रव्येषु मा
यारचितेषु मूढः। प्रलोभितात्मा ह्युपभोगबुद्ध्या पतंगवन्नश्यति नष्टदृष्टिः॥ ८ मधुकराच्छिक्षितमाह॥ ९॥ स्तोकं ए०टी०
स्तोकं ग्रसेद्ग्रासं देहो वर्त्तेत यावता। गृहानहिंसन्नातिष्ठेत् वृत्तिं माधुकरीं मुनिः॥ ९ गृहान् गृहस्थानत्रापिहिंसन्नपी ६२
डयन्। अयं भावः। यथा मधुकरो विशिष्टगंधलोलेन एकस्मिन्नेव वसन्नत्र समये मुकुलिते तस्मिन्नबध्यते। एवं मु

निरपि गुणलोलेन एकमेकस्मिन् एकमेव गृहमाश्रितस्तन्मोहेन बध्यते। किंच। अणुभ्यश्चेति॥ १०॥ अणुभ्यश्च म
हद्भ्यश्च शास्त्रेभ्यो मतिमान्नरः। सर्वतः सारमादत्ते पुष्पेभ्य इव षट्पदः॥ १० द्विविधो मधुव्रतः। मधुसंतति पुष्पाद
च्छिद्य गृह्णातीति मधुव्रतो भ्रमरः। मधु करोति ह्योरचेन स्वरूपेणेति मधुमक्षिका च। तत्र प्रथमाच्छिक्षितमु
क्त्वा द्वितीयाच्छिक्षितमाह। सायमिति॥ ११॥ सायंतनं श्वस्तनं वा न संगृह्णीत भिक्षितं। कुर्वाणः संग्रहं भिक्षुर्मक्षि
केव विनश्यति॥ ११ सायंमिदं भोक्ष्यामि श्व इदं भोक्ष्यामीति भिक्षितमन्नादि न संगृह्णीत। किंतु॥ १२॥ पाणिपात्रो
दरामत्रो माक्षिकेव न संग्रही। संगृह्णीता मक्षिकेव सह तेन विनश्यति॥ १२ पाणिपात्रस्तन्मात्रग्राही उदरमेवाम
त्रं पात्रं यस्य सः। एकमेव भिक्षायां च उदरमात्रग्राही भवेत्। संगृह्णीता मक्षिकेव न भवति। किंतु निरयं प्रतिप
द्यतेत्यर्थः। स्पर्शासक्तिर्नाशहेतुरिति गजाच्छिक्षितमाह। पदापीति॥ १३॥ पदापि युवतीं भिक्षुर्न स्पृशेद्दारवीम

पि। स्पृशन्करीव बध्येत करिण्या अंगसंगतः॥१३ पादेनापि दारवीं दारुमयीमपि। गजो हि करिणीं प्रदर्श्य तृणपिहि
तगर्ते निपात्य बध्यते। किंच॥ ब॥ नाधिगच्छेत्स्त्रियं प्राज्ञः कदाचिन्मृत्युमात्मनः॥ बलाधिकैः स हन्येत गजैरन्यैर्गजो य
था॥१४ नाधिगच्छेन्नोपगच्छेत्। त्यागविहीनो धनसंचयः परगामी भवतीत्यत्र मधुहा गुरुरित्याह। न देयमिति॥ ब॥ न
देयं नोपभोग्यं वा लुब्धैर्यद्दुःखेन संचितं। भुंक्ते तदपि तच्चान्यो मधुहेवार्थविन्मधु॥१५॥ तदन्यो बलवान्भुंक्ते तदप
त्यस्य च्चान्यः मधुहा मक्षिकादिभिः संचितं मधु यथा भुंक्ते तद्वत्। ननु सुगुप्तं धनं कथमन्यो ज्ञास्यति हरिष्यति चे
त्। तत्राह। अर्थवित् लिंगैरर्थं तदुपायं च वेत्तीत्यर्थः। यथा तरुकोटरांतरगतं मधु वेत्ति हरति चोपायेन। स्वोद्यमं ए८०
विना पि भोगाः संभवतीत्यत्र स एव गुरुरित्याह। सुदुःखेति॥ ब॥ सुदुःखोपार्जितैर्वित्तैराशासानां गृहाशिषः॥ ६४
मधुहेवाग्रतो भुंक्ते यतिर्वै गृहमेधिनां॥१६ आशासानां नामिति वक्तव्ये वर्णलोप आर्षः। यतिश्च ब्रह्मचारी च प

क्वान्नस्वामिनौ स्मृतौ। तयोरन्नमदत्वा तु भुक्त्वा चांद्रायणं चरेत् इति गृहिणामावश्यकत्वेनान्नदानविधानात्।
हरिणाच्छिक्षितमाह। ग्राम्येति॥ ब॥ ग्राम्यगीतं न शृणुयाद्यतिर्वनचरः क्वचित्। शिक्षेत हरिणाद्बद्धात् मृग
योर्गीतमोहितात्॥१७ भगवद्गीतं तु शृणुयादेव। मृगयोर्लुब्धकस्य हरिणशावदेव हरिणीसुतः ऋष्यशृंगोपि
गुरुर्जात इत्याह। नृत्येति॥ ब॥ नृत्यवादित्रगीतानि जुषन्ग्राम्याणि योषितां। आसां क्रीडनको वश्य ऋष्यशृंगो
मृगीसुतः॥१८ वश्यो बभूवेति शेषः। रसासक्तिर्नाशहेतुरिति मीनाच्छिक्षितमाह। जिह्वयेति॥ ब॥ जिह्वयातिप्र
मथिन्या जनो रसविमोहितः। मृत्युमृच्छत्यसद्बुद्धिः मीनस्तु बडिशैर्यथा॥१९ अतिप्रमाथिन्या अतिक्षोभकया उ
ऊर्ज्यया। ऋच्छति प्राप्नोति। बडिशैः आमिषलिप्तलोहकंटकैः। दुर्जयत्वमुपपादयति। इंद्रियाणीति द्वाभ्यां॥ ब॥
इंद्रियाणि जयंत्याशु निराहारा मनीषिणः। वर्जयित्वा तु रसनं तन्निरन्नस्य वर्धते॥२० अयं भावः। यद्याहारस्त्यज्य

ते तदर्थं चेंद्रियजयः केवलं भवति। रसनेंद्रियं तु वर्द्धते। यदि तु भुज्यते तर्हि पुनः रसासक्त्या सर्वेंद्रियलोलः स्यात्। बा।
तावज्जितेंद्रियो न स्यात् विजितान्येंद्रियः पुमान्। न जयेद्रसनं यावत् जितं सर्वं जिते रसे॥२०॥ अतो रसासक्तिं परि
त्यज्य उपथ्यवद्भुंजीतेति प्राणवृत्त्यैव संतुष्येदित्युक्तमपि रसनस्यातिदुर्जयत्वज्ञापनायोक्तमिति शेषः। पिंग
लायाः नैराश्यं शिक्षितमिति वक्तुं आख्यानमाह। पिंगलेत्यादिना॥ बा॥ पिंगला नाम वेश्यासीद्विदेहनगरे पुरा। त
स्या मे शिक्षितं किंचित् निबोध नृपनंदन॥२१॥ मे मया शिक्षितं॥ बा॥ सा स्वैरिण्येकदा कांतं संकेत उपनेष्यती। अभू
त्काले बहिर्द्वारि बिभ्रती रूपमुत्तमं॥२२॥ स्वैरिणी कामचारिणी। संकेते रतिस्थाने॥ बा॥ मार्ग आगच्छतो वीक्ष्य पुरु एटी०
षान्पुरुषर्षभ। तान् शुल्कदान् वित्तवतः कांतान्मेनेर्थकामुका॥२३॥ तान् वित्तवतः सधनान्। अत एव शुल्कदान् ६५
मूल्यदान्। कांतान् सुरतार्हान् मेने॥ बा॥ आगतेष्वपयातेषु सा संकेतोपजीवती। अप्यन्यो वित्तवान् कोपि मामुपै

ष्यति भूरिदः॥२४॥ अपि संभावनायां अन्योपि मामुपैष्यतीत्येवं दुराशयेत्युत्तरेणान्वयः॥ बा॥ एवं दुराशया ध्वस्तनि
द्रा द्वार्यवलंबिनी। निर्गच्छंती प्रविशंती निशीथं समपद्यत॥२५॥ द्वार्यवलंबमानाः पुनः प्रविशति दृष्ट्वा ततः पुनर्निर्गच्छ
तिष्ठद्धा ध्वदिः। एवं कुर्वती निशीथं अर्द्धरात्रं प्राप॥ बा॥ तस्या वित्ताशया शुष्यद्वक्त्राया दीनचेतसः। निर्वेदः परमो ज
ज्ञे चिंताहेतुः सुखावहः॥२६॥ निर्वेदो ऽलंबुद्धिः चिंतैव हेतुर्यस्य सः॥ बा॥ तथा निर्विण्णचित्ताया गीतं शृणु यथा म
म॥२६ यथा यथावत्। मम मत्तः श्रुणु। ननु निर्विण्णाया गीतश्रवणेन किं। तत्राह। निर्वेद इति॥ बा॥ निर्वेद आशा
पाशानां पुरुषस्य यथा ह्यसिः। न ह्यंगाजातनिर्वेदो देहबंधं जिहासति॥२७॥ हि यस्मात् पुरुषस्य आशापाशानां
निर्वेदो ऽसिर्यथा तथा छेत्ता। तत्र हेतुः। न हीति। अंग हे राजन्॥ बा॥ ॥पिंगलोवाच॥ ॥अहो मे मोहवि
ततिं पश्यताविजितात्मनः। या कांतादसतः कामं कामये येन बालिशा॥२८॥ अविजितात्मत्वे हेतुः। यादृ बालि

शाविवेकदृष्ट्या॥ तदुक्तं। तः। येन कारणेन असंततः। इच्छातू नरातू कामं कामये। बालिशत्वं प्रपंचयति। संतमिति च बालिशः॥
॥बा॥ संतं समीपे रमणं रतिप्रदं वित्तप्रदं नित्यमिमं विहाय। आ कामदं दुःखमयादिशोक मोहप्रदं दुःखमहं सजे
ऋ॥१९॥ समीपे संतं अंतर्यामिनातू। इमं अपरोक्षमीश्वरं॥ बा॥ अहो मयात्मा परितापितो हा यथा सांकेत्य हस्त्याति विग
र्हवार्त्तया। श्रेष्ठेण नरादर्थतृष्णोक्त शोच्यातू क्रीतेन वित्तं रतिमात्मने च्छतीं॥२०॥ अतिविगर्हणीयां याचा वार्त्ताजीविका
तया॥ कृतः॥ सांकेत्येन या हस्तिः तया। बह्वी दिनाद्य विषेषणं वा। परितापं प्रपंचयति। श्रेष्ठेणादिति। श्री लंपटादि
तू। अथवा अर्थतृष्णः॥ लुब्धकातू। अत एवा तु शोच्यान्नरातू। या दृष्टं वित्तं रतिं चेच्छतीं। तया हा यथात्मा परितापितः॥ केन वि ८१०
त्तमिच्छतीं। तेन नरेण क्रीतेन स्वयं विक्रीतेन आत्मना देहेन अहो धिग्मां यादृशमिति। बीभत्सितं तज्जामीत्याह। यदिति॥ ६६
॥७॥ यद्धस्तिभिर्निर्मितं वंशा वंशस्य स्थूणं बचारो मनखेऽपि नद्धं। स्मरवद्वारमगारमेतद्धि एष्मूत्रपूर्णं मंडपेति कान्या॥

॥२१॥ वंशो नाम स्थूणा स्तु निहित तीर्यत्यणुः वंशाख्यस्मिन् अस्थयतो निहिता वेणवः अस्थिरेव निर्मिता वंशादयोऽ
स्मिन्। ततः। तत्र पृष्ठे दीर्घमस्थिय तत्सवंशः। पार्श्वास्थीनि वंश्याः। स्थूणं हस्तपादादीनि। बचारो मा। नेत्रखे अपि न
द्धं छादितं तथापि स्तरंतिन वद्वाराणि यस्मिन् तत्। एवं भूतागारं रूपं नरशरीरं मत्तोऽद्याकावाकां तदुद्याउपे
ति सेवते। सङ्गतो सद्यामपि अहो मममोह इत्याह। विदेहानामिति॥ बा॥ विदेहानां पुरे ह्यस्मिन्नहमेके वस
ढ्धीः। यान्यमिच्छन्त्य सत्यस्मात्। आत्मदा कामम च्युतानू॥२२॥ याहं समती अच्युतादन्यं कामं लोगं इच्छती यास्मा
एवं निर्विण्णा सती अतः परमेवं करिष्यामीत्याह। सुहृदिति॥ बा॥ सुहृत्प्रेष्ठतमो नाथ आत्मा चायं शरीरिणां। तं वि
क्रीयात्मनैवाहं रमेऽनेन यथा रमा॥२३॥ अयमीश्वरः। आत्मनैव आत्मानमेवं विक्रीय विशेषेण क्रीत्वा अनेनेव स
हैरमेर मा लक्ष्मीर्यथा। अन्यथा स्तेदद्द्वर्शयति। कियदिति॥ ब॥ कियत्प्रियं ते व्यभजन्कामाये कामदा नराः॥

आद्यंतवंतो भार्यायाः देवा वा कालविद्रुताः॥ ३४ आद्यंतवंतो ये कामा विषयाः कामदा नरा वा। देवा वा कालकलि
ता। भार्यायाः कियत्प्रियं कृतवंतः। न किंचित् अतो नेहामुत्र तद्व्यतिरिक्तः कोपि सेव्यो ममेत्यर्थः। एवं निश्चित्य स्वभा
ग्यमभिनंदति॥ नूनमिति॥ बा॥ नूनं मे भगवान्प्रीतो विष्णुः केनापि कर्मणा। निर्वेदोयं दुराशाया यन्मे जातः सुखा
वहः॥ ३५ दुष्टाया आशायाः तस्याः मे। ननु धनाप्राप्त्या क्लिष्टासि। कथं विष्णुः प्रीत इत्यत्राह। मैवमिति॥ बा॥ मैवं स्यु
र्मंदभाग्यायाः क्लेशा निर्वेदहेतवः। येनानुबंधं निर्हृत्य पुरुषः शममृच्छति॥ ३६ तेनोपकृतमादाय शिरसा ग्राम्यसं
गता। त्यक्त्वा दुराशाः शरणं व्रजामि तमधीश्वरं॥ ३७ अतस्तेन विष्णुना। उपकृतं कृतमुपकारं निर्वेदलक्षणं ग्रा ए.टी०
म्येषु नरेषु विषयेषु वा संगता। कथं व्रजसि तदाह। संतुष्टेति॥ बा॥ संतुष्टा श्रद्दधत्येतद्यथालाभेन जीवती। विहरा ६७
म्यमुनैवाहमात्मना रमणेन वै॥ ३८ ननु ब्रह्मादीन् हित्वा अमुनैवेति कोयं नियमः। तत्राह। संसारेति॥ बा॥ संसारकू

पे पतितं विषयैर्मुषितेक्षणं। ग्रस्तं कालाहिनात्मानं कोन्यस्त्रातुमधीश्वरः॥ ३९ मुषितेक्षणं। अपहृतविवेकं। त
द्धि किं। आत्मत्राणोपाधिना सन्निधिमता। सर्वतो निर्विद्य। भगवद्भजने प्रवृत्तस्य आत्मान एव समर्थत्वादित्याह।
आत्मैवेति॥ बा॥ आत्मैव ह्यात्मनो गोप्ता निर्विद्येत यदाखिलात्। अप्रमत्त इदं पश्येत् ग्रस्तं कालाहिना जगत्॥ ४० य
दा एवं जगत्पश्येत् ततश्चाप्रमत्तः सन् निखिलात् इहामुत्रभोगात् निर्विद्येत तदा हि आत्मैव आत्मनो गोप्तेत्यन्व
यः। अतः केवलं तमेव तं भजिष्यामीति भावः॥ बा॥ ॥अवधूत उवाच॥ ॥एवं व्यवसितमतिर्दुराशां कांततर्ष
जं। छित्वोपशममास्थाय शय्यामुपविवेश सा॥ ४१ कांतस्य तर्षो भिलाषः। ततो जातां दुराशां। फलितमाह। आशा
हीति॥ बा॥ आशा हि परमं दुःखं नैराश्यं परमं सुखं। यथा संछिद्य कांताशां सुखं सुष्वाप पिंगला॥ ४२॥ ॥बा॥
इति श्रीभागवते महापुराणे एकादशस्कंधे पिंगलागीतं नामाष्टमोऽध्यायः॥ ॥बा॥ ॥ नवमे कुररादिभ्यो

देहतस्थोपशिक्षितं।सुखायदुःखतार्थोन्नतु इतिदृष्टेनवर्णितं॥९कुरराच्छिक्षितमाह।परिग्रहोहीति॥ब॥ ॥
अवधूत उवाच॥ ॥परिग्रहोहिदुःखाययद्यत्प्रियतमंनृणां।अनंतंसुखमाप्नोतितद्विद्वान्यस्त्वकिंचन॥१
यत्यत्प्रियतमंयस्यतस्यपरिग्रहः तद्विद्वान्परिग्रहोदुःखमितिविद्वान्सन्यस्त्वकिंचनःयस्तुपरिग्रहःन
उदरिद्रःसअनंतंसुखमाप्नोति।तदाह।सामिषमिति॥ब॥सामिषंकुररंजघ्नुर्बलिनोयेनिरामिषाः।तदामि
षंपरित्यज्यससुखंसमविंदात॥२मानापमानहीनोधन्यइतिअर्भकशिक्षामाह।नमेति॥ब॥नमेमानापमा
नौस्तोनचिंतागेहपुत्रिणां।आत्मक्रीडआत्मरतिर्विचरामीहबालवत्॥३गेहपुत्रिणांतद्वतांयाभवतिसाच एटी०
मेनास्ति।आत्मनेवक्रीडायस्यआत्मनिरतिःप्रीतिर्यस्य।सः।नन्वज्ञसर्वज्ञयोःकिंसादृश्यं।नेत्यचिंत्यंपरमंसुख ६८
मित्याह।द्वाविति॥ब॥द्वावेवचिंतयामुक्तौपरमानंदआप्लुतौ।योविमुग्धोजडोबालोयोगुणेभ्यःपरंगतः॥

॥४अतिमुग्धःअज्ञः।जडःअनुद्यमः।एवंभूतोयोबालयेश्चप्रवर्ततेःपरमीश्वरंप्राप्तः।तौद्वौ।कुमार्याःशिक्षितं
वक्तुमाख्यायिकामाह।क्वचिदित्यादि॥ब॥क्वचित्कुमारीत्वात्मानंवृणानान्गृहमागतान्।स्वयंतानर्हया
मासकापियातेषुबंधुषु॥५वृणानान्स्ववरणायागतान्।बंधुषुपित्रादिषु।क्वापिक्षेत्रादौ॥ब॥तेषामभ्य
वहारार्थंशालीन्रहसिपार्थिव।अवघ्नंत्याःप्रकोष्ठस्थाश्चक्रुःशंखाःस्वनंमहत्॥६शंखाःवलयाःमहद्यथा
भवतितथास्वनंचक्रुः॥ब॥सातज्जुगुप्सितंमत्वामहतीव्रीडितातनः।बभंजैकैकशःशंखान्द्वौद्वौपाण्योरशे
षयत्॥७तस्स्वयंशाल्यवहननंजुगुप्सितंदरिद्रताद्योतकंमत्वाएकैकशःक्रमेण।एकंएकंबभंज।करयोःदप
धारितवती॥ब॥उभयोरप्यभूद्घोषोह्यवघ्नंत्याःस्मशंखयोः।तत्राप्येकंनिरभिददेकस्मान्नाभवध्वनिः॥८
निरभिदत्पृथक्कृतवती॥ब॥अन्वशिक्षमिमंतस्याउपदेशमरिंदम।लोकाननुचरन्नेतान्लोकतत्त्वविवि

स्रया॥ ९ ननु कुमार्याश्चेव कथं संगतिस्तत्राह। लोकानिति॥ ब॥ वासे बहूनां कलहो भवेद्वार्त्ता द्वयोरपि। एकए
व वसेत्तस्मात्कुमार्या इव कंकणः॥ १० वास इति प्रथमगां तपाठे कलहः कलहहेतुः। वार्त्ता गोष्ठी हेतुर्भवेदित्य
र्थः। चित्तैकाग्रता हेतोः स्फूर्त्तिः लक्षणसमाधिहेतुरिति। एकाग्रमनाः स्वार्थं लभते। नान्य इतीयं बुद्धिः शरक
राच्छिक्षितेत्याह। मन इति॥ ब॥ मन एकत्र संयुंज्याज्जितश्वासो जितासनः। वैराग्याभ्यासयोगेन ध्रियमा
णमतंद्रितः॥ ११ तत्रोपायमाह। जितेति। आसनजये श्वासजयः। तस्य च जये श्वासाधीनं मनो निश्चलं भवति। न
नु रुद्धं निश्चलं भवतु विषयवासनया पुनः विक्षिप्येत तत्राह। किं तत्राह। वैराग्येति। वैराग्येण विक्षिप्यमाणं अभ्यास एटी०
योगानलस्रैर्ध्रियमाणं स्थिरीयमाणं। एकत्रेति कुत्र तत्राह। यस्मिन्निति॥ ब॥ यस्मिन्मनो लब्धपदं यदेतत्श ६९
नैः शनैर्मुंचति कर्मरेणून्। सत्त्वेन वृद्धेन रजस्तमश्च विधूय निर्वाणमुपैत्यनिंधनं॥ १२ यत्र लयविक्षेपात्मकं मन

यस्मिन्परमानंदरूपे भगवति। लब्धास्पदं सत् कर्मरेणून्कर्मवासनाः मुंचति तस्मिन्। ननु कर्मवासनात्यागे
पि पुनः पुनः क्षिप्तलयौ दुर्वारौ। सत्त्वेनेति। वृद्धेन उपशमात्मकेन रजस्तमसोरभावे विक्षेपलयाभावात् निर्वाणं अ
वृत्तिकं ध्येयाकारेणावस्थानमुपैति। कुतः। अनिंधनं। इंधनं गुणाः न कार्यं च तदाह इति। तदुक्तं योगशास्त्रे। मन
सो वृत्तिशून्यस्य ब्रह्माकारतया स्थितिः। या संप्रज्ञातनामासौ समाधिरभिधीयत इति तत्र च नैव तत्स्फूर्त्तिरि
त्याह। तदेति॥ ब॥ तदेवमात्मन्यवरुद्धचित्तो न वेद किंचिद्बहिरंतरं वा। यथेषुकारो नृपतिं व्रजंतमिषौ गता
त्मा न ददर्श पार्श्वे॥ ब॥ १३ बहिर्दर्शनादि अंतरं स्मृत्यादि। इषौ गतात्मा तस्य ऋजुकरणे दत्तचित्तः। भेरीघोषैरं
तिके व्रजंतं नृपतिमपि न वेद तद्वत्। सर्पाच्छिक्षितमाह। एकचारीति॥ ब॥ एकचार्यनिकेतः स्यादप्रमत्तो गुहा
शयः। अलक्ष्यमाण आचारैर्मुनिरेकोऽल्पभाषणः॥ १४ योगिभिर्मर्दृष्ट्यापि त्यागे कुमारी गुरुः जनसंगत्यागे सर्पः

सयथाऽन्नाछंकवं मानः॥एकाकी विचरति।नियतनिकेतरहितश्च।सदाप्रमत्तश्च।एकांतवासीवा।आचारैर्गि
तिलिंगःसविषोनिर्विषोवेति।नलक्ष्यतेवा।असहायश्च।मितभाषीवा।तदत्तुनिवर्त्ततेइत्यर्थः।अनिकेतत्वंप्रशंस
सति।गृहारंभइति॥३॥गृहारंभोतिदुःखायविफलश्चाध्रुवात्मनः।सर्प्पःपरकृतंवेश्मप्रविश्यसुखमेधते॥१५॥
अध्रुवात्मनःनरदेहस्य।सुखंयथानभवति।तथावर्द्धते।कारकसामग्रीनिरपेक्षात्केवलादीश्वरात्विश्वसृष्टि
संहारावूर्णनाभिदृष्टांतेनमयासंभाविताविति वक्तुंप्रथमंसंहारप्रकारमाह।२एकइतिसार्द्धत्रयेण॥३॥
एकोनारायणोदेवःपूर्वसृष्टंस्वमायया।संहृत्यकालकलयाकल्पांतइदमीश्वरः॥१६एकःकारकसामग्रीनि टी०
रपेक्षः।पूर्वसृष्टमिदंजगत्।कालकलयाकालशक्त्यासंहृत्य॥३॥एकएवाद्वितीयोऽभूदात्माधारोऽखिलाश्रयः १०
कालेनात्मानुभावेनसाम्यंनीतासुशक्तिषु॥१७एकएवाद्वितीयःसजातीयविजातीयभेदशून्योऽभूत्।कारण

भूत्।सुसत्त्वादिषुशक्तिष्वपिसाम्यंनीतासुसतीषु॥३॥सत्त्वादिष्वादिपुरुषःप्रधानपुरुषेश्वरः।परावराणांपर
मआस्तेकैवल्यसंज्ञितः॥१८गुणसाम्यंप्रधानंतदुपाधिःपुरुषःतयोरीश्वरः।परावराणांपरेब्रह्मादयःअवरेत्र
न्येचमुक्ताजीवाः।तेषांपरमःप्राप्यः।आस्ते।कुतः।कैवल्यसंज्ञितः।मोक्षशब्दाभिधेयः।तत्रहेतुः।केवलेति॥३॥केव
लानुभवानंदसंदोहोनिरुपाधिकः।केवलात्मानुभावेनस्वमायांत्रिगुणात्मिकां।संक्षोभयन्सृजत्यादौतयासू
त्रमरिंदम॥१९एकेवलोनिर्विशेषःयःस्वप्रकाशःआनंदानांसंदोहःसमूहःपरमानंदइत्यर्थः।कुतः।निरुपाधि
कः।ततःकेवलादेवसृष्टिंदर्शयति।केवलात्मेति।केवलेनात्मानुभावेनकालेनसूत्रंक्रियाशक्तिप्रधानंमहत्त
त्वंसृजति।जीवसंसारहेतुभूतेऽस्मिन्सूत्रेसृष्टेपिचित्रंमाभैरितिसंबोधयति।हेअरिंदम।अरीन्रागादीन्दमयितुंसमर्थाः॥३॥
तामाहुस्त्रिगुणव्यक्तिंसृजतीविश्वतोमुखं।यस्मिन्प्रोतमिदंविश्वंयेनसंसरतेपुमान्॥२०सूत्रस्यैवव्यक्तिशब्देनोक्त

मानस्य तामिति श्रीलिंगेन परामर्शः त्रिगुणत्वमुक्तं गुणत्रयस्य कार्यं अर्थे एतद्वि विश्वतो मुखं नानाविधं त्रिगुणात्मकं विश्वम
हंकारद्वारेण सृजंतीं त्रिगुणकार्यस्य सूत्रसंज्ञायां कारणमाह । यस्मिन्निति । कारणं सूतेस्मिन् समष्टिरूपे यस्मिन् इदं वि
श्वं प्रोतं ग्रथितं । वायुर्वै गौतम सूत्रं वायुना वै गौतम सूत्रेणायं लोकः परश्च लोकः सर्वाणि भूतानि संदृब्धानीति श्रु
तेः येन वा स्वात्मप्राणरूपेण जीवः संसरति । तदेवं शिक्षितमर्थमुक्त्वा दृष्टांतमाह । यथेति ॥ ९ ॥ यथोर्णनाभिर्हृद
यादूर्णां संतत्य वक्त्रतः । तया विहृत्य भूयस्तां ग्रसत्येवं महेश्वरः ॥ २० ॥ हृदयादुद्धृतं वक्त्रतः क्रमेण संतत्य प्रसार्य विहृ
त्य क्रीडित्वा भगवद्ध्यानपराणां तत्सारूप्यं न चित्रमिति पेशस्कृतो भ्रमरविशेषात् दृष्टांतमित्याह । यत्रयत्रेति ॥ ९ ॥ एदी०
यत्र यत्र मनो देही धारयेत्सकलं धिया । स्नेहाद्द्वेषाद्भयाद्वापि याति तत्तत्स्वरूपतां ॥ २१ ॥ सकलं एकाग्रं ॥ ९ ॥ कीटः ७१
पेशस्कृतं ध्यायन् कुड्यां तेन प्रवेशितः । याति तत्सात्मतां राजन् पूर्वरूपमसंत्यजन् ॥ २२ ॥ कुड्यां प्रवेशितः निरुद्ध

न येन तमेव ध्यायन् सात्मतां सारूप्यं साम्यतामिति पाठे त्वार्षः ॥ पूर्वरूपमसंत्यजन्नित्ययं न्यायमभिप्रायः । यद्यतेनै
व देहेनान्य सारूप्यं दृश्यते तदा किं वक्तव्यं देहांतरेण सारूप्यं घटत इति ॥ ९ ॥ एवं गुरुभ्य एतेभ्यः एषा मे शिक्षिता म
तिः । स्वदेहादपि शिक्षितं यच्च तच्छृणुष्व नराधिप ॥ २४ ॥ स्वदेहादेव शिक्षितमाह ॥ स्वात्मेति ॥ ९ ॥ स्वात्मोपशिक्षितं किंचि
त्तु शृणु मे वदतः प्रभो । देहो गुरुर्मम विरक्तिविवेकहेतुः बिभ्रत्स्म सत्त्वनिधनं सततार्त्युदर्कं । तत्त्वान्यनेन विमृशामि य
था तथापि पारक्यमित्यवसितो विचराम्यसंगः ॥ २५ ॥ गुरुत्वे हेतुः । विरक्तिविवेकयोर्हेतुः ॥ विरक्तिमाह । सत्त्वनिध
नं उत्पत्तिविनाशौ बिभर्ति स्म । किंच । सततं आर्त्युदर्कं दुःखमेवोत्तरफलं बिभ्रत् । यद्वा ॥ सततार्तिरेवोदर्कः उत्तर
फलं यस्य तं सत्त्वनिधनं बिभ्रत् । विवेकहेतुत्वमाह । तत्त्वानीति । यथायथावत् । एवमप्युपकारत्वेपि देहे नैवास्था
कर्तव्येत्याह । तथापीति । पारक्यं श्वसृगालादिभक्ष्यमिति निश्चितवान् । सततार्त्युदर्कं तां प्रपंचयति जायेतिद्वाभ्यां

॥ब॥ जायात्मजार्थपशुभृत्यगृहाप्तवर्गान्पुष्णाति यत्प्रियचिकीर्षितया वितन्वन्॥ स्वांते सकृच्छ्रमवरुद्धधनः स देहः सृ
ष्ट्वास्य बीजमवसीदति वृक्षधर्मा॥२६ यस्य देहस्य प्रियचिकीर्षया भोगसंपादनेच्छया जायादिवर्गान्वितन्वन्पुष्णाति।
कथंभूतः सकृच्छ्रं यथा भवति तथा अवरुद्धानि संचितानि धनानि येन स देह विशेषणं वा॥ देहः स्वस्यायुषोंते अव
सीदति नश्यति। किंवा देहनाशेऽपि दुःखसमाप्तिरित्याह। अस्य पुरुषस्य देहांतरबीजं कर्म सृष्ट्वेति। वृक्षस्येव धर्मो
यस्य सः॥ किंच जिह्वेति॥ब॥ जिह्वैकतोऽमुमपकर्षति कर्हि तर्षा शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित्॥ घ्राणोऽन्यत
श्चपलदृक्क च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनंति॥२७ अमुं देहं तदभिमानिनं पुरुषं एकतः रसं प्रति जिह्वा एदी०
आकर्षति। कर्हिकदाचित् तर्षः पिपासा जलं प्रति शिश्नो व्यवायं प्रति। त्वक् स्पर्शं प्रति। उदरमन्नमात्रं प्रति श्रवणो १२
शब्दं प्रति। घ्राणो गंधं प्रति। चपलदृक् रूपं प्रति। क्वचिक्कवित् स्वस्वविषयं प्रति। कर्मशक्तिः। अन्यदपि कर्मेंद्रियं लुनं

ति त्रोटयंति तदेवं देहो गुरुरित्यादित्रिभिर्विरक्तिविवेकहेतुत्वमुपपाद्य इदानीं देहस्यातिदुर्लभत्वं दर्शयन् ईश्वरनि
ष्ठां विधत्ते॥ सृष्ट्वेति द्वाभ्यां॥ब॥ सृष्ट्वा पुराणि विविधान्यजयात्मशक्त्या वृक्षान्सरीसृपपशून्खगदंशमत्स्यान्॥
तैस्तैरतुष्टहृदयः पुरुषं विधाय ब्रह्मावलोकधिषणं मुदमाप देवः॥२८ पुराणि शरीराणि। पुरुषं पुरुषदेहं
ब्रह्मणोऽवलोकाय धिषणा बुद्धिर्यस्मिन् तदुक्तं तासां मे पौरुषी प्रियेति। श्रुतिश्च। पुरुषत्वे चाविस्तरामात्मेति।
तथा। ताभ्यो गामानयत्ता अब्रुवन्न वै नोऽयमलमिति। ताभ्योऽश्वमानयत्ता अब्रुवन्न वै नोऽयमलमिति। ताभ्यः पुरुष
मानयत्ता अब्रुवन् सुकृतं बतेति च॥ब॥ लब्ध्वा सुदुर्लभमिदं बहुसंभवांते मानुष्यमर्थदमनित्यमपीह धीरः॥ तूर्णं
यतेत न पतेदनुमृत्यु यावन्निःश्रेयसाय विषयः खलु सर्वतः स्यात्॥२९ तस्माद्बहूनां संभवानां जन्मनामंते मा
नुष्यं अनित्यमप्यर्थदं पुरुषार्थप्रापकं देवाल्लब्ध्वा इदं अनुमृत्यु अनु निरंतरं मृत्युर्यावन्न पतेत्। शरीरं यावन्न

पतेत् तावदेव दृढं शीघ्रं निःश्रेयसाय यतेत। विषयाः पुनः सर्वतः स्यादियोनिष्वपि स्यादेव। तदेवं हेयोपादेयविवेकं नि
रूप्य इदानीं यदुक्तं चेत्पुकल्पः कविर्दत्त इत्यादि तत्रोत्तरमाह॥ब॥ एवं संजातवैराग्यो विज्ञानालोक आत्मनि। वि
चरामि महीमेतां मुक्तसंगोनहंकृतिः॥३० एवं बहुभ्यो गुरुभ्यः शिक्षितेन विशिष्टं ज्ञानमेवालोकः प्रदीपे यस्य सः॥ स
म्यंतं वा आत्मविशेषणं। आत्मनिष्ठित एव महीं विचरामि। ननु किं बहुभिर्गुरुभिः नहि श्वेतकेतुप्रभृतिभिरेवाब
हवो गुरवः आश्रिताः। तत्राह। न ह्येकस्मादिति॥ब॥ न ह्येकस्माद्गुरोर्ज्ञानं सुस्थिरं स्यात्सुपुष्कलं। ब्रह्मैतदद्वितीयं वै गी
यते बहुधर्षिभिः॥३१ बहुधा सप्रपंचं निःप्रपंचं वेदादिभिः। ते ते परमार्थगुरवः किंचन्च यद्यतिरेकान्यामात्मव्यव ए टी०
सवनादिमात्रनिर्वाहकाः। तेषां च बहुत्वं युक्तमेवेति ज्ञानप्रदं मंत्रप्रदं गुरुमेकमेव वक्ष्यति। मदभिज्ञं गुरुं शांत ७३
मुपासीतेति॥ उक्तं वा तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तममिति॥ब॥ ॥श्रीभगवानुवाच॥ ॥इत्युक्त्वा स यदुं वि

प्रस्तमामंत्र्य गभीरधीः। वंदितोभ्यर्चितो राज्ञा ययौ प्रीतो यथागतं॥३२ विप्रो दत्तात्रेयः। योगर्द्धिमान् पुरुरत्यीयदुदेह
यायाः इत्युक्त्वा तु। यथागतं तथैव यदृच्छया यया विद्यर्थः॥ब॥ अवधूतवचः श्रुत्वा पूर्वेषां नः स पूर्वजः॥ सर्वसंग
विनिर्मुक्तः समचित्तो बभूव ह॥३३ भगवानुद्धवीयं कुलं बहलं विदिति श्लाघति। पूर्वेषां नः सपूर्वज इति वा। अ
त्र संग्रहश्लोकः। कपोतमीनहरिणाः कुमारीगजपन्नगाः। पतंगः कुररश्चाष्टौ हेयार्थे गुरवो मताः। मधुहृन्मधु
कृत्पिंगला च हर्योऽश्र्याः। उपादेयार्थविज्ञाने षोडशेष्वाद्यो मताः। तदेवंतरस्ते दश तत्र स्फुटीकृताः। अ
ध्यायत्रितये चाष्टाविंशतिरीरिताः क्रमात्॥ब॥ ॥ ॥इति श्रीभागवते महापुराणे एकादशस्कंधे चतुर्विंश
तिगुरुव्याख्यानं नाम नवमोऽध्यायः॥ ॥ब॥ ॥चतुर्विंशतिर्गुरुव्याख्यानंतं संसारभावनात्। उद्धवस्यात्मतत्वा
प्येमाधवोक्तिरतः परे॥ दशमे देहसंबंधात् संसृतिरात्मनोच्यते॥ इयेतद्दर्शयामास मतोंतरनिरासतः॥

तदेवमन्वयव्यतिरेकाभ्यांप्रपञ्चविवेकज्ञानस्यतत्त्वज्ञानायादितश्चास्यसाधनान्युपदिशतिभगवान्।मये
ति॥छ॥ ॥श्रीभगवानुवाच॥ ॥मयोदितेष्ववहितःस्वधर्मेषुमदाश्रयः।वर्णाश्रमकुलाचारमकामात्मास
माचरेत्॥१मयापंचरात्राद्युक्तेषुस्वधर्मेष्ववहितःअप्रमत्तःसन्।कथमकामात्मासंभवतितत्राह॥छ॥अन्वी
क्षेतविशुद्धात्मादेहिनांविषयात्मनां।गुणेषुतत्त्वध्यानेनसर्वारंभविपर्ययं॥२स्वधर्मैःशुद्धचित्तःसन्देहिनांवि
षयेषुसत्यत्वाभिनिवेशवतांसर्वेषामारंभाणांफलेवैपरीत्यंपश्येत्।एवंफलवैपरीत्यादकामःस्यात्।किंच।का
म्यविषयाणांमिथ्यात्वादपीत्याह।सुप्तस्येति॥छ॥सुप्तस्यविषयालोकोध्यायतोवामनोरथः।नानात्मकत्वाद्विफ एटी०
लस्तथाभेदात्मधीर्गुणैः॥३विफलोऽर्थस्तस्याः।अत्रैवंप्रयोगः।इंद्रियैर्याबुद्धिर्नानात्वबुद्धिःसाविफला।नानात्म ७४
कत्वादैंद्रियकत्वात्स्वप्नमनोरथवदिति।मोक्षार्थीनप्रवर्त्तेततत्रकाम्यनिषिद्धयोः।नित्यंनैमित्ति

कंकुर्यात्प्रत्यवायजिहासया।ननुभगवानुक्तत्परःकिंकुर्यात्किंवापरिहरेदितिनिश्चयेनब्रूहीतिपृष्टःप्राहभग
वान्॥छ॥निवृत्तंकर्मसेवेतप्रवृत्तंमत्परस्त्यजेत्।जिज्ञासायांसंप्रवृत्तोनाद्रियेत्कर्मचोदनां॥४अतःप्रवृत्तंकाम्यं
कर्मत्यजेत्।निवृत्तंनित्यनैमित्तिकमेवकुर्यात्।आत्मविचारेसम्यक्प्रवृत्तोनिवृत्तकर्मचोदनामपिनाद्रियेत।किं
च॥छ॥यमानभीक्ष्णंसेवेतनियमान्मत्परःक्वचित्।मदभिज्ञंगुरुंशांतमुपासीतमदात्मकं॥५यमान्नुअहिंसादीन्
अभीक्ष्णंआदरेणसेवेत।शौचादीन्नियमांस्तुक्वचिद्यथाशक्ति।तदाच्चात्मज्ञानावरोधेन।यमान्द्वादशनियमानपि
एकोनविंशोध्यायेवक्ष्यति।किंच।यमेष्वप्यादरंपरित्यज्यमुपासीतेत्याह।मदभिज्ञमिति।मदात्मकंमद्रूपंगुरुं।
सेवकस्यधर्मानाह।अमानीति॥छ॥अमान्यमत्सरोदक्षोनिर्ममोदृढसौहृदः।असत्वरोऽर्थजिज्ञासुरनसूयुरमोघ
वाक्॥६यथाफलेननलिप्येततथावर्तमानः।दक्षोऽनलसः।निर्ममःजायादिषुममताशून्यः।गुरौतुदृढसौहृदः।

सत्वरः अव्यग्रः । अमोघवाक् वृथालापरहितः । एतान्येव शिष्यलक्षणानि । ननु जायादिषु कथं निर्ममः स्यात्तत्राह ॥ जा
येति ॥ ब ॥ जायापत्यगृहक्षेत्रस्वजनद्रविणादिषु । उदासीनः समं पश्येत् सर्वेष्वर्थमिवात्मनः ॥ ७ ॥ उदासीन्ये हेतुं वि
वेकं दर्शयति । आत्मनोऽर्थप्रयोजनं सर्वत्र सममेव पश्यन्निति । अयं भावः । सर्वदेहेष्वात्मनः एकत्वात् जायादिदेहेष्वा
त्मनोऽर्थः सुखादिः सम एव केन विशेषेण तेष्वेव ममत्वाभिनिवेशः इत्येवमुदासीनो गृहं प्रपद्येत । अहो कोऽसौ देहव्य
तिरिक्त आत्मा । यस्यैक्यादर्थः सर्वेषु समः स्यात् तमाह । विलक्षण इति ॥ ब ॥ विलक्षणः स्थूलसूक्ष्माद्देहादात्मेक्षिता
स्वदृक् । यथाग्निर्दारुणो दाह्यात् दाहकोऽन्यः प्रकाशकः ॥ ८ ॥ स्थूलसूक्ष्मदेहद्वयादात्मान्यः । यतो विलक्षणः । द्वेधा वैल एटी०
क्षण्यं दर्शयति । ईक्षिता स्वदृगिति । द्रष्टादिदृश्याद्विलक्षणः । स्वप्रकाशश्च जडाद्विलक्षणः । विलक्षणत्वाच्चैव दृष्टां १५
तः । यथाग्निर्दाहकः प्रकाशकश्च । दाह्यात् प्रकाश्यात् दारुणः काष्ठात् अन्यस्तद्वदिति । अनेनैव दृष्टान्तेन नित्यत्वमन

दिष्वेकत्वाद्योऽपि सिध्यंतीत्याह । निरोधेति ॥ ब ॥ निरोधोत्पत्त्यणुबृहन्नानात्वं तत्कृतान् गुणान् । अन्तःप्रविष्ट आ
धत्त एवं देहगुणान् परः ॥ ९ ॥ यदा दारुष्वंतः प्रविष्टोऽग्निः तत्कृतान् नाशादीन् प्राप्नोति । नतु स्वतो नाशादिमान् । अंतःप्र
विष्ट आधत्ते एवं देहगुणान् नित्यत्वादीन् देहात्परो नित्यादिस्वरूप्यात्मानुभवति । ततश्चानित्यत्वादिभिरपि वैलक्षण्य
दृश्यत्वमिति भावः । नन्वग्नेर्दारुसंयोगात् तद्धर्मलाभः कं घटते । आत्मनस्त्वसंगत्वात् देहेन तद्धर्मैर्वा कथं संबंधः संबंधे
वा कुतस्तन्निवृत्तिः । तत्राह । योऽसाविति ॥ ब ॥ योऽसौ गुणैर्विरचितो देहोऽयं पुरुषस्य हि । संसारस्तन्निबंधोऽयं पुंसो वि
द्याच्छिदात्मनः ॥ १० ॥ पुरुषस्येश्वरस्याधीनैर्मायागुणैः । योऽसौ सूक्ष्मः अयं स्थूलो देहो विरचितः । पुंसो जीवस्यायं सं
सारस्तन्निबंधनः । तदध्याससंभूतः । हि यस्मादेवं तस्मादात्मविद्या तन्निवर्तिकेत्याह । आत्मनो विद्या विज्ञानं तच्छि
त्छेत्री । आत्मच्छिदिति वा पदच्छेदः । तस्मादेवं ॥ ब ॥ तस्माज्जिज्ञासयात्मानमात्मस्थं केवलं परं । संगम्य निरसेदेतद्व

श्चबुद्धिंयथाक्रमं॥११तस्माज्जिज्ञासमयाविचारेणआत्मस्थंकार्यकारणसंघातेएवस्थितंसम्यक्ज्ञात्वाएतस्मिन्दे
हादौवस्तुबुद्धिंस्थूलसूक्ष्मक्रमेणनिरसेत्।गुरोर्लब्धाविद्याअविद्यातत्कार्यनिरसनक्षमेतिस्फुटीकर्तुंविद्योत्पत्तिम
स्फत्यत्तिरूपकेणनिरूपयंति।आचार्यइति॥ब॥आचार्योरणिराद्यःस्यात्अंतेवास्युत्तरारणिः।तत्संधानंप्रवचनं
विद्यासंधिःसुखावहा॥१२आद्यःप्रथमः।तत्संधानंतयोर्मध्यंमथनकाष्ठंप्रवचनंउपदेशः।विद्याचसंधिःसंधौल
वन्नग्निरिव।तथाचश्रुतिः।आचार्यःपूर्वरूपंअंतेवास्युत्तररूपंविद्यासंधिःप्रवचनंसंधानमिति।अग्निसादृश्यमे
वाहा।वैशारदीरिति॥ब॥वैशारदीसातिविशुद्धबुद्धिर्धुनोतिमायांगुणसंप्रसूतां।गुणांश्चसंदाह्ययदात्ममेतत्स्व ए.टी.७
यंचशाम्यत्यसमिद्यथाग्निः॥१३विशारदोनिपुणः।तेनशिष्येणप्राप्तातेनगुरुणोपदिष्टावाअतिविशुद्धाबुद्धिःगु ७६
णकार्यरूपांमायांनिवर्तयति।यदात्मकमेतद्विश्वंजीवस्यसंसृतिनिमित्तंतान्गुणांश्चदग्ध्वाअस्तमितनिरिंधनः

तस्मात्कार्येणकारणेनविद्यायाश्चव्यवधानाभावात्साक्षात्परमानंदरूपोभवतीति।एवंतावत्स्वप्रकाशज्ञानस्व
रूपोनित्यएकएवात्माकर्तृत्वादयश्चधर्मास्तस्यदेहोपाधिकाः।तद्व्यतिरिक्तंचसर्वमनित्यंमायामयंचअतःसर्वतोवि
रक्तःसन्आत्मज्ञानेनमुच्यते।इत्युक्तंविलक्षणस्थूलसूक्ष्मादिना।तदेवंश्रुतिसमन्वयेननिर्णीतेप्यर्थेमतांतर
विरोधेनसंदेहोमाभूदितितन्मतंनिराकर्तुमुपन्यस्यति।अथेति॥ब॥अथैषांकर्मकर्तृणांभोक्तृणांसुखदुःखयोः
नानात्वमथनित्यत्वंलोककालागमात्मनां॥१४अथमन्यसेएषांजीवात्मनांकर्मकर्तृणांसुखदुःखयोर्भोक्तृणांचना
नात्वमिति।एवंहिजैमिनीयामन्यंते।अहंप्रत्ययग्राह्यएवात्मासचप्रतिशरीरंभिन्नःकर्ताभोक्तारूपश्च।नतुतस्यस्वरूप
भूतोनिर्विकारः।एकःपरमात्मास्तीति।यथाहुः॥अहंप्रत्ययविज्ञेयोज्ञाताद्यःसर्वदेवदीति।तथावैराग्यंचनसंभवती
ति।तथाहि।भोगस्थानानामनित्यत्वात्वैराग्यंभवेत्तुभोगकालस्यवातदुपायकर्मबोधकागमस्यवा।भोक्तुरात्मनो

वानचैतदस्तीत्याह। अथेति। अथ नित्यं लोककालागममात्मनां मन्यस इति। लोकांतरे कालांतरे चागमनरूपा आत्मानो
यषां मिति वा। न च सोग्यानां विछेदात् मायामयत्वाद्वा वैराग्यं स्यादित्याह। मन्यसे इति॥ब॥ मन्यसे सर्वभूतानां संस्था
योत्पत्तिकीर्यथा। तत्र दान्हतिलोम्भेन देनजायते स्रियते च धीः॥२५ सर्वभावानां अंकुरचंदनादीनां संस्थास्थिति। अत्पत्ति
कीप्रवाहरूपेण नित्या तथा च वदंति। न कदाचिदनीदृशं जगदिति। अत एव कर्त्ता कश्चिदीश्वरोपि नास्तीति भावः। किं
चा यथा यथावत् न तु मायामयीत्यर्थः। न चात्मस्वरूपस्तं नित्यमेकं ज्ञानमस्तीत्याह। तत्रदिति। घटपटाद्याका
स्त्रेदेन धीरुत्पद्यते। अतो नित्या नियते च। अयं गूढोभिप्रायः। न हि निश्चयज्ञानस्वरूप आत्मा। अपि तु ज्ञानपरिण १८।०
मवान्। न च विकारित्वेन अनित्यत्वप्रसंगः। यथाहुः। विक्रियाज्ञानरूपाया न नित्यत्वे विरोध्यत इति। अतो मुक्तावि ११
क्रियादिरहितस्य परिणामासंभवात् जडत्वेन तत्प्राप्ते रपुरुषार्थत्वात् प्रवृत्तिरेव श्रेयसी न निवृत्तिरिति। तत्रता

वद्रूक्तमंगीकृत्य वैराग्योपपादनाय प्रवृत्तिमार्गस्यानर्थहेतुत्वं प्रपंचयति। एवमपीत्यादिना। लोकानां लोकपालानामि
च्यतः प्रोक्तेन ग्रथोन॥ब॥ एवमप्युं ग सर्वेषां देहिनां देहयोगतः। कालावयवतः संति भवाजन्मादयो सन्तु॥२६ अंग
हेउद्व। कालावयवतः संवत्सरादिरूपात्। तत्रापीति॥ब॥ तत्रापि कर्मणां कर्त्तुरिष्ठातं च्युं चलत्स्यते। सोकुश्च सुख
डःखानां कोन्वर्थो विविशं स्नजेत्॥२७ स्वातंत्र्यपक्षे कर्मणो डःखसोगस्य वासंभवादित्यर्थः। नत्वये सम्यक् कर्मकर्तुं
जानंति वे सुखिन एव। ये तु न जानंति त एव डःखिन एइति चेत्तत्राह॥नेति॥ब॥ न देहिनां सुखं किंचित् विद्यते विदुषाम
पि। तथा च डःखं मूढानो हथाहं करणं परं॥२८ विदुषामपि कृचित् सुखं न विद्यते। तथा मूढानामपि डःखं न। अतो वयं क
र्मकुशलत्वात् सुखिन इति तेषां वृथैवाहंकार इत्यर्थः॥ब॥ यदि प्राप्तिं विघातं च जानंति सुखडःखयोः। ते प्यद्धा न वि
डुर्योगं मृत्युर्न प्रभवेद्यथा॥२९ अंगीकृत्याप्याह। तं योगं उपायं न विडुः। यथा मारुतान्मृत्युर्न प्रभवेत्। तथापि याव

ह्नीवंसुखंनविश्यतीतिचेन्नेत्याह॥कोन्विति॥ब॥कोन्वर्थःसुखयत्येनंकामोवामृत्युरंतिके।आघातंनीयमानस्येव
ध्यस्येवनतुष्टिदः॥२०यतःअंतिकेवर्त्तमानोमृत्युर्नतुष्टिंददाति।आघातंवधस्थानंप्रति।एवमस्मिन्‌लोकेसुखंना
स्तीत्युक्तं।लोकांतरेपितथैवेत्याह॥ब॥श्रुतमिति॥ब॥श्रुतंचदृष्टंवडुष्टंस्पर्द्धाह्रियाश्रयश्रये।बहुंतरायकामचा
त्‌ऋषिवच्चापिनिष्फलं॥२१श्रुतंस्वर्गादितदपिदृष्टं।स्पर्द्धापरसुखासहनं।असूयापरगुणेदोषाविःकरणं।अन्य
योनाशः।द्वयोरपरः।यःतैर्दुष्टो।यद्वा।द्वयोर्नाशः।अन्ययोरन्यस्यापिशापः।तंदृष्ट्वादग्धास्याद्दुःखमित्यर्थः।किंचाबहु
वोंतरायाविघ्नएयादिरूपाविघ्नायस्मिन्‌।कामसुखे।तस्यनावश्यत्वंतस्माद्ऋषिर्यथाबहुविघ्नातद्वत्‌।बहुसुखत्वेन प०टी०
श्रुतमपिनिष्फलं।विघ्नवैगुण्याद्यनावमंगीकृत्यापिनाशदुःखंदुःपरिहरमित्याह।अंतरायेरितिपंचमिः॥ब॥अंत ७८
येरविहतोयदिधर्मःस्वनुष्टितः।तेनापिनिर्जितंस्थानंयथागच्छतितच्छृणु॥२२निर्जितंप्राधितं॥ब॥इन्द्रदेवता

यज्ञैःसुव्रतैःकिंयातियाज्ञिकः।भुंजीतदेववत्तत्रभोगान्‌दिव्यान्‌निजार्जितान्‌॥२३यज्ञैःदेवताइंद्रादिरूपाइष्टा॥ब॥
स्वधर्मोपचितेसुश्रेविमानउपगीयते।गंधर्वैर्विहरन्मध्येदेवीनांहृद्यवेषभृत्‌॥२४स्वगुणेरुपचितेसर्वभोगसंपन्ने
देवीनांमध्येविहरन्‌गंधर्वैर्गीयते॥ब॥क्रीडाःकामगयानेनकिंकिणीजालमालिना।क्रीडन्नवेदात्मपातंसुराक्री
डेषुनिर्वृतः॥२५कामेनइच्छयागच्छताविमानेनकिंकिणीजालमालिनाक्षुद्रघंटिकासमूहशोभिना।सदाक्रीडाः
सुराक्रीडेषुनंदनादिषुक्रीडन्‌आत्मपातंनवेद॥ब॥तावत्प्रमोदतेस्वर्गेयावत्पुण्यंसमाप्यते।क्षीणपुण्यःपतत्य
र्वाक्‌अनिच्छन्‌कालचालितः॥२६कालेनचालितःपातितः।प्रवृत्तिर्द्विविधा।विध्युत्सारेणकाम्येनकर्मणा।तल्लं
घनेनअधर्मेणवा।तत्रकाम्यप्रवृत्तेर्गतिरुक्ता।अधर्मप्रवृत्तेर्गतिमाह।यदीति॥ब॥यद्यधर्मरताःसंगाद्रस्तावाजि
तेंद्रियः।कामात्माकृपणोबुद्ध्याक्रूरेणाभूतविहिंसकः॥२७यदिवेत्यन्वयः।अजितेंद्रियत्वात्‌कामात्मा।अतःकृपण

न्नतोल्बणः स्रोगदृष्टाकुलः। अतः श्रेणः स्त्रीलंपटः। तदर्थं च भूतदिहिंसकः॥ किंच। दुःखजनकलोलितः॥ ब॥ पशूनवि
धिनालभ्य प्रेतभूतगणान्यजन्। नरकानवशो जंतुर्गत्वा यात्युल्बणं तमः॥ २७ धनाद्यर्थं पशून् अविधिना हत्वा तद
धिनालभ्य प्रेतभूतगणान्यजन्। नरकानवशो जंतुर्गत्वा यात्युल्बणं तमः॥ २८ अनाद्यर्थं पशून् अविधिना हत्वा तद
स्थावरतां याति। एवं कर्मसु प्रवृत्तस्य न सुखं न सुखं न च निःकृतिरित्युपसंहरति। कर्माणीति॥ ब॥ कर्माणि दुःखो
दर्काणि कुर्वन् देहेन तैः पुनः। देहमाभजते तत्र किं सुखं मर्त्यधर्मिणः॥ २९॥ तथापि लोकानां नित्यत्वात् अमर्त्यधर्मत्वा
न्मत्तू लोकपालानां सुखमस्तीति चेत्तत्राह। लोकानामिति॥ ब॥ लोकानां लोकपालानां मद्भयं कल्पजीविनां। ब्रह्म
णोपि भयं मत्तो द्विपरार्द्धपरायुषः॥ ३० द्वौ परार्द्धौ परमायुर्यस्य ब्रह्मणोपि। तथा च श्रुतिः। भीषास्माद्वातः पवते भी ५८।०
षोदेति सूर्यः। भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचमः इति। अतः प्रवृत्तिमार्गस्यैवमनर्थहेतुत्वात् विरक्त्यात् ततो निवृ ७९
त्तिरेव श्रेयसीति तात्पर्यार्थः। एतेनैव स्वयमीश्वरत्वाविकारेणानीश्वरसांख्यांगीकारापरिग्रहः॥ अन्यदपि श्रोघा

कृत्वमंगीकृतं निराकरोति चतुर्भिः। तत्र यदुक्तं कर्मसोक्तृरूपश्चात्मेति। तन्निराकरोति गुणा इति॥ ब॥ गुणाः सृजंति क
र्माणि गुणोनुसृजते गुणान्। जीवस्तु गुणसंयुक्तो भुंक्ते कर्मफलान्यसौ॥ ३१ गुणाः इंद्रियाणि कर्माणि सृजंति न त्वा
त्मा। न चात्मैवेंद्रियाणि प्रवर्त्तयन् कर्माणि करोतीति चेत्। नेत्याह। गुणः सत्वादिः गुणानिंद्रियाणि अनुसृजति प्र
वर्त्तयति न त्वात्मा। अतः आत्मनः कर्तृत्वं तावन्नास्ति। भोक्तृत्वमप्यौपाधिकमित्याह। जीवस्त्विति। गुणसंयुक्तः इंद्रिया
दिसंयुक्तः। कृतश्च यतस्त्वाह। असौ तेषु दंकारवान्नित्यर्थः। यच्चोक्तमात्मनो नानात्वं तदप्यौपाधिकमित्याह। यावत्स्या
दिति॥ ब॥ यावत्स्याद्गुणवैषम्यं तावन्नानात्वमात्मनः। नानात्वमात्मनो यावत् पारतंत्र्यं तदेव हि। यावदस्यास्वतंत्र
त्वं तावदीश्वरतो भयं। य एतत्समुपासीरंस्ते मुह्यंति शुचार्पिताः॥ ३२ एतद्गुणवैषम्यं तत्कृतं भोगं कर्मवित्यर्थः। स
मुपासीरन् सेवेरन्। लोकादीनामनित्यत्वात् शुचार्पिताः शोकाः संतो मुह्यंति। न केवलमनित्यता मात्रं किं तु माया

मयत्वमर्पयेत्यादि। काल इति॥३॥ कालआत्मागमो लोकः स्वभावो धर्म एव च। इति मां बहुधा प्राहुर्गुणव्यतिकरे सति॥३३॥
स्वभावो देवत्वादिपरिणामहेतुः। धर्मः सुखभोगकारणं। गुणव्यतिकरे मायाक्षोभे सति मामेव प्राहुः। न तु मद्व्यतिरिक्ताः सं
ति। ततो निवृत्तिरेव मुक्तिहेतुत्वात् श्रेयसीति सिद्धं। एवं तावदेक एवात्मा तस्य च गुणकार्यदेहसंबंधस्ततः संसारश्चा
त्मज्ञानाच्च मुक्तिरित्युक्तं। विलक्षणः स्थूलसूक्ष्म इत्यादिना तदेव च मतांतरनिरासेन दृढीकृतं। अथैषामित्यादिना तत्र
पृच्छति। गुणेष्विति॥३॥ ॥उद्धव उवाच॥ ॥गुणेषु वर्तमानोपि देहजेष्वनपावृतः। गुणैर्न बध्यते देही बध्यते वा क
थं विभो॥३४॥ अयमर्थः। गुणेष्वयमस्तु मुक्तिः सत्त्वेव वा। आद्ये ज्ञानसाधनाभावान्न मुक्तिः। द्वितीये च गुणेषु वर्तमा ए.टी.
नोपि तत्कार्यदेहजेषु कर्मसु सुखादिषु कथं न बध्यते। तथापि ते आकाशवदनावृतत्वान्न बध्यत इति चेत्तर्हि विवेकेथं स ८०
तद्योगेन संभवतीत्यादि। अनपावृतस्य तु गुणैः कथं बध्यत इति। यद्वि सत्त्वेव तद्देहकारणं बध्यते। तन्निवृत्त्या च मु

च्यत इति मतं। तर्हि तत्कथं ज्ञातव्यमिति पृच्छति। बद्धो मुक्तो वा कथं वर्ततेत्यादि॥३॥ कथं वर्तेत विहरेत्कैर्वा ज्ञायेत ल
क्षणैः। किं भुंजीतोत विसृजेत शयीतासीत याति वा॥३५॥ किं भुंजीत कथं भुंजीतेत्यर्थः॥३॥ एतदच्युत मे ब्रूहि प्रश्नं
प्रश्नविदां वर। नित्यबद्धो नित्यमुक्त एक एवेति मे भ्रमः॥३६॥ एतत् एतद्विषयं प्रश्नं। एक एवात्मा अनादिगुणसंबंधात्
नित्यबद्धः। मुक्तेर्नित्यत्वे च अनित्यत्वप्रसंगात् नित्यमुक्त इत्यप्यंगीकार्यं स्यात्। तत्र मे भ्रमो भवतीत्यादि। नित्यबद्ध इति॥
॥३॥ ॥इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे दशमोऽध्यायः॥ ॥३॥ ॥एकाद
शेऽत्र मुक्तानां बद्धानां चापि लक्षणं। साधूनां च तथा भक्तेर्लक्षणं हरिणोदितं॥१॥ नित्यबद्धे नित्यमुक्तौ एवेति मे भ्रम इति
यदुक्तं। तत्किं वस्तुतो विरोधान्न तीतिनो वा। नाद्यः बंधमोक्षयोर्वास्तवत्वाभावादित्यादि। बद्धो मुक्त इति द्वाभ्यां॥३॥
॥ ॥श्रीभगवानुवाच॥ ॥बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः। गुणस्य मायामूलत्वान्न मे मोक्षो न बं

नं॥१॥ आत्मा बद्धो मुक्तश्च मे गुणतः मदधीनसत्त्वादिगुणोपाधितः॥ न तु वस्तुतः। न चोपाधिकत्वेपि तंडुलपाकादिव
द्वास्तवत्वं किं न स्यात्। तत्राह। गुणस्य मायामूलत्वात् बंधनं नास्ति अत एव मोक्षश्च नास्तीति॥ ननु कथं सर्वशास्त्रवि
रुद्धमुच्यते। तत्राह। इति मे व्याख्येति। एवं मद्वचनतो निर्णयः॥ अलमतिकुतर्कैरित्यर्थः॥ अथ चैवमन्वयः। आत्मा बद्धो
मुक्त इति याऽपि व्याख्या उक्तिः॥ सा मे गुणतः मद्गुणपारतंत्र्यात् अत्र हेतुकत्वेन गुणनियंतरि स्वस्मिंस्तद्व्यतिरेकमा
ह। अत एव न बंधनं मोक्षश्चेति अन्वयः समानं। एवं कारणभूतगुणानां मायामयत्वात्। तत्कार्यं संसृतिर्मायैवेति प्रपंच
यति। शोकमोहाविति॥ बा॥ शोकमोहौ सुखं दुःखं देहापत्तिश्च मायया। स्वप्नो यथात्मनः ख्यातिः संसृतिर्न तु वास्तवी॥ एटी० ८२
॥२॥ यथा स्वप्ने आत्मनो बुद्धेरेव ख्यातिर्विवर्तस्तद्वत्। अतो वस्तुविरोधस्याभावान्नास्ति प्रतीतिश्चोपाधिकी घटत इत्याह
विद्याविद्ये इति॥ बा॥ विद्याविद्ये मम तनू विद्ध्युद्धव शरीरिणां। बंधमोक्षकरी आद्ये मायया मे विनिर्मिते॥३॥ तच्चेत बंध

मोक्षावास्यामिति तनू शक्ती कृते। मे मायया विनिर्मिते। मायावृत्तिरूपत्वात्। बंधमोक्षकरी इत्येकवचनं द्विवचनार्थे
न च तत्कार्यत्वे बंधमोक्षयोरनादित्वं न स्यात्। तात्र। आद्ये। अनादी यतो यावदविद्यां प्रवर्तयामि तावद्बंधः। यदा विद्यां
दधामि तदा मोक्षः स्फुरतीति। तथा च स्कंदपुराणे। बंधको भवपाशेन भवपाशाच्च मोचकः। कैवल्यदः परं ब्रह्म विष्णु
रेव सनातन इति। तत्र शरीरिणामिति बहुवचननिर्देशात् विषयभेदेन अविरोध उक्त इति भ्रांतिं व्यावर्तयन् बंधमोक्ष
व्यवस्थामुपपादयति। एकस्यैवेति॥ बा॥ एकस्यैव ममांशस्य जीवस्यैव महामते। बंधोऽस्याविद्ययाऽनादिर्विद्यया च तथेत
रः॥४॥ तर्हि किमात्मभेदात्तथापि बंधः। न हि नेत्याह। अंशस्य जीवस्यैव न त्वात्मभेदे जीवो नाम कोप्यस्ति। कथं च बंध
मोक्षसुखदुःखादिव्यवस्था। तत्राह। ममांशस्य। अयं भावः। यथैकस्यापि चंद्रादेः जलाद्युपाधिना बिंबप्रतिबिंबरू
पो भेदः यथा जलगताः कंपादयः तद्वत्प्रतिबिंबस्यैव। यथा च तत्र प्रतिबिंबानामुपाधिभेदेन भेदादेकस्मिन्सुद

ऽंसेव ग्रेतकृतप्रतिबिंबस्यैव बिंबैक्यं। नान्यगतस्य। तथा। अविद्यायां प्रतिबिंबितस्य मदंशस्य जीवस्यैव तत्कृतो बंधः तस्य

शोपाधितो भेदान्नस्य वस्तेति। तथा चाहुः। यथैकस्मिन् घटाकाशे रजोधूमादिभिर्युते। न सर्वे संप्रयुज्यंते तथा जीवाः सुखा

दिभिरिति। एतच्चातिरहस्यं सद्युक्त्या निश्चेतव्यमिति संबोधयति। द्वेमद्यामते। इतरो मोक्षः। तदेवं बंधव्यवस्थामुपपाद्य क

थं वर्ततेत्यादि विलक्षणप्रश्नस्योत्तरमाह। अथेति॥८॥ अथ बद्धस्य मुक्तस्य वैलक्षण्यं वदामि तो विरुद्धधर्मिणोस्तात

स्थितयोरेकधर्मिणि॥ एवं वैलक्षण्यं द्विविधं जीवेश्वरयोरेकं जीवानां चैकं। तत्र जीवेश्वरयोर्वैलक्षण्यमाह। विरुद्धधर्मिणो

रिति। सार्द्धद्वयेन। शोकानंदधर्मवतोः। एकस्मिन् धर्मिणि शरीरे। नियम्यनियंतृत्वेन स्थितयोः॥८॥ सुपर्णाविति। सु श्वे०टी०

दृशौ सखायौ यदृच्छयाकृतनीडौ च वृक्षे। एकस्तयोः खादति पिप्पलान्नमन्यो निरन्नो बलेन भूयान्॥ इ सुपर्णौ हि सु ८२

तृपक्षिणाविव देहात्पृथक्स्थितौ। सदृशौ चिद्रूपत्वात्सखायौ अवियोगादेकमत्स्याच्च। यदृच्छया अनिरुक्तया माय

या। वृक्षतः इति वृक्षोपमो देहः। ऊर्ध्वमूलमवाक्शाखं वृक्षं यो वेद संप्रतीति श्रुतेः। ऊर्ध्वमूलमधः शाखमश्व

त्थं प्राहुरव्ययमिति स्मृतेः। तस्मिन्कृतं नीडं निकेतं हृदयरूपं याभ्यां तौ। तयोर्मध्ये एको जीवः पिप्पलान्नं पि

प्पलो देहः तस्मिन्नदनीयं कर्मफलं भुंक्ते। अन्यः ईश्वरो निरन्नः असौ कापि निजानंदतृप्तो बलेन ज्ञानादिशक्त्या

भूयान् अधिकः। श्रुतिश्च। द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। एकस्तयोः पिप्पलं स्वाद्वत्त्यनश्न

न्नन्यो अभिचाकशीति। बलाधिक्यमेवाह। आत्मानमिति॥८॥ आत्मानमन्यं च स वेद विद्वान पिप्पलादो न तु पि

प्पलादः। यो विद्यया युक्तः स तु नित्यबद्धो विद्यामयो यः स तु स नित्यमुक्तः॥७॥ अतः यो० विद्यया युक्तः युक्तः स तु नि

त्यबद्धः। यस्तु विद्याप्रधानः स तु नित्यमुक्तः। मायाया अनावरकत्वात् आश्रयाद्व्यामोहकत्वाच्च इदानीं बद्धमुक्तजी

वानामेव मिथो वैलक्षण्यमाह। देहस्थोपीति दशभिः॥८॥ देहस्थोपि न देहस्थो विद्वान्स्वप्नाद्यथोत्थितः। अदेह

स्थोपि देहस्थः कुमतिः स्वप्नदृग्यथा॥८॥ विद्वान्मुक्तः संस्कारवशेन देहे वर्त्तमानोपि देहस्थो न भवति। यथा स्वप्नादु
त्थितः स्मर्यमाणे स्वप्नदेहे स्थितोपि तत्रस्थो न भवति। तद्गतसुखदुःखाद्यभावात्। तथा वस्तुतः अदेहस्थोपि कुमतिः।
अविद्वान् देहस्थः तन्निमित्तसुखदुःखभाक्। यथा स्वप्नदेहगत इति। अत्र देहेवेन वैलक्षण्यांतरमाह। इंद्रियैरि
ति॥ब॥ इंद्रियैरिंद्रियार्थेषु गुणैरपि गुणेषु वा। गृह्यमाणेष्वहं कुर्यात् न विद्वान्यस्त्वविक्रियः॥९॥ इंद्रियैरिंद्रियार्थे
षु गृह्यमाणेष्वपि यस्तु विद्वान् स नाहं कुर्यात् अहं द्रष्टास्मीति मतिं न कुर्यादित्यर्थः। कुतः। गुणैरिंद्रियैर्गुणेषु विष
येषु गृह्यमाणेषु अत एवाविक्रियः रागादिशून्यः। तदुक्तं। गीतासु। तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः। गुणा ए.टी.०
गुणेषु वर्त्तंत इति मत्वा न सज्जत इति॥ब॥ दैवाधीने शरीरेस्मिन् गुणभाव्येन कर्मणा। वर्त्तमानोबुधस्तत्र कर्ता ८३
स्मीति निबध्यते॥१०॥ अबुधस्तु पूर्वकर्माधीने शरीरे वर्त्तमानः गुणैरिंद्रियैर्भाव्येन कर्मणा तत्र देहादौ निबध्य

ते। कुतः। कर्त्तास्मीत्यहंकारेण। तदुक्तं। तत्रैव। प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। अहंकारविमूढात्मा क
र्त्ताहमिति मन्यत इति। एतैस्त्रिभिः कथं वर्त्तेताद्यप्रश्नस्य सुखदुःखस्पृष्टयोनिरभिमानादेहे वर्त्तेतेत्युत्तरमुक्तं भ
वति। वैलक्षण्यांतरं वदन् किं भुंजीतेत्यादिप्रश्नोत्तरमाह। एवमिति त्रिभिः॥ब॥ एवं विरक्तः शयन आसनाटनम
ज्जने। दर्शनस्पर्शनघ्राणभोजनश्रवणादिषु॥११॥ अन्यदेहेगतमेव कर्म मां बध्नातीत्येवं विरक्तो विद्वान् तथाऽविद्वा
निव शयनादि न बध्यते॥ब॥ न तथा बध्यते विद्वान् तत्र तत्रादयन् गुणान्। प्रकृतिस्थोप्यसंसक्तो यथा खं सविताऽनि
लः॥१२॥ न बध्यते इत्यर्धश्लोकेन सद्वाचयः। कुतः। तत्र तत्र विषयेषु गुणान् इंद्रियाणि आदयन् भोजयन् तत्साक्षित्वेन
वर्त्तमानः न तु स्वयमदन्। एतदेव कुतस्तत्राह। प्रकृतिस्थोपीति सार्द्धेन। यथा खं सर्वत्र स्थितमपि न सज्जते। यथा
सविता जले प्रतिबिंबितोपि यथा अनिलः सर्वत्र संचरन्नपि तद्वत्॥ब॥ वैशारद्येक्षयासंगशितया छिन्नसंशयः

प्रतिबुद्धइवस्वप्नान्नानात्वाद्विनिवर्त्तते॥१२॥असंगेनविराग्येणसितयातीक्ष्णयाछिन्नाःसंशयाःअसंभावनादयो
यस्यसः।नानात्वात्देहादिप्रपंचात्।कथंविद्वद्देहस्थोऽन्तरत्वेनविलक्षणोतरमाह।यस्यस्युरिति॥७॥यस्यस्यु
र्वीतसंकल्पाःप्राणेंद्रियमनोधियां।वृत्तयःसतुनिर्मुक्तोदेहस्थोपिहितद्गुणैः॥१४॥तद्गुणैर्देहगुणैःसंकल्पस्त्या
दिभिःप्राणादिवृत्तिभिःविद्वान्मुक्तइत्यर्थः॥एवंतावद्बद्धमुक्तयोःस्वसंवेद्यंविलक्षणमुक्तं।इदानींकेवलिंगैयेत
लक्षणैरिंद्रियस्थोऽन्तरतयापरैरपिसुज्ञेयंविलक्षणमाह।यस्यात्मेतित्रिभिः॥८॥यस्यात्माहिंस्यतेहिंस्रैःयेनकिंचि
यदृच्छया।अर्च्यतेवाक्वचित्तत्रनव्यतिक्रियतेबुधः॥१५॥हिंस्रैर्दुर्जनैः।अन्यैर्वाप्राणिभिः।यस्यात्मादेहःपीड्यतेयदृ ए.टी.०
च्छयायेनकेनापिक्वचिदर्च्यतेवा।संपूज्यतेतत्रनव्यतिक्रियते।नातिविक्रियतइत्यर्थः।तदुक्तंयाज्ञवल्क्येन।यः ८४
कंटकैर्विध्यतिचंदनैर्यश्चलिंपति।अक्रुद्धोऽपरितुष्टश्चसममस्यचतस्यचेति।किंच॥९॥नस्तुवीतननिंदेतकुर्व

तःसाध्वसाधुवा।वर्जितोगुणदोषाभ्यांवर्जितःसमदृङ्मुनिः॥१६॥साध्वसाधुवाकुर्वतोवदतोवाजनान्स्तुवीत
नचनिंदेत।योलौकिकव्यवहारविमुक्तइत्यर्थः॥अपिच॥१०॥नकुर्यान्नवदेत्किंचित्नध्यायेत्साध्वसाधुवा।आ
त्मारामोनयावृत्त्याविचरेज्जडवन्मुनिः॥१७॥योहिदेहादिकेपिकर्मणिउदासीनःसमुक्तइतरोबद्धइत्यर्थः।एतान्ये
वसर्वाणिमुमुक्षोःसाधनानिज्ञातव्यानियेश्रुकेवलंशब्दब्रह्मण्येवनिष्णाःपांडित्यमात्रस्याधीनन्नूक्तेःसाधुर्नैस्तद
र्थनिष्ठोभवेत्तन्निंदति।शब्देति॥११॥शब्दब्रह्मणिनिष्णातोननिष्णायात्परेयदि।श्रमस्तस्यश्रमफलोह्यधेनुमिवर
क्षतः॥१८॥शब्दब्रह्मणिनिष्णातःपारंगतोपिपरेब्रह्मणिननिष्णातःयात्ध्यानाभ्यासयोगंनकुर्यात्।तस्यशास्त्रश्र
मःश्रमैकफलःनतुरूपार्थपर्यवसायी।अधेनुंविरक्षतो।एतदेवाचार्यैर्निदर्शनैःप्रपंचयति।गामिति॥१२॥गां
दुग्धदोहामसतींचभार्यांदेहंपराधीनमसत्प्रजांच।वित्तंत्वतीर्थीकृतमंगवाचंहीनांमयारक्षतिदुःखदुःखी॥१९॥

स्यतइतिदोग्ध्रापयोदुग्धोदोग्ध्रानोत्तरत्रदोह्योपिस्यात्।तांअर्थशून्यांअसतींभार्यांकामशून्यां।देहंपराधीनं।असत्प्रजां
इष्टादृष्टफलशून्यंपुत्रंआगतेपात्रेअदत्तंवित्तं।दुःकीर्त्तिदुरितापादकं।अंगदेउद्धव।दुःखानंतरमेवदुःखंय
स्यासारस्तुतिमयादीनंवाचमित्युक्तंविवृणोति।यस्यामिति॥ब॥यस्यांनमेपावनमंगकर्मस्थित्युद्भवप्राणनिरो
धमस्य।लीलावतारेप्सितजन्मवास्यात्वंध्यांगिरंतांबिभृयान्नधीरः॥२०यस्यांवाचिमेजगतःशोधकंचरित्रंनस्या
त्।किंतत्।अस्यविश्वस्यस्थित्यादिरूपंतद्धेतुरित्यर्थः।लीलावतारेषुईप्सितंजगतांप्रेमास्पदंश्रीरामकृष्णजन्म
नस्यात्।तांनिष्फलांगिरंधीरोधीमान्नधारयेत्।उक्तंज्ञानमार्गमुपसंहरति।एवमिति॥ब॥एवंजिज्ञासयापोह्य ए०टी०
नानात्वभ्रममात्मनि।उपारमेतविरजंमनोमय्यर्प्यसर्वगे॥२१एवंनिश्चित्यविचारेणआत्मनिनानात्वंभ्रमंदेहाद्य ८५
ध्यासंनिरस्यनिर्मलंमनोमयिसर्वगेपरिपूर्णेसमर्प्यउपारमेत्।किंचिन्नकुर्यात्।नशास्त्रपांडित्यमात्रेणेत्यर्थः॥ब॥

यद्यनीशोधारयितुंमनोब्रह्मणिनिश्चलं।मयिसर्वाणिकर्माणिनिरपेक्षःसमाचर॥२२यद्यनीशःअशक्तःतर्हिश्रि
शामिदंमनस्त्येवकृतार्थोसिविष्णुतीर्थ्याद्दा।मयीति।मदर्पणेनकर्मभिःविशुद्धसत्वस्यांतरंगांभक्तिमाह।श्रद्धालु
रिति॥ब॥श्रद्धालुर्मेकथांशृण्वन्सुभद्रांलोकपावनीं।गायन्ननुस्मृतंकर्मजन्मचाभिनयन्मुहुः॥२३अभिनय
नृत्यमनुकुर्वन्॥ब॥मदर्थेधर्मकामार्थानाचरन्मदपाश्रयः।लभतेनिश्चलांभक्तिंमय्युद्धवसनातने॥२४आच
रन्सेवमानः॥ब॥सत्संगलब्धयाभक्त्यामयिमांयउपासिता।सवैमेदर्शितंसद्भिरंजसाविंदतेपदं॥२५ततस्त्वानेन
प्रकारेणमयिसत्संगेनलब्धयाभक्त्यासक्तःमांउपासिताध्याताभवति।सवध्यानशीलःसद्भिर्दर्शितंवैनिश्चिते
सुखेनैवपदंस्वरूपंप्राप्नोति।सत्संगलब्धयाभक्त्येत्युक्तं।तत्रसतांभक्तेश्चलक्षणंपृच्छति॥साधुरिति॥ब॥ ॥
उद्धवउवाच॥ ॥साधुस्तवउत्तमश्लोकमतःकीदृग्विधःप्रभो।भक्तिश्चयस्त्वुपयुज्येतकीदृशीसद्भिरादृता॥२६सा

धवः स्वमतिपरिकल्पिताः संति बहवः तव तु कीदृशः संमतः। भक्तिरपि बहुधा लोके। कीदृशी त्वय्युपयुज्येत। सद्भि
श्च नारदादिभिरादृता। एतच्च कथ्यतामिति। इदं चातिगुह्यं। स्वयं च वक्तव्यमित्यैश्वर्यमाविः करोति। हे पुरुषाध्यक्षेत्यादि
ना॥ ब॥ एतन्मे पुरुषाध्यक्ष लोकाध्यक्ष जगत्प्रभो। प्रणतायानुरक्ताय प्रपन्नाय च कथ्यतां॥२७॥ हे पुरुषाध्यक्ष ब्रह्मादि
नियंतः। तत्र हेतुः। त्वमिति॥ ब॥ त्वं ब्रह्म परमं व्योम पुरुषः प्रकृतेः परः। अवतीर्णोसि भगवान् स्वेच्छोपात्तपृथग्वपुः॥२८॥
व्योमवदसंगः। यतः प्रकृतेः परः स्वेषां भक्तानामिच्छया उपात्तं पृथक् शरीरमिति तं वपुर्येन सः। तत्र त्रिंशल्लक्षणैः साधुं निरूप
यति॥ ब॥ कृपालुरिति॥ ब॥ ॥श्रीभगवानुवाच॥ ॥कृपालुरकृतद्रोहस्तितिक्षुः सर्वदेहिनां। सत्यसारोनवद्य ए॰ १०
त्मा समः सर्वोपकारकः॥२९॥ कृपालुः परदुःखासहिष्णुः। सर्वदेहिनां केषांचिदपि अकृतद्रोहः। तितिक्षुः क्षमावान्। ८६
सत्यं सारः स्थैर्यं बलं वा यस्य सः। अनवद्यात्मा असूयादिरहितः। सुखदुःखयोः समः। यथाशक्ति सर्वेषामुपकारकः॥ ब॥

कामैरहतधीर्दांतो मृदुः शुचिरकिंचनः। अनीहो मितभुक् शांतः स्थिरो मच्छरणो मुनिः॥३०॥ कामैरक्षुभितचित्तः। दांतः संस्
यतबाह्येंद्रियः। मृदुः अकठिनचित्तः। शुचिः सदाचारः। अकिंचनः आसक्तिशून्यः। अनीहः दृष्टक्रियाशून्यः। मितभुक्
लघ्वाहारः। शांतो नियतांतःकरणः। स्थिरः स्वधर्मे। मच्छरणः मदेकाश्रयः। मुनिः मननशीलः॥ ब॥ अप्रमत्तो गभीरात्मा
धृतिमान् जितषड्गुणः। अमानी मानदः कल्यो मैत्रः कारुणिकः कविः॥३१॥ अप्रमत्तः सावधानः। गभीरात्मा निर्विका
रः। धृतिमान् विपद्यप्यकृपणः। जितषड्गुणः क्षुत्पिपासे शोकमोहौ जरामृत्यू षडूर्मयः। एते जिता येन। अमानी नमा
नाकांक्षी। अन्येभ्योपि मानदः। कल्यः परबोधने दक्षः। मैत्रः अवंचकः। कारुणिकः करुणयैव प्रवर्त्तमानः। न दृष्टलो
भेन। कविः सम्यग्ज्ञानी॥ ब॥ आज्ञायैवं गुणान् दोषान् मयादिष्टानपि स्वकान्। धर्मान्संत्यज्य यः सर्वान्मां भजेत स च
सत्तमः॥३२॥ मया वेदरूपेणादिष्टानपि स्वधर्मान् संत्यज्य यो मां भजेत् सोपि सत्तमः। किमज्ञानान्नास्तिक्याद्वा। न। धर्मा

वरणे स च कृपाद्यादीन् गुणान्विपक्षे दोषांश्च आज्ञाय ज्ञात्वापि मद्ध्यानविक्षेपकतया मद्भक्त्यैव सर्वं भविष्यतीति। दृढनि
श्चयेनैव धर्मान्कर्माणि संत्यज्य। यद्वा। तावत्कर्माणि कुर्वीत न निर्विद्येत यावता। मत्कथाश्रवणादौ वा यावच्छ्रद्धा न जा
यते। इति भक्तिदार्ढ्येन निवृत्ताधिकारितया संत्यज्य। अथवा विद्धैकादश्युपवासरूक्षैकादश्युपवासानिवेद्य
श्राद्धादयो ये भक्तिविरुद्धा धर्मास्तान्संत्यज्येत्यर्थः॥टी॥ ज्ञात्वाज्ञात्वाथ मां ये वै यावान्यश्चास्मि यादृशः। भजंत्यनन्य
भावेन ते मे भक्ततमा मताः॥३३॥ यावान्देशकालापरिच्छिन्नः। यश्च सर्वात्मा। यादृशः सच्चिदानंदादिरूपः। एतं मां ज्ञात्वा ए॰टी॰
ज्ञात्वापि। यद्वा। अशेषतः ज्ञानापुनर्ज्ञात्वा एकांतभावेन ये भजंति। साधुलक्षणमुक्तं भक्तेर्लक्षणमाह। मल्लिंगेत्यष्ट ८१
भिः॥टी॥ मल्लिंगमद्भक्तजनदर्शनस्पर्शनार्चनं। परिचर्या स्तुतिः प्रह्वगुणकर्मानुकीर्तनं॥३४॥ लिंगानि प्रतिमादी
न्यधिष्ठानानि॥टी॥ मत्कथाश्रवणे श्रद्धा मदनुध्यानमुद्धव। सर्वलाभोपहरणं दास्येनात्मनिवेदनं॥३५॥ सर्वलाभो

पहरणं सर्वस्य लब्धस्य समर्पणं॥टी॥ मज्जन्मकर्मकथनं मम पर्वानुमोदनं। गीततांडववादित्रगोष्ठीभिर्मद्गृहोत्सव
॥३६॥ पर्वाणि जन्माष्टम्यादीनि तदनुमोदनं॥टी॥ यात्राबलिविधानं च सर्ववार्षिकपर्वसु। वैदिकी तांत्रिकी दीक्षा म
दीयव्रतधारणं॥३७॥ बलिविधानं पुष्पोपहारादिसमर्पणं। सर्ववार्षिकपर्वसु चातुर्मास्यैकादश्यादिषु विशेषत
ः॥टी॥ ममार्चास्थापने श्रद्धा स्वतः संहत्य चोद्यमः। उद्यानोपवनाक्रीडपुरमंदिरकर्मणि॥३८॥ उद्यानादिकरणे साम
र्थ्ये सति स्वतः असमर्थश्चेदन्यैः संहत्योद्यमः कार्यः। उद्यानं पुष्पप्रधानं वनं। उपवनं फलप्रधानं वनं। आक्रीडं क्रीडास्था
नं॥टी॥ संमार्जनोपलेपाभ्यां सेकमंडलवर्तनैः। गृहशुश्रूषणं मह्यं दासवद्यदमायया॥३९॥ संमार्जनं रजोपक
र्षणं। मद्गृहं मम॥टी॥ अमानित्वमदंभित्वं कृतस्यापरिकीर्तनं। अपि दीपावलोकं मे नोपयुंज्यान्निवेदितं॥४०॥ स्वयम
न्येन वा दीपादि निवेदितं न स्वीकुर्यात्। एतच्च साधारणस्थावरविषयं। न तु इष्टदेवविषयं। रागप्राप्तिविषयं वा स्यात्तु अ

ष्टमेव। उक्तं च। षड्भिर्मासोपवासैस्तु यत्फलं परिकीर्तितं। विष्णोर्नैवेद्यसिक्थेन तत्फलं भुंजतां कलौ। हृदिरूपं स्वखेना
मनैवेद्यमुदरे दहेत्। पादोदकं च निर्माल्यं मस्तके यस्य सोच्युत इति। यद्वा। अस्य स्मै निवेदितं मे नोपयुंज्यात् न निवेदय
तां। विष्णोर्निवेदितान्नेन यष्टव्यं देवतांतरं। पितृभ्यश्चैव तद्देयं तदानंत्याय कल्पते। पितृशेषं तु यो दद्याद्धरये परमात्म
ने। रेतोधाः पितरस्तस्य भवंति क्लेशभागिनः। इत्यादिवचनेभ्यः॥ब॥ यद्यदिष्टतमं लोके यच्चातिप्रियमात्मनः। तत्तन्नि
वेदयन्मह्यं तदानंत्याय कल्पते॥४१॥ इदानीमेकादशाह्नाधिष्ठानान्याह। सूर्य इति॥ब॥ सूर्योग्निर्ब्राह्मणा गावो वै
ष्णवः खं मरुज्जलं। भूरात्मा सर्वभूतानि भद्र पूजापदानि मे॥४२॥ तेन तु अधिष्ठानभेदेन पूजासाधनान्याह। सूर्ये ति एटी०
॥ब॥ सूर्ये तु विद्यया त्रय्या हविषाग्नौ यजेत मां। आतिथ्येन तु विप्राग्र्ये गोष्वंग यवसादिना॥४३॥ त्रय्या विद्यया सूक्तै ८८
रुपस्थानादिना। अंग हे उद्धव। यवसादिना तृणादिना॥ब॥ वैष्णवे बंधुसत्कृत्या हृदि खे ध्याननिष्ठया। वायौ मुख्य

धिया तोये द्रव्यैस्तोयपुरस्कृतैः॥४४॥ बंधुसत्कृत्या बंधुवत्सम्मानेन। हृदि खे। हृदयाकाशे। मुख्यधिया प्राणदृष्ट्या। तो
ये तोयादिभिर्द्रव्यैः। तर्पणादिना॥ब॥ स्थंडिले मंत्रहृदयैर्भोगैरात्मानमात्मनि। क्षेत्रज्ञं सर्वभूतेषु समत्वेन यजे
त मां॥४५॥ स्थंडिले तु विमंत्रहृदयैः रहस्यमंत्रन्यासैः। सर्वाधिष्ठानेषु ध्येयमाह। धिष्ण्येष्विति॥ब॥ धिष्ण्येष्वेष्विति
मद्रूपं शंखचक्रगदांबुजैः। युक्तं चतुर्भुजं शांतं ध्यायन्नर्चेत्समाहितः॥४६॥ इतिशब्देन प्रकारेण एषु पूर्वोक्तेषु
धिष्ण्येषु उक्ताया भक्तेः फलमाह। इष्टापूर्तेनेति॥ब॥ इष्टापूर्तेन मामेवं यो यजेत समाहितः। लभते मयि सद्भ
क्तिं मत्स्मृतिः साधुसेवया॥४७॥ सद्भक्तिं दृढां भक्तिं। अस्या भक्तेरंतरंगं साधनमाह। इत्थं मत्स्मृतिः साधुसेवया भ
वति। यद्वा स्मृतिर्ज्ञानं। ततश्च दृढभक्तिमतः पुंसः। साधुसेवया मज्ज्ञानं भवतीत्यर्थः॥ ज्ञानभक्तिमार्गद्वयोक्तेरत
त्र ज्ञानमार्गादपि भक्तिमार्गः श्रेष्ठ इत्याह। प्रायेणेति॥ब॥ प्रायेण भक्तियोगेन सत्संगेन विनोद्धव। नोपायो विद्य

तिसम्यक्कृतायेणंहिसतामदं॥४७॥सत्संगेनयोभक्तियोगःतेनविनासंसारतरणेन्योपायोनविद्यमसत्संगेयत्रदेहमा
ह।हियस्मात्सतामदंप्रायणंप्रकृष्टमयनमाश्रयः।अतःसंगोमय्यंतरंगइत्यर्थः।इदानींसांख्ययोगादीनिसाध
नांतराण्यपेक्षाणिसव्यभिचाराणिच।सत्संगस्तुतच्चतएवसमर्थःफलाव्यभिचारीचेति॥छ॥अथैतत्परमंगुह्यं
श्रृण्वतोयदुनंदन।सुगोप्यमपिवक्ष्यामित्वंमेभृत्यःसुहृत्सखा॥४८॥एतद्वक्ष्यमाणंपरमंगुह्यंश्रृण्वित्यर्थः॥छ॥
॥ ॥ ॥इतिश्रीभागवतेमहापुराणेएकादशस्कंधेभगवदुद्धवसंवादेएकादशोऽध्यायः॥ ॥छ॥ ॥ ॥
द्वादशेसाधुसंगस्यमहिमावर्ण्यतेस्तुतः।कर्मानुष्ठानतत्त्यागयोर्व्यवस्थाचततःपरं॥१॥ ॥श्रीभगवानुवाच॥ ॥ एदी
नरोधयतिमांयोगोनसांख्यंधर्मउद्धव।नस्वाध्यायस्तपस्त्यागोनेष्टापूर्तंनदक्षिणा॥१॥नरोधयति।नवशीकरोति। ८९
योगःअष्टांगः।सांख्यंतत्त्वानांविवेकः।धर्मःसामान्यतोहिंसादिः।स्वाध्यायोवेदाध्ययनं।तपःकृच्छ्रादि।त्यागःसंन्या

सः।इष्टापूर्तंइष्टंवापूर्तंवा।तत्रेष्टमग्निहोत्रादि।पूर्तंवापीकूपारामादिनिर्माणं।दक्षिणाशब्देनसामान्यतोदानंल
क्ष्यते॥छ॥व्रतानियज्ञःछंदांसितीर्थानिनियमायमाः।यथावरुंधेसत्संगःसर्वसंगापहोहिमां॥२॥व्रतानिएकादश्यु
पवासादीनि।यज्ञोदेवपूजा।छंदांसिरहस्यमंत्राः।अवरुंधेवशीकरोति॥छ॥सत्संगेनहिदितेयायातुधानाःख
गामृगाः।गंधर्वाप्सरसोनागाःसिद्धचारणगुह्यकाः॥३॥यातुधानाराक्षसाः॥छ॥विद्याधरामनुष्येषुवैश्याःशूद्राः
स्त्रियोंत्यजाः।रजस्तमःप्रकृतयःतस्मिंस्तस्मिन्युगेयुगे॥४॥अनुयुगेसंध्यासंध्यांशादौ॥छ॥बहवोमत्पदंप्रा
प्ताःत्वाष्ट्रकायाधवादयः।वृषपर्वाबलिर्बाणोमयश्चाथविभीषणः॥५॥त्वाष्ट्रोवृत्रःकायाधवःप्रह्लादः॥छ॥सुग्रीवो
हनुमानृक्षोगजोगृध्रोवणिक्पथः।व्याधःकुब्जाव्रजेगोप्योयज्ञपत्न्यस्तथापरे॥६॥ऋक्षोजांबवान्।गृध्रोजटायुः।
वणिक्पथस्तुलाधारः।व्याधोधर्मव्याधः।यज्ञपत्न्योदीक्षितभार्याः।तेषां।सत्संगव्यतिरिक्तसाधनांतराभावमाह।तेने

ति॥७॥ तेनाधीतश्रुतिगणा नोपासितमहत्तमाः। अव्रतातप्ततपसः मत्संगान्मामुपागताः॥७॥ न अधीताः श्रुतिगणा यैस्ते
तथा। किंच। अव्रतातप्ततपसः न व्रतानि तेषां न तप्तानि तपांसि यैः। सत्संगादिति। सद्भिः संगो नाम मय्येव संगः इत्यभि
प्रेत्योक्तं। यद्वा। असंगस्यापि मत्संगत्वं विवक्षते। असंगस्यापि सत्वात्। यद्वा मदीयसंगादित्यर्थः। तत्र वृत्रादीनां सवत्तुनामक
त्थं विसाधनांतरं गोपीप्रभृतीनां नाप्यदर्शयन्नाह। केवलेनेति॥ब॥ केवलेन हि भावेन गोप्यो गावो नगा मृगाः। येऽन्ये मूढ
धियो नागाः सिद्धा मामीयुरंजसा॥८॥ सत्संगलब्धेन केवलेनैव हि भावेन प्रीत्या। नगाः यमलार्जुनादयः। नागाः कालि
यादयः। यद्वा। तदानींतनसर्वतरुगुल्मादीनामपि भगवति भावोऽस्तीति गम्यते। तदुक्तं भगवतेव। अहोऽमी देववराम एदी
राचितं पादांबुजं ते सुमनःफलार्हणं। नमंत्युपादाय शिखाभिरात्मनोऽतमोपहत्यै तरुजन्म यत्कृतं। सिद्धाः कृतार्थाः ७०
संतः ईयुः प्रापुः अप्राप्त दुर्लभतामाह। यमिति॥ब॥ यं न योगेन सांख्येन दानव्रततपोध्वरैः। व्याख्यास्वाध्यायसन्यासैः

प्राप्नुयाद्यत्नवानपि॥९॥ योगादिभिः कृतप्रयत्नोपि यं न प्राप्नुयात्। तं मामीयुरिति पूर्वेणैवान्वयः। अत्र च प्रथमं या गोप्यः
पश्चाद्ये यो वा श्रीकृष्णेन सह संगताः। ते संताः। तत्संगो येषां सत्संगाः। ते न च तेषां भक्तिरिति ज्ञातव्यं। गोपीनां भावं प्रपंचय
ति। रामेणेति चतुर्भिः॥ब॥ रामेण सार्कं मथुरां प्रणीते श्वाफल्किना मय्यनुरक्तचित्ताः। विगाढभावेन न मे वियोगतीव्रा
धयोऽन्यं ददृशुः सुखाय॥१०॥ श्वाफल्किना अक्रूरेण मयि मथुरां प्रणीते सति। मे मत्तोऽन्यं सुखाय न ददृशुः। कुतः। वि
योगेन तीव्रो दुःसह आधिर्यासां ताः। अत्र हेतुः। मयि विगाढेन अतिदृढेन भावेन प्रेम्णा। अनुरक्तानि संसक्तानि चित्तानि
यासां ताः। तीव्राधित्वं प्रपंचयति। तास्ता इति॥ब॥ तास्ताः क्षिपाः प्रेष्ठतमेन नीता मयैव वृंदावनगोचरेण। क्षणार्द्धवत्ताः
पुनरंग तासां हीना मया कल्पसमा बभूवुः॥११॥ मया सह या एव क्षिपा रात्रयः क्षणार्द्धवन्नीताः ता एव पुनर्मया हीनानां ता
सां कल्पसमा बभूवुः। एवं तीव्राधयस्ताः मोहमिषेण समाधिं प्राप्ता इत्याह। ता इति॥ब॥ ता नाविदन्मय्यनुषंगबद्ध

धियः स्वमात्मानमदस्तथेदं। यथा समाधौ मुनयोब्धितोये नद्यः प्रविष्टा इव नामरूपे॥२२ मयि अनुषंगेण सक्त्या बद्ध

धियो यास्ताः स्वमात्मानं स्वदेहं अदः दूरस्थं इदं संनिहितं च न विदन्। यद्वा। स्वं पतिपुत्रादि आत्मानं अहंकारास्प

दं अदः परलोकं इमं लोकं च न विदंतिन्निति। यथा मुनयः समाधौ नामरूपे न विदुः तद्वत्। किंच। अब्धितोये नद्य इव

मयि प्रविष्टा इत्यन्वयः॥ ब॥ मत्कामा रमणं जारमस्वरूपविदोबलाः। ब्रह्म मां परमं प्रापुः संगाच्छतसहस्रशः॥

२३ एवं ता अबलाः केवलं मत्कामाः। मत्स्वरूपाविदः। स्वरूपं तु न जानंति। तथापि मत्संगात् तु जारं ब्रह्म जारबुद्धिविषय

मपि ब्रह्म स्वरूपमेव मां परमं प्रापुरित्यर्थः। यस्मादेवं भूतो मद्भजनप्रभावः॥ ब॥ तस्मात्त्वमुद्धवोत्सृज्य चोदनां प्र

तिचोदनां। प्रवृत्तिं च निवृत्तिं च श्रोतव्यं श्रुतमेव च॥२४ मामेकमेव शरणमात्मानं सर्वदेहिनां। याहि सर्वात्मभावेन

या स्या ह्यकुतोभयं॥२५ तस्मात् त्वं चोदनां श्रुतिं। प्रतिचोदनां स्मृतिं। यद्वा। विधिनिषेधं च उत्सृज्य मां शरणं याहि।

मामेवाकुतोभयं यास्यसि। एवं तावन्मयोदितेष्ववहितः स्वधर्मेष्वित्यादिना कर्मकर्तव्यमित्युक्तं। इदानीं तु सर्वं त्यक्त्वा मां

शरणं याहीत्युच्यते। तत्र किमात्मनः कर्तृत्वाद्यस्ति नास्ति वेत्यात्मस्थः आत्मविषयः संशयो न निवर्तते। यद्वा। कर्म कार्यं

त्याज्यं वेत्यात्मस्थः संशयो न निवर्तत इति पृच्छति। संशय इति॥ ब॥ ॥उद्धव उवाच॥ ॥संशयः शृण्वतो वाचं त

व योगेश्वरेश्वर। न निवर्तत आत्मस्थो येन भ्राम्यति मे मनः॥२६ येन संशयेन॥ उत्तरं स एष इत्यष्टभिः॥ ब॥ स एष जीवो

विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः। मनोमयं सूक्ष्ममुपेत्य मात्रं मात्रा स्वरो वर्ण इति स्थविष्ठः॥२७ अयं भावः।

ईश्वरस्यावस्वमाया वशात् प्रपंचात्मना भाति। तत्प्रपंचाध्यासाच्च जीवानामनाद्यविद्यया कर्तृत्वादि ततो विधिप्र

तिषेधाधिकारः। तदानीं स च शुद्ध्यर्थं कर्माणि कुर्विद्युक्तं। सत्वे च शुद्धे कर्मजाड्यपरिहाराय सांख्यविक्षेपकर्मा के

दं परित्यज्य दृढविश्वासेन भजेत्युक्तं ज्ञातायां तु विद्यायां न किंचित्कर्तव्यमस्तीति। तत्र तावदीश्वरागिंद्रियद्वारा

एटी

९१

जीवसंसृतिकारणभूतप्रपंचो ऽनुक्रममादसौ द्वैध्यवर्जितः॥ स एष अपरोक्षः जीवयतीति जीवः परमेश्वरः अपरोक्षश्चेदे
ऽ॥ विवरेषु आधारादिचक्रेषु प्रसूतिरिव प्रसूतिः॥ अनिरुक्तिर्यस्य सः॥ तामेवानिरुक्तिमाह॥ घोषेणेति॥ घोषेण
पराख्येन नादवता प्राणेन गुहां आधारचक्रं प्रविष्टः सन् मनोमयं सूक्ष्मं रूपं पश्यंत्याख्यं मध्यमाख्यां च मणिपूरक
चक्रे विशुद्धचक्रे च उपेत्य प्राप्य वक्त्रे मात्रा ऊष्मादिः स्वरः उदात्तादिरिये वैखर्याख्यां स्थविष्ठः अतिस्थूलो नानावि
दशाख्यात्मको भवति॥ तथा च श्रुतिः॥ चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः॥ गुहा त्रीणि
निहिता नेंगयंति तुरीयं वाचो मनुष्या वदंतीति॥ अयमर्थः॥ वाक्परिमितानि वाचः परिमितानि शास्त्रनिर्णीता एदी॰
नि चत्वारि पदानि स्थानानि॥ परा पश्यंती मध्यमा वैखरी तानि च ये ब्राह्मणा मनीषिणः ध्यानमकुशलाः ते विदुः॥ तेषां ७२
मध्ये आद्यौ त्रीणि पदानि गुहायां शरीरे आधारनाभिहृदयेषु निहितानि नेंगयंति॥ नाजानंति॥ तुरीयं चतुर्थं वैखर्याख्यं

मनुष्या वदंति॥ मनुष्याणां वदने वर्त्तमानो बोधकः शब्दो भवतीत्यर्थः॥ अभियुक्तैः श्लोकश्च॥ या सा मित्रावरुणसदना
दुच्चरंती त्रिषष्टिं वर्णानंतः प्रकटकरणैः प्राणसंगात्प्रसूते॥ तां पश्यंती प्रथममुदितां मध्यमां बुद्धिसंस्थां वाचं वक्त्रे
करणविशदां वैखरीं च प्रपद्ये॥ २॥ अस्यार्थः॥ तां भगवतीं त्रिविधां भारतीमहं प्रपद्ये॥ यतो वाक्शक्तिरूपा भगव
च्छक्तिमान् साक्षात् यतः शक्त्या शक्तिमानात्मोपलभ्यते॥ ज्ञायते इति कारणात्॥ या सा भारती पश्यंत्यभिधानात्मि
का मित्रावरुणसदनात् अग्नीषोमस्थानात् उच्चरंती उद्भवंती मित्रो ऽर्कोऽग्निर्वरुणः सोमः तयोः सदनमावासस्थानं
परमात्मेति॥ यतः श्वासस्य शीतोष्णत्वमुपलभ्यते॥ तस्मादुच्चरंती त्रिषष्टिं वर्णान् जनयति॥ तान् वर्णानाह॥ स्वराः
एकविंशतिः॥ ह्रस्वदीर्घप्लुतप्रयोगेण अइउवर्णाः त्रिविधा नव॥ ऌवर्णः प्लुतहीनो द्विविधः॥ दीर्घहीनः॥ संध्यक्ष
राण्येवमेवाष्टौ एकविंशतिः स्वराः॥ स्पर्शाः पंचविंशतिः॥ यादयो ऽंताः अष्टौ अंतस्थाः ऊष्माणश्चेति॥ पंच अनुनासि

कः पंच। अनुस्वारो विसर्जनीयश्च। कःपौ चेति। ६३ एवं त्रिषष्टिः। एतान् वर्णान् प्राणसंगप्रभूतान् वायुध्वा साज्ञातान्
प्रकटकरणे बुद्धिगतः प्रत्यक्षरूपः इंद्रियैः अंतर्यामितया पश्यति न तूच्चारयति सा पश्यंत्यभिधाना वाग्निश्रागेन
त्मनस्तिष्ठति। तां प्रथमं पूर्वमुत्पादितां उत्पन्नां बुद्धिसंस्थां विचारयन्नुक्तां इदमुच्चारयामीति मध्यमां वक्रे मुखे वर्त्ति
तां करणविशदां जिह्वाग्रनिर्मलां वैखरीं चाहं प्रपद्ये। करणप्रदर्शनं स्थानप्रयत्नोपलक्षणार्थं यतः स्थानकरणप्रय
त्नेभ्यो वर्णा निष्पाद्यंते। यतः। अष्टौ स्थानानि वर्णानामुरः कंठः शिरस्तथा। जिह्वामूलं च दंताश्च नासिकोष्ठौ च तालु च
प्रयत्नोऽप्यात्मकृतो बाह्योऽभ्यंतरश्चेति। आत्मबुद्ध्या वाग्जनो युक्तं प्रवक्षायां मनः कायाग्निमाहंति स प्रेरयति मारु एटी।
तो मारुतस्तूरसि चरन्मंद्रं जनयति स्वरं॥१ आकाशवायुः प्रभवः शरीरात्समुच्चरन् वक्रमुपैति नादः। स्थानांतरेषु ७३
प्रविभज्यमानो वर्णत्वमागच्छति यः स शब्दः॥१ अथ क्रमप्राप्तं मध्यमक्रमेणाभिव्यक्तौ दृष्टांतः। यथेति॥७॥

यथानलः खेऽनिलबंधुरूष्मा बलेन दारुण्यतिमथ्यमानः। अणुः प्रजातो हविषा समिध्यते तथैव मे व्यक्तिरियं हि वाणी।
॥१८॥ यथाग्निः खेऽवकाशच्छिद्रे ऊष्मा अव्यक्तोष्मरूपः दारुण्यधिकं मथ्यमानः अनिलसहायः सन् अणुः सूक्ष्मविस्फु
लिंगादिरूपो भवति। पुनः प्रवृद्धोऽजस्रं हविषा संवर्द्धते। तथैवेयं वाणी विदलक्षणं ममाभिव्यक्तिः। उक्तां व
त्तिमुपसंहरन्नन्यतरेंद्रियवृत्तीरतिदिशति॥७॥ एवं गदिः कर्मगतिर्विसर्गो घ्राणो रसो दृक्स्पर्शः श्रुतिश्च।
संकल्पविज्ञानमथाभिमानः सूत्रं रजःसत्त्वतमोविकारः॥१९॥ गदिः गदनं भाषणं मे व्यक्तिरित्युपसंहारः। कर्म हस्त
योर्वृत्तिः। गतिः पादयोः। विसर्गः पायूपस्थयोः। घ्राणोऽवघ्राणं। रसो रसनं। दृक्दर्शनं स्पर्शनं स्पर्शः श्रुतिः श्रवण
मिति ज्ञानेंद्रियाणां। संकल्पो मनसः। विज्ञानं बुद्धिचित्तयोः। अभिमानोऽहंकारस्य। सूत्रं प्रधानस्य। रजःसत्त्वतमसां
विकारोऽधिदेवादिः त्रिविधः प्रपंचो मे व्यक्तिरिति पूर्वेणान्वयः। तस्मादीश्वराभिव्यक्तिरूपः प्रपंचो नेश्वराद्भिन्नो ह्यी

थाह। अयमिति॥ ३॥ अयं हि जीवस्त्रिवृदब्जयोनिरव्यक्त एको वयसा स आद्यः। विश्लिष्टशक्तिर्बहुधेव भाति बीजानि यो-
निं प्रतिपद्य यद्वत्॥२०॥ अयं जीवः ईश्वरः आदौ अव्यक्त एक एव। वयसा कालेन विश्लिष्टा विभक्ता वागींद्रियरूपाः श-
क्तयो यस्य। यद्वा। विशेषेण आश्लिष्टा आलिंगिता मायाशक्तिर्येन स बहुप्रकार इव भाति। यतः स एव आद्यः त्रिवृत् त्रि-
गुणाश्रयः। अब्जयोनिः लोकपद्मस्य कारणभूतः। एकस्य बहुधा भाने दृष्टांतः। योनिं क्षेत्रं प्रतिपद्य प्राप्य बीजानि यद्व-
द्भांति। तस्मात्तन्मायाविलसितत्वात् तदाश्रयमिदं जगत् न ततः पृथगिति सदृष्टांतमाह। यस्मिन्निति॥ ३॥ यस्मिन्नि-
दं प्रोतमशेषमोतं पटो यथा तंतुवितानसंस्थः॥२१॥ तंतुवितानेन संस्था स्थितिर्यस्य सः पटो यथा तथा यस्मिन्निदं विश्वं एटी
उतं दीर्घतंतुषु पट इव प्रोतं तिर्यक्तंतुष्विव। एवंभूतं समष्टिव्यष्ट्यात्मकं विश्वमविद्यया आत्मन्यध्यस्तं दृष्टरूपं जीव एध
स्य कर्तृत्वादिसंसारहेतुः अतस्तद्विवेकज्ञानेन कर्मादि सर्वं त्याज्यमित्युक्तमित्याशयेनाह। य एष सोऽहं इति त्रिभिः

॥ ३॥ य एष संसारतरुः पुराणः कर्मात्मकः पुष्पफले प्रसूते॥२१॥ पुराणः अनादिः। कर्मात्मकः प्रवृत्तिस्वभावः। पुष्प-
फले भोगापवर्गौ कर्म तत्फले वा प्रसूते जनयति। दृष्टरूपकं प्रपंचयति। द्वे इति॥ ३॥ द्वे अस्य बीजे शतमूलस्त्रिनाल-
पंचस्कंधः पंचरसप्रसूतिः। दशैकशाखो द्विसुपर्णनीडः त्रिवल्कलो द्विफलोऽर्कं प्रविष्टः॥२२॥ द्वे पुण्यपापे अस्य बी-
जे स च शतमूलः। शतं अपरिमिता वासना मूलानि यस्य सः। त्रयो गुणा नालानि प्रकांडा यस्य। पंच भूतानि स्कंधा यस्य।
पंचरसाः शब्दादयः तत्प्रसूतिर्यस्मात्। एकादशेंद्रियाणि शाखा यस्य। द्वयोः सुपर्णयोर्जीवपरमात्मनोः नीडं यस्मि-
न्। त्रीणि वल्कलानि त्वचो वातपित्तश्लेष्माणो यस्य। द्वे सुखदुःखे फले यस्य सः। अर्कं प्रविष्टः। सूर्यमंडलपर्यंतव्याप्त-
त्वात्। निर्भिद्य गतस्य संसाराभावात्। तत्फलमोक्षमाह॥ ३॥ अदंति चैकं फलमस्य गृध्राः ग्रामेचरा एकमरण्यवासाः। हं-
सा य एकं बहुरूपमिज्यैः मायामयं वेद स वेद वेदं॥२३॥ गृध्राः कामिनः। ग्रामेचराः गृहस्थाः। अस्य दृष्टरूपस्य ए-

कं फलं दुःखं वदंति। परिणामतः स्वर्गादेरपि दुःखरूपत्वात्। हंसा विवेकिनो अरण्यवासाः सन्यासिनः एकं फलं सुखं
वदंति। एकं परमात्मानं मायामयं बहुरूपं इज्यैर्गुरुभिः ज्ञात्वा यो वेद स वेदं तत्त्वार्थं वेद॥४॥ चैवं ज्ञात्वा कृतकृत्यः सन्नु स
र्वं साधनं त्यजेच्चेत्याह। एवमिति॥४॥ एवं गुरूपासनयैकभक्त्या विद्याकुठारेण शितेन धीरः। विवृश्च्य जीवाशयमप्रम
त्तः संपद्य चात्मानमथ त्यजास्त्रं॥२४॥ एकांतभक्त्यासितेन तीक्ष्णेन विद्याकुठारेण जीवोपाधिं त्रिगुणात्मकं लिंगशरीरं
विवृश्च्य छित्वा परमात्मानं च संपद्य प्राप्य अस्त्रं साधनं त्यजेति॥४॥ ॥ ॥ इति श्रीभागवते महापुराणे एकादश
स्कंधे भगवदुद्धवसंवादे द्वादशोऽध्यायः॥ ॥४॥ ॥ त्रयोदशे सत्ववृद्ध्या विद्योदयक्रमः। हंसेतिहासतश्चित्त ए टी०
गुणविश्लेषवर्णनं॥१॥ विद्याकुठारेण जीवाशयं विवृश्च्य साधनं त्यजेत्युक्तं। ननु तत्र तमआदिगुणत्रयवृत्तिप्रतिबंधे ए ५८
सति कथं विद्योत्पत्तिः। गुणत्रयमलिनांतःकरणस्य तु क्वासावासावा तु स्यादाशंक्य तन्निवृत्त्या विद्योत्पत्तिप्रकारमा

हा सत्वमिति सत्वसिः॥४॥ ॥श्रीभगवानुवाच॥ ॥सत्वं रजस्तम इति गुणा बुद्धेर्न चात्मनः। सत्वेनान्यतमौ हन्या
त्सत्वं सत्वेन चैव हि॥१॥ तत्र यथानंदादिवत् आत्मधर्मा गुणाः कः तर्हीति स्वरूपत्वात् तेषां गुणानां निवृत्तिर्न स्यात्तान
वेतद्दर्शयन्नाह। बुद्धेः प्रकृतेरेव गुणाः न चात्मन इति। अतः सत्वेन सत्ववृद्ध्या अन्यतमौ हन्यात् रजस्तमोवृत्तीर्जये
दित्यर्थः। सत्वं च सत्वदयादिवृत्तिरूपं उपशमात्मकेन सत्वेनैव हन्यात्। ननु गुणत्रयवृत्तीनां परस्परोपमर्दरूपत्वा
त्। कथं सत्ववृद्ध्यैवेतरवृत्त्योर्नियमेन हंतव्यत्वात्राह। सत्वादिति॥४॥ सत्वाद्धर्मो भवेद्वृद्धात्पुंसो मद्भक्तिलक्षणः।
सात्विकोपासया सत्वं ततो धर्मः प्रवर्तते॥२॥ मद्भक्तिं लक्षयति योधर्मः सः। मद्भक्तिरूप एव वा। ननु सत्वमेव कथं वर्द्धेत
तत्राह। सात्विकानां पदार्थानां उपासनया सेवया सत्वं वृद्धं भवतीत्यर्थः। स च धर्मो रजस्तमश्च हन्यात्। कुतः॥४॥ धर्मो
यं सात्विकः शुद्धः सत्ववृद्धिरनुत्तमः। आशु नश्यति तन्मूलो ह्यधर्म उभये हते॥३॥ स च धर्मो रजस्तमश्च हन्यात्। कुतः

नविद्यतेउत्तमोयस्मात्सःसर्वोत्तमः॥यतःसत्त्ववृद्धिः।सत्त्वस्यवृद्धिर्यस्मात्।कारणंसः॥अतएवतत्कार्योधर्मःप्रतिबंधेपि
नाशि।इत्याह।तस्मिंस्तुनयस्मिन्।इतेतन्मूलरजस्तमसीरागद्वेषादिनाप्रमादालस्यादिनाचमूलंयस्यसः।सात्त्विको
पासनयासत्त्वंवर्द्धतइत्युक्तं।तानेवसत्त्ववृद्धिहेतून्दर्शयितुंसामान्यतोगुणवृद्धिहेतूनाह।आगमइति॥४॥आगमो
ऽपःप्रजादेशःकालःकर्मचजन्मच।ध्यानंमंत्रोथसंस्कारोदशैतेगुणहेतवः॥४॥आगमःशास्त्रं।अपःआपः।क्वचिदा
गमोर्थइतिपाठः।आगमःअधीतोवेदः।अर्थन्यायोपार्जितंवित्तं।प्रजाःलोकाः।देशःसज्जभृगसंचारिप्रवृत्ति।कालोव
संतादि।कर्मआश्रमादिविहितं।जन्मउत्तमयकुलविशुद्धंदीक्षालक्षणंवा।ध्यानंदेवताविषयं।मंत्रोगायत्र्यादि।संस्का एका०
रोगर्भाधानादि।गुणहेतवः।एषामपित्रैविध्यंवृद्धाचारपरंपरयाज्ञातव्यमित्याह।तत्तदिति॥५॥तत्तत्सात्त्विकमेवै ९८
षांयद्वृद्धाःप्रचक्षते।निंदंतितामसंतत्तद्राजसंतदुपेक्षितं॥५॥एषुसात्त्विकादिनिर्णयमाह।एषामेवमध्येप्रचक्ष

तत्प्रशंसंति।यद्यन्निंदंतितत्तत्।यत्तुतैर्वृद्धैरुपेक्षितं।नस्तुतंनचनिंदितंतद्राजसं॥६॥सात्त्विकान्येवसेवेतपुमान्सत्त्व
विवृद्धये।ततोधर्मस्ततोज्ञानंयावत्स्मृतिरपोहनं॥७॥निवृत्तशास्त्राण्येवसेवेतनप्रवृत्तपाखंडशास्त्राणि।तीर्थापएव
नगंधोदकसुराद्याः।प्रजाःनिवृत्तान्नप्रवृत्तदुराचारान्।विविक्तदेशं।नरथ्याद्यूतदेशान्।कालंब्रह्ममुहूर्त्तंध्या
नादेः।नप्रदोषनिशीथादीन्।कर्मचनित्यं।नकाम्याभिचारादीनि।जन्मचवैष्णवशैवदीक्षालक्षणं।नशाक्तदुर्दी
क्षारूपं।ध्यानंविष्णोःशिवस्यवानकामिनीविद्विषां।मंत्रंप्रणवादिकं।नकाम्यक्षुद्रात्।संस्कारंचात्मनःशोधकं।नतुके
वलंदेहगेहादीनां।ननुज्ञानंवाक्यश्रवणादेवोत्पद्यते।किंतत्रसत्त्ववृद्ध्याधर्मेणवा।अतआह।यावत्स्मृतिः।आत्माप
रोक्षं।यावच्चदेहद्वयतत्कारणभूतगुणापोहः।तावत्स्वयंतज्ज्ञानंभवतीत्यर्थः॥ननुगुणव्यतिकरजातोदेहःक
थंस्वाश्रयभूतान्गुणान्सत्त्वएवोत्पन्नयाविद्ययापोह्यस्वयमेवोपरमेत्तत्राह।वेण्विति॥८॥वेणुसंघर्षजोव

ह्निर्दग्ध्वा शाम्यति तद्वनं। एवं गुणव्यत्ययजो देहः शाम्यति तत्क्रियः॥७ वेणूनां संघर्षणाज्जातोऽग्निर्यथा स्वतएवोत्पन्न
निर्ज्वालाग्निः तद्वनं दग्ध्वा स्वयं शाम्यति। एवं देहोऽपि तत्क्रियः तस्याग्नेरिव क्रिया व्यापारो यस्य सः॥ ननु नियतेंद्रियतया सा
त्विकसेवायामियान्नहि पुरुषार्थः। तथापि राजसादीन् विषयान् दुःखमिति। जानंतोऽपि कथं सेवंते इति पृच्छति। वदंती
ति॥ब॥ ॥उद्धव उवाच॥ ॥वदंति मर्त्याः प्रायेण विषयान्पदमापदां। अथापि भुंजते कृष्ण तत्कथं श्वखराजवत्
॥८ पदं स्थानं। श्वा यथा भर्त्स्यमानोऽपि खरो यथा पद्भ्यां ताड्यमानोऽपि खरीमनुधावति। अजो यथा हंतुमानीतोऽपि त
द्वत्। इममर्थं क्रमेण दर्शयन् मिथ्याभिनिवेशेन भुंजत इति सदृष्टांतमाह। अहमिति त्रिभिः॥ब॥ ॥श्रीभगवानु एका
॥ ॥अहमित्यन्यथाबुद्धिः प्रमत्तस्य यथा हृदि। उत्सर्पति रजो घोरं ततो वैकारिकं मनः॥९ प्रमत्तस्याविवेकशून्यस्य ८७
देहादावहमिति मिथ्याबुद्धिर्हृदि यथावदुपसर्पति। ततो हि बुद्धेश्च वैकारिकं सत्त्वप्रधानमपि मनः प्रति घोरं दुःखात्म

कं रजः उत्सर्पति मनो व्याप्नोतीत्यर्थः॥ब॥ रजोयुक्तस्य मनसः संकल्पः सविकल्पकः। ततः कामो गुणध्यानात् दुःसहः स्या
द्धि दुर्मतेः॥१० इदमेवं भोग्यमिति सविकल्पः। संकल्पः स्यात्। ततश्चाहो रूपमहो भाव इति गुणध्यानात् दुर्द्धरः कामः
स्यात्॥ब॥ करोति कामवशगः कर्माण्यविजितेंद्रियः। दुःखोदर्काणि संपश्यन् रजोवेगेन मोहितः॥११ ततो विषयान्भो
क्तुं कर्माणि करोति। एवं चेन्न कस्यापि दुःखनिवृत्तिरित्याशंक्याह॥ब॥ रजस्तमोभ्यां यदपि विद्वान् विक्षिप्तधीः पुनः॥अ
तंद्रितो मनो युंजन् दोषदृष्टिर्न सज्जते॥१२ यद्यपि रजस्तमोभ्यां विक्षिप्तधीर्मूढधीश्च तथापि विद्वान् विवेकी पुनः पुनःम
मनो निरुंधन्न सज्जते। विषयदोषदृष्ट्या मनोनिरोधासक्तो सुखं तन्निरोधोपायमाह। अप्रमत्त इति॥ब॥ अप्रमत्तोनु
युंजीत मनो मय्यर्पयन् शनैः॥ अनिर्विण्णो यथाकालं जितश्वासो जितासनः॥१३ अनिर्विण्णः अनलसः यथाकालं त्रिषव
णं मयि परमानंदरूपेऽर्पयन् समादध्यात्। विषयैः संग्रथितस्य मनसः तद्वियोगेन ईश्वरनिष्ठत्वमसंभावितं मन्यमानं

प्रतितन्निरूपणायेतिहासमुत्क्षिपन्नाह। एतावानिति॥ब॥ एतावान्योग आदिष्टो मच्छिष्यैः सनकादिभिः। सर्वतो मन आकृ
ष्य मय्यद्धावेश्यते यथा॥२४ यथावन्मय्यावेश्यते इत्येतावानित्यर्थः। मच्छिष्यैरित्युक्ते तेषामतिज्याय सांख्येनेन रूपेण निरूपि
णसंभवात् पृच्छति। यदेति॥ब॥ ॥उद्धव उवाच॥ ॥यदा त्वं सनकादिभ्यो येन रूपेण केशव। योगमादिष्टवानेत
द्रूपमिच्छामि वेदितुं॥२५ तं कालं तद्देवरूपं च वेदितुमिच्छामि इच्छामि। तत्कथयेति॥ब॥ ॥श्रीभगवानुवाच॥ ॥पुत्रा
हिरण्यगर्भस्य मानसाः सनकादयः। पप्रच्छुः पितरं सूक्ष्मां योगस्यैकांतिकीं गतिं॥२६ हिरण्यगर्भस्य मानसाः पुत्राः सूक्ष्मां
दुर्ज्ञेयां ऐकांतिकीं परां काष्ठां तदेवाह। गुणेष्विति॥ब॥ ॥सनकादय ऊचुः॥ ॥गुणेष्वाविशते चेतो गुणाश्चेतसि च ए॰टी॰
प्रभो। कथमन्योन्यसंत्यागो मुमुक्षोरतितीर्षतः॥२७ विषयेषु स्वभावतो रागादिवशाच्चेतः प्रविशति। ते चानुभूता विष ५८
यवासनारूपेण चेतसि प्रविशंति। अतितीर्षोः विषयानतिक्रमितुमिच्छोः॥ब॥ ॥श्रीभगवानुवाच॥ ॥एवं पृष्टो मह

देवः स्वयंभूर्भूतभावनः। ध्यायमानः प्रश्नबीजं नाभ्यपद्यत कर्मधीः॥२८ महान्देवोपि स्वयंभूरपि भूतानां स्रष्टापि
ध्यायमानो विचारयन्नपि प्रश्नस्य बीजं। यदज्ञानादयं प्रश्नः तन्नाविंदत्। यतः कर्मविक्षिप्तधीः॥ब॥ स माममचिंतयद्देवः
प्रश्नपारतितीर्षया। तस्याहं हंसरूपेण सकाशमगमं तदा॥२९ प्रश्नस्य पारं उत्तरं अभिप्रायो वा तस्य तितीर्षया जिज्ञा
सया हंसरूपेण तत्रागतोस्मीति। हंसो यथा क्षीरनीरे च पृथक्कर्तुं शक्तः एवं गुणांश्चेतश्चेति द्योतयितुं हंसरूपेण तत्रा
गतोसीति॥ब॥ दृष्ट्वा मां त उपव्रज्य कृत्वा पादाभिवंदनं। ब्रह्माणमग्रतः कृत्वा पप्रच्छुः को भवानिति॥३० इत्यहं मुनिभिः
पृष्टः पृष्टस्तत्त्वजिज्ञासुभिस्तदा। यदवोचमहं तेभ्यस्तदुद्धव निबोध मे॥३१ इत्यहं मुनिभिः पृष्ट इति पृथग्वाक्यं यदवोचमि
ति पृथक्। अतोस्मच्छ्रोतृहृत्स्थित्वरदोषः। तेभ्यो यदवोचं तन्मे वचनं निबोध। देहादिविविक्तात्मज्ञाने सति तन्निष्ठस्य रागा
द्यसंभवात् स्वयमेव विषयचेतसोर्विश्लेषो भवतीति वस्तुप्रश्नखंडनमिषेणैव तदात्मानात्मविवेकमाह। वस्तु

न इति त्रिभिः ॥ब॥ ॥हंस उवाच॥ ॥वस्तुनो यद्यनानात्व आत्मनः प्रश्न ईदृशः॥ कथं घटेत वो विप्रा वक्तुर्वा मे क आश्र
यः॥२१॥ किमात्मविषयोऽयं प्रश्नः। तदुपाधेर्भूतसंघस्य वा। नाद्य आत्मनः तर्हि तस्य वस्तुतः परमात्मस्वरूपस्य अनानात्वे
सति हे विप्राः वो युष्माभिः कृतः ईदृशः प्रश्नः बहुत्वनिर्द्धारणरूपः कथं घटते। उत्तरदातुर्वा मम क आश्रयः। अविशेषे
आत्मनि कं जातिगुणादिविशेषमाश्रित्य उत्तरं वक्ष्यामीत्यर्थः॥ब॥ पंचात्मकेषु भूतेषु समानेषु च वस्तुतः। को भवा
निति प्रश्नो वाचारंभो ह्यनर्थकः॥२२॥ भूतसंघविषयत्वेऽपि अयं वः प्रश्नो वाचारंभः वाङ्मात्रेणारब्धः यतो निरर्थकः। अ
तः। भूतेषु देवमनुष्यादिदेहेषु पंचात्मकेषु अतः समानेषु अभिन्नेषु। पुनर्वस्तुतश्च तमकारणात्मना अभिन्नेषु। वा ए.टी.
चारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रुतेः। तत्र पंचात्मकत्वं प्रत्यक्षादिसिद्धमेवेति परमकारणाभेद ९९
मेवोपपादयति। मनसेति॥ब॥ मनसा वचसा दृष्ट्या गृह्यतेऽन्यैरपींद्रियैः। अहमेव न मत्तोऽन्यदिति बुध्यध्वमंजसा॥२३॥

मन आदिभिरिंद्रियैर्यद्गृह्यते तत्तदहमेवेत्यर्थः। अंजसा तत्त्वविचारेण एतेन सर्वात्मकोऽहमित्यंजसा ह्युत्तरमु
क्तं। एवं प्रश्नखंडनमिषेणैवात्मरूपं सामान्यतो निरूप्य ब्रह्मणोऽपि दुःपरिहरं यत्पृष्टं तत्रोत्तरमाह। गुणेष्विंद्रिया
दिना यावदध्यायसमाप्तिः॥ब॥ गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रजाः॥ जीवस्य देह उभयं गुणाश्चेतो म
दात्मनः॥२४॥ अयमभिप्रायः यदि कर्तृत्वभोक्तृत्वादिरूपतया विषयैः संग्रथितं चित्तं बुद्ध्यादिशब्दवाच्यमेव जी
वस्य स्वरूपं भवेत् ततस्तद्वियोगो न घटते। तस्य तु स्वरूपमहं ब्रह्मैव चित्ताध्यासेन तु तत्स्वभावतया विषयैः सं
ग्रथितं। अतस्तस्य जीवस्य ब्रह्मत्वभावनया विषयाणां च मिथ्यात्वानुसंधानेन सर्वतो निर्विद्य भगवंतं भजेतूल
वद्येवं परिशिष्टस्वरूपावस्थानमिति। हे प्रजाः पुत्रकाः अयं गुणेषु चेतः आविशति गुणाश्चेतसि। एवं गुणाश्चे
तस्योभयं ग्रथितं। तदात्मनो ब्रह्मरूपस्य जीवस्य देहः अध्यस्तः उपाधिः न तु स्वरूपं तस्मात्॥ब॥ गुणेष्वाविश

तच्चित्तमभीक्ष्णं गुणसेवया। गुणाश्च चित्तप्रभवा मद्रूप उभयं त्यजेत्॥२५ अभीक्ष्णं पुनः पुनर्गुणसेवया तत्संस्का-
रेण गुणेषु चित्तमाविशते। ते तु न वासनारूपेण चित्ते प्रकर्षेण भवंतीति तथा। तच्चित्तं ते गुणाश्च एवं यदुभयं तन्म-
द्रूपः सन् त्यजेत्। ननु जाग्रदावस्थावतः कुतः ऐक्यं चिद्रूपत्वं। कुतः कूटस्थचिद्रूपता वा। तत्राह। जाग्रदिति॥ जा-
ग्रत्स्वप्नः सुषुप्तं च गुणतो बुद्धिवृत्तयः। तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितः॥२६ जाग्रज्जागरणं स्वप्नः सु-
षुप्तं चेति बुद्धेरेता वृत्तयो न तु जीवस्य। ताश्च न स्वाभाविक्यः किंतु सत्वाज्जागरणं विद्यात् रजसा स्वप्नमादिशेत्।
प्रस्वापं तमसा जंतोस्तुरीयं त्रिषु संततमिति। वक्ष्यमाणक्रमेण गुणवृत्तय एवताः। जीवस्तु विलक्षणः तदवस्थारहितः ए.टी.
एव निश्चितः। कुतः। तासां साक्षित्वेन। ननु तर्हि कथमहं जागर्मीत्यादि प्रतीतिस्तत्राह। यर्हीति॥ यर्हि संसृति- १००
बंधोयमात्मनो गुणवृत्तिदः। मयि तुर्ये स्थितो जह्यात् त्यागस्तद्गुणचेतसां॥२७ यर्हि यस्मात्। सम्यक्सृतिः सरण

मनयेति संसृतिर्बुद्धिः तया बंधोयमात्मनो गुणवृत्तीर्ददाति। तस्मान्मयि तुर्ये स्थितः सन् जीव इमं संसृतिबंधं ज-
ह्यात्। तत्तदा गुणानां चेतसश्चान्योन्यं त्यागो भवति। कथं संसृत्या बंधः कथं वा जह्यात्। तदाह। अहमिति॥ अ-
हंकारकृतं बंधमात्मनोर्थविपर्ययं। विद्वान्निर्विद्य संसारचिंतां तुर्ये स्थितस्त्यजेत्॥२८ अहंकारेण कृतं बंध-
नं आत्मनोर्थविपर्ययं आनंदाद्यावरणेनानर्थहेतुं विद्वान् जानन् सन् निर्विद्य दुःखमेतदिति ज्ञात्वा तुर्ये स्थितो
भूत्वा संसारचिंतां संसारे बुद्धिः तस्मिन् चिंतां अभिमानं तत्कृतां भोगे चिंतां त्यजेदिति यावदेवं न त्यजेत्तावत्तस्य
कर्मज्ञानादि सर्वं व्यर्थमित्याह। यावदिति॥ यावन्नानार्थधीः पुंसो न निवर्तेत युक्तिभिः। जागर्त्यपि स्वपन्नज्ञः
स्वप्ने जागरणं यथा॥२९ यद्यपि जागर्त्ति कर्मादिषु तथापि स्वपन् स्वप्नान् पश्यन्निव भवति। यतोऽज्ञः। न सम्य-
ग्दर्शी। अन्यजागरत्वस्य स्वप्ने दृष्टांतः। ननु कथं वेदमितवर्णाश्रमकर्मादीनां धीः निवर्तते। तत्राह। असत्वादि-

ति॥ टी॥ अस्य चात्मनोऽन्येषां भावानां तत्कृता भिदा। गतयो हेतवश्चास्य मृषा स्वप्नदृशो यथा॥३०॥ भावानां देहादीनां
तत्कृता भिदा वर्णाश्रमादिरूपा। गतयः स्वर्गादिफलानि हेतवः कर्माणि च। अस्यात्मनो मृषा। अविद्याविद्विषये
वेद इति भावः। युक्तिभिर्विविक्तं। ता एव युक्तीराह य इति॥ टी॥ यो जागरे बहिरनुक्षणधर्मिणोऽर्थान्भुङ्क्ते सम
स्तकरणैर्हृदि तत्सदृक्षान्। स्वप्ने सुषुप्त उपसंहरते स एकः स्मृत्यन्वयात्त्रिगुणवृत्तिदृगिन्द्रियेशः॥३१॥ अर्थानु
क्तानुक्तदेहादीन्समस्तकरणैश्चक्षुरादिभिर्भुङ्क्ते। कथंभूतान् अनुक्षणधर्मिणः क्षणिकबाल्यतारुण्यादिध
र्मवतः। यश्च स्वप्ने हृदि जागरदृष्टसदृशान्वासनामयान्भुङ्क्ते। यश्च सुषुप्ते तान्सर्वानुपसंहरते स एकः। कुत । एकी
स्त्रिगुणवृत्तिदृक् अवस्थात्रयद्रष्टा। ननु जाग्रदवस्थायां सर्वेन्द्रियाणि पश्यंति स्वप्ने मनः सुषुप्ते संस्कारशेषा बुद्धिः। २०५
कथमात्मा द्रष्टा। तत्राह। इंद्रियेशः। अवस्थात्रयेप्येक एव। ननु इंद्रियेशा विश्वतैजसप्राज्ञा भिन्नाः। तत्राह। तत्कृतः

स ईदृशः। स्मृत्या प्रतिसंधानेन सर्वावस्थास्वन्वयात्। यः स्वप्नानन्दाऽस्यं यश्चानंतरं न किंचिदवेदिषं स एव एतद्विजा
गमीति। उपाधिभेदेन विश्वादिव्यवहार इति। एतेन बालयुवाद्यवस्थास्वपि प्रतिसंधानेनात्मैक्यं द्रष्टव्यं। ततः कि
मतश्चाह। एवमिति॥ टी॥ एवं विमृश्य गुणतो मनसस्त्र्यवस्था मन्मायया मयि कृता इति निश्चितार्थाः। संछिद्य हार्द
मनुमानसदुक्तितीक्ष्णज्ञानासिना भजत माखिलसंशयाधिं॥३२॥ गुणतो या एता मनसस्त्र्यवस्थास्ता मदविद्य
या मयि कृता न तत्त्वतः संतीति निश्चितः आत्मरूपोऽर्थो येषां ते यूयं माखिलसंशयानामाधिं आधीयं ते अस्मिन्नि
त्याधिः अहंकारः। तं संछिद्य हार्दं हृदिस्थितं मां भजत केन छित्वा तदाह। अनुमानैः सदुक्तिभिः सतामुपदेशैः विम
तं मिथ्या दृश्यत्वात् शुक्तिरजतवदित्यनुमानं। वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति सदुक्तिः। अनु
मानं च सदुक्तिश्च ताभ्यां तीक्ष्णो योऽसौ ज्ञानासिः तेन तीक्ष्णेन ज्ञानखड्गेन। अनुमानांतरं दर्शयति। ईक्षेतेति॥ टी॥ ई

त्येतद्विश्वमखिलं मनसो विलासं दृष्टं विनष्टमतिलोलमलातचक्रं। विज्ञानमेकमुरुधेव विभाति मायास्वप्नस्त्रिधा गुणवि
सर्गकृतो विकल्पः॥२४॥ इदं जगत् विश्वमीक्षिता नत्र द्वैतवान्। मनोविलासत्वात् दृश्यत्वात् विनाशित्वाच्च स्वप्नवत्
अतिचंचलत्वात् अलातचक्रवत्। ननु आत्मापि कथं निर्विषयः स्यात् तत्राह। विज्ञानमिति निगमनं तस्मात् त्रिधोपायं
गुणपरिणामकृतो विकल्पो भेदः समाप्य इति। यस्मादेवं विश्वमात्रं दृश्यं तस्मात्॥२५॥ दृष्टिं ततः प्रतिनिवर्त्य निवृत्त
तृष्णस्तूष्णीं भवेन्निजसुखानुभवो निरीहः। संदृश्यते क्व च यदीदमवस्तुबुद्ध्या त्यक्तं भ्रमाय न भवेत् स्मृतिरानिपाता
त्॥२६॥ ततो दृश्यात् दृष्टिं प्रतिनिवर्त्य निजसुखानुभावात् तन्नैष्कल्यार्थं च निवृत्ततृष्णः तूष्णीं निरीहश्च भवेत् म प.द
नोवाक्काययथापारं इत्यर्थः। ननु सर्वव्यापारपरिहरणमतिनिपुणानामपि दुःशकं। प्राणभोजनादिव्यापारा १०२
विक्षेपहेतवः ननु देहवतः सर्वथा द्वैतदृष्टिप्रतिनिवर्तनायोगात् पुनः संसारः स्यादेव तत्राह। संदृश्यत इति क्वचि

दावश्यकव्यापारादिषु यद्यपीदं संदृश्यते तथापीदमवस्तुबुद्ध्या यत्त्यक्तं। तत्पुनर्मोहाय न भवेत्। किंतु देहपा
तपर्यंतं स्मृतिरिव स्मृतिः॥ संस्कारमात्रेणावभासो भवेदित्यर्थः। एतदेवोपपादयति देहमिति॥२६॥ देहं च नश्वरमव
स्थितमुत्थितं वा सिद्धो न पश्यति यतोध्यगमत्स्वरूपं। दैवादपेतमथ दैववशादुपेतं वासो यथा परिकृतं मदिरामदांधः
॥२७॥ आसनादुत्थितं उत्थायतत्रैवस्थितं ततः क्वचिदपेतं निर्गतं। उन्मत्तैर्वोपेतं आगतं वा देहमपि नानुसंधत्ते। कुतो
यतः येन देहेन स्वरूपमध्यगमत्। तं देहं। यतः कारणादिति वा। परिकृतं परिहितं वासो गतं स्थितं वा। यथा न वेत्ति
तद्वत्। ननु यो देहः परिपाल्यमानोपि मुमूर्षति। तं चेन्न पश्यति तर्हि पतेदेवानेनाह। देहोपीति॥२८॥ देहोपि दैवव
शगः खलु कर्म यावत् स्वारंभकं प्रतिसमीक्षत एव सासुः। तं सप्रपंचमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्र
तिबुद्धवस्तुः॥२९॥ दैववशेन गच्छन् स्वारंभकं कर्म यावदस्ति तावत्पर्यंतं प्रतिसमीक्षत एव सासुः। प्राणेंद्रियस

१०३

दितः॥ ननु तर्हि तस्मिन् कदाचिदासक्तेनापि नेश्याद् इत्यमिति। स्वाप्नं स्वप्नतुल्यं अधिरूढः प्राज्ञः समाधिपर्यंतो योगो येन
अत एव प्रतिबुद्धं ज्ञातं परमार्थवस्तु तो येन सः। उक्तार्थे तेषां विश्वासार्थं स्वरूपमाह। मयेति॥ छ॥ मयैतदुक्तं वो वि
प्राः गुह्यं यत्सांख्ययोगयोः। जानीत मागतं यज्ञं युष्मद्धर्मविवक्षया॥ ३८ सांख्यमात्मानात्मविवेकः योगोष्टांगः तयो
र्गुह्यं रहस्यं। यज्ञं विष्णुं युष्मद्धर्मविवक्षयेत्यनेन धर्माध्यक्षरूपदिष्टा इति ज्ञेयं। अत एव यत्नेन हंसरूपेण ब्रह्मणोप्यु
त्तमा धर्मवेद्यत्वं वादोत्र विष्यति॥ छ॥ अहं योगस्य सांख्यस्य सत्यस्यर्तस्य तेजसः। परायणं द्विजश्रेष्ठाः श्रियः कीर्तेर्द
मस्य च॥ ३९ योगस्य ईश्वरार्पणत्वेन क्रियमाणस्य कर्मणः सांख्यस्य तत्त्वज्ञानस्य शास्त्रेण ज्ञातस्य। सत्यमनुष्ठी ८८
यमानो धर्मः ऋतं प्रमीयमानो धर्मः तेजः प्रभावः एतेषां परमं अयनं। किंच। मामिति॥ छ॥ मां भजंति गुणाः सर्वे १०३
निर्गुणं निरपेक्षकं। सुहृदं प्रियमात्मानं साम्यासंगादयो गुणाः॥ ४० कथं भूताः अगुणाः गुणपरिणामरू

पा न भवंति। किंतु नित्या इत्यर्थः॥ छ॥ ॥श्रीभगवानुवाच॥ ॥इति मे छिन्नसंदेहा मुनयः सनकादयः। सभाजयि
त्वा परया भक्त्यागृणत संस्तवैः॥ ४१ मे मया अगृणत मां तुष्टुवुः॥ छ॥ तैरहं पूजितः सम्यक् संस्तुतः परमर्षिभिः।
प्रतीयाय स्वकं धाम पश्यतः परमेष्ठिनः॥ ४२ प्रतीयाय प्रतिगतोस्मीति॥ छ॥ ॥ ॥इति श्रीभागवते महापुरा
णे एकादशस्कंधे हंसगीतं नाम त्रयोदशोऽध्यायः॥ ॥छ॥ ॥चतुर्दशे परं श्रेयो भक्तिरेव न चेतरत्। इत्येतद्ध
र्म्यं तद्ध्यानयोगस्य सहसाधनैः॥ १ एवं तावद्भगवतो भक्त्या मोक्ष इत्युक्तं। अन्ये तु वै भवव्यतिरिक्तान्यन्यानि साध
नानि वदंति। तत्र विशेषनिर्धारणाय पृच्छति। वदंतीति॥ छ॥ ॥उद्धव उवाच॥ ॥वदंति कृष्ण श्रेयांसि बहूनि
ब्रह्मवादिनः। तेषां विकल्पप्राधान्यमुताहो एकमुख्यता॥ १ श्रेयांसि श्रेयःसाधनानि। किं विकल्पेन प्राधान्यं उता
हो किं वा एकस्यैव मुख्यता। एकमुख्यत्वपक्षे ज्ञाने बीजमाह। भवतेति॥ छ॥ भवतोदाहृतः स्वामिन् भक्तियोगोन

पेक्षितः।।निरस्य सर्वतः संगं येन त्वय्याविशेन्मनः।।२।।नन्वपेक्षितं अनपेक्षाय स्मितु सः।।अद्वैतकः।।अयमर्थः।।भक्ता

नक्तियोग इत्युक्तं।।अन्ये च यानि श्रेयःसाधनानि वदंति।।तेषां किं विकल्पेन सर्वेषां तुल्यफलत्वं।।यद्वा।।कस्यचिद्विशि

ष्ट इति।।तत्र भक्तिरेव महाफलत्वेन मुख्या।।अन्यानि तु प्रज्ञस्य तु सारेण तुच्छस्थानीय स्वर्गादिफलबुद्धिभिः प्राणिभिः

प्राधान्येन परिकल्पितानि तुच्छफलानीति विवेक्तुं प्रज्ञस्य तु सारेण बहुधात्वे सत्यप्रतिपत्तिमाह।।कालेनेति सप्त

भिः।।३।। ।।श्रीभगवानुवाच।। ।।कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता।।मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां

मदात्मकः।।३ मदात्मकः मय्येवात्मा चित्तं यस्य सः।।३।। तेन प्रोक्ता तु पुत्राय मनवे पूर्वजाय सा।।ततो भृग्वादयोऽगृह् एद

न् सप्त ब्रह्ममहर्षयः।।४ भृग्वादयः।।भृगुश्च मरीचिरत्र्यंगिरसौ पुलहः क्रतुः।।इत्येते सप्त ब्रह्माणः प्रजापतयः ते च ते २०५

महर्षयश्च।।४।। तेभ्यः पितृभ्यः तत्पुत्राः देवमानवगुह्यकाः।।मनुष्याः सिद्धगंधर्वाः सविद्याधरचारणाः।।५ किंदेवाः

किंनरा नागा रक्षः किंपुरुषादयः।।बह्व्यस्तेषां प्रकृतयो रजःसत्त्वतमोभुवः।।६ किंदेवाः किंचिद्देवदेहो गंधर्वा रा

दिशादिद्येन किं देवा मनुष्या वेति संदेहास्पदद्वीपांतरमनुष्या एव।।एवं किंनराः किंचिन्नरा इव मुखवता शरीरतो वा

किंपुरुषाः।।किंचित्पुरुषा इव वानरादयः।।प्रकृतयः वासनाः कृतः बह्व्यः रजःसत्त्वतमांसि भुवो जन्मस्थानानि यासां

ताः।।६।। याभिर्भूतानि भिद्यंते भूतानां मतयस्तथा।।यथाप्रकृति सर्वेषां चित्रा वाचः स्रवंति हि।।७ भूतानि देवासु

रमनुष्यादीनि।।चित्रा वाचः वेदार्थव्याख्यानविषयाः।।७।। एवं प्रकृतिवैचित्र्यात् भिद्यंते मतयो नृणां।।पारंपर्येण केषांचि

चित्पाखंडमतयोऽपरे।।८ एवमित्युक्तोपसंहारः।। केषांचिदध्ययनादिशून्यानां उपदेशपरंपरया।।ननु केचिद्बौद्ध

चार्वाकादयो वेदपावदीनाः पृथक् श्रेयो वदंति।।तत्कथमिति चेत्तत्राह।।अपरे पाखंडमतयः वेदविरुद्धार्थमतयः नि

र्मूलश्रेयोवादिन इत्यर्थः।।तत्र स्मृतीनां मायागुणमूलत्वात्।।एवं मतिवैचित्र्ये कारणमाह।।मन्मायेति।।८।।मन्माया

मोदितधियः पुरुषाः पुरुषर्षभ। श्रेयो वदंत्यनेकांतं यथाकर्म यथारुचि॥९॥ मन्मायामोहितधियः। अनेकांतं नाना
विधं। तदेवाह। धर्ममिति सार्द्धेन॥टी॥ धर्ममेके यशश्चान्ये कामं सत्यं शमं दमं। अन्ये वदंति स्वार्थं ऐश्वर्यं त्यागभोज
नं॥१०॥ धर्मं कर्ममीमांसकाः। तदर्थं मोक्षार्थिनः प्रवर्त्तंते। तत्र काम्यनिषिद्धयोः। नित्यं नैमित्तिकं कुर्यात्प्रत्यवायजिघां
सया। इत्यादि। यशः काव्यालंकारकृतः। यथाहुः। यावत्कीर्तिर्मनुष्यस्य पुण्या लोकेषु गीयते। तावद्वर्षसहस्राणि
स्वर्गलोके महीयते। इति। कामं वात्स्यायनादयः। सत्यं शमं दमं च योगशास्त्रकृतः। अन्ये हि स्वार्थवादिनो दंडनीतिकृतः।
वैश्वसिद्धं ऐश्वर्यमिव स्वार्थं पुरुषार्थं वदंति। अतः सामाद्युपाया एव श्रेयःसाधनमिति तेषां मतं। तथैव त्यागं भोजनं एद
च लोकायतिकाः बौद्धाः॥टी॥ केचिद्यज्ञं तपो दानं व्रतानि नियमान्यमान्॥११॥ यज्ञं तपो दानं यज्ञो देवतायजनं। तपश्च १०५
स्नानं वा। तेषां तु फलं च मिथ्याह। आद्यंतवंत इति॥टी॥ आद्यंतवंत एवैषां लोकाः कर्मविनिर्मिताः। दुःखोदर्कास्त

मोनिष्ठाः क्षुद्रानंदाः शुचार्पिताः॥१२॥ तेषां लोकाः एतैः साधनैः फलानि। तमोनिष्ठाः मोहप्रधानाः। भोगकालेऽप्यसूयादि
भिः शुचार्पिताः। ध्यात्वा॥ भक्तेः सुखं चाह। मयीति। यावदध्यायसमाप्ति॥टी॥ मय्यर्पितात्मनः सभ्य निरपेक्षस्य सर्वतः। म
यात्मना सुखं यत्तत्कुतः स्याद्विषयात्मनां॥१२॥ हे सभ्य। मया परमानंदरूपेण आत्मना स्वरूपत्वेन स्फुरता। किंच। अन्ये
षां तत्र ब्रह्मलोकादि परिच्छिन्नं सुखं न तस्य तु परिपूर्णमित्याह। अकिंचनस्येति॥टी॥ अकिंचनस्य दांतस्य शांतस्य सम
चेतसः। मया संतुष्टमनसः सर्वाः सुखमया दिशः॥१३॥ परिपूर्णतामेवाह। न पारमेष्ठ्यमिति॥टी॥ न पारमेष्ठ्यं न महेंद्रधि
ष्ण्यं न सार्वभौमं न रसाधिपत्यं। न योगसिद्धीरपुनर्भवं वा मय्यर्पितात्मेच्छति मद्विनान्यत्॥१४॥ रसाधिपत्यं पातालादिस्वा
म्यं। अपुनर्भवं मोक्षमपि मद्विना मां विना। अन्यदिच्छति। अहमेव तस्य प्रेष्ठ इत्यर्थः। ममापि स एव प्रेष्ठ इत्याह। न तथेति
द्वाभ्यां॥टी॥ न तथा मे प्रियतम आत्मयोनिर्न शंकरः। न च संकर्षणो न श्रीर्नैवात्मा च यथा भवान्॥१५॥ आत्मयोनिर्ब्रह्मा

१९८

अतोपि शंकरः मत्स्वरूपस्ततोपि संकर्षणोस्त्रातापि श्रीर्भार्यापि आत्मा मच्छरीरमपि यथा भक्त इति वक्तव्ये अतिहर्षे
णाद्वा। यथा भवानिति। ज्ञानिनः प्रियतमत्वमेव दर्शयति। निरपेक्षमिति॥ ब॥ निरपेक्षं मुनिं शांतं निर्वैरं समदर्शि
नं। अनुव्रजाम्यहं नित्यं पूयेयेत्यंघ्रिरेणुभिः॥१६॥ चतुर्विधा भजंते मां जनाः सुकृतिनोऽर्जुन। ज्ञानी त्वात्मैव मे म
तमिति भगवद्वचनं। पूयेयमहं तदंघ्रि ब्रह्मांडानि पवित्रीकुर्यामिति भावनेत्यर्थः। किंच। मद्भक्तानां सुखं एतावद
वंभूतमिति वा वक्तुं कः समर्थः। तत्स्वसंवेद्यं निरूपमित्याह। निःकिंचना इति॥ ब॥ निःकिंचना मय्यनुरक्तचेतसः
शांता महांतोखिलजीववत्सलाः। कामैरनालब्धधियो जुषंति यन्नैरपेक्ष्यं न विदुः सुखं मम॥१७॥ महांतो निर्दंभा ए.टी.
नाः। अनालब्धधियः अस्पृष्टचित्ताः। निःकिंचनत्वादीनां यथेष्टं हेतुमद्भावः। एवंभूता मम मदीयाः यत्सुखं जुषंति १८५
सेवंते तत्सुखं त एव विदुर्नान्ये। कुतः। नैरपेक्ष्यं नास्त्यपेक्षणीयं येषां ते नैरपेक्षाः। तैरेव लभ्यं न तु मोक्षापेक्षैरपि।

इत्यर्थः। यद्वा। एवंभूताः संतो ये मम मां इत्यर्थः। जुषंते प्रीणंति त एव यन्नैरपेक्ष्यं तद्विदुर्नान्ये इत्यन्वयः। अपि च। अशांता
वकुत्त्व भक्तकथा। यतः प्राकृतोपि भक्तः कृतार्थ एवेत्याह। बाध्यमान इति द्वाभ्यां॥ ब॥ बाध्यमानोपि मद्भक्तो
विषयैरजितेंद्रियः। प्रायः प्रगल्भया भक्त्या विषयैर्नाभिभूयते॥१८॥ अजितेंद्रियोपि मद्भक्तो विषयैराकृष्यमा
णोपि। प्रगल्भया समर्थया॥ ब॥ यथाग्निः सुसमिद्धार्चिः करोत्येधांसि भस्मसात्। तथा मद्विषया भक्तिरुद्धवै
नांसि कृत्स्नशः॥१९॥ पाकाद्यर्थं प्रज्वालितोप्यग्निः यथा काष्ठानि भस्मीकरोति। तथा रागादिनापि कथंचिन्मद्वि
षया सती मद्भक्तिः। समस्तपापानीति। भगवानात्मविषयभक्तिमहिमाश्चर्येण संबोधयति। अहो उद्धव विस्मयं
कृपणेति। अत एवंभूतं श्रेयो नान्यदस्तीत्याह॥ न साधयतीति द्वाभ्यां॥ ब॥ न साधयति मां योगो न सांख्यं धर्म उद्ध
व। न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता॥२०॥ भक्त्याहमेकया ग्राह्यः श्रद्धयात्मा प्रियः सतां। भक्तिः पु

नातिमन्निष्ठा श्वपाकानपि संभवात्॥२१॥ श्रद्धयायां भक्तिस्तया संभवात् जातिदोषादपीत्यर्थः। भक्त्याभावेऽन्यत्साधनं
व्यर्थमित्याह। द्वाभ्यां। धर्म इति॥ब॥ धर्मः सत्यदयोपेतो विद्या वा तपसान्विता। मद्भक्त्यापेतमात्मानं न सम्यक्प्रपु
नाति हि॥२२॥ भक्तेश्चिह्नान्याह। कथमिति॥ब॥ कथं विना रोमहर्षं द्रवता चेतसा विना। विनानंदाश्रुकलया शुध्ये
द्भक्त्या विनाशयः॥२३॥ रोमहर्षादिकं विना कथं भक्तिर्गम्यते। भक्त्या विना कथमाशयैः शुध्येदिति। किंच। मद्भक्तिः
स्वाश्रयं शोधयतीति किं वक्तव्यं। यतो गद्गदवागादिलक्षणो मद्भक्तियुक्तो लोकं सर्वं पुनातीत्याह। वागिति॥ब॥ वा
ग्गद्गदा द्रवते यस्य चित्तं रोदित्यभीक्ष्णं हसति क्वचिच्च। विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुनाति॥२४ एस
अपि च भक्त्यैवात्मशुद्धिः नान्यत इति सदृष्टांतमाह। यथेति॥ब॥ यथाग्निना हेममलं जहाति ध्मातं पुनः स्वं भ १०५
जते च रूपं। आत्मा च कर्मानुशयं विधूय मद्भक्तियोगेन भजत्यथो मां॥२५॥ यथाग्निना ध्मातं तापितमेव वस्तु वसंअत

मलं जहाति। स्वं निजं रूपं च भजते। न तु क्षालनादिभिः। कर्मानुशयं कर्मवासनां भजते मद्रूपतामापद्यते। न तु ब्रह्म
विदाप्नोति परं तमेव विदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभ्यो ज्ञानादेवाऽविद्यानिवृत्त्या चात्मावाप्तिरवगम्यते। कुतो भक्तियो
गेनेति चेत्। सत्यं। तच्च ज्ञानं भक्त्या भवतीत्याह। यथेति॥ब॥ यथा यथात्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभि
धानैः। तथा पश्यति वस्तु सूक्ष्मं चक्षुर्यथैवांजनसंप्रयुक्तं॥२६॥ आत्मा चित्तं परिमृज्यते शोध्यते। मत्पुण्यकथानां श्रव
णैः अभिधानैश्च भक्तैः रवावांतरव्यापारो ज्ञानं न पृथगित्यर्थः। किंच। ज्ञानं नाम चित्तस्य मदाकारपरिणामः। स च मां भ
जतः स्वत एव भवति। न तु यत्नांतरमपेक्षत इति सदृष्टांतमाह। विषयानिति॥ब॥ विषयान्ध्यायतश्चित्तं विषयेषु वि
षज्जते। मामनुस्मरतश्चित्तं मय्येव प्रविलीयते॥२७॥ यदस्मादन्यत्साधनं तत्फलं च स्वप्नं मनोरथवदभिध्यानमात्रं।
तस्मात्तद्विधाय मय्येव मनः समाहितं कुर्विति प्रकरणार्थः। प्रकरणार्थमुपसंहरति। तस्मादिति॥ब॥ तस्मादसद

सिध्यानं यथा चत्र मनोरथं। हित्वा मयि समाधत्स्व मनो मद्भावभावितं॥२८ मद्भावभावितं मद्भावेन मज्जते तेन वशो धित्वं
विशेषतो वा स्त्र्यायनाद्यक्तकाममार्गः परित्याज्य इत्याह। स्त्रीणामिति॥ टी॥ स्त्रीणां तत्संगिनां संगं त्यक्त्वा दूरत आत्म
वान्। क्षेमे विविक्त आसीनश्चिंतयेन्मामतंद्रितः॥२९ आत्मवान् धीरः सन् क्षेमे निर्भये देशे विविक्ते विजने एतदुपपा
दयति। न तथेति॥ टी॥ न तथास्य भवेत्क्लेशो बंधश्चान्यप्रसंगतः। योषित्संगाद्यथा पुंसो यथा तत्संगिसंगतः॥३० अस्य
पुंसः यथा तत्संगिसंगतः क्लेशो भवेत्। यथा च बंधो योषित्संगेन तथान्यप्रसंगतो न भवेदिति। मां चिंतयेदित्युक्तं तत
त्प्रकारं पृच्छति॥ यथेति॥ टी॥ ॥उद्धव उवाच॥ ॥यथा त्वामरविंदाक्ष यादृशं वा यदात्मकं। ध्यायेन्मुमुक्षुरेतन्मे एक
ध्यानं त्वं वक्तुमर्हसि॥३१ यथेति ध्यानांगप्रश्नः। यादृशमिति ध्येयविशेषेण प्रश्नः। यदात्मकमिति यस्य तानि विशेषणा १०८
नि तत्स्वरूपप्रश्नः। तत् तथा एतन्मे ध्यानं वक्तुमर्हसीति पाठः। तत्रायमर्थः। मुमुक्षुस्त्वां यथा ध्यायेत् तन्मे वक्तुमर्हसि। जि

ज्ञासोः कथनाय उ नरेतत्। मम च त्वद्दास्यमेव पुरुषार्थः। न तु ध्यानेनान्यस्य महत्त्वमिति। तदुक्तं। त्वयोपभुक्तस्रग्गंधवासोऽलं
कारचर्चिताः। उच्छिष्टभोजिनो दासास्तव मायां जयेम हीति। त्वं वक्तुमर्हसीति पाठस्तु सुगमः। ध्यानप्रधानत्वाद्योगस्य
ध्यानं वक्तुमर्हसीति योगं वक्तुमर्हसीत्यर्थः। यमनियमयोर्बहिरंगत्वा उक्तत्वात् तत्र ध्यानांगत्वेनासनप्राणायामप्रकार
माह। सम इति चतुर्भिः॥ टी॥ ॥श्रीभगवानुवाच॥ ॥सम आसन आसीनः समकायो यथासुखं। हस्तावुत्संग आ
धाय स्वनासाग्रनिरीक्षणः॥३२ समे नात्युच्छ्रिते नातिनीचे आसने कंबलादौ समकायः सन् यथासुखमासीन इति
नासिकत्वस्तिकादिनियम इत्युक्तं। नासाग्रनिरीक्षणं च विक्षेपपरिहारार्थं। उक्तं तल्लक्ष्णोर्बहिर्दृष्टिः स्थिरचित्तः सुसंवृत इ
ति योगशास्त्रोक्तेः॥ टी॥ प्राणस्य शोधयेन्मार्गं पूरकुंभकरेचकैः। विपर्ययेणापि शनैरभ्यसेन्निर्जितेंद्रियः॥३३ विपर्य
येण रेचकपूरककुंभकक्रमेण। यद्वा वामनाड्या पूरितं दक्षिणया त्यजेत्। तया चापूरितं वामया त्यजेदेवं विपर्ययेणाय

योक्तं योगशास्त्रे। ईडया पूरयेद्वायुं त्यजेत्पिंगलया ततः इति। निर्जितेंद्रिय इति प्रत्याहार उक्तः॥ प्राणायामो द्विविधः स
गर्भोऽगर्भश्चेति। ततः श्रेष्ठत्वात्प्रणवगर्भमाह। हृदीति द्वाभ्यां॥ टी॥ हृद्यवच्छिन्नमोंकारं घंटानादं बिसोर्णवत्। प्राणे
नोदीर्य तत्राथ पुनः संवेशायस्वरं॥ ३४ मूलाधारादारभ्याप्यवच्छिन्नं संततं घंटानादतुल्यमोंकारं हृदि संतं प्राणेन उदी
र्य ऊर्ध्वं मूर्द्धांतपर्यंतं नीत्वा। कथं। बिसोर्णवत् कमलनालतंतुवत् तत्र मात्रातीते स्वरं पंचदशं बिंदुं संवेशते। अथ पुन
रित्यध्युतं च बिंदुशिरस्कं कुर्यादित्यर्थः। यद्वा मूलाधारादारभ्य मूर्द्धांतपर्यंतं बिसनेतुवत्तस्मिन्नविच्छिन्नं संततं हृदि मन
सि प्राणेनोदीर्यते नियम्य अथ पुनस्तत्रोंकारे घंटानादतुल्यं स्वरं तदा तं नादं स्थिरीकुर्यात्॥ टी॥ एवं प्रणवसंयुक्तं प्रा ए.द.
णसंधानमभ्यसेत्। दशान्त्वब्धिषण्मासाद्वाक्जितानिलः॥ ३५ मासादर्वाक्जितानिलो भवति। एवं ध्यानांगमुक्त्वा १०९
या दशमित्यध्योत्तरं वक्तुं ध्येयपीठमाह। हृत्पुंडरीकमिति सार्द्धेन॥ टी॥ हृत्पुंडरीकं तत्र मूर्द्धनालमधोमुखं। ध्या

लोर्ध्वमुखमुन्निद्रमष्टपत्रं सकर्णिकं॥ ३६ धृतं तत्पुंडे दैत्यांतवर्तिनि ऊर्ध्वनालमधोमुखमुकुलितकदलीपुष्पसंकाशं यदस्ति
तद्विपरीतं ध्यायेच्चेति॥ टी॥ कर्णिकायां न्यसेत्सूर्यसोमाग्नीनुत्तरोत्तरं। वह्निमध्ये स्मरेद्रूपं ममैतद्ध्यानमंगलं॥ ३७ न्यसे
त्चिंतयेत्। सविस्तरं षष्ठं ध्यानमाह। वह्निमध्यमिति षड्भिः। ध्यानमंगलं ध्यानस्य शुभं विषयं॥ टी॥ समं प्रशांतं सुमुखं
दीर्घचारुचतुर्भुजं। सुचारुसुंदरग्रीवं सुकपोलं शुचिस्मितं॥ ३८ समं ऋजुरूपावयवं। दीर्घाश्चारवश्चत्वारो भुजा य
स्मिन् सुचारु अतिरम्यं॥ टी॥ समानकर्णविन्यस्तस्फुरन्मकरकुंडलं॥ ४० हेमांबरं घनश्यामं श्रीवत्सश्रीनिकेतनं।
।३९। समानयोः कर्णयोः विन्यस्ते स्फुरंती मकराकारे कुंडले यस्मिन्। श्रीवत्सश्रियो निकेतनं। वक्षसि दक्षिणवाम
नस्तनाभ्यां सुलक्ष्ममित्यर्थः॥ टी॥ शंखचक्रगदापद्मवनमालाविभूषितं। नूपुरैर्विलसत्पादं कौस्तुभप्रभयावृतं॥ ४०
द्युमत्किरीटकटककटिसूत्रांगदायुतं। सर्वांगसुंदरं हृद्यं प्रसादसुमुखेक्षणं। सुकुमारमभिध्यायेत् सर्वांगेषु

मनोदधत्॥४१॥ द्युमद्भिः किरीटादिभिः आसमंताद्धृतमलंकृतं। यद्वा। अंगदयुतमिति वक्तव्ये अंगदायुतं इति दीर्घश्छां
दसः॥ प्रसादेन शोभनं सुखमीक्षणं च यस्मिन् तत्। सुकुमारमतिकोमलं। सविशेषणं ध्यानमुपसंहरन् धारणामाह
।इंद्रियाणीति॥ब॥ इंद्रियाणींद्रियार्थेभ्यो मनसाकृष्य तन्मनः। बुद्ध्या सारथिना धीरः प्रणयेन्मयि सर्वतः॥४२॥ सर्वतः
सर्वांगयुक्ते हृदयाशमित्यर्थो। न्तरत्वेन सविशेषणसुस्काय दात्मकमित्यर्थो। न्नरतया ज्ञानेनिर्विशेषणत्यागेन ध्यानमेव
समाधिपर्यंतमाह। तदिति त्रिभिः॥ब॥ तत्सर्वव्यापकं चित्तमाकृष्यैकत्र धारयेत्। नान्यानि चिंतयेद्भूयः सुस्मितं भावये एव
न्मुखं॥४३॥ एकत्रांगे। अन्यान्यंगानि न चिंतयेत्। एकत्रेति यदुक्तं तद्देवांगं दर्शयति। सुस्मितमिति॥ब॥ तत्र लब्धपदं चित्तं
आकृष्य व्योम्नि धारयेत्। तच्च त्यक्त्वा मदारोहो न किंचिदपि चिंतयेत्॥४४॥ व्योम्नि सर्वकारणरूपे। तच्च कारणमपि त्यक्त्वा ११८
मदारोहो म किंचिदपि चेत्स्वयि स्थिद्वे ब्रह्मण्यारूढः सन् न किंचित् ध्यातृध्येयविभागमपि न चिंतयेत्॥ब॥ एवं समाधि

तमतिः मामेवात्मानमात्मनि। विचष्टे मयि सर्वात्मन्ज्योतिर्ज्योतिषि संयुतं॥४५॥ मामेवात्मनि विचष्टे आत्मानं च सर्वात्म
कं मयि संयुतं विचष्टे। ज्योतिर्ज्योतिषि संयुतमिति विद्यन्वयः। एवंभूतसमाधिपर्यंतध्यानस्य फलमाह। ध्यानेनेति॥
ब॥ ध्यानेनेत्थं सुतीव्रेण युंजतो योगिनो मनः। संयास्यत्याशु निर्वाणं द्रव्यज्ञानक्रियाभ्रमः॥४६॥ मनो युंजतः सम
दधतः। द्रव्यज्ञानक्रियाभ्रमः। अतिभूताधिदेवद्रव्यज्ञानक्रियाभ्रमः। अतिभूताधिदैवाध्यात्मरूपः। द्रव्यद्रष्टृदर्श
नरूपो वा भ्रमः निर्वाणं शांतिं सम्यक् यात्यतीति॥ब॥ ॥ ॥इति श्रीभागवते महापुराणे एकादशस्कंधे भगव
डुद्धवसंवादे चतुर्दशोऽध्यायः॥ ॥ब॥ ॥ततः पंचदशे प्रोक्ताः सिद्धयो धारणानुगाः। श्रीविष्णुपदसंप्राप्तावं
तरायतया मताः॥१ एवं मनो युंजतो योगिनोंतराविर्भवंत्यः सिद्धयो ऽत्यंतरायप्राया एव। अतस्ताः परिहृत्य परमेश्वर
परएव मनो वेदिति वक्तुं सिद्धीराह। जितेंद्रियस्येति॥ब॥ ॥श्रीभगवानुवाच॥ ॥जितेंद्रियस्य युक्तस्य जितश्वा

स्य योगिनः। मयि धारयतश्चित्तमुपतिष्ठंति सिद्धयः॥१युक्तस्य स्थिरचित्तस्य॥छ॥ ॥उद्धव उवाच॥ ॥कया धारण
या कास्वित्कथं वा सिद्धिरच्युत। कति वा सिद्धयो ब्रूहि योगिनां सिद्धिदो भवान्॥२सिद्धिरिति वितर्के कास्वित् किं नामा। कथं
स्वित् कीदृशी वा। धारणा च कतीति प्रश्नांतरे वा शब्दः। त्वमेवैतज्जानासि नान्यः इत्याशयेनाह। योगिनामिति॥छ॥ ॥श्री
भगवानुवाच॥ ॥सिद्धयोष्टादश प्रोक्ता धारणा योगपारगैः। तासामष्टौ मत्प्रधाना दशैव गुणहेतवः॥३धारणा च
अष्टादश च तु षंगः। योगपारगैरिति मयि मनोधारणालक्षणो यो योगः। तत्र पारंगतैः धारणा योगपारगैः। त्रिकाल
ज्ञत्वादि क्षुद्रसिद्धीरन्येपि जानंतीति भावः। मत्प्रधानाः ममस्थितः सिद्धाः संसारफलाः गुणहेतवः। सात्वोत्कर्षहेतु
काः। ताः स्वरूपतो नामतश्चोपदिशति। अणिमेति सार्द्धैः पंचभिः॥छ॥ अणिमा महिमा मूर्त्तेः लघिमा प्राप्तिरिंद्रियैः॥ ११
प्राकाश्यं श्रुतदृष्टेषु शक्तिः प्रेरणमीशिता॥४अणिमा महिमा लघिमा च मूर्त्तेर्देहस्य तिस्रः सिद्धयः। प्राप्तिर्नामसि

द्धिः सर्वप्राणिनां इंद्रियैः सह तत्तदधिष्ठातृरूपेण संबंधः इत्यर्थः। तत्तदिंद्रियैस्तत्तद्विषयप्राप्तिः प्राप्तिर्नाम सिद्धिः।
॥छ॥ श्रुतेषु पारलौकिकेषु दृष्टेषु दर्शनयोग्येष्वपि सर्वेषु भूविवरादपिहितेष्वपि प्राकाश्यं भोगदर्शनसाम
र्थ्यं सिद्धिः॥५शक्तीनां मायातदंशभूतानां प्रेरणं। तत्रेश्वरे मायायाः अन्येषु तदंशानां प्रेरणं सकलभोग्यवर्ग
करणनियंतृत्वं ईशिता नाम षष्ठी सिद्धिः॥६॥छ॥ गुणेष्वसंगो वशिता यत्कामस्तदवस्यति। एता मे सिद्धयः सौ
म्य अष्टावौत्पत्तिकी मताः॥५विषयभोगेष्वसंगो वशिता सिद्धिः॥७यत्कामः यद्सुखं कामयते तत्तदवस्यति।
तत्सीमानं प्राप्नोतीत्यर्थः॥८अत्पत्तिकीः अत्पत्तिक्यः। स्वाभाविक्यो निरतिशया इत्यर्थः। गुणहेतु सिद्धीराह॥
छ॥ अनूर्मिमत्त्वं देहेस्मिन् दूरश्रवणदर्शनं। मनोजवः कामरूपं परकायप्रवेशनं॥६अनूर्मिमत्त्वं क्षुत्पिपासादिर
हित्यं॥२दूरश्रवणदर्शनेति द्वे सिद्धी॥३मनोवेगेन देहस्य गतिः॥४कामितरूपप्राप्तिः॥५परकायप्रवेशः॥६

॥ब॥ स्वछंदमृत्युर्देवानां सहक्रीडानुदर्शनं। यथासंकल्पसंसिद्धिः आज्ञाप्रतिहता गतिः॥६॥ स्वेछामृत्युः॥७। अप्सरो-
भिः सह देवानां या क्रीडा तासामनुदर्शनं प्राप्तिः॥८ संकल्पात्तद्रूपप्राप्तिः॥९ अप्रतिहता। आसमंतात् तिर्यगाद्याः॥ सा
आज्ञा चेत्येतादृशी॥१० क्षुद्रसिद्धीः पंचाह। त्रिकालज्ञत्वमिति॥ब॥ त्रिकालज्ञत्वमद्वंद्वं परचित्ताद्यभिज्ञता। अग्न्यर्कांबु-
विषादीनां प्रतिष्टंभोऽपराजयः॥७॥ अद्वंद्वं शीतोष्णाद्यनभिभवः। अग्न्यादीनां स्तंभनं॥ब॥ एताश्चोद्देशतः प्रोक्ता योग-
धारणसिद्धसिद्धयः। यया धारणया या स्याद्यथा स्यान्निबोध मे॥८ तत्र धारणाभिः सह विशेषतो निरूपयति यथेति।
यावदध्यासमाप्तिः॥ब॥ भूतसूक्ष्मात्मनि मयि तन्मात्रं धारयन्मनः। अणिमानमवाप्नोति तन्मात्रोपासको मम॥८ भूतसू-
क्ष्मोपाधौ मयि मनो धारयन्। तन्मात्रं भूतसूक्ष्माकारं स तन्मात्रोपासकः। मम मदीयमणिमानं॥ब॥ महत्यात्मन्मयि
परे यथासंस्थं मनो दधत्। महिमानमवाप्नोति भूतानां च पृथक्पृथक्॥९ ज्ञानशक्तिप्रधाने महत्तत्त्वोपाधौ मयि यथा-

संस्थं महत्तत्त्वाकारं भूतानां ते चेति आकाशादिभूतोपाधौ च मयि मनो धारयन् तत्तद्भूतमहिमानं प्राप्नोतीत्यर्थः॥ब॥
परमाणुमये चित्तं भूतानां मयि रंजयन्। कालसूक्ष्मार्थतां योगी लघिमानमवाप्नुयात्॥१० वाय्वादिभूतानां ये परमा-
णवः तन्मये तदुपाधौ मयि चित्तं रंजयन् योगी कालसूक्ष्मार्थतां परमाणूपाधिरूपतामिति लघुत्वविवरणं। तदु-
क्तं स कालः परमाणुर्वै यो भुंक्ते परमाणुतामिति।३॥ब॥ धारयन्मय्यहंतत्त्वे मनो वैकारिकेखिले। सर्वेंद्रियाणा-
मात्मत्वं प्राप्तिं प्राप्नोति मन्मनाः॥१२ वैकारिकाहंकारोपाधौ मयि। अखिलं। एकाग्रं। आत्मत्वं। अधिष्ठातृत्वं। अत्र हेतु-
र्मन्मनाः मयि मनो धारणाप्रभावादेवं भवति। नात्रातीवहेतुरनुसंधेयः।१२ एवं मद्धारणानुभावेन मद्योगबलमाश्र-
यतश्चादिष्वप्युह्यं॥४॥ब॥ महत्यात्मनि यः सूत्रे धारयेन्मयि मानसं। प्राकाम्यं पारमेष्ठ्यं मे विंदते व्यक्तजन्मनः।
१२ क्रियाशक्तिप्रधानं महत्तत्त्वमेव सूत्रं तदुपाधौ मयि। स मे पारमेष्ठ्यं सर्वोत्कृष्टं प्राकाम्यं विंदते। तत्र महत्यात्मनि

तिमहिमफलसाधनत्वेनोक्तोमहान्प्राकाशस्यसाधनत्वेनकथमुच्यते।तत्राह।सूत्रइति।सूत्रेसर्वप्राणिलिंगसष्टीनां
समष्टिरूपेसूत्रेतुसमष्टिव्यष्टिभावशून्यंमायाप्रथमविकारमात्रंमहिमफलसाधनत्वेनोक्तमितितत्सांकर्यशंकान
कार्या॥कथंभूतस्यमे।अव्यक्ताजन्मयस्य।तस्यसूत्रस्यतदुपाधेर्ममेत्यर्थः॥५॥ब॥विष्णौत्र्यधीश्वरेचित्तंधारयेत्का
लविग्रहे।सईशत्वमवाप्नोतिक्षेत्रज्ञक्षेत्रचोदनां॥१५॥त्र्यधीश्वरेत्रिगुणमायानियंतरिअतएवकालविग्रहे।सईशत्वम
वाप्नोति।ईशत्वंविशिनष्टि।क्षेत्रज्ञानांजीवानांक्षेत्राणांचनोदनंप्रेरणं।यद्वा।क्षेत्रज्ञःसन्क्षेत्रेनोदनांचराचरशरी
रादिसंघातनियंतृत्वं।नतुविश्वसृष्ट्यादिकर्तृत्वलक्षणमित्यर्थः॥६॥ब॥नारायणेतुरीयाख्येभगवच्छब्दशब्दिते।म
नोमय्यादधद्योगीमद्धर्मावशितामियात्॥१६॥नरोनरसमुदायःतस्याश्रयनमात्मवत्तयायेननरस्यचायनवास
त्मानारायणःपरः।इत्युक्तेनारायणेतुरीयाख्येविराट्हिरण्यगर्भश्चकारणंचेत्युपाधयःईशस्ययत्त्रिभिर्हीनं

तुरीयंतत्पदंविदुरित्येवंलक्षणेऐश्वर्यस्यसमग्रस्यधर्मस्ययशसःश्रियः।ज्ञानवैराग्ययोश्चैवषण्णांभगइतीर्यते।त
द्वतिभगवच्छब्दशब्दिते।उत्पत्तिंप्रलयंचैवभूतानामागतिंगतिं।वेत्तिविद्यामविद्यांचसवाच्योभगवानिति।मद्ध
र्माधर्मोयस्यसमद्धर्मा॥७॥ब॥निर्गुणेब्रह्मणिमयिधारयन्विशदंमनः।परमानंदमाप्नोतियत्रकामोवशीयते॥
॥१७॥यत्रपरमानंदरूपेसर्वोपिकामस्स्वदंशभूतोवशीयतेसमाप्यतेतं।अतःपरंगुणहेतुकाः॥ब॥श्वेतद्वीपपतौ
चित्तंशुद्धेधर्ममयेमयि।धारयञ्छ्वेततांयातिषडूर्मिरहितोनरः॥१८॥शुद्धेशुद्धसत्त्वात्मकेश्वेततांशुद्धसत्वरूपतां॥
॥ब॥मय्याकाशात्मनिप्राणेमनसाघोषमुद्वहन्।तत्रोपलब्धाभूतानांहंसोवाचःशृणोत्यसौ॥१९॥आकाशात्मायः
प्राणःसमष्टिरूपःतद्रूपेमयिमनसाघोषंनादंचिंतयन्असौहंसोजीवःतत्राकाशेउपलब्धाज्ञातासन्तत्रस्थावि
विधावाचःशृणोति।यद्वा।तत्राकाशेउपलब्धाअभिव्यक्तायाभूतानांवाचःताःदूरतःशृणोति।दूरश्रवणमुक्त्वाह

रदर्शनमाद्यं ॥ ब ॥ चक्षुस्त्वष्टरि संयोज्य त्वष्टारमपि चक्षुषि । मां तत्र मनसा ध्यायन् विश्वं पश्यति सूक्ष्मदृक् ॥ १८ ॥ त्वष्टा आदि
त्यः । तस्मिन्नपरिच्छिन्ने चक्षुः संयोज्य तं च चक्षुषि संयोज्य तत्रात्मसंयोगे मां ध्यायन् विश्वं दूरतः पश्यति ॥ ३ ॥ ब ॥ मनो
मयि सुसंयोज्य देहं तदनुवायुना ॥ मद्धारणानुभावेन तत्रात्मा यत्र वै मनः ॥ १९ ॥ मनः देहं च तदनुवर्त्तिना वायुना स
ह मयि सुसंयोज्य मद्धारणा क्रियते । तस्याः प्रभावेन यत्र यत्र मनो याति तत्रात्मा देहोपि याती त्यर्थः । यद्वा । मनः कर्तृ आ
त्मानं वायुना सह देहं च मयि सुसंयोज्य मद्धारणा क्रियते तस्याः प्रभावेन यत्र मनो याति तदनु तत्र देहो याती ति ॥ ४ ॥ ब ॥
यदा मन उपादाय यद्यद्रूपं बुभूषति । तत्तद्भवेन्मनोरूपं मद्योगबलमाश्रितः ॥ २० ॥ मनः उपादानकारणं स्वीकृत्य यद्यद्दे
वादिरूपं भवितुमिच्छति तत्तन्मनोरूपं मनसोभीष्टं रूपं योगी भवेत् । कुतः । यतो मद्योगबलं योदमचिंत्यशक्तिर्नाना
कारः । तस्मिन्मयि मनसो योगो धारणा तस्य बलं प्रभावः स एवाश्रयः कारणं ॥ ५ ॥ ब ॥ परकायं विशन् सिद्ध आत्मानं

तत्र भावयेत् । पिंडं हित्वा विशेत्प्राणो वायुभूतः षडंघ्रिवत् ॥ २१ ॥ यत्र प्रविविक्षति तत्रात्मानं चिंतयेत् । ततः पिंडं स्वदे
हं हित्वा प्राणः प्राणप्रधानलिंगशरीरोपाधिः वायुभूतः बाह्यवायोर्भूतः प्रविष्टः तेन मार्गेणेत्यर्थः । षडंघ्रिवत् ।
भृंगो यथा पुष्पात्पुष्पांतरमनायासेन प्रविशति तद्वत् ॥ ६ ॥ पिंडं हित्वेत्युक्तं । तत्प्रकारं कथयन् स्वच्छंदमृत्युमाह
॥ ब ॥ पार्ष्ण्यापीड्य गुदं प्राणं हृदुरःकंठमूर्द्धसु । आरोप्य ब्रह्मरंध्रेण ब्रह्म नीत्वोत्सृजेत्तनुं ॥ २२ ॥ पार्ष्ण्या पार्ष्णिना
गुदं निरुध्य प्राणं प्राणोपाधिमात्मानं ब्रह्मरंध्रेण मूर्द्धद्वारेण ब्रह्मेत्युपलक्षणं । ब्रह्म वा अन्यद्वा अपेक्षितं स्थानं
मनसा नीत्वा ॥ ७ ॥ ब ॥ विहरिष्यन् सुराक्रीडे मत्स्थं सत्त्वं विभावयेत् । विमानेनोपतिष्ठंति सत्त्ववृत्तीः सुराःस्त्रियः ॥ २३
मत्स्थं मन्मूर्त्तिरूपं शुद्धं चिंतयेत् । तदा सत्त्ववृत्तयः सुराः स्त्रियश्च विमानेनोपतिष्ठंति । सत्वांशभूताः ॥ ८ ॥ ब ॥ यदा
संकल्पयेद्बुद्ध्या यथा वा मत्परः पुमान् । मयि सत्ये मनो युंजन् तथा तत्समुपाश्नुते ॥ २४ ॥ यदा वा यत्कालेपि यथा वेति

पावेद्यथावायेनकेनापिप्रकारेणबुद्ध्यासंकल्पयेत्।तत्तथायथावत्प्राप्नोतीत्यर्थः।यद्वा।यथासंकल्पयेत्तथावा।म
त्परःमयिविश्वासवान्।भवतितदातद्वस्तुरूपंसर्वंप्राप्नोतीत्यर्थः।किंकुर्वन्।सत्यसत्यसंकल्पोमयिमनोयुंजान्॥
ण॥ब॥योवैमद्भावमापन्नईशितुर्वशितुःपुमान्।नकुतश्चिद्विहन्येततस्यचाज्ञायथामम॥२५मदितिपृथक्
पदं।मामित्यर्थः।ईशितुःसर्वनियंतुःवशितुःस्वतंत्रस्यमम भावंस्वभावंप्राप्तः॥२०एताउणादेतवः।अतःपरंक्षुद्राः॥ब॥
मद्भक्त्याशुद्धसत्त्वस्ययोगिनोधारणाविदः।तस्यत्रैकालिकीबुद्धिःजन्ममृत्यूपबृंहिता॥२६धारणाविदइतित्रिका
लज्ञेश्वरधारणाभाविता॥त्रैकालिकीत्रिकालवस्तुविषया।स्वजन्ममृत्यन्यासुउपबृंहितातत्सहिता।२अनयैवप एट
रचित्ताद्यभिज्ञतापिव्याख्याता॥२॥ब॥उदासीनेमयिपरेब्रह्मकृतेर्गुणवृत्तिषु।चिन्मयेधारयेच्चेतोद्वंद्वैर्नैवाभिभू ११५
तये॥२७॥सर्वभूतहृदिस्थंमात्मानंसर्वसाक्षिणं।ध्यायेदात्मतयाचित्तंपरेषांपरिपश्यति॥२८अग्न्यादिभिर्नह

न्येतमुनेर्योगमयंवपुः।मद्योगश्रांतचित्तस्ययादसामुदकंयथा॥२९अग्न्यादिभिःसर्वोपघातकैःयोभगवान्इ
त्येवंभूतयोगमयंतेनाभिभूयते।तत्रहेतुः।मद्योगेतियादसामुदकंयथा।विघातकंनभवति।तथातस्यवपु
षोग्न्यादयइत्यर्थः॥३अनयैवाद्वंद्वतापिव्याख्याता॥४॥ब॥मद्विभूतीरभिध्यायेत्श्रीवत्सास्त्रविभूषिताः।ध
जातपत्रव्यजनैःसवेदपराजितः॥३०मद्विभूतीःममावतारान्।ध्वजादिभिःसहाउपसंहरति॥ब॥उपासक
स्यमामेवंयोगधारणयामुनेः।सिद्धयःपूर्वकथिताउपतिष्ठंत्यशेषतः॥३१एवंपृथग्धारणादिभिःयद्वा।किंनाना
धारणाप्रयासेन।एकयैवसर्वाःसिद्धयोभवंतीत्याह।जितेंद्रियस्येति॥ब॥जितेंद्रियस्यदांतस्यजितश्वासात्म
नोमुनेः।मद्धारणांधारयतःकासासिद्धिःसुदुर्लभा॥३२मद्धारणांनारायणेतुरीयाख्येइत्यत्रोक्तांयातां।सुदुर्लभा
स्यात्।साकानकाचिदित्यर्थः।यद्यप्येवंतथापिनप्राध्याइत्याह।अंतरायानिति॥ब॥अंतरायान्वदंत्येतान्युंजतो

योगमुत्तमं। मयासंपद्यमानस्य कालरूपाद्धेतवः॥२२ तस्मादहैतुकीश्वयमेवधारणा कार्या। नान्याकाम्या इत्या
हाजन्मेति॥३॥ जन्मौषधितपोमंत्रैर्यावतीरिह सिद्धयः। योगेनाप्नोति ताः सर्वाः नान्यैर्योगगतिं व्रजेत्॥३४॥ जन्म
नैवकाश्चित्सिद्धयो भवंति। यथा देवानां। यथा चोदसाद्यदकहंसाः पक्ष्यादीनां खेचरत्वादि। हूपं। तदुक्तं। पातंज
ले। जन्मौषधितमोमंत्रयोगजाः सिद्धय इति। योगेन मद्धारणामिश्रकेन। योगगतिं मत्स्यालोक्यादिरूपं। कुतश्च
यत आह। सर्वासामिति द्वैन॥३॥ सर्वासामपि सिद्धीनां हेतुः पतिरहं प्रभुः॥३५ प्रभुत्वोपपादनाय हेतुः। कारणं प
लयितां चेति किं वा न केवलं सिद्धीनामेव प्रभुः। अपि च मोक्षादीनामपीत्याह। अहमिति॥३॥ अहं योगस्य सांख्यस्य
धर्मस्य ब्रह्मवादिनां। अहमात्मांतरो बाह्यो नावृतः सर्वदेहिनां। यथा भूतानि भूतेषु बहिरंतः स्वयं तथा॥३६ योगो
मोक्षः सांख्यं तत्साधनं। ज्ञानं धर्मस्य। तदुपदेष्टृणां। ब्रह्मवादिनां च। कुतस्तत्राह। अहमिति। सर्वदेहिनां जीवानामा

त्मा। यतः अंतरः अंतर्यामी। एष त आत्मांतर्याम्यमृत इति श्रुतेः। तर्हि किमंतर्यामित्वात् परिछिन्नः। नहि बाह्य
श्च व्यापक इति। तत्र दृष्टांतमाह। भूतेषु चतुर्विधेषु महाभूतानि यथा बहिरंतश्च भवं
ति। स्वयं अहमपि तथैव सर्वथा॥३॥ ॥ ॥ इतिश्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धव
संवादे धारणानिरूपणं नाम पंचदशोऽध्यायः॥ ॥३॥ ॥षोडशे तु दशेश्वराविर्भावयुक्ता विभूतयः
ज्ञानवीर्यप्रभावादिविशेषेणोपवर्ण्यते॥१ अंतश्चित्ते न यद्ध्यानमशक्यमकृतात्मनां। अतस्तद्योग्यतासि
द्ध्यै विभूत्यादिनिरूपणं॥२ एवं तावच्चत्वाध्यायैरष्टौ प्रश्ना निरूपिताः। ब्रह्मवसंभवेतावत्सूक्ष्ममादित्रभृये
॥२ बद्धमुक्तस्य निर्धारिः सप्रश्नक्रैस्ततः परे। द्वादशेनांतरं कर्मकृतिश्या गद्यवर्ष्चितो॥३॥ हंसेतिहासतो योग
निष्ठायां चत्रयोदशे। श्रेयःसाधननिर्धारिध्यानेचैव चतुर्दशे॥४ धारणासिद्धिभेदेन प्रसंगेन परं तरे। अद्य वा

अतो दत्तमुत्तरं दर्शितं ॥ ६ षोडशे भूतिविस्तारे द्वयोर्वर्णाश्रमवर्तने । ज्ञानादिनिष्ठयोश्चेता यमादीनां च निर्ण
ये ॥ ७ योगत्रयाधिकारेषु विशेषस्तदनंतरे । तत्त्वसंख्याविवादे च प्रकृत्योर्विवेचने ॥ ८ जन्ममृत्युप्रकारेण
ह्यविंशे दत्तमुत्तरं । परापराधसहने च ततो निस्पदनंतरे ॥ ९ सप्तविंशे क्रियायोगप्रश्ने तदुपवर्णनं । अष्टाविंश
ततः प्रोक्ता ज्ञानयोगोपसंहृतिः ॥ १० संसारासनवप्रश्ने तन्मध्ये दत्तमुत्तरं । तदशक्तस्य च नः प्रश्ने भक्तियोगोप
संहृतिः ॥ ११ एवं प्रश्नोत्तराण्यत्र क्रमेणैतानि विंशतिः । अध्यात्मांतरो बाह्यो नाहृतः स्यादिहादिनां ॥ १२ यथा भू
तानि भूतेषु बहिरंतः स्वयं तथेत्युक्तं । तत्र भूतानि यथा कश्चित्केनचिद्गुणविशेषेणोक्तानि वर्तंते । कश्चित्साम
न्यरूपेणैव । तथा त्वमपि कथं वर्तस इति विभूतीः प्रष्टुं प्रथमं तावदुक्तमेव सर्वात्मत्वमनुवदति । त्वं ब्रह्मेति
॥ ७ ॥ ॥ उद्धव उवाच ॥ ॥ त्वं ब्रह्म परमं साक्षादनाद्यंतमपावृतं । सर्वेषामपि भावानां त्राणस्थित्य ११७

प्ययोद्भवः ॥ १ अपावृतं निरावरणं । स्वतंत्रं वा । अत एव सर्वेषामपि प्राणां स्थितिर्जीवनं त्राणस्थितिसहितोऽप्य
प्ययोद्भवो यस्मात् । सर्वं उपादानाकारणमित्यर्थः । अत्र सदाचारप्रमाणमाह । उच्चावचेष्विति ॥ ७ ॥ उच्चा
वचेषु भूतेषु दुर्ज्ञेयमकृतात्मभिः । उपासते त्वां भगवन् याथातथ्येन ब्राह्मणाः ॥ २ याथातथ्येन यथार्थ
येन सर्वभूतकारणं त्वां ब्राह्मणा वेदतात्पर्यविदः एवं सर्वकारणत्वे सर्वात्मत्वमनूद्य विभूतीः पृच्छति । येष्वि
ति ॥ ७ ॥ येषु येषु च भावेषु यथा त्वां परमर्षयः । उपासीनाः प्रपद्यंते संसिद्धिं तद्वदस्व मे ॥ ३ उपासीनाः सेव
मानाः संतः । दुर्ज्ञेयत्वमेवाह । गूढ इति ॥ ७ ॥ गूढश्चरसि भूतात्मा भूतानां भूतभावन । न त्वां पश्यंति भूतानि
पश्यंतं मोहितानि ते ॥ ४ गूढः अस्फुटः । भूतानां प्राणिनां मध्ये । अत्र हेतुः भूतात्मा अंतर्यामी । अत्रापि हेतुः
हे भूतभावनेति । ते च यातायात एव साकल्येन पृच्छति ॥ ७ ॥ याः काश्च भूमौ दिवि वै रसायां विभूतयो दिक्षु महावि

अतोऽनन्तमुत्तरं हरिणोदितं॥६ षोडशे भूतिविस्तारे ह्युयोवसम्श्रिमव्रते। ज्ञानादिनिष्ठयोश्चैतां यमादीनां च निश्च-
ये॥७ योगत्रयाधिकारेषु विशेषस्तदनंतरे। तत्त्वसंख्याविवादे च प्रकृतिपुरुषयोर्विवेचने॥८ जन्ममृत्युप्रकारेण
द्वाविंशे दत्तमुत्तरं। परापराधसहने च वै भिक्षुदनंतरे॥ एवं सप्तविंशे क्रियायोगश्चात्र तदुपवर्णनं। अष्टाविंश-
ततः प्रोक्तं ज्ञानयोगोपसंहृति॥१० संसारासंभवप्रश्ने तन्मध्ये दत्तमुत्तरं। तदशक्त्यावनःप्रश्ने भक्तियोगोप-
संहृतिः॥११ एवं प्रश्नोत्तराण्यत्र क्रमेण तानि विंशतिः। अद्वमात्मांतरो बाह्यो नावृतः परदेहिनां॥१२ यथा भू-
तानि भूतेषु बहिरंतः स्वयं तथेत्युक्तं। तत्र भूतानि यथा कश्चिदेकेन विद्गुणाविशेषेणोक्तानिवर्त्तंते। कश्चित्सामा-
न्यरूपेणैव। तथा त्वमपि कथं वर्त्तस इति विभूतीः प्रष्टुं प्रथमं तावदुक्तमेव सर्वात्मत्वमनुवदति। त्वं ब्रह्मेति
॥छ॥ ॥ ॥उद्धव उवाच॥ ॥त्वं ब्रह्म परमं साक्षादनाद्यंतमपावृतं। सर्वेषामपि भावानां त्राणस्थित्य-

प्ययोद्भवः॥१ अपावृतं निरावरणं। स्वतंत्रं वा। अत एव सर्वेषामपि भावानां स्थितिर्जीवनं त्राणं स्थिति सदितोऽप्य-
प्ययोद्भवो यस्मात्। सर्वं उपादानकारणमित्यर्थः। अत्र सदाचारप्रमाणमाह। उच्चावचेष्विति॥छ॥ उच्चा-
वचेषु भूतेषु दुर्ज्ञेयमकृतात्मभिः। उपासते त्वां भगवन् यथातथ्येन ब्राह्मणाः॥२ याथातथ्येन यथाव-
त्सर्वभूतकारणं त्वां ब्राह्मणा वेदतात्पर्यविदः एवं सर्वकारणत्वेन सर्वात्मत्वमनूद्य विभूतीः पृच्छति। येष्वि-
ति॥छ॥ येषु येषु च भावेषु भक्त्या त्वां परमर्षयः। उपासीनाः प्रपद्यन्ते संसिद्धिं तद्वदस्व मे॥३ उपासीनाः सेव-
मानाः संतः। दुर्ज्ञेयत्वमेवाह। गूढ इति॥छ॥ गूढश्चरसि भूतात्मा भूतानां भूतभावन। न त्वां पश्यंति भूतानि
पश्यंतं मोहितानि ते॥४ गूढः अस्फुटः। भूतानां प्राणिनां मध्ये। अत्र हेतुः भूतात्मा अंतर्यामी। अत्रापि हेतुः
हे भूतभावनेति। तेन याता एव साकल्येन पृच्छति॥छ॥ याः काश्च भूमौ दिवि वै रसायां विभूतयो दिक्षु महावि-

भूते। तामहमाख्यास्ये तु भाविताश्चेन मामिति ते तीर्थपदांघ्रिपंकजं ॥ पदे महाविभूतेयाः काश्चिद्भूमादिषु ते विभू
तयः रसायां रसातले अनुभाविताश्चैवयैव केन चिच्छक्तिविशेषेण संयोजिताः तीर्थानां परं च तदंघ्रिपद्मं च न
रावतारः भूतानां न प्रश्नसंवादित्वात् तवायं प्रश्नः साधीयानिति तावदनुमोदते। एवमिति त्रिभिः ॥ ब ॥ ॥ ॥
श्रीभगवानुवाच ॥ ॥ एवमेतदहं पृष्टः प्रश्नं प्रश्नविदां वर। युयुत्सुना विनशने सपत्नैरर्जुनेन वै ॥ ६ प्रश्नं
पृष्टवान्। सपत्नैर्योद्धुमिच्छता विनशने कुरुक्षेत्रे। ननु युयुत्सोर्विभूतिप्रश्ने कः प्रसंग इत्यत आह। ज्ञात्वेति ॥ ब ॥ ज्ञा
त्वा ज्ञातिवधं गर्ह्यमधर्म्यं राज्यादिहेतुकं। ततो निवृत्तो हंता हतोयमिति लौकिकः ॥ ७ लौकिकः प्राकृतमतिः
सन् ॥ ब ॥ स तत्र पुरुषव्याघ्रो युक्त्या मे प्रतिबोधितः। अभ्यभाषत मामेवं यथा त्वं रणमूर्धनि ॥ ८ यथा च मामि
भाषसे एवं संग्राममूर्धनि मामभ्यभाषत। तदेव तवापि कथयिष्यामीति भावः। ता विभूतीः कथयति। अहमिति

॥ ब ॥ अहमात्मोद्धवामीषां भूतानां सुहृदीश्वरः। अहं सर्वाणि भूतानि तेषां स्थित्युद्भवाप्ययः ॥ ९ अस्मदहं सामा
नाधिकरणाः प्रथमांताः। द्वितीयांतेषु सर्वा विभूतयः। ताश्चोपासनार्थं कथ्यंते। षष्ठ्यंतनिर्धारणे संबंधे च क्व
चिद्यथायोग्यं द्रष्टव्याः। ततश्चामीषां भूतानां आत्मेति सुहृदिति ईश्वर इति च सामान्येनाहमुपास्य इत्यर्थः। ता
नि भूतान्यहमेवेत्येकं। तत्र हेतुमाह। तेषामिति। तेषां हेतुरहं एवं सर्वत्र तेषां स्थित्युद्भवाप्ययः। तद्धेतुरित्यर्थः
विशेषतो विभूतीराह। तैषा अहमिति ॥ ब ॥ अहं गतिर्गतिमतां कालः कलयतामहं। गुणानां चाप्यहं साम्यं गु
णिन्यौत्पत्तिको गुणः ॥ १० कलयितां वशीकुर्वतां मध्ये। गुणानां सत्त्वादीनां साम्यं प्रधानं। गुणिनि धर्मिणि
आकाशादौ औत्पत्तिकः स्वाभाविको यो गुणः सोहं ॥ ब ॥ गुणिनामप्यहं सूत्रं महतां च महानहं। सूक्ष्माणा
मप्यहं जीवो दुर्जयानामहं मनः ॥ ११ सूत्रं प्रथमकार्यं महान्महत्तत्त्वं। सूक्ष्मोपाधित्वात् दुर्जेयत्वाज्जीव

घृहस्तत्त्वं। बुद्धेर्गुणेनात्मगुणेन चैव नैवाणुमात्रोप्यपरोपि दृष्ट इति श्रुतेः॥व॥ हिरण्यगर्भो वेदानां मंत्राणां प्र
णवस्त्रिवृत्। अक्षराणामकारोस्मि पदानि छंदसामहं॥१२ वेदानां संबंधी तेषामध्यापकः। पदानि त्रिपदा गा
यत्रीत्यर्थः॥व॥ इंद्रोहं सर्वदेवानां वसूनामस्मि हव्यवाट्। आदित्यानामहं विष्णुः रुद्राणां नीललोहितः॥१३
सर्वदेवानां त्रयस्त्रिंशत्कोटिदेवगणानामित्यर्थः। आदित्यानां द्वादशानां॥व॥ ब्रह्मर्षीणां भृगुरहं राजर्षीणा
महं मनुः। देवर्षीणां नारदोहं हविर्धान्यस्मि धेनुषु॥१४ हविर्धानी कामधेनुः॥व॥ सिद्धेश्वराणां कपिलः सुपर्णो
हं पतत्रिणां। प्रजापतीनां दक्षोहं पितॄणामहमर्यमा॥१५ मां विद्धि दैत्यानां प्रह्लादमसुरेश्वरं। सोमं नक्ष
त्रौषधीनां धनेशं यक्षरक्षसां॥१६ नक्षत्रौषधीनां प्रभुं सोमं। यक्षरक्षसां प्रभुं धनदं॥व॥ ऐरावतं गजेंद्राणां या
दसां वरुणं प्रभुं। तपतां घर्मतां सूर्यं मनुष्याणां च भूपतिं॥१७ यादसां जलचराणां। तपसां प्रतापवतां घर्मतां

दीप्तिमतां च मध्ये तेषां प्रभुं वा सूर्यं मां जानीहि॥व॥ उच्चैःश्रवास्तुरंगाणां धन्वनामस्मि कांचनं। यमः संयमतां चा
हं सर्पाणामस्मि वासुकिः॥१८ नागेंद्राणामनंतोहं मृगेंद्रः श्रृंगिदंष्ट्रिणां। आश्रमाणामहं तुर्यो विप्राणां प्रथमो
नघ॥१९ तुर्यः संन्यासः। प्रथमो ब्राह्मणः॥व॥ तीर्थानां स्रोतसां गंगा समुद्रः सरसामहं। आयुधानां धनुरहं त्रि
पुरघ्नो धनुष्मतां॥२० स्रोतसां प्रवाहानां च गंगाहं। सरसां स्थिरोदकाशयानां समुद्रोहं॥व॥ धिष्ण्यानामस्म्य
हं मेरुः गहनानां हिमालयः। वनस्पतीनामश्वत्थः ओषधीनामहं यवः॥२१ धिष्ण्यानां देवनिवासस्थानां मध्ये मे
रुरहं। गहनानां दुर्गमानां हिमालयोहं॥व॥ पुरोधसां वसिष्ठोहं ब्रह्मिष्ठानां बृहस्पतिः। स्कंदोहं सर्वसैन्या
नामग्रण्यां भगवानजः॥२२ ब्रह्मिष्ठानां श्रोत्रियाणां सैन्यानां च भूपतीनां सेनायां भवाः सैन्याः सेनापतयः स
र्वसैन्यानामिति सर्वसेनापतीनामित्यर्थः। अग्रण्यां सन्मार्गप्रवर्तकानां अजो ब्रह्मा॥व॥ वाङ्मय्यकंविर्वागात्मा

ऋषीनामप्यहं भृगुः॥ योगानामात्मसंरोधो मंत्रोस्मि विजिगीषतां॥२३॥ शुचीनां शोधकानामपि मार्जनतक्ष-
णघर्षणादीनां मध्ये वाय्वादिरूपः शोधकोहं योगानां योगांगानां अष्टानां मध्ये आत्मसंरोधः समाधिरहं मंत्रो नी-
तिः॥ ब॥ आन्वीक्षिकी कौशलानां विकल्पः ख्यातिवादिनां॥ स्त्रीणां तु शतरूपाहं पुंसां स्वायंभुवो मनुः॥२४॥ कौशला-
नां विवेकादिनैपुण्यानां मध्ये आन्वीक्षिकी आत्मानात्मविवेकविद्या। आत्मख्यात्यन्यथाख्यातिशून्यख्यात्यसत्ख्या-
त्यनिर्वचनीयख्यातिवादिनां एवमिदमेवं चेति योऽनंतो विकल्पः सोहं॥ ब॥ नारायणो मुनीनां च कुमारो ब्रह्मचारिणां।
धर्माणामस्मि संन्यासः क्षेमाणामबहिर्मतिः॥२५॥ कुमारः सनत्कुमारः। संन्यासः भूतानामभयदानं। क्षेमाणां नि-
यस्थानानां मध्ये अबहिर्मतिरंतर्निष्ठा॥ ब॥ गुह्यानां सूनृतं मौनं मिथुनानामजस्त्वहं। संवत्सरोस्म्यनिमिषां ऋतूनां १२३
मधुमाधवौ॥२६॥ सूनृतं प्रियवचनं मौनं च। न हि प्रियभाषणे मौनेन च रहस्याभिप्रायो ज्ञायते। अजः प्रजापतिः।

यस्य देहो द्विस्त्र्यां मिथुनमभूत् स एव मुख्यं मिथुनं। अर्धो वा एष आत्मनो यत्पत्नी इति श्रुतेः। अनिमिषां अप्रमत्तानां
संवत्सरः कालोस्मि। मधुमाधवौ वसंत इत्यर्थः॥ ब॥ मासानां मार्गशीर्षोहं नक्षत्राणां तथाभिजित्। अहं युगानां च कृ-
तं धीराणां देवलोसितः॥२७॥ अभिजित् उत्तराषाढचतुर्थः पादः। तथा च श्रुतिः। अभिजिन्नाम नक्षत्रमुपरिष्टाद-
षाढानां अवस्ताच्छ्रोणायाः इति। कृतं कृतयुगं। देवलो असितश्च ऋषी॥ ब॥ द्वैपायनोस्मि व्यासानां कवीनां काव्य
आत्मवान्॥ वासुदेवो भगवतां त्वं तु भागवतेष्वहं॥२८॥ व्यासानां वेदविभागकर्तॄणां। कवीनां विदुषां काव्यः शुक्रः।
भगवतां। उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं। वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति॥ ब॥ किंपुरुषाणां ह-
नुमान् विद्याध्राणां सुदर्शनः। रत्नानां पद्मरागोस्मि पद्मकोशः सुपेशसां॥२९॥ सुपेशसां सुंदराणां॥ ब॥ कुशोस्मि
दर्भजातीनां गव्यमाज्यं हविःष्वहं। व्यवसायिनामहं लक्ष्मीः कितवानां छलग्रहः॥३०॥ दर्भजातानां काशकुशादीनां

हविःषु चरुपुरोडाशादिषु हुतेषु वा। लक्ष्मीधनादिसंपत्॥ ब॥ तितिक्षास्मि तितिक्षूणां सत्त्वं सत्त्ववतामहं। ओजःस
होबलवतां कर्माहं विद्धि सात्वतां॥ ३१ बलवतां ओजःसहश्च। सात्वतां भागवतानां भक्त्यादिकं कर्माहमित्यर्थः॥ ब॥
सात्वतां नवमूर्तीनां आदिमूर्तिरहं परा। विश्वावसुः पूर्वचित्तिः गंधर्वाप्सरसामहं॥ ३२ नवमूर्तिष्वेव वासुदेवसं
कर्षणप्रद्युम्नानिरुद्धनारायणहयग्रीववाराहनृसिंहब्रह्माण इति या नवमूर्तयः तासां मध्ये वासुदेवाख्याहं गं
धर्वाणां विश्वावसुः। अप्सरसां पूर्वचित्तिः॥ ब॥ भूधराणामहं स्थैर्यं गंधमात्रमहं भुवः। अपां रसश्च परमो तेजिष्ठा
नां विभावसुः॥ ३३ गंधमात्रं अविकृतं। परमो मधुरः॥ ब॥ प्रभा सूर्येंदुताराणां शब्दोऽहं नभसः परः। ब्रह्मण्यानां ब — ए.स.
लिरहं वीराणामहमर्जुनः॥ ३४ परः पराख्यः शब्दः। अर्जुनः पार्थः॥ ब॥ भूतानां स्थितिरुत्पत्तिरहं वै प्रतिसंक्रमः। ग — १२१
त्युक्त्युत्सर्गोपादानमानंदस्पर्शलक्षणं॥ ३५ भूतानां प्राणिनां। प्रतिसंक्रमः प्रलयः। गत्यादयः पंचकर्मेंद्रिय

व्यापाराः। तत्र लक्षणं दर्शनं॥ ब॥ आस्वादः श्रुत्यवघ्राणमहं सर्वेंद्रियेंद्रियं॥ ३५ सर्वेंद्रियाणामिंद्रियं तत्तदर्थग्र
हणशक्तिरयमहं तदेव तत्र निर्धारणेन तत्र संबंधेन च विशेषतो विभूतीर्निरूप्य तेऽदानीं सामान्यतः सर्वा अपि
निरूपयति। पृथिवीति सार्द्धद्वयेन॥ ब॥ पृथिवी वायुराकाश आपो ज्योतिरहं महान्। विकारः पुरुषोऽव्यक्तं रजस्स
त्त्वं तमः परं॥ ३६ पृथिव्यादिशब्दैः तन्मात्राणि विवक्षितानि। अहं अहंकारः महान्महत्तत्त्वं। एताः सप्त प्रकृतिविकृत
यः विकाराः पंच महाभूतानि। एकादशेंद्रियाणि चेत्येवं षोडशसंख्याकः पुरुषो जीवः। अव्यक्तं प्राकृतिः एवं पंच
विंशति तत्त्वानि। तदुक्तं। मूलप्रकृतिरविकृतिः महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृ
तिर्न विकृतिः पुरुष इति। किंच रजः सत्त्वं तम इति प्रतिगुणाश्च परं ब्रह्म च। तदेतत्सर्वमहमेव। किंच॥ ब॥ अह
मेतत्प्रसंख्यानं ज्ञानं तत्त्वविनिश्चयं॥ ३७ तत्प्रसंख्यानं एतेषां परिगणनं एतेषां लक्षणतो ज्ञानं च तत्फलं सं

स्यज्ञानंतच्चतोऽहमेव।कथंभूतंज्ञानं।तत्त्वविनिश्चयं।विशेषेणनिश्चीयतेयेनतत्त्वविनिश्चयं।तदेवसंक्षिप्याह।म
येति॥ब॥मयेश्वरेणजीवेनगुणेनिगुणिनाविना।सर्वात्मनापिसर्वेणनभावोविद्यतेक्वचित॥३८जीवेश्वरस्व
पोहिविधेयोभावः।यश्चगुणगुणिरूपः।यश्चक्षेत्रक्षेत्रज्ञरूपः।ससर्वोपिभावः।मयाविनामद्व्यतिरेकेणनास्ति।
सर्वदृश्यईश्वराद्भेदंवारयति।सर्वेण।अहमेवसर्वमित्यर्थः।ननुसामान्यतःकिमेवंसंक्षिप्यकथयसिसर्वविभूतिधा
रणसंबंधान्यांविशेषतःसर्वाःकथयेतिचेत्तत्राह।संख्यानमिति॥ब॥संख्यानंपरमाणूनांकालेनक्रियतेम
या।नतथामेविभूतीनांसृजतोंडानिकोटिशः॥३९संख्यानंपृथिव्यादिपरमाणूनांकालेनमहतातदपिमये
वक्रियतइतिमच्चावक्तुंशक्यते।तथामेविभूतीनांसंख्यानंकर्तुंनशक्यते।कुतइत्यतआह।सृजतोंडानीति।
यदामयासृज्यमानानांब्रह्मांडानामवतावत्संख्यानास्तितदाकुतस्तद्गतानांविभूतीनांसंख्येत्यर्थः।तथा

पिविशेषतएवसर्वाअपिसंक्षेपतः।कथयामीत्याह॥ब॥तेजःश्रीःकीर्तिरैश्वर्यंह्रीस्त्यागःसौभगंभगः।वीर्यंति
तिक्षाविज्ञानंयत्रयत्रसमेंऽशकः॥४०तेजःप्रभावः।श्रीःसंपत्।सौभगंमनोनयनाह्लादकत्वं।भगोभाग्यं।वीर्यं
बलं।अंशकःविभूतिः।उपसंहरतिएताइति॥ब॥एतास्तेकथिताःसर्वाःसंक्षेपेणविभूतयः।मनोविकाराए
वैतेयथावाचाभिधीयते॥४१एतच्चविभूतिभेदामयिचित्तावतारायकथिता।अतोनात्रातीवाभिनिवेशः
कर्त्तव्यइत्यतआह।मनोविकाराएवपरमार्थतः।यथाखपुष्पादिवाङ्मात्रेणाभिधीयतेतद्वत्।तस्मात्॥
ब॥वाचंयच्छमनोयच्छप्राणान्यच्छेंद्रियाणिच।आत्मानमात्मनायच्छनभूयःकल्पसेध्वने॥४२वागादीन्नियच्छ।आ
त्मनेबुद्धिं।आत्मनासत्त्वसंपन्नयैवबुद्ध्या।अध्वनेसंसारमार्गायजन्ममरणाय।असंयमनेदोषमाह।य।इति
॥ब॥योवैवाङ्मनसीसम्यक्असंयच्छन्धियायतिः।तस्यव्रतंतपोदानंस्रवत्यामघटांबुवत॥४३असंय

१२३

छन्नसंयच्छति॥७॥ तस्मान्मनोवचःप्राणान्नियच्छेन्मत्परायणः। मद्भक्तियुक्तया बुद्ध्या ततः परिसमाप्यते॥४४॥
परिसमाप्यते कृतकृत्यो भवतीत्यर्थः॥७॥ ॥ ॥इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धव
संवादे विस्तृतिकथनं नाम षोडशोऽध्यायः॥७॥ ॥ ॥ततः सप्तदशे प्रष्टे स्वधर्मे भक्तिलक्षणे। हंसोक्तं ध
र्ममिहाह ब्रह्मचारिगृहस्थयोः॥१॥ कर्मादेर्विधिसाध्यता मित्यत्र भक्त्याद्युक्तं कर्म मोक्षसाधनं मद्भिन्नतिरिक्तं।
भक्तिसाधनत्वं च कर्मणां मयोदितेषु वदितः। स्वधर्मोऽधियादिना तत्र तत्रोक्तं न च कर्मानुष्ठातॄणां नियमेन भक्ति
र्दृश्यते। अतः पृच्छति यस्त्वयेति सप्तभिः॥७॥ ॥उद्धव उवाच॥ ॥यस्त्वयाभिहितः पूर्वं धर्मस्त्वद्भक्तिलक्ष एद
णः। वर्णाश्रमाचारवतां सर्वेषां द्विपदामपि॥२॥ पूर्वं कल्पादौ भक्तिलक्षणः तस्यापकः तत्साधनमित्यर्थः। व १२३
र्णाश्रमहीनानामपि द्विपदां नराणां॥७॥ यथानुष्ठीयमानेन त्वयि भक्तिर्नृणां भवेत्। स्वधर्मेणारविंदाक्ष तन्ममा

ख्यातुमर्हसि॥३॥ यथा येन प्रकारेण अनुष्ठीयमानेन स्वधर्मेण। ननु संप्रदायादेव ज्ञास्यसि। किं पुनर्वर्णनेनात
त्राह पुरेति॥७॥ पुरा किल महाबाहो धर्मं परमकं प्रभो। यत्तेन हंसरूपेण ब्रह्मणेऽभ्यात्थ माधव॥४॥ परम
कं परमश्रेयसो कं सुखरूपश्च तं। यत्त्वं हंसरूपेण धर्मोऽप्यक्त एव। ननु योगमात्रं। जानीत मा गतं यत्त्वं सुप्र
धर्म विवक्षये प्रकट्यांत। किमिति पृच्छसि॥७॥ स इदानीं सुमहता कालेनामित्रकर्शनः। न प्रायो भविता म
र्त्यलोके प्रागनुशासितः॥५॥ प्राक् अनुशासितोऽपि न भविता न विद्यति। अत्र हेतुमाह। वक्तेति द्वाभ्यां॥७॥
वक्ता कर्ताविता नान्यो धर्मस्याच्युत ते भुवि। सभायामपि वैरिंच्यां यत्र मूर्तिधराः कलाः॥६॥ ये वदंति ब्राह्मणाः क
र्तारो महांतः। ये च पालयंति क्षत्रियाः। तेषां मध्ये अप्यधर्मस्य ते वक्तान्यः। कला वेदाद्याः। निराकृतवंतः। यथा
हस्तामीति वेत्तत्राह। कर्त्रेति॥७॥ कर्त्राविता प्रवक्त्रा च भवता मधुसूदन। त्यक्ते महीतले देव विनष्टं कः प्रव

१२५

स्यति॥ इतत्वं नःसर्वधर्मज्ञ धर्मस्त्वद्भक्तिलक्षणः यथायस्य विधीयेत तथा वर्णय मे विभो॥ १ तत्तस्मात्‌। नोस्मा
कं मनुष्याणां मध्ये यथा यस्य विधीयेत तथा वर्णय॥ ८॥ ॥श्रीशुक उवाच॥ ॥एवं पृष्टः स्वभृत्यमुख्येन
पृष्टः स भगवान्‌ हरिः। प्रीतः क्षेमाय मर्त्यानां धर्मानाह सनातनान्‌॥ ८॥ ॥श्रीभगवानुवाच॥ ॥धर्म्य
एष तव प्रश्नो निःश्रेयसकरो नृणां। वर्णाश्रमाचारवतां तमुद्धव निबोध मे॥ एधर्म्यो धर्मादनपेतः। कृतः निः
श्रेयसकरो भक्तिजनकः। अतो मे मत्तः स्वधर्मं निबोध। तत्रादौ मदुपासनालक्षण एव मुख्यो धर्म आसीत्‌। आचा
रलक्षणस्तु पश्चात्‌ त्रेतायां। सच आचारलक्षणोपि एवं अनुष्ठितो भक्तिहेतुरिति वक्ष्यति तमाह। आदाविति ०६
॥८॥ आदौ कृतयुगे धर्मो नृणां हंस इति स्मृतः। कृतकृत्याः प्रजा जात्या तस्मात्‌ कृतयुगं विदुः॥ १० कल्पादौ यत्कृत १२६
युगे तस्मिन्‌। तेच तदा मामुपासत। नान्यत्‌ कृतयुग नाम निरुक्तिमाह। कृतकृत्या इति। जात्या जन्मनैव। किं

चाविषयकानावादपि तदानीं नान्यत्कर्मासीदित्याह। वेद इति॥ ८॥ वेदः प्रणव एवाग्रे धर्मोऽहं वृषरूपधृक्‌। उ
पासते तपोनिष्ठा हंसं मां मुक्तकिल्बिषाः॥ ११ धर्मश्च मनोविषयोऽहमेव। वृषरूपधृक्‌ चतुष्पात्‌। नक्रियावि
षयो यज्ञादिः। अतस्तपोनिष्ठाः मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तप इति वचनात्‌। एकाग्रतया। हंसं शुद्धं मां
ध्यायंते न्यर्थः॥ ८॥ त्रेतामुखे महाभाग प्राणान्मे हृदयात्त्रयी। विद्या प्रादुरभूत्तस्या अहमासं त्रिवृन्मखः॥ १२ प
श्चात्‌ त्रेतामुखे वेदे मे विराजरूपस्य प्राणान्निमित्तात्‌। हृदयाकाशात्‌ त्रयी वेदविद्या प्रादुरभूत्‌। तस्यास्त्रय्याः स
काशात्‌ होतृ अध्वर्यु उद्गातृ निमित्तं त्रिरूपा। यज्ञो वै विष्णुरिति श्रुतेः। धर्माणामाश्रमाणां च धर्मांश्च क्ष्णुतेषामुत्पत्ति
माह। विप्रेति द्वाभ्यां॥ ८॥ विप्रक्षत्रियविट्‌शूद्रा मुखबाहूरुपादजाः। वैराजात्पुरुषाज्जाता य आत्माचारलक्ष
णाः॥ १३ आत्माचारः स्वधर्म एव लक्षणं ज्ञापको येषां॥ ८॥ गृहाश्रमो जघनतो ब्रह्मचर्यं हृदो मम। वक्षःस्थला

इनेवासोन्यासः श्रीधाम्नि संस्थितः॥२४ ममवैराजरूपस्य हृदो वक्षसो धस्मात्। ब्रह्मचर्यमिति नैष्ठिकानिषायां ते
षामधिकारविशेषेण स्वभावनाह। वर्णानामितिपंचभिः॥ वर्णा॥ ब॥ वर्णानामाश्रमाणांच जन्मभूम्यनुसारि
णीः॥ आस्यवक्षस्तयोरूर्वोर्नीचैर्नैश्वोत्तमोत्तमैः॥२५ जन्मस्थानानुसारीण्यः नीचैरित्यस्ययं अतो मर्थः॥ मं दानिज
न्मभूमिरिमं दाउत्तमापिनिरूत्तमाश्चेति॥ ब॥ शमो दमस्तपः शौचं संतोषः क्षांतिरार्जवं। मद्भक्तिश्च दया सत्यं
ब्रह्मप्रकृतयस्त्विमाः॥२६ तपः स्वलोचनं॥ ब॥ तेजो बलं धृतिः शौर्यं तितिक्षौदार्यमुद्यमः॥ स्थैर्यं ब्रह्मण्यतैश्व
र्यं क्षत्रप्रकृतयस्त्विमाः॥२७ तेजः प्रतापः॥ ब॥ आस्तिक्यं दाननिष्ठा च अदंभो ब्रह्मसेवनं। अतुष्टिरर्थोपचयैर्वै
श्यप्रकृतयस्त्विमाः॥२८ शुश्रूषणं द्विजगवां देवानां चाप्यमायया। तत्र लब्धेन संतोषः शूद्रप्रकृतयस्त्विमाः।
॥२९ एतैरेवाश्रमस्वभावा अपि ज्ञेया तद्वाह्याह्यानां स्वभावानाह॥ अशौचमिति॥ ब॥ अशौचमनृतं स्तेयं नास्ति

क्यं शुष्कविग्रहः। कामः क्रोधश्च तर्षश्च स्वभावोंतेवसायिनं॥३० शुष्कविग्रहो निर्मूलकलहः॥ तर्षः तृष्णा॥ तत्र
तावत्सर्वधारणं धर्ममाह। अहिंसेति॥ ब॥ अहिंसा सत्यमस्तेयमकामक्रोधलोभता। भूतप्रियहितेहा च धर्मो
यं सार्ववर्णिकः॥३१ वर्णग्रहणमुपलक्षणार्थं वर्णधर्मान् दृष्टुं प्रकरणे वक्ष्यति। प्रथमं तावदाश्रमेषु ब्रह्म
चारिणो धर्मान्वर्णयति। सच द्विविधः। उपकुर्वाणो नैष्ठिकश्च। तत्राद्यस्य धर्मानाह। द्वितीयमिति त्रिभिः श्लो
कैः॥ ब॥ द्वितीयं प्राप्यानुपूर्व्याज्जन्मोपनयनं द्विजः। वसन्गुरुकुले दांतो ब्रह्माधीयीत चाहूतः॥३२ द्विजः त्रैवर्णि
कः। आनुपूर्व्यात् गर्भाधानादिसंस्कारक्रमेण द्वितीयमुपनयनाख्यं जन्म प्राप्य आचार्येणाहूतो ब्रह्म वेदमधी
यीत। चकारात्तदर्थं च विचारयेत्। किंच॥ ब॥ मेखलाजिनदंडाक्षब्रह्मसूत्रकमंडलून्। जटिलोधौतदद्वासो
रक्तपीठः कुशान्दधत्॥३३ मेखलीं दीक्षकुशान्दधत्। तत्राक्षेणाक्षमाला। कथंभूतः जटिलः। अनभ्यंगादि

नाजातजटिलः। तथाच धौतदन्तवासाः। अरक्तपीतः दंताश्च वासश्च दन्तवासांसि निर्धौतानि तानि यस्य स चासौ अरक्तपी
तश्च। नकौसुंभादिनारक्तपीतमासनं यस्य सः॥ ब॥ स्नानभोजनहोमश्च जपोच्चारे च वाग्यतः। नच्छिंद्यान्नखरोमाणि
कक्षोपस्थगतान्यपि॥ २४ जपउच्चारो मूत्रपुरीषोत्सर्गश्च जपोच्चारं तस्मिन् वाग्यतो मौनी भवेत्॥ ब॥ रेतो नावकिरे
ज्जातु ब्रह्मव्रतधरः स्वयं। अवकीर्णे विगाह्याप्सु जितासुस्त्रिपदीं जपेत्॥ २५ रेतो बुद्धिपूर्वं नावकिरेन्नोत्सृजेत्। ब्रह्म
व्रतधरः अष्टदृष्टा। स्वयमेव कथंचिदवकीर्णे अवगाह्य स्नात्वा जितासुः कृतप्राणायामः त्रिपदीं गायत्रीं जपेत्॥ ब॥
अन्यक्षीवा[illegible]गो विप्रगुरुवृद्धसुराश्च विः। समाहितमुपासीत संध्ये च जितवाक् जपेत्॥ २६ संध्ये च द्वे जितवाग्ज
पन्नुपासीत। मध्याह्ने संध्यानिमित्तं मौनेनास्तीति द्विवचनं॥ ब॥ आचार्यं मां विजानीयात् नावमन्येत कर्हिचित्।
न मर्त्यबुद्ध्यासूयेत सर्वदेवमयो गुरुः॥ २७ सायंप्रातरुपानीय भैक्षं तस्मै निवेदयेत्। यच्चान्यदप्युपज्ञातमुपभुं

जीत संयतः॥ २८ अन्यदपि यत्संप्राप्तं तच्च गुरवे निवेदयेत्। तेनानुज्ञातः संयतः सन् उपभुंजीतेत्यर्थः॥ ब॥ शुश्रूषमा
ण आचार्यं सदोपासीत नीचवत्। यानशय्यासनस्थानैः नातिदूरे कृतांजलिः॥ २९ यानशय्यासनस्थानैर्यातेष्टे
ष्टतोऽर्थं तंडितमधमतया समीपशयने न विश्रांतं पादसंवाहनादिभिः समीपासने आसीनं कृतांजलिर्नियोगप्रती
क्षया। नातिदूरे च स्थाने नेत्यर्थः॥ ब॥ एवं द्विजो गुरुकुले वसेद्भोगविवर्जितः। विद्या समाप्यते यावत् ब्रह्मव्रतम
खंडितं॥ ३० एवं स्नृतं ब्रह्मं यस्य सः। एवमुपकुर्वाणस्य धर्ममुक्त्वा नैष्ठिकस्य विशेषधर्मानाह। यदीति षड्भिः॥ ब॥
यदि सोऽछंदसां लोकमारोढुमिच्छति ब्रह्मविष्टपं। उरवे विन्यसेद्देहं स्वाध्यायार्थं दृढव्रतः॥ ३१ यदि छंदसां लोकं महर्लो
कं ब्रह्मलोकं वा। आरोढुमिच्छतीत्यर्थः। यद्वा छंदसां लोकमिति ब्रह्मलोकविशेषणं। यत्र मूर्तिधराः
कला इत्यक्तत्वात्। तर्हि दृढव्रतः सन् दृढनैष्ठिकं व्रतं यस्य सः। विन्यसेत्समर्पयेत्। अधिकस्वाध्यायार्थं अधीत

निःक्रयार्थं वा॥ सर्वत्रेश्वरोपास्तिं ब्रह्मचारिणः कर्तव्यत्वेनाह॥ अग्नाविति॥ ब॥ अग्नौ गुरावात्मनि च सर्वभूतेषु मांप
रं॥ अपृथग्धीरुपासीत ब्रह्मवर्चस्व्यकल्मषः॥ ३२ ब्रह्मवर्च्चः वेदाभ्यासजं तेजः। तद्वान्। तच्चैवं वनस्थयतिसा
धारणधर्मानाह॥ स्त्रीणामिति॥ ब॥ स्त्रीणां निरीक्षणस्पर्शसंलापक्ष्वेलनादिकं। प्राणिनो मिथुनीभूतानगृहस्थोग्र
तस्त्यजेत्॥ ३३ निरीक्षणं नावगतं। क्ष्वेलनं परिहासः। एवमादिकं त्यजेत्। मैथुनीभूतान् गृहस्थस्त्यजेत्। न पश्येदित्य
र्थः। तच्चैवं सर्वाश्रमसाधारणधर्ममाह॥ शौचमिति द्वाभ्यां॥ ब॥ शौचमाचमनं स्नानं संध्योपास्तिर्ममार्चनं। तीर्थसे
वा जपोऽस्पृश्याभक्ष्यासंभाष्यवर्जनं॥ ३४ सर्वाश्रमप्रयुक्तोयं नियमः कुलनंदन। मद्भावः सर्वभूतेषु मनोवाक्कायसं एह
यमः॥ ३५ निःकामनैष्ठिकस्योत्तमोत्तफलमाह॥ एवमिति॥ ब॥ एवं बृहद्व्रतधरो ब्राह्मणोग्निरिव ज्वलन्। मद्भक्तस्ती १२७
व्रतपसा दग्धकर्माशयोऽमलः॥ ३६ अमलो निःकामश्चेत्। दग्धकर्मा आशयोंऽतःकरणं यस्य। तथाभूतः सन् मद्

कोभवति। उपकुर्वाणस्य समावर्तनप्रकारमाह॥ अथेति॥ ब॥ अथानंतरमावेक्षन् यथा जिज्ञासितागमः॥ गु
रवे दक्षिणां दत्वा स्नायाद्गुर्वनुमोदितः॥ ३७ अनंतरं द्वितीयाश्रमं आवेक्ष्यन् प्रावेष्टुमिच्छन् यथावद्विचारित
वेदार्थः। स्नायादन्त्यगादिकं कृत्वा समावर्तेतेत्यर्थः। तच्चाधिकारानुरूपमाश्रमविकल्पसमुच्चयावाह॥ गृह
मिति॥ ब॥ गृहं वनं चोपविशेत् प्रव्रजेद्वा द्विजोत्तमः॥ आश्रमादाश्रमं गच्छेत् नान्यथामत्परश्चरेत्॥ ३८ सका
मश्चेद्गृहं। अंतःकरणशुद्ध्या अकामश्चेद्वनं। शुद्धांतःकरणः सच द्विजोत्तमो ब्राह्मणश्चेत्। द्विजोत्तमश्यक्षत्त्र्या
क्षत्रियविश्ययोः प्रव्रज्यानधिकारं सूचयति। ब्राह्मणः प्रव्रजेदित्यर्थः। यद्वा॥ आश्रमादाश्रमांतरं गच्छेत्। अन्य
थाऽनाश्रमी प्रतिलोमं च नाचरेदित्यर्थः। आश्रमात्परइति वा छेदः। स्वभक्तस्य आश्रमनियमा नावश्यं वक्ष्यमा
णत्वात्। विवाहनियमपूर्वकं वर्णधर्मान् सगृहस्थधर्मानाह॥ गृहार्थीति॥ ब॥ गृहार्थी सदृशीं भार्यामुद्वहेदजु

ऽपूजितां॥ यवीयसीं च वयसा यां सवर्णामित्युक्रमात्॥३९ सदृशीं सवर्णां उद्वहेत् पूजितां कुलतो लक्षणतश्चानिं
दितां कामतस्तु यां अस्यामुद्वहेत् वा सवर्णामित्युक्तम् तस्याः अनंतरं। तत्रापि वर्णक्रमेणोद्वहेदित्यर्थः॥ तिस्रो वर्णा
नुपूर्वेण द्वे तथैका यथाक्रमं। ब्राह्मणक्षत्रियविशां भार्या स्वा शूद्रजन्मनः इति स्मृतेः। शूद्रस्य त्वाद्वैर्यां स्व
जेव सा च स्वा च विशः स्मृताः। ते च स्वा चैव राज्ञश्च ताश्च स्वा चाग्रजन्मनः इति मनुः॥ बा॥ इज्याध्ययनदानानि
सर्वेषां च द्विजन्मनां। प्रतिग्रहोऽध्यापनं च ब्राह्मणस्यैव याजनं॥४० इज्यादयस्त्रैवर्णिकानामावश्यकधर्माः॥ प्र
तिग्रहादित्रयं तु वृत्तिः सा च ब्राह्मणस्यैव। तत्रापि मुख्यमुख्यतमं चाचार्यं वृत्तिमाह। प्रतिग्रहमिति॥ बा॥ प्रति एदी
ग्रहं मन्यमानस्य तपस्तेजोयशोनुदं। अन्याभ्यामेव जीवेत शिलैर्वा दोषदृक्कयोः॥४१ तपआदिनाशकरं। तयो १२८९
र्याजनाध्यापनयोरपि कार्पण्यादिदोषं पश्यन् शिलैर्वा मिश्रकैः क्षेत्रपतितैः कणिशैः। एवं च वृत्तिकार्श्ये

ब्राह्मणेन सोढव्यमित्याह। ब्राह्मणस्येति॥ बा॥ ब्राह्मणस्य हि देहोऽयं क्षुद्रकामाय नेष्यते। कृच्छ्राय तपसे चे
ह प्रेत्यानंत्यसुखाय च॥४२ क्षुद्रकामाय काममुखाय। ऊंछवृत्तिर्नमविपणादिपतितकणोपादानं। तांशि
लवृत्त्या एकीकृत्य तयोऽतु वृ विप्रस्य मोक्षफलमाह। शिलोंछेति॥ बा॥ शिलोंछवृत्त्या परितुष्टचित्तो धर्मं म
हांतं विरजं जुषाणः। मय्यर्पितात्मा गृह एव तिष्ठेत् नातिप्रसक्तः समुपैति शांतिं॥४३ महांतं आतिथ्यादिल
क्षणं विरजं निःकामं सेवमानः गृह एव गृहस्थाश्रमे एव तिष्ठेत्। नातिः प्रसक्तः अतिशयेन रागमकुर्वन् शां
तिं समुपैति मोक्षाधिकारी भवति। एवमधनस्य महत्फलमुक्त्वा सधनानामप्याह त्रिभिः। समुद्धरंतीति
॥ बा॥ समुद्धरंति ये विप्रं सीदंतं मत्परायणं। तानुद्धरिष्ये न चिरादापद्भ्यो नौरिवार्णवात्॥४४ समुद्धरंति दा
रिद्र्यादुत्सारयंति। विप्रमिक्षुपलक्षणं मत्परायणं कमपि। राजस्त्वावश्यकमेतदित्याह। सर्वा इति॥ बा॥ स

वाः स्मुद्धरेद्राजा पितेव सनात्मजाः। आत्मानमात्मनाधीरो यथा गजपतिर्गजान्॥४५ एवंविधेन नरपतिर्विमा
नेनार्कवर्चसा॥ विधूयेहाशु संकष्टमिंद्रेण सह मोदते॥४६ सर्वेषामापद्वृत्तीराह त्रिभिः॥ ब॥ सीदन्विप्रो वणि
ग्वृत्त्या पण्यैरेवापदं तरेत्। खड्गेन चापदाक्रांतो न श्ववृत्त्या कदाचन॥४७ पण्यैर्विक्रियार्हैः न तु घृततैललवणा
लवणाद्यैः। तत्राप्यापदाक्रांतश्चेत् खड्गेन क्षत्रियवृत्त्या वा। यद्यपि गोतमोनंतरं पापीयसीं वृत्तिमातिष्ठेदिति क्ष
त्रषड्धाराणां पण्यविक्रया दुष्टं मन्यते। तथापि हिंसातो वणिग्वृत्तिरेव श्रेष्ठेति भगवतो मतं। न तु श्ववृत्त्या नी
चासेवया। नीचोनामा विभवः। राज्ञश्चापद्वृत्तीराह॥ ब॥ वैश्यवृत्त्या तु राजन्यो जीवेन्मृगयया परि। चरेद्वा वि
प्ररूपेण न श्ववृत्त्या कथंचन॥४८ तत्राप्यापदि मृगया। विप्ररूपेणाध्यापनादिना। वैश्यस्यापद्वृत्तीराह। शूद्रवृ १२
त्ति॥ ब॥ शूद्रवृत्तिं भजेद्वैश्यः शूद्रः कारुकटक्रियां। कृच्छ्रान्मुक्तो न गर्ह्येण वृत्तिं लिप्सेत कर्मणा॥४९ कारवः श

तिलोमजविशेषाः। वरुडादयः। तेषां वृत्तिं कटक्रियादिकां। आपद्वृत्तीरुक्त्वा नानुकल्पेन वर्तेतेत्याह। कृच्छ्रादिति।
तदेवं वृत्तिष्ववस्थासूक्ता। तु नगृहस्थावश्यकान् पंचयज्ञानाह॥ ब॥ वेदेति॥ ब॥ वेदाध्यायः स्वधा स्वाहा बल्यन्न
द्यैर्यथोदयं। देवर्षिपितृभूतानि मद्रूपाण्यन्वहं यजेत्॥५० वेदाध्ययनं ब्रह्मयज्ञः। तेन ऋषीन् स्वधाकारेण पितॄ
न्। स्वाहाकारेण देवान्। बलिहरणेन भूतानि। अन्नाद्यैरन्नोदकादिभिः। मनुष्यानिति ज्ञातव्यं। यथोदयं वित्त
वानुसारतः। तेष्वीश्वरदृष्टिं विधत्ते मद्रूपाणीति। आवश्यकं धर्ममुक्त्वा शक्त्यानुसारं धर्ममाह। यदृच्छयेति॥ ब॥
यदृच्छयोपपन्नेन शुक्लेनोपार्जितेन वा। धनेनापीडयन् भृत्यान्न्यायेनैवाहरेत्क्रतून्॥५१ यदृच्छया उद्यमं विना
उपार्जितेन वा। शुक्लेन स्ववृत्त्या लब्धेन धनेन वा। भृत्यानपोष्यान्। गृहस्थस्यापि निविष्टवृत्तिनिष्ठामेवाह। कु
टुंबेष्विति त्रिभिः॥ ब॥ कुटुंबेषु न सज्जेत न प्रमाद्येत्कुटुंब्यपि। विपश्चिन्नश्वरं पश्येत् अदृष्टमपि दृष्टवत्॥५२॥

नप्रमाद्येत। ईश्वरनिष्ठायां प्रमत्तो न भवेत्। काम्यकर्मसु न सक्तो भवेत्। ननु दृष्टादृष्टार्थकर्मासक्त्या मा कथ
मप्रमादः। विचारेणेत्याह। विपश्चिदिति। तत्रापि दृष्टेष्वासक्तेरधिकत्वात्तेषां नश्वरतां प्रपंचयति॥ छ॥ पुत्रदा
राप्तबंधूनां संगमः पांथसंगमः। अनुदेहं वियंत्येते स्वप्नो निद्रानुगो यथा॥ ५२॥ पुत्रादीनामेकत्र संगमं पांथा
नां प्रपायां संगम इव। तत्र हेतुः। अनुदेहं प्रतिदेहं एते वियंति नश्यंति। निद्रानुवर्त्ती स्वप्नो निद्रापाये यथेति
॥ छ॥ इत्थं परिमृशन्मुक्तो गृहेष्वतिथिवद्वसन्। न गृहैरनुबध्येत निर्ममो निरहंकृतः॥ ५३॥ अतिथिवदुदासी
नः। अद्यापि विकल्पमाह। कर्मभिरिति॥ छ॥ कर्मभिर्गृहमेधीयैरिष्ट्वा मामेव भक्तिमान्। तिष्ठेद्वनं चोपविशे एका॰
त्प्रजावान्वा परिव्रजेत्॥ ५४॥ गृहाश्रम एव तिष्ठेत्। यदि प्रजावान् तर्हि प्रव्रजेद्वा। गृहाद्यासंगदोषमाहाय १३०
स्त्वितित्रिभिः॥ छ॥ यस्त्वासक्तमतिर्गेहे पुत्रवित्तैषणातुरः। स्त्रैणः कृपणधीर्मूढो ममाहमिति बध्यते॥ ५५॥ बंध

मेवाभिनयेन दर्शयति। अहो इति॥ छ॥ अहो मे पितरौ वृद्धौ भार्या बालात्मजात्मजाः। अनाथा मामृते दीनाः कथं
जीवंति दुःखिताः॥ ५६॥ बाला आत्मजाय स्याः सा। आत्मजाश्च मां विना अन्यथाः संतः कथं जीवयिष्यंति॥ छ॥ एवं
गृहाशयाक्षिप्तहृदयो मूढधीरयं। अतृप्तस्ताननुध्यायन्मृतोऽधं विशते तमः॥ ५७॥ गृहेषु आशयो वासना तेन
आसर्वतः क्षिप्तं हृदयं यस्य सः। अंधं तमः अतितामसीं योनिं यातीत्यर्थः॥ छ॥ ॥ ॥ इति श्रीभागवते महा
पुराणे एकादशस्कंधे भगवदुद्धवसंवादे सप्तदशोऽध्यायः॥ ॥ छ॥ ॥ ॥ अष्टादशे वदद्धर्मं वन
स्थयतिगोचरं। अधिकारविशेषेण विशेषं चापि तत्कृतं। क्रमप्राप्तान्वनस्थधर्मानाह। वनमिति॥ छ॥ ॥ श्री
भगवानुवाच॥ ॥ वनं विविक्षुः पुत्रेषु भार्यां न्यस्य सहैव वा। वन एव वसेच्छांतस्तृतीयं भागमायुषः॥ १॥ आयु
षस्तृतीयं भागं पंचाशद्वर्षादिपंचसप्ततिवर्षपर्यंतं। ततः परं क्षीणेंद्रियस्य भावषड्विकारेपि संन्यासाधिकार इति भा

१३१

वा॥ब॥ कंदमूलफलैर्वन्यैर्मेध्यैर्वृत्तिं प्रकल्पयेत्। वसीत वल्कलं वासः तृणपर्णाजिनानि वा॥२ वसीत परिदधी
त॥ब॥ केशरोमनखश्मश्रुमलानि बिभृयाद्दतः। न धावेदप्सु मज्जेत त्रिकालं स्थंडिलेशयः॥३ दतः दंतान् न धा
वेत् न शोधयेत्। त्रिकालमप्सु मज्जेत। मुशलवत् स्नायात्। स्थंडिलेशयः भूमिशायी॥ब॥ ग्रीष्मे तप्येत पंचाग्नी
न् वर्षास्वासारषाट् जले। आकंठमग्नः शिशिरे एवंवृत्तस्तपश्चरेत्॥४ सूर्येण सह चतुर्दिशमग्नीन् निधाय आ
त्मानं तापयेदित्यर्थः। आसारषाट्। आसारं धारासंपातं सहत इति तथा। अभ्रावकाशं नाम व्रतं चरेत्। जले आ
कंठमग्नः उदकवासं नाम व्रतं चरेत्॥ब॥ अग्निपक्वं समश्नीयात् कालपक्वमथापि वा। उलूखलाश्मकुट्टो एटी
वा दंतोलूखल एव वा॥५ उलूखलेन वा अश्मना वा कुट्टितं कंडयतीति तथा। दंता एवोलूखलं यस्य स तथा॥ब॥ स्वयं सं १३१
चिनुयात् सर्वमात्मनो वृत्तिकारणं। देशकालबलाभिज्ञो नाददीतान्यदाहृतं॥६ संचिनुयात् स्वयं। आहरेत् अ

न्यदा कालांतरे आहृतं कालांतरे नाददीत। लब्धेन नवेन चेन्नाद्ये पुराणं परित्यजेदिति नारदोक्तेः॥ब॥ वन्यैश्चरुपु
रोडाशान् निर्वपेत् कालचोदितान्। न तु श्रौतेन पशुना मां यजेत वनाश्रमी॥७ कालेनोदितान् अस्मिन् काले इ
दं कर्तव्यमिति विहितान्॥ब॥ अग्निहोत्रं च दर्शश्च पौर्णमासश्च पूर्ववत्। चातुर्मास्यानि च मुनेराम्नातानि च नैग
मैः॥८ मुनेः वनस्थस्य नैगमैः वेदवादिभिः कथितानि। अस्य नित्यकाम्यफलमाह। एवमिति॥ब॥ एवं चीर्णेन तपसा
मुनिर्धमनिसंततिः। मां तपोमयमाराध्य ऋषिलोकादुपैति मां॥९ धमनिभिर्नाडीभिः संततः व्याप्तः। यावज्जी
वनकृतेन तपसा शुष्कमांस इत्यर्थः। ऋषिलोकात् महर्लोकादिक्रमेण मुच्यत इति। अयं भावः। अंतःकरण
शुद्धिर्भक्तिद्वारा अत्रैव तावन्मुच्यते। प्रतिबंधकबाहुल्ये वनेन क्रमेण मुच्यत इति। तं सकामं निंदति। यस्त्विति
॥ब॥ यस्त्वेतत् कृच्छ्रतश्चीर्णं तपो निःश्रेयसं महत्। कामायाल्पीयसे युंज्यात् बालिशः कोऽपरस्ततः॥१० निःश्रेय

संमोक्षफलं श्रेयसे कामायश्चाविरंच्यादत्यल्पमेव तस्मै। एवं यावज्जीवं वर्त्तमानस्य मोक्षः॥ तृतीयमागा
वसानेऽभ्यंदविरागेऽपि सन्न्यासाधिकारः। यद्वि ततो वागेऽपि वक्ष्यधर्मेश्शक्तो भवेत्। तदापि सम्यग्विरक्तः
विरक्तो वा। तत्राविरक्तस्य श्रद्धयमाह॥ ब॥ यदासौ नियमेकल्पो जरया जातवेपथुः। आत्मन्यग्नीन् समारो
प्य मद्भक्तोऽग्निं समाविशेत्॥ २१ जातोद्देहकं पोषयस्य सः। विरक्तस्याह। यदेति॥ ब॥ यदा कर्मविपाकेषु लोके
षु निरयात्मसु। विरागो जायते सम्यङ् न्यस्ताग्निः प्रव्रजेत्तदा॥ २२ लोकेषु ब्रह्मलोकपर्यंतेषु निरयात्मसु स्व
ऽःखोदर्केषु। तदा न्यस्ताग्निहोत्रादिकर्म ततः इति वर्णाश्रमात्। तत्रादौ प्रश्नद्वयमाह। इष्ट्वेति॥ ब॥ इष्ट्वा यथो एदा
पदेशं मां दत्वा सर्वस्वमृत्विजे। अग्नीन् स्वप्राण आवेश्य निरपेक्षः परिव्रजेत्॥ २३ यथोपदेशं श्राद्धाष्टकश्रवकं २३
प्राजापत्येष्ट्यामामिष्ट्वा स्वप्राणे आत्मनि। सन्न्यासे विघ्ना भवंति तान् विगणय्य। सन्न्यासदेवेष्याशयेनाह। विप्र

स्येति॥ ब॥ विप्रस्य वै सन्न्यसतो देवा दारादिरूपिणः। विघ्नं कुर्वंत्ययं ह्यस्मानाक्रम्य समियात्परं॥ २४ केनाभिप्रा
येण विघ्नं कुर्वंति। तमाह। अयमिति परं ब्रह्म। एवं प्रव्रजितस्य धर्मानाह। बिभृयादिति॥ ब॥ बिभृयाच्चेन्मुनिर्वा
सः कौपीनाच्छादनं परं। त्यक्तं न दंडपात्राभ्यामन्यत्किंचिदनापदि॥ २५ कौपीनयुग्मं आच्छाद्यते यावता। तावन्मा
त्रं वासो धारयेदित्यर्थः। त्यक्तं शेषोऽपाराः सर्वमेव तत्तोऽन्यत्किंचिदपि न बिभृयात्। दंडपात्राभ्यामित्यावश्यकज
लपवित्रादेरुपलक्षणं। परमहंसस्य विधिनिषेधागोचरत्वात्। बहूदकानयतः कुटीचक्रभगवान् धर्मानाह। दृष्टी
ति॥ ब॥ दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत्। सत्यपूतं वदेद्वाक्यं मनः पूतं समाचरेत्॥ २६ मनसा सम्य
ग्विचार्य यच्छुद्धं तदाचरेदित्यर्थः॥ ब॥ मौनानीहानिलायामा दंडा वाग्देहचेतसां। न ह्येते यस्य संत्यंग वेणुभिर्न
भवेद्यतिः॥ २७ मौनं वाचो दंडः। अनीहा काम्यकर्मत्यागो देहस्य। प्राणायामश्चेतसः। एते त्रयं तत्त्रयो डा दंडयस्य न

संतिश्चंगदेउद्दवाश्चंगेध्यातेर्वेणुनिशितिवा॥७॥ निस्तां चउर्षुवर्णेषु विगर्ह्यानवर्ज्यं यश्चरेतासप्तागारानसंक्लि
ष्टान्नउश्येलब्धेनतावता॥२८ ब्राह्मणेष्ववृत्तिर्नेदेन चउर्विधेषुवर्णेषु। पूर्वापूर्वासंनवेषु पूर्वपूर्वासंनवेता॥ वि
गर्ह्यानिपतितानश्चसंक्लिष्टान्नश्चरायेलासोनविद्यतीतिपूर्वमनुदिष्टाना॥ चउर्वर्णेष्वितिथउक्तं तदेवविविच्य
दर्शयिति। देवोमुनिर्द्विजोराजा वैश्यःशूद्रोबिडालकः। पशुर्म्लेछश्चांडालविप्रादशविधाःस्मृताः॥१ नित्यकोध्या
पकश्चैवसंउष्टोविजितेंद्रियः। वेदशास्त्रार्थतत्त्वज्ञोदेवोविप्रःप्रकीर्तितः॥२ तपःसत्यमहिंसादिषट्कर्माणिदि
नेदिनेनानवेकाललोपश्च ब्राह्मणोमुनिरुच्यते॥३ अकृष्टमूलमूलादिसीनवातातपःसदा। कुरुतेरहरहःश्रा एरी
द्धंब्राह्मणोद्विजउच्यते॥४ पशुवाहनतत्त्वज्ञोरणेवैचापलायवान्। आरंभेनीतिमान्शूरःराजाब्राह्मणउच्यते १३३
॥५ वैश्यकर्मण्यभिरतःपशूनांप्रतिपालनं। वाणिज्यकृषिकर्त्ताचसवैश्योद्विजउच्यते॥६ प्रम्नेहलाक्षातिला

नीलीक्षीरक्षारघृतंमधुमांसं विक्रियतेचैवविप्रोमार्जारउच्यते॥७ नखास्त्रस्तंवरेषुश्कसमोयोकार्यकार्य
योः। गम्यागम्यंनजानातिकृतघ्नोब्राह्मणःपशुः॥८ वापीकूपतडागानांआरामाणांचभेदकः। संध्यास्नान
विहीनश्चब्राह्मणोम्लेछउच्यते॥९ क्रूरोलुब्धोनिंदकश्चपरद्रव्यापहारकः। निर्दयःसर्वभूतेषुविप्रश्चांडाल
उच्यते॥१० बहिर्जलाशयंगत्वातत्रोपस्पृश्यवाग्यतः। विभज्ययाचितंशेषंभुंजीताशेषमाहृतं॥११ ग्रामा
द्बहिर्वर्तमानंजलाशयंगत्वाप्रोक्षणादिभिःशोधितमन्नं। विभज्य। विष्णुब्रह्मार्कभूतेभ्यःअशेषमित्यधिकादृ
णांनिरस्तं। याचितमितिपाठेमाधुकरेणयाचितमन्नंचेत्तर्हिविभज्यादिभ्योविभज्यभुंजीत। नत्वयाचितादि
ष्वेत्यवउष्टयमित्यर्थः। माधुकरेतुनैवेद्यं सोत्स्येनान्येनविद्यते। नैवेद्यकंक्षिपेदप्सुष्टतीयंसोतिकंबहिरिति
स्मृतेः। यद्वातदानीकेनापियाचितंचेत्तन्मध्येतस्मेकिंचिद्विभज्यदत्त्वेत्यर्थः॥१२॥ एकश्चरेन्महीमेतांनिःसं

गः संयतेंद्रियः। आत्मक्रीडा आत्मरतिः आत्मवान् समदर्शनः॥२०॥ आत्मन्येव क्रीडा कौतुकं यस्य सः। आत्मन्येव रतः
संतुष्टः आत्मवान् धीरः॥ ॥ विविक्तक्षेमशरणो मद्भावविमलाशयः। आत्मानं चिंतयेदेकमभेदेन मया मुनिः
॥२१॥ विविक्तं विजनं क्षेमं निर्भयं शरणं स्थानं यस्य सः। मयि भावेन विमलः आशयो यस्य सः॥ ॥ अन्वीक्षेतात्मनो
बंधं मोक्षं च ज्ञाननिष्ठया। बंध इंद्रियविक्षेपो मोक्ष एषां च संयमः॥२२॥ बंधमोक्षं चान्वीक्षेत वितर्कयेत। केन बं
धः केन मोक्ष इति। तावाह। बंध इति। एतेषां इंद्रियाणां चकारात् आत्मस्मरणे। न बंधमोक्षौ। यस्मादेवं। अतो बंध
मोक्षौ॥ ॥ तस्मान्नियम्य षड्वर्गं मद्भावेन चरेन्मुनिः। विरक्तः क्षुद्रकामेभ्यो लब्ध्वात्मनि सुखं महत्॥२३॥ मद्भावे
न मां स्मरन् भिक्षार्थं पुरादिकं प्रविशन् महीं चरेदित्यन्वयः॥ ॥ पुरग्रामव्रजान्सार्थान्भिक्षार्थं प्रविशंश्चरेत्। पु ए.टी. १३५
ण्यदेशसरिच्छैलवनाश्रमवतीं महीं॥२४॥ पुराणि ह्यदिमंति। ग्रामास्तद्रहिताः। व्रजा गोष्ठानि। सार्थान् यात्रिक

जः न समूहान्॥ ॥ वानप्रस्थाश्रमपदेष्वभीक्ष्णं भैक्ष्यमाचरेत्। संसिध्यत्याश्वसंमोहः शुद्धसत्वः शिलांधसा॥२५॥
शिलवृत्त्या प्राप्तेन तदीयेनांधसान्नेन शुद्धसत्वः सन् निवृत्तमोहः आशु सिध्यति मुच्यते। ननु मृष्टान्नं वि
हाय कथं शिलान्नप्रवृत्तिः स्यात्। अत आह। नैतदिति॥ ॥ नैतद्वस्तुतया पश्येत् दृश्यमानं विनश्वरं। असक्त
चित्तो विरमेदिहामुत्रचिकीर्षितात्॥२६॥ एतत् दृश्यमानं मृष्टान्नादिकं वस्तुतया न पश्येत। यतो विनश्यति। अ
तः इहामुत्र च लोके असक्तचित्तः सन् चिकीर्षितात् तदर्थं कृतात् विरमेत्। ननु तथापि यावद्विनाशं सुखहेतुत्वा
त्तच्चिंतावान्। ततः कुतो विरागः स्यात्। तत्राह। यदेतदिति॥ ॥ यदेतदात्मनि जगन्मनोवाक्प्राणसंहतं। स
र्वं मायेति तर्केण स्वस्थस्त्यक्त्वा न तत्स्मरेत्॥२७॥ एतत् जगत् ममतास्पदं मम वाक्प्राणैः संहतं अहंकारास्पदं श
रीरं सर्वं तत् त्यक्त्वा च आत्मनि मायामात्रमिति तर्केण स्वप्नादिदृष्टांतेन त्यक्त्वा स्वस्थः आत्मनिष्ठः सन्न तु

नः न तत्स्मरेत् न चिंतयेत्। एवं बहूदकादिधर्मानुक्त्वा परमहंसधर्मानाह। ज्ञाननिष्ठ इति सार्द्धैर्दशभिः॥ मू॥ ज्ञा
ननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः। सलिंगानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः॥२८॥ यदि विरक्तो मुमुक्षु
स्तयोर्ज्ञाननिष्ठो वा मोक्षेप्यनपेक्षो वा। वा शब्दश्चार्थे। ज्ञाननिष्ठश्च विरक्तश्च मद्भक्तश्च। सलिंगान् त्रिदंडादिस
हितानाश्रमधर्मान् तद्धर्मान् त्यक्त्वा तदासक्तिं विहाय यथोचितं धर्मं चरेदित्यर्थः। न पुनस्स्वयं तत्त्याग एव विवक्षि
तः। तेन धर्मविधानात्। अक्रियत्वस्य उत्तराध्याये वक्ष्यमाणत्वाच्च। तर्हि पूर्वस्मात् को विशेषः। तमाह। अविधिगो
चरः। विधिकिंकरो न स्यादिति। एतदेव स्फुटीकरिष्यति। शौचमाचमनं स्नानं न तु चोदनया चरेदित्यादि। तर्हि किं
यथेच्छं चरेत्तदाह। बुधइति॥ मू॥ बुधो बालकवत्क्रीडेत् कुशलो जडवच्चरेत्। वदेदुन्मत्तवद्विद्वान् गोचर्यां नैग
मश्चरेत्॥२९॥ बुधः विवेकवानपि बालकवत् मानापमानविवेकशून्यः। कुशलः निपुणोपि जडवत् फलानु

ए॰टी॰ १३५

संधानाभावेन। विद्वानपि पंडितोपि उन्मत्तवत् लोकरंजनाभावेन। नैगमः वेदार्थनिष्ठोपि गोचर्यं अनियताचार
मिव॥ मू॥ वेदवादरतो न स्यान्न पाषंडी न हैतुकः। शुष्कवादविवादे न कंचित्पक्षं समाश्रयेत्॥३०॥ वेदवाद
रतः कर्मकांडव्याख्यानादिनिष्ठः। हैतुकः केवलतर्कनिष्ठः शुष्कवादे निःप्रयोजनगोष्ठ्यां। यो विवादस्त
स्मिन्॥ मू॥ नोद्विजेत जनाद्धीरो जनं चोद्वेजयेन्न तु। अतिवादांस्तितिक्षेत नावमन्येत कंचन॥३१॥ अतिवादा
नुच्चंडरुक्तानि॥ मू॥ देहमुद्दिश्य पशुवत् वैरं कुर्यान्न केनचित्। एक एव परो ह्यात्मा भूतेष्वात्मन्यवस्थितः॥
३२॥ आत्मदृष्ट्या वैताद्वैरकारणं नास्तीत्यर्थः। एक एवेति॥ मू॥ यथेंदुरुदपात्रेषु भूतान्येकात्मकानि च। अल
ब्ध्वा न विषीदेत काले कालेशनं क्वचित्॥३३॥ भूतानि च देहा अपि कारणरूपेणैकात्मकानि। अयं भावः। एक
एवात्मा येषां तानि भूतान्येकात्मकानि। अतस्तेषामनिष्टकृत् आत्मनेऽनिष्टं करोतीत्यर्थः॥ मू॥ अलब्ध्वान

विषीदितकालेकालेशनंक्वचित्।लब्ध्वानहृष्येन्मतिमान्उभयंदैवतंत्रितं।आहारार्थंसमीहेतयुक्तंतत्प्राणधा
रणं॥३४तत्त्वंविमृश्यतेयेनतद्विज्ञायविमुच्यते॥३४दैवतंत्रितंदैवाधीनंयतःउभयंहर्षविषादं।अलंतदितिनिरा
श्रयत्वेनापितत्राह।आहारार्थंसमीहेतैव।यतस्तस्यप्राणधारणंयुक्तं।कथं।तेनप्राणधारणेनतत्त्वंविचार्यते।अ
थवा।आहारार्थंसमीहेत।तदपियुक्तंयोग्यं।किंत्विच्छयान।तदपिप्राणधारणंनकामतः।तस्मात्कामतोनसमीहेत।
यस्मात्तेनआहारसमीहनेनतत्त्वंविमृश्यते।कामतःआहारंसमीहमानस्यवश्यवशेंद्रियत्वात्।तत्त्वविमर्शनंनसंभ
वति।ननुप्राणधारणमात्रंचेदन्नज्ञातंतर्हियतेःश्रेष्ठन्नयिष्टान्नादिसेवनेप्यवायोनस्यादितिचेत्तत्राह।यदृच्छ ए०टी
येति॥ब॥यदृच्छयोपपन्नान्नमद्याच्छ्रेष्ठमुतापरं।तथावासस्तथाशय्यांप्राप्तंप्राप्तंभजेन्मुनिः॥३५ननुस्नानशौचं १३
तथानिद्रानियमेकांतशीलता।यतेश्चचारिकर्माणिपंचमंनोपपद्यते।इतिवचनात्।कथंयदृच्छालाभवर्तनंतत्रा

ह।शौचमिति॥ब॥शौचमाचमनंस्नानंनतुचोदनयाचरेत्।अन्यांश्चनियमान्ज्ञानीयथाहंलीलयाचरेत्॥३६
यथाहमीश्वरोलीलयाचरामि।तथाज्ञानीज्ञाननिष्ठःअनासक्तःसन्कुर्यात्।नतुविधिकिंकरत्वेनतत्र्यज्ञा
ननिष्ठाविरोधादित्यर्थः।ततोविधिकिंकराभावस्तस्यतदाह।नहीति॥ब॥नहितस्यविकल्पाख्यायाचमद्वीक्ष
याहता।आदेहांतात्क्वचित्ख्यातिःततःसंपद्यतेमया॥३७नहितस्यविकल्पाख्याभेदप्रतीतिःनन्वस्तिसा।मद्यं
याचासौमद्वीक्षया।ज्ञानेनहता।ननुनहतापुनःदृश्यमानत्वात्तत्राह।आदेहांतात्क्वचित्बाधितैवख्याति
र्भवति।तदेवंविरक्तस्यपरोक्षज्ञानवतःसंन्यासंतद्धर्मांश्चोक्त्वाकेवलवैराग्यवतंविविदिषुंप्रत्याह।दुःखोदर्को
ति॥ब॥दुःखोदर्केषुकामेषुजातनिर्वेदआत्मवान्।अजिज्ञासितमद्धर्मोगुरुंमुनिमुपव्रजेत्॥३८नजिज्ञासि
तमद्धर्मोमित्याज्ञिस्माधनंयेनसः॥ब॥तावत्परिचरेद्भक्तःश्रद्धावाननसूयकः।यावद्ब्रह्मविजानीयान्मामेवगुरु

रुमाहतः॥३९॥ मामेवमहृष्टो वपुरूं परिचरेत्। ततः परमेकस्थे रेदिष्यादिधर्मे वर्त्तेतेति भावः॥ अनधिकारिणः ॥ सन्या-
संनिंदति द्वाभ्यां॥ यस्त्वेति॥ब॥ यस्त्वसंयतषड्वर्गः प्रचंडेंद्रियसारथिः। ज्ञानवैराग्यरहितस्त्रिदंडमुपजीवति॥४०॥
प्रचंडो ग्राहकः। इंद्रियसारथिर्बुद्धिर्यस्य सः॥ब॥ सुरानात्मानमात्मस्थं निह्नुते मां च धर्महा। अविपक्वकषायोऽस्माद
मुष्माच्च विहीयते॥४१॥ सुरान्यष्टव्यान् देवान् आत्मानं मां च निह्नुते प्रतारयति। निह्नवफलमाह। अस्मादिति॥ चत्व-
र्णां प्रधानधर्मानाह। भिक्षोरिति॥ब॥ भिक्षोर्धर्मः शमोऽहिंसा तप ईक्षा वनौकसः। गृहिणो भूतरक्षेज्या द्विजस्याचा-
र्यसेवनं॥४२॥ द्विजस्य ब्रह्मचारिणः॥ अन्यधर्मान् कांश्चित् गृहस्थेष्वतिदिशति॥ ब्रह्मचर्यमिति॥ब॥ ब्रह्मचर्यं तपः
शौचं संतोषो भूतसौहृदं। गृहस्थस्याप्यृतौ गंतुः सर्वेषां मदुपासनं॥४३॥ गृहस्थस्य ब्रह्मचर्यं ऋतुगामित्वं। तपः स्व-
धर्मः। शौचं रागादिराहित्यं। एवंभूतवर्णाश्रमफलमाह। इतीति॥ब॥ इति मां यः स्वधर्मेण भजेन्नित्यमनन्यभाक्।

सर्वभूतेषु मद्भावो मद्भक्तिं विंदते चिरात्॥४४॥ दृढां मद्भक्तिं चिरात् विंदते। ततः किमत आह। भक्त्येति॥ब॥ भक्त्यो-
द्धवानपायिन्या सर्वलोकमहेश्वरं। सर्वोत्पत्त्यप्ययं ब्रह्म कारणं मोपयाति सः॥४५॥ महेश्वरत्वे हेतुः सर्वोत्पत्त्यप्ययं
सर्वोत्पत्त्यप्ययौ यस्मात्। अत एव तत्कारणं मां ब्रह्मरूपं वैकुंठनिवासिनं। यद्वा। ब्राह्मणो वेदस्य कारणं मां उप-
याति सामीप्येन प्राप्नोति ततश्च सोऽमुक्त एवेत्याह। इतीति॥ब॥ इति स्वधर्मनिर्णिक्तसत्त्वो निर्ज्ञातमद्गतिः। ज्ञान-
विज्ञानसंपन्नो विरक्तः समुपैति मां॥४६॥ एवंभूतेन स्वधर्मेण निर्णिक्तं शुद्धं सत्त्वं यस्य सः। अत एव निर्ज्ञाता मम गति-
रैश्वर्यं येन। उक्तमर्थं संक्षिप्याह। वर्णेति॥ब॥ वर्णाश्रमवतां धर्म एष आचारलक्षणः। स एव मद्भक्तियुतो निःश्रेय-
सकरः परः॥४७॥ य एष आचारलक्षणः स्वधर्मः। पितृलोकप्राप्तिफलः। स मद्भक्तियुक्तः मदर्पणेन कृतश्चेत् तर्हि निः-
श्रेयसकरः। उक्तमर्थं संक्षिप्याह। एतदिति॥ब॥ एतत्तेऽभिहितं साधो भवान् पृच्छति यच्च मां। यथा स्वधर्मसंयुक्तो

भक्तो मां समियात्परं॥४८ तच्च ते अभिहितं। यथा भक्तो भूत्वा मां परं संप्राप्नुयादिति॥ ७॥ ॥ ॥ इति श्रीभागवते
महापुराणे एकादशस्कंधे वर्णाश्रमधर्मनिर्णयो नामाष्टादशोऽध्यायः॥ ॥७॥ ॥ ॥ ऊनविंशे विमुक्त
स्यापि यन्नास्तीति गद्यते। गुणदोषव्यवस्थार्थं यमादीनां च निर्णयः॥ १ तदेवं तर्कतो बाधितोपि देहादिप्रपंचो यावद
परोक्षानुभवेन दिग्मोहादिरिव न लीयते तावत् ज्ञानाभ्यासः ततो मुक्तिरित्युक्तं। आदेहांतात्क्वचित्ख्यातिः ततः सं
पद्येत मयेत्यादिना। यदा त्वपरोक्षानुभवेन प्रपंचो लीनप्रायः। तदा किं विकृत्यमस्तीत्याह। योवि[illegible]तो॥ ७॥ ॥
श्रीभगवानुवाच॥ ॥ योविद्याश्रुतसंपन्नः आत्मवान्नानुमानिकः। मायामात्रमिदं ज्ञात्वा ज्ञानं च मयि संन्यसेत्॥ १
विद्या अनुभवः तत्पर्यंतेन संन्यासेन संपन्नः अत एव आत्मवान् प्राप्तात्मतत्त्वः। नानुमानिकः केवलः परोक्षज्ञानवान्
भवति। अनेकारण्याविप्राकृत्युक्त्यनुकूलतर्कतो निर्णीतार्थ इत्यर्थः। स इदं द्वैतं तत्साधनं च मायामात्रमिति ज्ञात्वा ज्ञा

नं तत्साधनं मयि संन्यसेत्। येन यज्जसितं यज्जेतिहि स्मर्यते। अथवा विद्या वेदलक्षणा व्रतानि तत्संबंधीनि॥
ब्रह्मचर्यादीनि तैः संपन्नः आत्मवान् विषयान्निवृत्तः आनुमानिको वैदिकयुक्तिभिः कुशलश्च यो भवति। स
मयि ज्ञानं संपाद्य ततू अनात्मजातं मायामात्रं ज्ञात्वा पश्चात्कर्माणि संन्यसेत्। अयं विद्वत्संन्यासो नाम। अत्र हेतु
माह। ज्ञानिन इति॥७॥ ज्ञानिनस्त्वहमेवेष्टः स्वार्थो हेतुश्च संमतः। स्वर्गश्चैवापवर्गश्च नान्योर्थो म[illegible]प्रियः॥२ य
स्मादहमेव तस्येष्टः। अपेक्षितः स्वार्थः। फलं हेतुः। तत्साधनं च संमतः। स्वर्गोऽभ्युदयश्च। अपवर्गः संसारनिवृत्तिः
अतस्तस्य न प्राप्यं कृत्यं वा किंचिदस्तीत्यर्थः। अत्र विद्वदनुभवं प्रमाणयति। ज्ञान इति॥७॥ ज्ञानविज्ञानसंसिद्ध
परं श्रेष्ठं विदुर्मम। ज्ञानी प्रियतमोतो मे ज्ञानेनासौ बिभर्ति मां॥३ यथोक्तं ज्ञानिनं अभिनंदति। यतोसौ ज्ञानेन मोक्ष
स्यति। तस्य ज्ञानं स्तौति भगवान्॥७॥ तपस्तीर्थं जपो दानं पवित्राणीतराणि च। नालं कुर्वंति तां सिद्धिं या ज्ञानकल

याकृता॥४॥ अलं अन्यथं ज्ञानस्य कलया लेशेन ज्ञानेन सहितं तत्वं यतं तं यथा भवति तथा स्वात्मानं ज्ञात्वा तत्संप
न्नः सन् मामेव भजेः अन्यथ सर्वं भजेत्यर्थः॥ब॥ तस्मात् ज्ञानेन सहितं ज्ञात्वा स्वात्मानमुद्धव। ज्ञानविज्ञानसंपन्नो
भज मां भक्तिभावनः॥५॥ तस्य प्रशस्यार्थं पूर्वेषां वृत्तमाह। ज्ञानइति॥ब॥ ज्ञानविज्ञानयज्ञेन मामिष्ट्वा स्वात्मानमा
त्मनि। सर्वयज्ञपतिं मां वै संसिद्धिं मुनयो गताः॥६॥ मामेव संसिद्धिं प्राप्ता मामेव संसिद्धिं प्राप्ताः। ननु भगवन्तेषां
सन्यासिनां ज्ञानिनां चेत् त्वमात्मा तर्हि संसारिणो मम का गतिरिति चेत्तत्राह। त्वयीति॥ब॥ त्वय्युद्धवाश्रयति य
स्त्रिविधो विकारो मायांतरापतति नाद्यपवर्गयोर्यत्। जन्मादयोस्य यदमी तव तस्य किं स्युः। आद्यंतयोर्यदसतो एटी
स्ति तदेव मध्ये॥७॥ त्रिविधः आध्यात्मिकादि विकारः देहादिः सः मायया न तु परमार्थः। यत् यस्मात् अंतरा मध्ये ए १२
व आपतति रज्जौ सर्पमालादिवत्। नाद्यपवर्गयोर्न आदावंते वास्ति। अतः यत् यदा तस्य विकारस्य अमी जन्मा

दयः स्युः। तदा तस्य तव अधिष्ठानभूतस्य किं। न किंचिदित्यर्थः। तस्याप्यवस्तुतो न संति। तस्यासत्वादित्याह॥ आद्यं
तयोरिति॥ अतः सर्पादिराद्यंतयोर्यदस्ति रज्जुः। तदेव मध्येपि न तु सर्पादिः तद्वदयं विकारो स्तीति॥ यद्वा॥ आ
द्यंतयोर्यदस्ति तन्मध्येप्यस्त्येव। न तस्य जन्मादयः संति। अतस्त्वं निर्विकारं ब्रह्मेति ज्ञानं संक्षेपतो दर्शितं। ज्ञाना
दिविषयो जिज्ञासुः पृच्छति। ज्ञानमिति॥ब॥ ॥उद्धव उवाच॥ ॥ज्ञानं विशुद्धं विपुलं यथैतत् वैराग्य
विज्ञानयुतं पुराणं। आख्याहि विश्वेश्वर विश्वमूर्ते त्वद्भक्तियोगं च महद्विमृग्यं॥८॥ विशुद्धं ब्रह्मविषयत्वात्। ए
तज्ज्ञानं विपुलं निश्चितं यथा भवति तथा कथयति। वैराग्यं साधनं विज्ञानं फलं ताभ्यां युतं त्वद्भक्तियोगं च आख्या
हि। ननु भवतु ज्ञानमेव भक्तियोगेन किं तत्राह। तापत्रयेणेति॥ब॥ तापत्रयेणाभिहतस्य घोरे संतप्यमान
स्य भवाध्वनीश। पश्यामि नान्यच्छरणं तवांघ्रिद्वंद्वातपत्राद मृताभिवर्षात्॥९॥ तापत्रयेणाभिहतो हतस्या

अतः संतप्यमानस्य। अंकिं इदं इमेव आतपत्रं यस्मात्। न केवलं आतपत्रात्। अमृतमपि अनितो वर्षति तस्मात्।
अतितरपासुत्या तयन्नाह। दृष्टमिति॥ब॥ दृष्टं जनं संपतितं बिलेस्मिन् कालाहिना क्षुद्रसुखोरुतर्षं। समु
द्धरेनं कृपयापवर्ग्यैर्वचोभिरासिंच महानुभाव॥१०॥ अस्मिन् बिले संसारकूपे पतितं तत्रच कालाहिना दृष्टं॥
एवमपि क्षुद्रसुखोरुतर्षं। क्षुद्रसुखे विषये उरुमहती तृष्णा यस्य सः तं। दह्यमानः कथं समुद्धरणीयः इति चेत्त
त्राह। आपवर्ग्यैरिति। अपवर्गबोधकैर्वागमृतैः आसिंचेति। तद्विद्यासार्थं विद्वत्सभायां निर्णीतं अर्थं वक्ष्यामीत्या
ह। इत्थमिति॥ब॥ ॥श्रीभगवानुवाच॥ ॥इत्थमेतत्पुरा राजा भीष्मं धर्मभृतां वरं। अजातशत्रुः पप्र एकी
च्छ सर्वेषां नोनुशृण्वतां॥११॥ निवृत्ते भारते युद्धे सुहृन्निधनविह्वलः। श्रुत्वा धर्मान् बहून् पश्चात् मोक्षधर्मान १५०
पृच्छत॥१२॥ तानहं तेभिधास्यामि देवव्रतमुखाच्छ्रुतान्। ज्ञानविज्ञानवैराग्यश्रद्धाभक्त्युपबृंहितान्॥१३॥ तान्

धर्मान् अपृच्छत्। तेभिधास्यामि। तत्तु ज्ञानभक्त्योः पृष्टयोः धर्मकथनं मदुक्त्या मद्विषयकथनमनुकरोतीति चेत्तत्रा
ह। ज्ञानेति। ज्ञानादिनिरूपणोपबृंहितान् तत्सहितानित्यर्थः। तत्र ज्ञानं कथयति नवेति॥ब॥ नवैकादश पंच त्रीन् भा
वान् भूतेषु येन वै। ईक्षेताथैकमध्ये तत्ज्ञानं मम विनिश्चितं॥१४॥ प्रकृतिपुरुषमहदहंकार पंच तन्मात्राणि न
व। एकादश इंद्रियाणि पंच महाभूतानि त्रयो गुणाः। एतान् भावान् अष्टाविंशति तत्त्वानि भूतेषु ब्रह्मादिस्थाव
रांतेषु कार्येषु अनुगतानि। येन ज्ञानेन ईक्षेत। कार्यकारणात्मकं जगत्त्रयं परमकारणात्मकमेवैतत्। न तु त
तः पृथगिति। येन पश्येत तत्ज्ञानमित्यर्थः। विज्ञानमेवाह। एतदेवेति श्लोकार्द्धेन॥ब॥ एतदेव हि विज्ञानं न तथै
केन येन यत्। स्थित्युत्पत्त्यप्ययान् पश्येत् भावानां त्रिगुणात्मनां॥१५॥ यद्यदा एतानि सर्वभूतेषु वर्तमानानि अष्टावि
शति तत्त्वानि आगमापायीति। आत्मा चैकः आगमापायसाक्षी नित्य इति यत् तत्ज्ञानं। एतदेव साक्षात्कारफलं वि

ज्ञानमितिभावः।यदाएकेनअनुगतान्अनेकात्मकान्भावान्पूर्वमेलयतातानतथापूर्ववद्भेदयता।किंज्ञातदेवं
परमकारणंब्रह्मैवतदाएवदेवविज्ञानमुच्यते।एतदुक्तंभवति।अपरोक्षज्ञानेनपरोक्षत्वमस्यादिग्मोहादिवन्नि
वृत्तिभावात्तदाजगतःस्वयमात्मनःपृथक्सदितिमन्यते।अपरोक्षज्ञानेनबाधितमेवदग्धपटवत्जीवन्मुक्तः
संसारंशेषंपश्यति।ततःपरंनपश्यतिवा।अतःपरोक्षापरोक्षज्ञानेज्ञानशब्दाभ्यामुच्यते।एतेनसर्वकार्याणाम
नुगतिंकार्याणांकारणात्पृथक्सत्त्वंचोपपादयति।तत्रयदिनकदाचिदनीदृशंजगदित्यादिमतेनैतेषांभावान
मुत्पत्त्यादयोनस्युःतर्हिकारणस्यैकस्याभावात्एकात्मतामिथ्यात्वंचनस्यात्।अतस्तेषामुत्पत्त्यादीन्साधय
ति।स्थितीतित्रिगुणात्मनांसावयवानामित्यर्थः।विमताभावाउत्पत्त्यादिमन्तःसावयवत्वात्घटादिवत्रये
दित्यर्थः॥छ॥आदावन्तेचमध्येचसृज्यात्सृज्यंयदन्वियात्।पुनस्तत्प्रतिसंक्रामेयच्छिष्येततदेवसत्॥१६॥आदाउ

त्पत्तौअन्तेपरिणामान्तरापत्तौचकाराद्वेनमध्येवाअन्वयत्वेनसृज्यात्सृज्यंकार्यात्कार्यान्तरंप्रतियदन्वियात्अनुगच्छेत्तात
त्प्रतिसंक्रामेतेषांयदिवशिष्येततदेवसदितिप्रपश्येदित्यर्थः।ननुसर्वत्रैवात्मानुगतस्तत्रकिंप्रमाणमित्याह।श्रुतिरि
तिहास्यां॥छ॥श्रुतिःप्रत्यक्षमैतिह्यमनुमानंचतुष्टयं।प्रमाणेष्वनवस्थानात्विकल्पात्सविरज्यते॥१७श्रुत्यादिभिश्च
तुर्ष्वपिप्रमाणेष्वनवस्थानात्अनेकमत्वादिकल्पोज्ञातः।विकल्पस्यमिथ्यात्वात्तस्माद्विरज्येतविवेकी।तत्रश्रु
तिः।नेहनानास्तिकिंचन।एकोदेवःसर्वभूतेषुगूढः।साक्षीचेताकेवलोनिर्गुणश्च।प्रत्यक्षंघटादिकार्यंतंचाव्य
तिरेकेणनदृश्यते।चैतन्यव्यतिरेकेणनकिंचित्दृश्यतइति।ऐतिह्यंमहाजनप्रसिद्धं।क्षेत्रज्ञंचापिमांविद्धिए
कएवहिभूतात्माभूतेभूतेव्यवस्थितः।अनुमानंविमतंविवादास्पदंमिथ्यादृश्यत्वात्शुक्तिरजतवत्।इज्या
दि।एवंप्रमाणचतुष्टयएतेष्वनवस्थानात्एतेबाधितत्वात्।एवंसर्वानुगतंसत्यमात्मतत्त्वंपश्यन्विकल्पस्या

चमिथ्यात्वात् ततो विरज्येत विरक्तो भवतीत्यर्थः। ननु ब्रह्मलोकादिविषयाणां सत्यत्वात्स्वरूपार्थत्वमिति चेत्तत्राह
र्मपरिणामरूपत्वाद्विषयाणां मिथ्यात्वात्। कर्मणामिति॥ बा॥ कर्मणां परिणामित्वादाविरिंच्यादमंगलं। विपश्चिन्नश्व
रं पश्येददृष्टमपि दृष्टवत्॥ १८ आविरिंच्यात् ब्रह्मलोकपर्यंतं अदृष्टमपि सुखं अमंगलं दुःखरूपं नश्वरं च पश्ये
त्। अतोऽदृष्टं परलोकमपि दृष्टवत्। ऐहिकभोग्यवत् नश्वरं पश्यति विपश्चित्। भक्तियोगं सकारणमाह। भ
क्तियोग इति॥ बा॥ भक्तियोगः पुरैवोक्तः प्रीयमाणाय तेऽनघ। पुनश्च कथयिष्यामि मद्भक्तेः कारणं परं॥ १९ भ
क्तियोगः पूर्वमुक्त एव। तथापि तस्मिन्प्रीतिं प्राप्नुवते तुभ्यं पुनश्च कथयिष्यामि। भक्तेः कारणमाह। श्रद्धेति॥
बा॥ श्रद्धामृतकथायां मे शश्वन्मदनुकीर्तनं। परिनिष्ठा च पूजायां स्तुतिभिः स्तवनं मम॥ २० श्रद्धा श्रवणादरः। श
श्वदिति सर्वदाऽनुषज्यते। मदनुकीर्तनं श्रवणानंतरं मत्कथाव्याख्यानमित्यर्थः॥ बा॥ आदरः परिचर्यायां सर्वांगै

रभिवंदनं। मद्भक्तपूजाभ्यधिका सर्वभूतेषु मन्मतिः॥ २१ मदर्थेष्वंगचेष्टा च वचसा मद्गुणेरणं। मय्यर्पणं च म
नसः सर्वकामविवर्जनं॥ २२ अंगचेष्टा लौकिकी क्रिया। वचसा लौकिकेनापि मद्गुणानामीरणं कथनं॥ बा॥
मदर्थेऽर्थपरित्यागो भोगस्य च सुखस्य च। इष्टं दत्तं हुतं जप्तं मदर्थं यद्व्रतं तपः॥ २३ मदर्थे मद्भजनार्थं तद्विरो
धिनोऽर्थस्य परित्यागः भोगस्य तत्साधनस्य स्रक्चंदनादेः सुखस्य पुत्रोपलालनादेः इष्टादि वैदिकं यत्कर्म त
दपि मदर्थं कृतं भक्तेः कारणं॥ बा॥ एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनां। मयि संजायते भक्तिः कोऽन्योऽर्थो
स्यावशिष्यते॥ २४ भक्तिः प्रेमलक्षणा संजायते। अस्य भक्तस्य। अन्यः कोऽर्थः साधनरूपः साध्यरूपो वा वशि
ष्यते। सर्वोऽपि च तत एव भवतीत्यर्थः। तदेवाह। यदेति॥ बा॥ यदात्मन्यर्पितं चित्तं शांतं सत्त्वोपबृंहितं। धर्मं ज्ञानं स
वैराग्यमैश्वर्यं चाभिपद्यते॥ २५ यदात्मनि मय्यीश्वरे चित्तमर्पितं तदा उमा न धर्मादीन्प्राप्नोत्येव। किं बहुना। चि

त्तमेवांतर्बहिर्निर्दिष्टं अर्थनिर्णयोः कारणमिति भावः। एतदेव व्यतिरेकेण द्रढयति। यदर्पितमिति॥ ब॥ यदर्पितं तद्वि
कल्पं इ[illegible] परिध्यावति। रज्ज्वुस्थलं वा सन्निविष्टं चित्तं विद्धि विपर्ययं॥२६ यत्तु यदा तच्चित्तं विकल्पे देहे गृहादावर्पितं सत्
विषये परिध्यावति तदा अधिकं रजस्थलं च सन्निविष्टं भवति। ततश्च विपर्ययं अधर्मादिकं विद्धि। स्वाभिप्रेतान् धर्मान्व्या
चष्टे धर्म इति॥ ब॥ धर्मो मद्भक्तिकृत् प्रोक्तो ज्ञानं चैकात्म्यदर्शनं। गुणेष्वसंगो वैराग्यं ऐश्वर्यं चाणिमादयः॥२७ धर्मो म
द्भक्तिकृत्। ततः स एव प्रोक्तः प्रकृष्टः उक्तः शास्त्रेषु धर्मादीनां महाजनप्रसिद्धानां अन्यथा व्याख्यानं तत्त्वात् यमादिव
पिसंख्यानं तत्स्वरूपतो वा किंविद्वैलक्षण्यं स्यादिति संभावनया तद्विशेषजिज्ञासुः पृच्छति। यम इति पंचभिः॥ ब॥
॥ ॥उद्धव उवाच॥ ॥यमः कतिविधः प्रोक्तो नियमो वारिकर्षन। कः शमः को दमः कृष्ण का तितिक्षा धृतिः प्र
भो॥२८ किं दानं किं तपः शौर्यं किं सत्यमृतं उच्यते। कस्त्यागः किं धनं चेष्टं को यज्ञः का च दक्षिणा॥२९ पुंसः किंस्विद्बलं

श्रीमंड
श्रीमन् भगो लाभश्च केशव। का विद्या ह्रीः परा का श्रीः किं सुखं दुःखमेव वा॥३० परेति विद्यादीनां विशेषणं। श्रीमंड
श्रीमद्व्यालाभश्च केशव। का विद्या ह्रीः परा का श्रीः किं सुखं दुःखमेव वा॥३० परेति विद्यादीनां विशेषणं। श्रीमंड
नं॥ ब॥ कः पंडितः कश्च मूर्खः कः पंथा उत्पथश्च कः। कः स्वर्गो नरकः कः स्वित् को बंधुरुत किं गृहं॥३१ कश्च आढ्यः
को दरिद्रो वा कृपणः कः क ईश्वरः। एतान्प्रश्नान् मम ब्रूहि विपरीतांश्च सत्पते॥३२ प्रश्नान् पृष्टान्नर्थान् विपरीतान्
॥ब॥ अहिंसेति त्रिभिः॥ ब॥ ॥श्रीभगवानुवाच॥ ॥अहिंसा सत्यमस्तेयं असंगो ह्री
रसंचयः। आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमाभयं॥३३ अस्तेयं मनसापि परद्रव्याग्रहणं। आस्तिक्यं धर्मतीर्थादौ
विश्वासः॥ ब॥ शौचं जपस्तपो होमः श्रद्धातिथ्यं मदर्चनं। तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवनं॥३४ शौचं बाह्याभ्यं
तरं चेति द्वयं। अतो द्वादश नियमाः। श्रद्धा धर्मादिषु॥ ब॥ एते यमाः सनियमाः उभयोर्द्वादश स्मृताः। पुंसामुपा
सितास्तात यथाकामं दुहंति हि॥३५ उभयोर्द्वादश स्मृताः ते यमा नियमाश्च यद्वा। उभयोः प्रवृत्तिनिवृत्तयोः मुमुक्षो

र्यमामुख्याः सकामश्च नियमामुख्याः। तत्र हेतुमाह। द्वियस्मात् उपासिताः संतः प्रवृत्तानां निवृत्तानां च यथा
कामं कामानुसारेण मोक्षमक्रमदयं च दुहंतीति। मुमुक्षोरुपादेयान् शमादीन् हेयांश्च दुःखादीन् प्रहाणेन
प्रसिद्धेभ्यो विलक्षणानाह। शम इति यावदध्यायसमाप्ति॥३॥ शमो मन्निष्ठता बुद्धेः दम इंद्रियसंयमः। तिति
क्षा दुःखसंमर्षो जिह्वोपस्थजयो धृतिः॥३६॥ शमो मन्निष्ठता बुद्धेः नतु शांतिमात्रं। दमः इंद्रियसंयमः। नतु चौरादि
दमनं। तितिक्षा विहितस्य दुःखस्य संमर्षः सहनं। नतु भारादेः। जिह्वोपस्थयोर्जयः। वेगधारणं धृतिः। नत्वनुद्वेगमा
त्रं॥३॥ दंडन्यासः परं दानं कामत्यागस्तपः स्मृतं। स्वभावविजयः शौर्यं सत्यं च समदर्शनं॥३७॥ दंडो द्रोहः
तस्य न्यासो दानं। नतु धनार्पणं। कामत्यागः भोगोपेक्षा तपः। नतु कृच्छ्रादि। स्वभावो वासना तस्य जयः प्रतिबंधः शौ
र्यं। नतु विक्रांतिः। समं ब्रह्म तस्य दर्शनं आलोचनं। सत्यं विषयवाक्यं। न यथार्थभाषणमात्रं अथ च ऋतं॥३॥ ऋतं

च सूनृता वाणी कविभिः परिकीर्तिता। कर्मस्वसंगमः शौचं त्यागः संन्यास उच्यते॥३८॥ सूनृता सत्या प्रिया च वाक् ऋतं
एवं ऋतसत्ययोः स्फुट एव विवेकः। कर्मस्वसंगत्यागं व्याख्यातुमादौ ततो भेदेन शौचं व्याचष्टे। तथापि मलत्यागरूप
त्यागाद्भेदं प्रतीतेः कर्मसु असंगमः अनासक्तिः शौचं। त्यागस्तु संन्यास इति तयोर्भेद इत्यर्थः॥३॥ धर्म इष्टं धनं नृ
णां यज्ञोऽहं भगवत्तमः। दक्षिणा ज्ञानसंदेशः प्राणायामः परं बलं॥३९॥ नृणां इष्टं धनं धर्मः न पश्वादि। भगवत्तमः प
रमेश्वरोऽहमेव यज्ञः। मखुध्यायज्ञोऽनुष्ठेयः। न क्रियाद्युद्देश्यर्थः। यज्ञेन यज्ञमयजंतेति श्रुतेः॥ यज्ञार्थं दक्षिणा स्व
चज्ञानोपदेशः। न हिरण्यादिदानं। तेन हि यज्ञरूपो विष्णुः प्राप्यते। इदमनेन बलं तच्च मनोदमनहेतुत्वात् प्राणाया
म इति। द्वयालोकप्रसिद्धेवाभिमतालाभं ध्याविख्याप्सुः प्रथमं भगं ततो भेदेन व्याचष्टे। लोके तयोरभेदप्रसिद्धेः॥
॥३॥ भगो म ऐश्वरो भावो लाभो मद्भक्तिरुत्तमः। विद्यात्मनि भिदाबाधो जुगुप्सा ह्रीरकर्मसु॥४०॥ भगो भाग्यं तच्च मे ऐश्वरो

भावोमदीयं ऐश्वर्यादिषाकुण्यमित्यर्थः। उत्तमलोत्तमकमद्भक्तिः नतुधनादिविद्याआत्मनिष्ठतीतस्यानेदस्यनाशः। नत्ता
नमात्रं। अकर्मजुगुप्सादेयत्वदर्शनेकी। नलज्जामात्रं।।६।। श्रीगुणानैरपेक्षाद्याः सुखं दुःखं सुखाचयाः दुःखंका
मः सुखापेक्षा पंडितो बंधमोक्षवित्।।४२ गुणा एव श्री मंडनं। नकिरीटादि सुखदुःखयोरस्य यात्र्यतिक्रमः अनंतसंधानं
सुखं। नभोगाः। विषयभोगापेक्षैव दुःखं ना निद्रादादि। बंधान्मोक्षं हृदयं। वायोवेत्ति स पंडितः। नविद्वन्मात्रं।।६।। मूर्खो
देहाद्यहंबुद्धिः पंथा मन्निगमः स्मृतः। उत्पथाश्चित्तविक्षेपः स्वर्गान्वचगुणोदयः।।४२ अहंबुद्धिरित्युपलक्षणं देहगे
हादिष्वहंत्वाभिमानवान् मूर्ख इत्यर्थः। मन्निगमः मां नितरां गमयति प्रापयति यो निवृत्तिमार्गः स एव पंथा सन्मार्गः। न
कंटकादिशून्यः। चित्तविक्षेपः प्रवृत्तिमार्गः स उत्पथः कुमार्गः। नतु चोराद्याकुलः। सत्वस्य गुणोदयः उद्रेकः स्वर्गः। नेंद्रादि
लोकः।।६।। नरकस्तमउन्नाहः बंधुर्गुरुरहं सखे। गृहं शरीरं मानुष्यं गुणाढ्यो ह्याढ्य उच्यते।।४२ तमसः उन्नाहः उद्रे

कः स नरकः नतामिस्रादिः। गुरुरेव बंधुर्नभ्रात्रादिः। स चाहमेव यथाहं जगद्गुरुः।। एक एव परो बंधुर्विषमे समुपस्थिते
गुरुः सकलधर्मात्मा यत्र किंचन गोहरि इति। सत्साधनभोगायतनं रहं तच्च मानुष्यं रूपं शरीरमेव। नतु हर्म्यादि। गु
णैः संपन्नः आढ्य उच्यते। धनवान्।।६।। दरिद्रो यस्त्वसंतुष्टः कृपणो यो जितेंद्रियः। गुणेष्वसक्तधीरीशो गुणसंगो
विपर्ययः।।४४ असंतुष्टो यः स दरिद्री। नतु निर्द्धनः। यो अजितेंद्रियः स कृपणः शोच्यः। न दीनः। गुणेषु विषयेषु अनास
क्तधीर्यः स ईशः स्वतंत्रः। न राजा। गुणेषु संगो यस्य स विपर्ययः अनीशः। एतच्चारामादिविपर्ययोपलक्षणार्थं उपसे
हरति। एतइति।।६।। एत उद्धव ते प्रश्नाः सर्वे साधु निरूपिताः। किं वर्णितेन बहुधा लक्षणं गुणदोषयोः।। गुणदो
षदृशिर्दोषो गुणस्तूभयवर्जितः। साधु मोक्षोपयोगितया। एतच्च सर्वं गुणदोषयोः विवेकाय। योद्धवेन पृष्टमपित
योः संक्षेपतो लक्षणमाह। किमिति। किं बहुना वर्णितेन गुणदोषयोर्लक्षणमेतावदेव। तदाह। गुणदोषयोर्दृ

शिदर्शनं दोषः। गुणस्तु तदुभयदर्शनवर्जितः स्वभावः। गुणदोषजनितेनेदंहष्टेरस्फूर्तिः स्वभावः स गुणः॥छ॥
इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे यमनियमादिकथनं नाम एकोनविंशोऽध्यायः॥
॥छ॥ ॥विंशे योगत्रयं प्रोक्तं भक्तिज्ञानक्रियात्मकं। गुणदोषव्यवस्थार्थमधिकारिविभागतः। ननु गुणदोष
दृशिर्दोषो गुणस्तूभयवर्जितः। इत्युक्तं तत् वेदस्य विषयापहारप्रसंगात् अयुक्तमित्याक्षिपति। विधिश्चेति पंच
भिः॥छ॥ ॥उद्धव उवाच॥ ॥विधिश्च प्रतिषेधश्च निगमो हीश्वरस्य ते। अवेक्षतेरविंदाक्ष गुणं दोषं च कर्म
णां॥१॥ विधिश्च प्रतिषेधश्च ईश्वरस्य तव निगम आज्ञारूपो वेदः। स च विधेयानां प्रतिषेध्यानां कर्मणां गुणं दोषं प्र
च पुण्यपापरूपं अवेक्षते॥छ॥ वर्णाश्रमविकल्पं च प्रतिलोमानुलोमजं। द्रव्यदेशवयःकालान् स्वर्गं नरकमेव १४
च॥२॥ प्रतिलोमानुलोमजं। गुणदोषं तथैव ईक्षते। प्रतिलोमजाः उत्तमवर्णस्त्रीषु हीनवर्णेभ्यो जाताः। सूतवैदे

हिकादयः। अनुलोमजाः उत्तमवर्णेभ्यः पुरुषेभ्यो हीनवर्णासु स्त्रीषु जाताः। मूर्धावसिक्ताम्बष्ठादयः। तेषां गुणदोषौ द्रव्या
दीनं कर्मार्हतानर्हतारूपं स्वर्गं नरकं च तत्फलं तया गुणदोषरूपमेवावेक्षते। एतच्चोत्तराध्याये प्रपंचयिष्यति। तथा
पि प्रक्षे तेकिमायातं अत आह। गुणदोषेति॥छ॥ गुणदोषभिदादृष्टिमंतरेण वचस्तव। निःश्रेयसं कथं नृणां निषे
धविधिलक्षणं॥३॥ कर्मकांडं तव वचः कथं तच्च वचोंतरेण नृणां निःश्रेयसं कथं स्यात्। तथापि श्रोतव्यो मंतव्य
इत्यादि साधनविधिः। नानुध्यायेद्बहून् शब्दान् वाचो विग्लापनं हि तत्। इत्यादि निषेधस्य चावश्यकत्वादिति भावः।
गुणदोषभिदादृष्टिमंतरेण निषेधविधिलक्षणमपि कथं तत्त्वमस्यादिवाक्यवत् निःश्रेयसपरं स्यात्। सर्वस्य वेद
स्य विधिनिषेधांगीकारादित्यर्थः। ननु पितरो देवाश्च सर्वज्ञाः प्रत्यक्षतो दृष्टाः संतः मनुष्येभ्यः कथयिष्यंत्यः कथ
यिष्यंतीत्याह। पितृदेवेति॥छ॥ पितृदेवमनुष्याणां वेदश्चक्षुस्तवेश्वर। श्रेयस्त्वनुपलब्धेऽर्थे साध्यसाधनयोरपि

॥४॥ पित्रादीनां सर्वेषां त्वद्वाक्यरूपो वेद एव । अत्र श्रेयः श्रेष्ठं चक्षुः । प्रमापकं । क्व । अनुपलब्धेऽर्थे मोक्षस्वर्गादौ च तथा साध्य
साधनयोः इदमस्य साध्यं । इदमस्य साधनमित्यत्रापि तदेवं गुणदोषदृष्ट्या वेनिःश्रेयसं न घटते । किंच । शास्त्रेणैव
विहितां भेददृष्टिं तस्मिन्नेव विषये शास्त्रं कथं निवर्त्तयेदित्याह । गुणदोषेति ॥३॥ गुणदोषभिदादृष्टिर्निगमात्ते
न हि स्वतः । निगमेनापवादश्च भिदाया इति ह भ्रमः ॥४॥ ते निगमात्त्वद्वाक्यरूपाद्वेदादेव न हि स्वतः । यस्मादर्थवा
न्त्वेन निवर्त्तितत्वस्फुटं च भ्रमो भवति । तं निवर्त्तयति । सत्यं इदं ते वेदः । तथापि मद्वाक्यस्य ज्ञानविषयत्वात् न वि
रोध इति दर्शयितुं उक्तं विभागमेवाकर्तव्याकर्तव्यलक्षणं विविच्य दर्शयति । विषयाभेदेऽपि अधिकारिभेदेना
विरोधं वक्तुं प्रथमं योगत्रयमाह भगवान् । योगेति ॥६॥ ॥श्रीभगवानुवाच॥ ॥योगास्त्रयो मया प्रोक्ता नृ
णां श्रेयोविधित्सया । ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कर्हिचित् ॥६॥ योगाः उपायाः । ब्रह्मकर्मदेवताकांडैः

प्रोक्ताः । कर्म च निष्कामं श्रेयोविधित्सया मोक्षसाधनेच्छया । अन्यः उपायो नास्तीति काम्यकर्म व्यावर्त्तयति । इतीक
रोति तथाचोत्तराध्याये स्फुटीकरिष्यति । यः एतावन्मयोत्तद्विचेति । तर्हि त्रयाणां मध्ये कस्य कुत्राधिकारः इति
चेत्तत्राह । निर्विण्णानामिति ॥७॥ निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु । तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु
कामिनां ॥७॥ इदमेषां मध्ये कर्मसु निर्विण्णानां दुःखबुद्ध्या तत्फलेष्वपि विरक्तानां । अतएव तत्साधनभूतकर्मन्यासि
नां ज्ञानयोगः सिद्धिदः इत्युत्तरेणान्वयः । अनिर्विण्णचित्तानां दुःखबुद्धिशून्यानां । अतः कामिनां तत्फलेष्वविरक्ताना
मित्यर्थः ॥७॥ यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् । न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः ॥८॥ यदृच्छ
या केनापि भाग्योदयेन तत्र काम्यकर्मसु वर्त्तमानस्य सर्वात्मना विधिप्रतिषेधाधिकार इत्युत्तराध्याये वक्ष्यति । निःका
मकर्मयोगाधिकारिणस्तु यथाशक्ति स्वधर्मज्ञानभक्तियोगाधिकारात् प्रागेव तदधिकृतयोश्च न्यायः तान्यां सिद्धांतं

उक्तिं विदितिसावधिकर्मयोगमाह। तावदितिनवभिः॥ब॥ तावत्कर्माणि कुर्वीत न निर्विद्येत यावता। मत्कथाश्रवणा
दौ वा यावच्छ्रद्धा न जायते॥ एकर्माणि नित्यनैमित्तिकानि। यावता यावत्कर्मयोगिनो ज्ञानभक्तिभूमिकारोहस्तत्कास्मा
द्धा॥ब॥ स्वधर्मस्थो यजन्यज्ञैरनाशीःकाम उद्धव। न याति स्वर्गनरकौ यद्यन्यन्न समाचरेत्॥१०॥ अनाशीःकामः अफ
लकामः। अन्यत्तु निषिद्धं। नरकयानं हि द्विधैव। विहितातिक्रमात् निषिद्धाचरणाद्वा। अतः स्वधर्मस्थत्वात् निषिद्धव
र्जनाच्च नरकं न याति। अफलकामत्वाच्च स्वर्गमपीत्यर्थः। न च वैराग्यं न भक्त्यर्थं चेत्कर्माणि करोति तर्हि तयोः का
र्यस्य ज्ञानस्य च कर्मफलत्वात् स्वर्गादिवत् परलोके संभवः इति चेत्तत्राह। इहेति॥ब॥ इह लोके वर्त्तमानः स्वधर्मस्थो
ऽनघः शुचिः। ज्ञानं विशुद्धमाप्नोति मद्भक्तिं वा यदृच्छया॥११॥ इह अस्मिन्नेव लोके अस्मिन्नेव देहे। अनघः निषिद्धत्या १४८
गी अतः शुचिः। निवृत्तरागादिमलः। यदृच्छयेति। केवलज्ञानादपि भक्तेर्दुर्लभतां द्योतयति। अनेन प्रकारेण ज्ञानभ

क्तिसाधनत्वात् नरदेहं स्तौति। स्वर्गिण इति॥ब॥ स्वर्गिणोऽप्येतमिच्छन्ति लोकं निरयिणस्तथा। साधकं ज्ञानभक्तिभ्यां
उभयं तदसाधकं॥१२॥ निरयिण इति दृष्टान्तत्वेनोक्तं। ज्ञानभक्तिभ्यां ज्ञानभक्त्योः तदुभयं स्वर्गिनारकिशरीरं॥ब॥
न नरः स्वर्गतिं कांक्षेत् नारकीं वा विचक्षणः। नेमं लोकं च कांक्षेत देहावेशात्प्रमाद्यति॥१३॥ अतो न नरः स्वर्गतिं कांक्षे
त नारकीमिति दृष्टान्तः। यद्वा। स्वर्गनरकसाधनकर्माणि न कुर्यादित्यर्थः। अथातिश्रेष्ठत्वात् उनरपि मर्त्यलोकं न च(?)
यमित्यपि न कांक्षेत। यतो देहावेशात्प्रमाद्यति ज्ञानभ्रष्टो भवतीत्यर्थः॥ब॥ एवं विद्वान् पुरा मृत्योरभवाय घटेत सः।
अप्रमत्त इदं ज्ञात्वा मर्त्यमप्यर्थसिद्धिदं॥१४॥ अपि तु एतत् इदं मोक्षसाधकमिति विद्वान् तत्वार्थसिद्धिदमिति मर्त्यं ज्ञात्वा
अप्रमत्तः सन् मृत्योः प्रागेव मोक्षाय घटेत यत्नं कुर्यात्। अप्रमत्तो मुक्तसंगः सुखं प्राप्नोतीत्यत्र खगदृष्टान्तः॥ब॥ छिद्य
मानं यमैरेतैः कृतनीडं वनस्पतिं। खगः स्वकेतमुत्सृज्य क्षेमं याति ह्यलंपटः॥१५॥ यमैः यमवन्निर्दयैः पुरुषैः कृतं नीडं

यस्मिन्कृतं स्वकं तं स्वकेतं॥ क्षेमं॥ अलंपटः अनासक्तः दार्ष्टांतिकमाह अहोरात्रैरिति॥ब॥ अहोरात्रैश्छिद्यमानं बुध्वायु
र्भयवेपथुः॥ मुक्तसंगः परं बुध्वा निरीह उपशाम्यति॥१६॥ अहोरात्रैः छिद्यमानं आयुर्बुध्वाय भयेतिजगादिति तत्र अहोरा
त्रैः छिद्यमानमपक्षीयमाणमायुर्बुध्वा भयेन वेपथुः कंपो यस्य सः॥ एवं भयतः प्राप्तं प्रमत्तं निंदति। नृदेहमिति॥ब॥
नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारं। मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत्स आत्महा
॥१७॥ नृदेहं प्लवं नावं प्राप्येय ध्या द्वारः प्लवंति तरंति संसारमनेनेति प्लवं नरदेहं यो भवाब्धिं न तरेत्स आत्महा। अत्र दे
हस्य आद्यं सर्वफलानां मूलं। एतद्देहोपार्जितकर्माभिः सर्वप्राप्तेः। किंच। सुदुर्लभं तं उद्यमकोटिभिरपि प्राप्तुमशक्यं॥
तथापि सुलभं। यदृच्छया प्राप्तत्वात्। तं च सुकल्पं पटुतरं। किंच। गुरुः संश्रितमात्र एव कर्णधारो नेता यस्य तं। मया च स्मृ
तमात्रेणानुकूलमारुतेन प्रेरितं। एवं तावद्विरक्तस्य विराग्यद्वारा ज्ञानभक्तिसाधकं कर्मयोगमुक्त्वा। इदानीं सम्यक्

विरक्तस्य ज्ञानयोगं तस्य विज्ञानप्राप्तेः पूर्वं किंचित्कृत्यं वर्ज्जनीयं चाह। यदेति सार्द्धैर्नवभिः॥ब॥ यदारंभेषु निर्विण्णो
विरक्तः संयतेंद्रियः। अभ्यासेनात्मनो योगी धारयेदचलं मनः॥१८॥ यदा आरंभेषु निर्विण्णो विरक्तः संयतेंद्रियः
कर्मसु निर्विण्णः दुःखदर्शनेनोद्विग्नः तत्फले विरक्तश्च तदा संयतेंद्रियः सन् आत्मनोऽभ्यासेन आत्मविषयवृत्ति
संतत्या अचलं यथा भवति तथा मनो धारयेत्। तत्र प्रथममेव अत्यंतधारणासंभवात् तत्स्वभावानुसारेण मनसो
वशीकरणमाह। धार्यमाणमिति॥ब॥ धार्यमाणं मनो यर्हि भ्राम्यदाश्वनवस्थितं। अतंद्रितोऽनुरोधेन मार्गेणात्म
वशं नयेत्॥१९॥ यर्हि आशु भ्राम्यत् परिभ्रमदनवस्थितं भवति। तदा अनुरोधेन किंचिदपेक्षापूरणद्वारेण भवत
द्रियया सर्वमेव वश्यात्तत्राह॥ब॥ मनोगतिं न विसृजेज्जितप्राणो जितेंद्रियः। सत्वसंपन्नया बुद्ध्या मन आत्मव
शं नयेत्॥२०॥ मनोगतिं नैव विसृजेत् नोपेक्षेत। किं त्वप्रमत्तः सन् लक्षयेदित्यर्थः॥ अनुरोधमार्गं सदृष्टांतं स्तौति॥

एष इति ॥२०॥ एष वै परमो योगो मनसः संग्रहः स्मृतः ॥ हृदयज्ञत्वमन्विच्छन् दम्यस्येवार्वतो मुहुः ॥२१॥ एष एव वृत्तिमार्गे
ण मनसः संग्रहः परमो योगः । तत्साधनत्वात् उपचारेणेति । यथा अर्वतः दमनीयस्य अर्वतः । अश्वस्य हृदयज्ञ
त्वं स्वाभिप्रायेण गतिमन्विच्छन् अवेक्षमाणः अश्ववारकः प्रथमं किंचिदनुवर्तते । तदा च रश्मिनां तं दृष्टैव गच्छति । नत्व
पिसृतात् तद्वदित्यर्थः ॥ एवमीषद्वशीकृतस्य मनसोऽयं तन्नैश्चल्योपायमाह । सांख्येति त्रिभिः ॥ब॥ सांख्येन सर्वभावानां प्र
तिलोमानुलोमतः ॥ भवाप्ययावनुध्यायेत् मनो यावत्प्रसीदति ॥२२॥ सांख्येन तत्त्वविवेकेन सर्वभावानां महदादिदेहा
न्तानां अनुलोमतः प्रकृत्यादिक्रमेण भवं प्रतिलोमतः पृथिव्यादिक्रमेण अप्ययं च अनुध्यायेत् । महदादिक्रमेणाप
पत्त्या दृश्य देहस्योत्पत्तिः पृथिव्यादिक्रमेण अस्य देहस्यैकैकलयो मरणं इत्यनुध्यायेदित्यर्थः ॥ यावन्मनः प्रसीदति नि
श्चलं भवति । ननु प्रायः स्वरूपेणापि मनो विषयाकारं न जहातीति किं त्वयोर्भूयः उपदेशो न इति चेत्तत्राह । निर्विण्णेति ॥ब॥

निर्विण्णस्य विरक्तस्य पुरुषस्योक्तवेदिनः ॥ मनस्त्यजति दौरात्म्यं चिंतितस्यानुचिंतया ॥२३॥ ततश्च आगमापायिषु तेषु व
धिक्षु तात्मदर्शनात् उदितविवेकात् पन्नः संसारः निर्विण्णस्य अतो विरक्तस्य ततश्च उक्तवेदिनः गुरूपदिष्टार्थालोचक
स्य ततो गुरूपदिष्टस्यैव चिंतितस्य पुनः पुनः चिंतया अभ्यासेन दौरात्म्यं देहाद्यभिमानं त्यजति ॥ब॥ यमादिभिर्योग
पथैरान्वीक्षिक्या च विद्यया ॥ ममार्चोपासनाभिर्वा नान्यैर्योग्यं स्मरेन्मनः ॥२४॥ यमादिभिर्योगमार्गैः आन्वीक्षिक्या प
दार्थद्वयशोधनेन ममार्चनध्यानादिभिर्वा वा शब्देनास्य पक्षस्यातंत्र्यं दर्शयति । एतैरुपायैर्योग्यं परमात्मानं मनः स्म
रेत् । नान्यैः अतोऽन्यन्न कुर्यादित्यर्थः ॥ ननु नान्यैरिति कथं योगिनः प्रमादात् पापप्राप्तौ प्रायश्चित्तं कार्यमेव तत्राह । यदी
ति यदि कुर्यात्प्रमादेन योगी कर्म विगर्हितं ॥ योगेनैव दहेदंहो नान्यं कुर्यात्कदाचन ॥२५॥ योगेन ज्ञानाभ्यासेनैवाएत
च्च नक्तस्यापि नामकीर्तनाद्युपलक्षणार्थं नान्यत् कृच्छ्रादि । ननु नित्यनैमित्तिकं कर्म सत्त्वशोधकत्वात् गुणः ॥ हिंसादिकं

व्यशुद्धिहेतुत्वाद्दोषः॥ तत्र च तन्निवर्तकत्वात् कृच्छ्रादिप्रायश्चित्तं गुणः इति विधिप्रतिषेधाभ्यां उक्तत्वात् प्रायश्चित्तं विना
योगेनैव कथं पापं दहेत्तत्राह स्वे स्वे इति सार्धेन॥ ७॥ स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः। कर्मणां जात्यशुद्धानामनेन
नियमः कृतः॥ २६॥ स एव गुणः न तरः। तदुपपादयति। यस्माद्विधिप्रतिषेधाभ्यामुक्तत्वात् अनेन गुणदोषविधानेन कर्मणां
नियमः संकोचः कृतः। कुतश्च तत्राह। जात्या उत्पत्त्यैव अशुद्धानां कर्मणां स्वभावप्राप्तानां संगानां त्याजनेच्छया। अयं भावः
पुरुषस्याशुद्धिनिमित्तप्रवृत्तेरस्याः स्वाभाविकप्रवृत्त्यैव तस्य मलिनत्वात् न च सहसा सर्वतो निवृत्तिः कर्तुं शक्यते। अतः
इदं कर्तव्यमिदं न कर्तव्यमित्येवं स्वाभाविकप्रवृत्तिसंकोचद्वारेण निवृत्तिरेव क्रियते। यथा च प्रवृत्तिपरो वेदः तथोत्तरा
ध्याये वक्ष्यामः। उत्पत्त्यैव हि कामेषु इत्यादिना। अतो योगिनः स्वाभाविकप्रवृत्त्यभावात् न प्रायश्चित्तादिविधिगोचरतेति
भक्त्यधिकारिणो भक्तियोगमाह। गुणदोषेति॥ ब॥ गुणदोषविधानेन संगानां त्याजनेच्छया। जातश्रद्धो मत्कथासु निर्वि

ण्णः सर्वकर्मसु॥ २७॥ वेद दुःखात्मकान् कामान् परित्यागेऽप्यनीश्वरः। ततो भजेत मां प्रीतः श्रद्धालुर्दृढनिश्चलः॥ २८॥ म
त्कथासु जातश्रद्धः। अत एवान्येषु कर्मसु उद्विग्नः। ननु तत्फलेषु विरक्तः। तदाह। वेदेति। यद्यपि वेद तथापि तत्परित्या
गेऽनीश्वरः अशक्तः। एवं तर्हि ततो यः श्रद्धालुः भक्त्यैव सर्वं भविष्यतीति दृढनिश्चयः सन् तदनंतरं मां भजेत। विषयां
श्च सेवमानोऽपि तेषु प्रीतिं न कुर्यादित्याह। जुषमाण इति॥ ब॥ जुषमाणश्च तान् कामान् दुःखोदर्कांश्च गर्हयन्। प्रो
क्तेन भक्तियोगेन भजतो मासकृन्मुनेः॥ २९॥ कामा हृदय्या नश्यन्ति सर्वे मयि हृदि स्थिते। भिद्यते हृदयग्रंथिः छिद्यन्ते
सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि मयि दृष्टेऽखिलात्मनि॥ ३०॥ कथं भजेत किं वा ततो भवति तदाह। प्रोक्तेनेति द्वा
भ्यां। श्रद्धामृतकथायां मे शश्वन्मदनुकीर्तनमित्यादिना। ततः तं प्रोक्तेन भक्तियोगेन असकृन्नित्यं भजतः हृदय्याः हृदि स्थिताः कामाः
नश्यन्ति। हृदयमेव ग्रंथिः अहंकारः। तत्पूर्वकाश्च सर्वे संशयाः असंभावनादयः। कर्माण्यनारब्धफलानि संसारहेतु

न्तानि तदेवं श्रेयस्त्रयाधिकारत्रयमुक्तं। तत्र च भक्तस्य निरपेक्षत्वात् भक्तियोगस्य श्रेष्ठत्वं दर्शयन्नुपसंहरति। तस्मादिति
त्रिभिः॥ब॥ तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः॥ न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिति॥३१ मदात्मनः मयि आ-
त्मा चित्तं यस्य। तस्य श्रेयःसाधनं तत्र हेतुः॥ यत्कर्मेति॥ब॥ यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत्। योगेन दानधर्मेण
श्रेयोभिरितरैरपि॥३२॥ इतरैरपि तीर्थयात्राव्रतादिभिः श्रेयःसाधनैः यद्भव्यं स्वर्गादि तत्सर्वं भक्तोऽञ्जसा अनायासेन
स्वर्गमपवर्गं मद्धाम वैकुंठं लभत एव॥ब॥ सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा। स्वर्गापवर्गं मद्धाम कथंचिद्यदि वां-
छति॥३३॥ इह वांछा तु नास्तीत्युक्तं। तत्र हेतुमाह। न किंचिदिति॥ब॥ न किंचित्साधवो धीरा भक्ता ह्येकांतिनो मम। वांछंत्य-
पि मया दत्तं कैवल्यमपुनर्भवं॥३४॥ धीराः धीमंतः अत एव एकांतिनः मय्येव प्रीतियुक्ताः। मया दत्तमपि न गृह्णंतीति किं वक्त-
व्यं न वांछंतीत्यर्थः। अपुनर्भवं आत्यंतिकमपि कैवल्यं तदुपपादयति। नैरपेक्ष्यमिति॥ब॥ नैरपेक्ष्यं परं प्राहुर्निःश्रेयस-

मनल्पकं। तस्मान्निराशिषो भक्तिर्निरपेक्षस्य मे भवेत्॥३५॥ निरपेक्षमेव परं उत्कृष्टं अनल्पकं महत् निःश्रेयसं फलं त-
त्साधनं च प्राहुः। मे भक्तिः निराशिषः प्रार्थनाशून्यस्य निरपेक्षस्य प्रार्थनाकारणतृष्णारहितस्य पुंसो भवेत्॥
यद्वा निरपेक्षस्य या भक्तिः सा निराशिषो भवेदित्यर्थः॥ अनेन च कर्मज्ञानभक्तिप्रकारेण सिद्धानां न गुणदोषा इति वि-
रोधपरिहारमुपसंहरति। न मयीति॥ब॥ न मय्येकांतभक्तानां गुणदोषोद्भवा गुणाः। साधूनां समचित्तानां बुद्धेः परमु-
पेयुषां॥३६॥ गुणदोषैर्विहितप्रतिषिद्धैः उद्भवो येषां ते। गुणाः पुण्यपापादयः साधूनां तिरस्कृतरागादीनां अतः समचित्तानां
अत एव बुद्धेः परं ईश्वरं प्राप्तानां। काम्यकर्मनिष्ठां दर्शयन्नेतान्मुक्तिमार्गानुपसंहरति। एवमिति॥ब॥ एवमेतान्मया
दिष्टाननुतिष्ठंति मे पथः। क्षेमं विंदंति मत्स्थानं यद्ब्रह्म परमं विदुः॥३७॥ मे पथः मत्प्राप्त्युपायान् ये अनुतिष्ठंति। ते क्षेमं का-
लमायादिरहितं मम लोकं विंदंति। यत्परं ब्रह्म तत्त्वविदः॥ब॥ ॥ ॥ इति श्रीभागवते महापुराणे एकादशस्कंधे भग-

वउद्धवसंवादेविंशोऽध्यायः॥ब॥ ॥ ॥एकविंशेक्रियाज्ञानभक्तिष्वनधिकारिणां।कामिनांद्रव्यदेशादिगुणदोषप्र
पंचिता॥१॥तदेवंगुणदोषव्यवस्थार्थंयोगत्रयमुक्तं।तत्रचज्ञानभक्तिसिद्धानांनकिंचिद्गुणदोषौ।साधकानांतुप्र
थमतोनिवृत्तमनिष्ठानांयथाशक्तिनित्यनैमित्तिकंकर्मसत्त्वशोधकत्वाद्गुणः।तदकरणंनिषिद्धकरणंचतन्मलीमसक
रणाद्दोषः।तन्निवर्त्तकत्वाच्चप्रायश्चित्तंगुणः।विशुद्धसत्त्वानांतुज्ञाननिष्ठानांज्ञानाभ्यासएवस्वसिद्धिहेतुत्वाद्गुणः।भक्ति
निष्ठानांपुनः।किंतुकेवलंकाम्यश्रवणकीर्त्तनादिभक्तिरेवगुणः।तद्विरुद्धंभक्तिरहितंसर्वंपुनर्येषांदोषइत्युक्तं।इदानीं
येनतुनसिद्धानापिसाधकाः।किंतुकेवलंकाम्यकर्मप्रधानाः।तेषांसकलगुणदोषानप्रपंचयिष्यन्नादौतानवदिमु
खान्निंदतियइति॥ब॥ ॥श्रीभगवानुवाच॥ ॥यएतान्मत्पथोहित्वाभक्तिज्ञानक्रियात्मकान्।क्षुद्रान्कामान्
चलैःप्राणैर्जुषंतःसंसरंतिते॥१॥मत्पथःमद्भक्तिमार्गान्।क्षुद्रान्तुच्छान्चलैरस्थिरैः।प्राणैर्देवायुत्तिःइंद्रियैर्वाजु

धर्ममुद्वहतांधुरं॥४॥मयामन्वादिरूपेणधर्मरूपांधुरंभारंकर्मजडानामित्यर्थः।शुद्ध्यशुद्धीःप्रपंचयिष्यन्वेदोक्तत्वेनत
दृत्तिनिवेशोमाभूदितिसमानेष्वपिवस्तुष्वितियदुक्तंतत्प्रपंचयतिभूमीतित्रिभिः॥ब॥भूम्यंब्वग्न्यनिलाकाशोभू
तानांपंचधातवः।आब्रह्मस्थावरादीनांशारीराआत्मसंयुताः॥५॥भूतानांप्राणिनांधारयंतीतिधातवः।कारणानिशा
रीराःशरीरारंभकाः।देहतःसाम्यमुक्तं।जीवतोप्याह।आत्मसंयुताइति।इदानीमसमानतामाह।वेदेनेति॥ब॥वे
देननामरूपाणिविषमानिसमेष्वपि।धातुषूद्धवकल्प्यंतेएतेषांस्वार्थसिद्धये॥६॥धातुषुदेहेषुनामरूपाणिवर्णाश्र
मादीनिनानाकल्प्यंते।कल्पनायाःप्रयोजनमाह।एतेषामिति।एतेषांप्राणिनांअधिकारिणांस्वार्थसिद्धये।प्रवृत्तिनि
यमद्वाराधर्मादिपुरुषार्थसिद्धये।नकेवलंदेहेष्वेवअपितु॥ब॥देशकालादिभावानांवस्तूनांममसत्तम।गुणदो
षौविधीयेतेनियमार्थंहिकर्मणां॥७॥देशकालादिभावानामपिआदिशब्देनाउपादेयानांफलनिमित्ताधिकारिणांच

षंतः सेवमानास्तु भवंति ते सरंति। निखिलगुणदोषज्ञात्केन नानायोनीः प्रादुर्भवंतीत्यर्थः॥ ननु तैरेव कर्मभिः केचिद्वि
द्गुणदोषज्ञाः॥ केचिन्नेति कुतो वैषम्यं। नह्यग्निना केचित्तप्यंते केचिन्नेति संभवति। तत्राह। स्वे स्वे इति॥ ५॥ स्वे
स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः। विपर्ययस्तु दोषः स्यादुभयोरेष निश्चयः॥ स्वाधिकारभेदेन कल्पि
तौ गुणदोषौ न वस्तुनिष्ठाविति भावः। तदाह। शुद्धीति॥ ६॥ शुद्ध्यशुद्धी विधीयेते समानेष्वपि वस्तुषु। द्रव्यस्य वि
चिकित्सार्थं गुणदोषौ शुभाशुभौ॥ शुद्ध्यशुद्धी योग्यत्वायोग्यत्वे गुणदोषौ तन्निमित्तौ पादेयत्वानुपादेयत्वे शुभा
शुभे तन्निमित्तौ अथ वा विनर्थौ। तत्र शुद्धी धर्माद्यर्थं शुद्धेन धर्मः अशुद्धेन अधर्मः। गुणदोषौ व्यवहारार्थं अशुद्धा वपि
राज्ञादीनां व्यवहारदर्शनादुपादेयं। नान्य इति शुभाशुभौ यात्रार्थं प्राणरक्षणार्थं दोषत्वेनापस्तु शरीरनिर्वाह
मात्रोपादानेन पापं अधिकोपादाने तु पापमिति॥ ७॥ धर्मार्थं व्यवहारार्थं यात्रार्थमपि चानघ। दर्शितोऽयं मयाचारो

द्धणं वस्तूनां उपादेयानां ब्राह्मणादीनामपि मम मया नियमार्थं संकोचार्थमित्यर्थः। एवं गुणदोषौ परिशोध्य तयोः शुद्ध्य
शुद्धी प्रत्यवायत्वात्तु शुद्ध्यशुद्धीः प्रपंचयन्निदानीं देशाशुद्धिमाह। अकृष्णसारस्त्वशुचिः॥ ८॥ अकृष्णसारो देशानामब्र
ह्मण्योऽशुचिर्भवेत्। कृष्णसारोऽप्यसौवीरकीकटासंस्कृतेरिणं॥ ८॥ देशानां मध्ये कृष्णसारहरिणहीनोऽशुचिः। तत्रापि अब्र
ह्मण्यः ब्राह्मणा न सन्ति यस्मिन्सोऽशुचिः। कृष्णसारोऽपि कृष्णेन मृगेण सारः युक्तोऽपि यः सोऽपि असौवीरः कैकट
मगधांगवंगकलिंगादिः असंस्कृतः म्लेच्छबहुलः सन्मार्जनादिशून्यो वा इरिणमूषरं तदशुचिः तदन्यः शुचिरित्य
र्थः। कालस्य शुद्ध्यशुद्धी दर्शयति। कर्मण्य इति॥ ९॥ कर्मण्यो गुणवान्कालो द्रव्यतः स्वत एव वा। यतो निवर्तते क
र्म स दोषोऽकर्मकः स्मृतः॥ ९॥ द्रव्यतः द्रव्यसंपत्त्या स्वतो वा पूर्वाह्णादिर्यः कर्मण्यः कर्मार्हः सकलस्तस्मिन्कर्मणि
गुणवान्। यतः यस्मिन्द्रव्यालाभेन वा राहुविप्लवादिना वा कर्म न निवर्तते। यथाशौचकालो दशाहादिलक्षणोऽक

र्मकः कमानिह्यः स्मृतः ॥ स कालो दोषः ॥ अशुद्धस्य यथा ॥ वस्त्रशब्दोपात्तानां द्रव्याणां शुद्ध्यशुद्धी दर्शयति । द्रव्यस्येति च उक्तं ॥
॥ब॥ द्रव्यस्य शुद्ध्यशुद्धी च द्रव्येण वचनेन वा । संस्कारेण च कालेन महत्त्वाल्पतया तथा ॥१०॥ द्रव्यस्य वस्त्रादेः द्रव्येण
तोयादिना शुद्धिः मूत्रादिना चाशुद्धिः ॥ वचनेन शुद्धमशुद्धं वेति संदेहे शुद्धद्रव्यस्यैवंरूपेण ब्राह्मणवचनेन शुद्धिः । विपरीत
नाशुद्धिः । उदक्यादिवचनेन । भिक्षादिद्रव्यस्याशुद्धिः ॥ संस्कारेण प्रोक्षणादिना पुष्पादेः शुद्धिः । अवघ्राणादिना चाशुद्धिः ।
कालेन स्मशानादेः शुद्धिः । अन्नादेरशुद्धिः ॥ कालेन दशाहादिना नवोदकादेः शुद्धिः । उक्तं च । कालमेघोदकं ग्राह्यं वर्ज्यं
दैत्यहमेव हि । अकाले दशरात्रं स्यात् ततः शुद्धिर्विधीयते ॥ महत्त्वाल्पत्वाभ्यां । अंत्यजाद्युपहतानां तडागादिउदकानां मह
त्त्वाल्पत्वाभ्यां शुद्ध्यशुद्धी ॥ब॥ शक्त्याशक्त्याथवा बुद्ध्या समृद्ध्या च तथात्मनः ॥ अन्येषु चैव तिष्ठति तथा देशावस्थानुसारतः ॥११॥
शक्त्याशक्त्या सूर्योपरागादिस्नातकान्नादेः शक्तानामशुद्धिः । वृद्धबालकानां शुद्धिः ॥ क्वचित् शक्तस्यास्नानेन शुद्धिः । अश

क्तस्य विनापि शुद्धिः ॥ बुद्ध्या उदजन्मादौ दशाहाद्वहिः शुचिः ॥ ज्ञानिनो ध्यानेन शुद्धिः ॥ समृद्ध्या जीर्णमलवद्वस्त्रादेः समृद्धस्याशु
द्धिः दरिद्रं प्रति शुद्धिः ॥ तत्रापि विशेषमाह । एते च द्रव्यवचनादयोऽद्याशुद्धिद्वारा आत्मनेपदद्वयं कुर्वंति । तद्देशावस्थानुसा
रेण यथा यथावत् कुर्वंति न सर्वत्र ॥ तथाहि । निर्जले देशे स्नानादिना शुद्धिः ॥ नष्टचौराद्याकुले प्राणसंदेहे अन्यदेशे स्ना
नादिकं विनाशुद्धिः ॥ तथा रोगादिव्यतिरिक्तं स्वावस्थायामेव कुर्वंति न बाल्यरोगाद्यवस्थायामिति । तथा च स्मृतिः । देशं
कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनं । उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेदिति ॥ इत्यादि निर्दिष्टस्य शुद्धिरिच्छक्तं
तच्च वचनादिशुद्धिरेकरूपैव । द्रव्यतस्तु शुद्धिर्बहुरूपा । तां प्रपंचयति धान्यस्येति ॥ब॥ धान्यदारुवस्तितंतूनां रसतैजसकर्
मणां । कालवाय्वग्निमृत्तोयैः पार्थिवानां युतायुतैः ॥१२॥ धान्यानां वायुना । दारूणां यज्ञपात्रादीनां ग्रहचमसानां तोया
ग्निनौ आर्द्रके । अस्थ्नां गजदंतानां कालेन । तंतूनां तोयेन । रसाः तैलघृतादयः ॥ तेजसाः सुवर्णादयः । तेषां अग्निना । पार्थि

वानां रथ्याकर्दमघटेष्टकादीनां यथायथं कालादिभिः शुद्धिः। तत्रापि कालाग्न्युजलोपघाततारतम्येन देशकालाव
स्थाद्यनुसारेण एतैरन्यैश्च युताद्युतैः मिलितैः केवलैश्च। कालस्य पुनर्ग्रहणं तु तत्त्वप्रदर्शनार्थम्। अस्पृश्यस्पर्शे शुद्धिमु
क्त्वा लेपविषयेप्याह॥ अमेध्येति॥ बा॥ अमेध्यलिप्तं यद्येनं गंधलेपं यद्यपोहति। न जते प्रकृतिं तस्य तच्छौचं तावदिष्य
ते॥ १३ यत्पीठपात्रावस्त्रादि यन्न तक्षणक्षारेण लोदकादिनां गंधवल्लेपं यद्यपोहति। यज्जातिं चागतिं च मलं यत्काप्यच
तिं न जेत। तस्य तच्छौचकं। यावत्ता च तक्षणादिना यपोहति। तावत्स्वमाणं रूपतः आहन्ति ता वा तत्कर्तव्यमिष्यते। एवं
तावत्तद्यशुद्धिरुक्ता। इदानीं कर्तृशुद्धिमाह। स्नानेति॥ बा॥ स्नानदानतपोवस्थावीर्यसंस्कारकर्मभिः। मत्स्मृत्या चात्मा
त्मनः शौचं शुद्धः कमाचरेत् द्विजः॥ १४ अवस्था कौमारादि वीर्यं शक्तिः संस्काराः उपनयनादि। कर्मसंध्योपासनादि
लक्षणं। आत्मनः साहंकारस्य कर्तुः एतैः स्नानादिभिः यथायथं तत्कार्यानुसारिणी शुद्धिः। इयं च शुद्धिर्निषिद्धाद्यदाचरणाद्यथा

विहितकर्मार्थिन्याह। शुद्ध इति। द्विज इत्युपलक्षणं। शूद्रादेरपि। मंत्रशुद्धिमाह। मंत्रस्येति॥ बा॥ मंत्रस्य च परिज्ञानं क
र्मशुद्धिर्मदर्पणं। धर्मः संपद्यते षड्भिरधर्मस्तु विपर्ययः॥ १५ सद्गुरुमुखान्यथावत्सांगोपांगविनियोगसहितं मंत्र
स्य परिज्ञानं शुद्धिः। कर्मशुद्धिमाह। ईश्वरार्पणं कर्मणः शुद्धिः। धर्माद्यर्थं शुद्ध्युक्ता। उपचं प्रदर्श्योपसंहरति धर्म इ
ति। देशकालद्रव्यकर्तृमंत्रकर्मभिः षड्भिः शुद्धैर्धर्मः संपद्यते। एतेषां देशकालादीनां यो विपर्ययः सोऽधर्मः। तद्धेतु
रित्यर्थः। अयं च गुणदोषविभागो न वास्तव इत्याह। क्वचिदिति॥ बा॥ क्वचिद्गुणोऽपि दोषः स्याद्दोषोऽपि विधिना गुणः।
गुणदोषार्थनियमः तद्भिदामेव बाधते॥ १६ आपदि प्रतिग्रहो गुणोऽप्यनापदि निषिद्धत्वाद्दोषः। परधर्मः परस्य
गुणोऽपि स्वस्य दोषः। दोषोऽपि कूटबध्यागादि विरस्या न दोषः। अपि तु विधिबलेन गुणः। एवं योऽयं गुणदोषयोरेकस्मि
न्ने वार्थे नियमः। गुणदोषार्थे वा यो नियमः नियामकं शास्त्रं स तयोर्भेदमेव बाधते। दोषस्य क्वचिद्दोषत्वाभावे गु

ण्वैवोदाहरणं दर्शयति। समानेति॥ ब॥ समानकर्माचरणं पतितानां न पातकं। अत्पत्तिको गुणः संगो न शयानः पत
त्यधः॥१७ समानस्य तस्यैव कर्मणः सुरापानादेराचरणं। अपतितानां पतनहेतुरपि जात्या कर्मणा वा पतितानां पुन
पातकं शंसकं न भवति। इर्वमिव पतितत्वात्। अतोत्र दोषस्यापि दोषता नास्ति। तथा संगोपि यो यते दोषः स गृह
स्थस्य गुणः। ऋतौ भार्यामुपेयादित्यादिविधानात्। उभयत्र दृष्टांतः। इर्वमेवाधः शयानो यथा न पततीति। अतो गुण
दोषनियमविधीनां प्रवृत्तिसंकोचद्वारा निवृत्तावेव तात्पर्यमित्यभिप्रेत्याह। यत इति॥ ब॥ यतो यतो निवर्तेत विमुच्येत त
तस्ततः। एष धर्मो नृणां क्षेमः शोकमोहभयापहः॥१८ यथाश्रुतं प्रवृत्तिपरतां वेदस्य निराकर्तुं प्रवृत्तिमार्गस्यानर्थहे
तुतां दर्शयति। विषयेष्विति त्रिभिः॥ ब॥ विषयेषु गुणाध्यासात् पुंसः संगस्ततो भवेत्। संगात्संजायते कामः का
मादेव कलिर्नृणां॥१९ संगः आसक्तिः तत्र तेषु विषयेषु येन प्रतिहन्यते कामः तेन सह विषयस्वामिभिः कामदेवक

लिः कलहो विवादः॥ ब॥ कलेर्दुर्विषहः क्रोधस्तमस्तमनुवर्तते। तमसा ग्रस्यते पुंसश्चेतना व्यापिनी द्रुतं॥२० कलेनरं
तरं दुर्विषहस्तीव्रः क्रोधो भवति। तदनु तमः। अविवेकः तमसा अविवेकेन चेतना कार्याकार्यस्मृतिः द्रुतं शीघ्रं ग्रस्यते॥ ब॥
तया विरहितः साधो जंतुः शून्याय कल्पते। ततोस्य स्वार्थविभ्रंशो मूर्छितस्य मृतस्य च॥२१ हे साधो तया कार्याकार्यस्मृ
त्या रहितो जंतुः शून्याय कल्पते। असंदुष्टो भवतीत्यर्थः। ततः स्वार्थविभ्रंशः पुरुषार्थहानिः। मूर्छितमृततुल्यस्य। ततुल
त्वं प्रपंचयति विषयेति॥ ब॥ विषयाभिनिवेशेन नात्मानं वेद नापरं। वृक्षजीविकया जीवन् व्यर्थं भस्त्रेव निःश्वसन्॥२२
न च परं च नात्म देहादिकं व्यर्थं वृक्षजीविकयेव याजीवन्वर्तते। स मूर्छिततुल्यः। अत एव भस्त्रेव श्वसन् वर्तते स मृततु
ल्यः। अतः स्वार्थनाश इत्यर्थः। ननु प्रवृत्तस्य स्वर्गादिफलश्रवणात् कुतः स्वार्थविभ्रंश इत्यत आह। फलश्रुतिरिति॥ ब॥
फलश्रुतिरियं नृणां न श्रेयो रोचनं परं। श्रेयो विवक्षया प्रोक्तं यथा भैषज्यरोचनं॥२३ इयं फलश्रुतिर्न श्रेयः। परम

पुरुषार्थपरान् भवतीत्यर्थः ॥ किंतु बहिर्मुखानां नृणां मोक्षविवक्षयावांतरकर्मफलैः कर्मसु रुच्युत्पादनमात्रं ।
यथा भैषज्यरोचनं । तथाहि । पिब निंबं प्रदास्यामि खलु ते खंडलड्डुकान् । पित्रैवमुक्तः पिबति । तथा मातृवाक्यं । त्रि
खाते वर्द्धते वत्स गुडूचीं अद्य वा पिबेति । न फलं तावदेव तु किंतु आरोग्यं । ननु कर्मकांडे मोक्षस्य नामापि न श्रूय
ते । अतएवं व्याख्यायते । तथाश्रुतस्य अघटनादित्याह । उत्पत्त्यैवेति द्वाभ्यां ॥टी॥ उत्पत्त्यैव हि कामेषु प्राणेषु स्वज
नेषु च । आसक्तमनसो मर्त्या आत्मनोऽनर्थहेतुषु ॥२४॥ उत्पत्त्या स्वभावत एव कामेषु पश्वादिषु प्राणेषु आयुरिंद्रि
यबलवीर्यादिषु । स्वजनेषु पुत्रादिषु परिपाकतः अनर्थहेतुषु ॥टी॥ न तानविदुषः स्वार्थं भ्राम्यतो वृजिनाध्वनि
कथं युंज्यात्पुनस्तेषु तांस्तमो विशतो बुधः ॥२५॥ अतस्तान् स्वार्थं परमसुखं अविदुषः । अतो न तान् प्रकीर्तितान्
वेदोऽयं बोधयिष्यतीति तदेव श्रेयः इति विश्वसितान् तानेवं भूतान् वृजिनाध्वनि कर्मवर्त्मनि देवादियोनिषु भ्राम्य

तः ततः पुनः तमः वृक्षादियोनिं विशतः पशुकाम इति आयुरिंद्रियकाम इति च पुत्रादिकाम इति कथं पुनस्तेष्वेव कामेषु
स्वयं बुधो वेदो युंज्यात्प्रवर्त्तयेत् । तथा सति अनाप्तः स्यादिति भावः । ननु कथं तर्हि कर्ममीमांसकाः फलपरतां वदं
ति वेदस्य तात्पर्यापरिज्ञानादित्याह । एवमिति ॥टी॥ एवं व्यवसितं केचिदविज्ञाय कुमेधसः । फलश्रुतिं कुसुमितां न वे
दज्ञा वदंति हि ॥२६॥ व्यवसितं वेदस्याभिप्रायं । कुसुमितां अवांतरफलप्ररोचनार्थं रमणीयां । परमफलश्रुतिं वदं
ति । कुतः सिद्धं यस्मादित्याह । हि यस्मात् । वेदज्ञा व्यासादयः तथा न वदंतीति । कुसुमितां प्रपंचयन्निंदति कामिन इत्य
ष्टभिः ॥टी॥ कामिनः कृपणा लुब्धाः पुष्पेषु फलबुद्धयः । अग्निमुग्धा धूमतांताः स्वं लोकं न विदंति ते ॥२७॥ कामिनः कृप
णाः ततो लुब्धाः तृष्णाकुलाः ततः पुष्पेषु अवांतरेफलेषु परमफलबुद्धयः । अतएव अग्निमुग्धाः । अग्निसाध्यकर्मनि
निवेशेन लुप्तविवेकाः । ततश्च धूमतांताः । धूममार्गे श्रांते येषां ते । स्वं लोकं आत्मतत्त्वं न विदुः । तथा च श्रुतिः । कथि

इवात्मस्माल्लोकाच्छ्रेयआत्मानंनवेदअयमहमस्मीतिकश्चित्स्वंलोकंनप्रतिजानाति।अग्निमुग्धोहैवधूमतांतइ
ति।कोसौस्वलोकस्तमाह।।टी।।नतेमामंगजानंतिहृदिस्थंयइदंयतः।उक्थशस्त्राह्यसुतृपोयथानीहारचक्षुष
ः।।२८हृदिस्थमात्मानंमांस्वलोकं।नतुहृदिस्थंमहंकारास्पदंजानंत्येवासत्यं।परमात्मानंतुनजानीत्याह।यइदंजग
सोहंमत्तोन्यच्चाप्तावातमद्व्यतिरिक्तंजगन्नास्त्येव।अतःकेवलंअसुतृपःप्राणतर्प्पणपराः।नीहारंतमःतेनव्याप्तानि
चक्षूंषियेषांतेयथासंनिहितमपिनजानंतितद्वत्।तथाचश्रुतिः।।नतंविदाथयइमाजजानान्यद्युष्माकमंतरंब
भूव।नीहारेणप्रावृताजल्प्याचासुतृपउक्थशासश्चरंतीतिवेदतात्पर्यज्ञानाच्चअन्यानयजंतीत्याह।तेमेति।।टी।।ते
ममतमविज्ञायपरोक्षंविषयात्मकाः।वृथापशून्विहिंसंतोहिंस्यंतेप्रेत्यतेश्रुते।।२९तेअपरोक्षंस्फुटंममतमवि
ज्ञायदेवादीनामेरवशात्क्रव्यादीनयजंतिइक्रतुरेणान्वयः।एवमतमेवाह।हिंसायामिति।।टी।।हिंसायांयदिरागश्चे

द्यज्ञएवनचोदना।इतिवेदधनिंश्रुत्वानवेदज्ञावदंतिहि।।३०हिंसायांमांसभक्षणार्थंतत्फलार्थेचयदिरागःस्यात्तात
हियज्ञएवैयन्ननुज्ञातद्वारापरिसंख्येयं।नहिंस्यात्सर्वभूतानिअग्नीषोमीयंपशुमालभेत।इतिपरिसंख्या।नत्वावश्यक
कर्त्तव्येनचोदनेत्येवंरूपे।यद्यपिनित्यनैमित्तिकयोःकामविशेषानुबंधोनास्तितथापिकर्मणापितृलोकमितिस्मृतेः।।फल
मात्रान्यत।पितृलोककामनानास्त्येव।अंतःकरणशुद्धिकामनयेतिभावः।तदुक्तं।नकामयत्क्रियाकाचितदृश्यतेचेहकृति
कर्हिचित।यद्यद्धिकुरुतेजंतुतत्तत्कामस्यचेष्टितं।।टी।।हिंसाविहाराह्यालब्धैःपशुभिःस्वसुखेच्छया।यजंतेदेवतायज्ञैः
पितृन्भूतपतीन्खलाः।।३१अजस्रदेवहिंसयाविहारःक्रीडयेषांते।किंच।तेअतिमंदबुद्धयइत्याह।स्वप्नोपमाद्यं
मिति।।टी।।स्वप्नोपमममुंलोकंअसंतंश्रवणप्रियं।आशिषोहृदिसंकल्प्यत्यजंत्यर्थान्यथावणिक्।।३२अमुंपरलो
कंआशिषश्चास्मिन्लोकेसंकल्प्यनतुनिश्चित्यविघ्नबाहुल्यात्।त्यजंतिकर्मसुविनियोजयंति।यथाकश्चिद्वणि

कृष्यापारीक्षरस मुद्रादिलं यनेन बहुधनार्जनेछया सर्वं गृहेष्वितं धनं यज्ञेन नयतः श्रेष्ठो भवति॥ तद्दियथ
॥ब॥ रजःसत्वतमोनिष्ठा रजःसत्वतमोजुषः। उपासंते इंद्रमुख्यान् देवादीन्न तथैव मां॥ ३२ रजःसत्वतमोनिष्ठा स्वा
नुरूपानिंद्रादीनेवोपासंते न तु मां गुणातीतं। यद्यपींद्रादीनामपि मद्रूपत्वात् तमुपासनमेव तत्। तथापि यथावत्तन्ने
पासंते। नेदृशिन्निदियर्थः। आशिषो हृदि संकल्प्य फलं तमेव संकल्पं दर्शयति। इष्ट्वेति॥ब॥ इष्ट्वेह देवता यज्ञैर्ग
त्वा रंस्यामहे दिवि। तस्यांत इह भूयास्म महाशाला महाकुलाः॥ ३३ तस्यांते भोगक्षयांते महाशाला महागृहस्थाः। तत
किमत आह एवमिति॥ब॥ एवं पुष्पितया वाचा व्याक्षिप्तमनसां नृणां। मानिनां चातिमानानां मद्वार्तापि न रोचते॥ ३४ अ
तो मत्स्वरूपज्ञानाभावात्तन्निष्ठं संसारिणो भवंतीति भावः। तदेवं प्रवृत्तिपरत्वं वेदानां निरस्य प्रकृतं निवृत्तिपरत्वमेव उपसं
हरति। वेदा इति॥ब॥ वेदा ब्रह्मात्मविषयास्त्रिकांडविषया अपि। अपरोक्षवादा ऋषयः परोक्षं मम च प्रियं॥ ३५ कर्मज्ञानदे

वतालक्षणत्रिकांडविषया अपि। इमे वेदा ब्रह्मात्मविषयाः। अर्थं तिरेणप्रायेन अन्यवक्तवदनशीला। ब्रह्मैव आत्मा न सं
सारीत्येतत्परत्वात् प्रतीतो वा। फलश्रुतिरियं नृणां न श्रेयो रोचनं परं। श्रेयो विवक्षया प्रोक्तं यथा भैषज्यरोचनमित्युक्त्या
मेव कारणमनुस्मारयति। परोक्षेति। ऋषयो मंत्रा द्रष्टारो वा परोक्षवादाः। अतींद्रियार्थप्रतिपादनपराः। तत्र परोक्षं ब्रह्म
मम अव्यंते प्रियं धाम। अयं भावः। शुद्धांतःकरणैरेव तद्बोध्यं नान्यैरनधिकारिभिः। वृथा कर्मत्यागेन। अंशयसंगादिति
ननु वेदज्ञा अपि केचिन्मिथ्या दयः किमिति तथा वेदस्था। ब्रह्मपरत्वं न वर्णयंति मां विना तत्वतो वेदं तदर्थं द्वा न कोपि वेदेत्य
शयेनाह। शब्दब्रह्मेति यावदर्थ समाप्तिः॥ब॥ शब्दब्रह्म सुदुर्बोधं प्राणेंद्रियमनोमयं। अनंतपारं गंभीरं दुर्विगाह्यं
समुद्रवत्॥ ३६ स्वरूपतः पारतोऽर्थतश्च दुर्विज्ञेयं तच्च सूक्ष्मं स्थूलं चेति द्विविधं। तत्र सूक्ष्मं तावत्स्वरूपतो दुर्ज्ञेय
मित्याह। प्राणेंद्रियमनोमयं। प्रथमं प्राणमयं पराख्यं। ततो मनोमयं पश्यंत्याख्यं। ततः इंद्रियमयं मध्यमाख्यं। तच्च वा

गुंफकत्वेन वागिंद्रियग्राह्यत्वात्। किंच। अनंतपारं समष्टिप्राणादिमयं। अनिर्विशेषत्वात्। तस्य कालतो देशतश्चापरि-
च्छेदात्। अर्थतोऽपि दुर्विज्ञेयतामाह। गंभीरं निगूढार्थं अतो दुर्विगाह्यं प्रतिप्रवेशानर्हं। तथा च श्रुतिः। चत्वारि वाक्परि-
मिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहिता नेंगयंति तुरीयं वाचो मनुष्या वदंतीति। अयमर्थः।
वाचः शब्दब्रह्मणः परिमितानि गणितानि पद्यते ज्ञायते परं तत्त्वमनेनेति पदानि रूपाणि चत्वारि। चत्वार्यपि ये मनीषि-
णस्तद्दृष्टयस्त एव विदुर्नान्ये। यतो गुहायां देहमध्ये त्रीणि निहितानि नेंगयंति। स्वरूपेण न प्रकाशयंति। अतः केवलं वाच-
स्तुरीयं चतुर्थीं वाग्वैखरीरूपं मनुष्या वदंति॥ब॥ तदपि स्वनंत्येव न तत्त्वतो जानंतीति तत्र मनीषिभिरेव ज्ञेयं सूक्ष्मं तत्त्वं स्व-
यं दर्शयति॥ब॥ मयोपबृंहितं भूम्ना ब्रह्मणानंतशक्तिना। भूतेषु घोषरूपेण विसेषूर्णेव लक्ष्यते॥३८॥ मयांतर्यामि-
णोपबृंहितं अधिष्ठितं। अतस्तत्त्वेऽप्यपरिच्छेदमाह। भूम्नेति। अधिष्ठातृत्वेऽप्यविकारित्वमाह। ब्रह्मणेति। अविकृत-

व्यापिनीयं बृंहयति। अनंतशक्तिनेति। भूतेषु सर्वप्राणिषु घोषरूपेण नादरूपेण लक्ष्यते मनीषिभिः। अतः सूक्ष्म-
त्वेन दर्शनेन दृष्टांतः। विसेषु ऊर्णातंतुरिवेति। ततो वैखर्याख्यायाः हृद्याया वाचः उत्पत्तिप्रकारं सदृष्टांतमाह। यथे-
ति त्रिभिः॥ब॥ यथोर्णनाभिर्हृदयादूर्णामुद्वमते मुखात्। आकाशाद्घोषवान्प्राणो मनसा स्पर्शरूपिणा॥३९॥
हृदयात्मकात् मुखद्वारा तंतुमुद्वमते बहिः प्रकटयति दार्ष्टांतिके दर्शयति। आकाशादिति प्राणः तदुपाधिर्हिरण्यग-
र्भरूपः॥ब॥ छंदोमयोऽमृतमयः सहस्रपदवीं प्रभुः। ॐकाराद्व्यंजितस्पर्शस्वरोष्मांतस्थभूषितां॥४०॥ प्रभुर्भगवान् तेन रू-
पेण छंदोमयो वेदमूर्तिश्चित्तत्त्वमृतमयः घोषवान् नादोपादानवान्। मनसा निमित्तभूतेन। निमित्ततामेव दर्शयति॥
कथंभूतेन मनसा स्पर्शरूपिणा। स्पर्शादीन् वर्णान् रूपयति संकल्पयतीति स्पर्शनिरूपितेन। स्पर्शग्रहणमुपलक्षणं।
हृदयाकाशात् तद्बृहतीं वेदलक्षणां वाणीं सृजति। पुनश्च विपतेश्चयमिति बृहतीं शास्त्रार्थव्याख्यानयविशेषणानि। स-

हृत्प्रपदवींबहुमार्गांअनेकपुरुषार्थसाधनवतीं तदेवाह ॐकारात् । उरःकंठादिसंयोगेनव्यंजितैः स्पर्शादिभिर्भूषिता ।
तत्रप्रथमं विस्तरयिष्योंकारः तस्माद्व्यंजितां अंतोंकारात् सूक्ष्मात् निवेता । न तु अकारादिवर्णरूपा । तत्र स्पर्शाः कादयः पंचव
र्गाः । स्वरा अकारादयः । षोडश ॥ ऊष्माणः शषसहाः ॥ अंतस्था यरलवाः ॥ब॥ विचित्रभाषाविततां छंदोभिश्चतुरुत्तरैः ।
अनंतपारां बृहतीं सृजत्याक्षिपते स्वयं ॥४१ विचित्राभिर्वैदिकलौकिकभाषाभिर्वितितां । यथोत्तरं चत्वारि अक्षराणि उ
त्तराणि अधिकानि येषां तैश्छंदोभिः उपलक्षितामेवमनंतपारां सृजति । स्वयमेवाक्षिपते उपसंहरति । तेषु कतिचिच्छं
दांसि दर्शयति ॥ब॥ गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च । त्रिष्टुब्जगत्यतिछंदो ह्यत्यष्ट्यतिजगद्विराट् ॥४२ तत्र च
तुर्विंशत्यक्षरा गायत्री । अष्टाविंशत्यक्षरोष्णिक् । द्वात्रिंशदक्षरानुष्टुप् । एवं सर्वाणि चतुरुत्तराणि छंदांसि ज्ञातव्या
नि । एवंभूता वेदलक्षणा वाणी । तस्याः अभिप्रायं मां विना न कोपि जानातीति भावः । अतिदृह्यपि सा कृत्स्नेन स्वरूप

तो दुर्ज्ञेयेत्युक्तं । अर्थतोपि दुर्ज्ञेयत्वमाह । किमिति ॥ब॥ किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् । इत्यस्या हृदयं लो
के नान्यो मद्वेद कश्चन ॥४३ कर्मकांडे विधिवाक्यैः किमाचष्टे । किं प्रकाशयति । ज्ञानकांडे च किमनूद्य विकल्पयेत् । नि
षेधार्थमित्येवमस्या हृदयं तात्पर्यं मत्तोऽन्यः कश्चिदपि न वेद । ननु तर्हि त्वं मत्कृपया कथय त्वमिति च कथयति
मामिति ॥ब॥ ॥श्रीभगवानुवाच॥ ॥मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते त्वहं । एतावान्सर्ववेदार्थः शब्द आ
स्थाय मां भिदां ॥ मायामात्रमनूद्यांते प्रतिषिध्य प्रसीदति ॥४४ कर्मकांडे यज्ञरूपं मामेव विधत्ते तत्र देवतारूपं मामे
व प्रकाशयति । न मत्तः पृथग्वदंति यजंति वा । यच्चाकाशादिप्रपंचजातं । तस्माद्वा एतस्मादात्मन आकाशः संभूतः ।
इत्यादि विकल्प्यापोह्यते निराक्रियते । तदप्यहमेव न मत्तः पृथगस्ति । अत इत्यपेक्षायां सर्ववेदार्थसंक्षेपतः कथय
ति । एतावानेव सर्वेषां वेदानामर्थः । तमेवाह । शब्दो वेदः मां परमार्थरूपमाश्रित्य भिदां मायामात्रमित्यनूद्य नेह नाना

ष्विकिं चेनेति अथ तिमोहेमायामात्रं प्रतिषिध्य प्रसीदति। निवृत्तत्तच्चापारोभवति। शद्धो वेदोजल्पमात्रं भवतीति। अयं भाव:। य
याद्यां अरेयोस्म: स एव तद्विस्तारभूतानानाकांडशाखास्वपि। तथैव प्रणवस्य योर्थ: परमेश्वर: स एव तद्विस्तारभूतानां
कांडशाखानामपि संगच्छते नान्य इति। नित्यमुक्त: स्वत: सर्ववेदज्ञ: सर्ववेदवित्। स्वपरज्ञानदायेतातं वै देवगुरुमीश्वरं।।१
।। ।।छ।। ।। ।।इतिश्रीभागवतेमहापुराणेएकादशस्कंधेभगवदुद्धवसंवादेएकविंशोध्याय:।। ।।छ।। ।।।।
द्वाविंशेतत्वसंख्यानां अविरोधविधोच्यते। पुंप्रकृत्योविविकश्च जन्ममृत्युविधादिवा।।१ तदेवं वेदानां प्रवृत्तिपरत्वं निरा
सत्वमोक्षपरत्वं निर्णीतं। सतित्वमोक्षपरत्वेपितदवांतरविवाद:। तथाहि। केचित्तत्वसंख्यासु विवदंते। तत्रापि बाह्यार्थम
दसत्वे आत्मतत्वे ऐक्यचनानात्वादिषु। तत्र किं सत्यमितिजिज्ञासया पृच्छति। कतीति।।छ।। ।।उद्धव उवाच।। ।।कति
तत्वानिविश्वेशसंख्यातान्यृषिभि: प्रभो। नवैकादशपंचत्रीण्यात्थत्वमितिशुश्रुम:।।१ ऋषिभि: आगमेषु बहुविधासं

ख्यातानि तेषु कतियुक्तानीत्यर्थ:। भगवन्मतानुवादपूर्वकं बहुधा संख्यानं प्रपंचयति। नवेति। त्वं तावत् अष्टाविंशतित
त्वान्यात्थ। तानि वयं शुश्रुम: श्रुतवंत:।।छ।। केचित् षड्विंशतिं प्राहुरपरे पंचविंशतिं। सप्तैके नव षट् केचित् चत्वार्येकाद
शापरे।।२ केचित्सप्तदश प्राहु: षोडशैके त्रयोदश। एतावत्त्वं हि संख्यानं ऋषयो यद्विवक्षया। गायंति पृथगायुष्मन् इ
दं नो वक्तुमर्हसि।।३ एतावती नां भाव:। एतातावत्त्वं। नाना इत्यर्थ:। यद्विविक्षयायत्प्रयोजनमभिप्रेत्य गायंति। हे आयुष्म
न् नित्यमूर्ते विवक्षया भेदेन सर्वं युक्तमेव। मायया किं नाम न युक्तमित्याह।।छ।। ।।श्रीभगवानुवाच।। ।।युक्तय: सं
ति सर्वत्र भाषंते ब्राह्मणा यथा। मायां मदीयामुद्गृह्य वदतां किं नु दुर्घटं।।४ यथा ब्राह्मणा भाषंते तथोक्तं न च वक्तृत:। यस्मा
संति सर्वत्र तत्त्वानि। सर्वाणि तत्त्वानि किं च। मायामिति। असत्येपि मायाश्रयत्वात् घटत एवेत्यर्थ:। उद्गृह्य स्वीकृत्य। न हि म
रीचिजलपरिमाणादिविवादे किंचिदघटितमेव प्रभवति। ननु यदि सर्वमपि युक्तं कुतो विवाद:। यदि च मायैवालंबनं कु

तो द्वैतं प्रति विवादः। तत्र वादप्रकारमेवाह॥ ठ॥ नैतदेवं यथात्थ त्वं यदहं वच्मि तत्तथा॥ एवं विवदतां हेतुः शक्तयो मेऽदुरत्यया॥ प
हेतुं प्रति च विवदमानानां मदीया दुरतिक्रमाः शक्तयः सत्त्वाद्याः अंतःकरणवृत्तिविशेषरूपेण परिणता। ता एव हेतुरित्यर्थः।
तासां विवादहेतुत्वमुपपादयति। यासामिति॥ ठ॥ यासां व्यतिकरादासीद्विकल्पो वदतां पदं। प्राप्ते शमदमेऽप्येति वादस्तम
नु शाम्यति॥ ६॥ यासां शक्तीनां व्यतिकरात् क्षोभात् वदतां पदं विषयः विकल्पो भेद आसीत्। अंतःकरणवृत्तिविकल्पो वा। त
न्मूलभूतः। तमेव व्यतिरेकेण द्रढयति। प्राप्तेति। एतेषां वाक्यानां आलंबनभूतः। स च विकल्पः शमदमे प्राप्ते सति निलीय
तिगच्छति। तं च विकल्पं नाशं च अनुवादः शाम्यतीति। ननु कथं सर्वत्र विरुद्धत्वात् युक्तयः संभवतीति चेत्तत्राह। परस्परेति द्वाभ्यां
॥ ठ॥ परस्परानुप्रवेशात्तत्त्वानां पुरुषर्षभ। पौर्वापर्यप्रसंख्यानं यथा वक्तुर्विवक्षितं॥ ७॥ अन्योन्यस्मिन्ननुप्रवेशात् वक्तु
र्यथा विवक्षितं तथा पूर्वं कारणं अपरं कार्यं कार्यकारणभावेन प्रसंख्यानं भवति। यद्वा। पूर्वं अल्पसंख्या अपरा अधिक

संख्या तयोर्भावः पौर्वापर्यं तेन प्रसंख्यानं गणनमिति। अनुप्रवेशं दर्शयति। एक इति॥ ठ॥ एकस्मिन्नपि दृश्यंते प्रविष्टानीत
राणि च। पूर्वस्मिन्वा परस्मिन्वा तत्त्वे तत्त्वानि सर्वशः॥ ८॥ पूर्वस्मिन् कारणभूते तत्त्वे कार्यतत्त्वानि सूक्ष्मरूपेण प्रविष्टानि घ
टवत्। अपरस्मिन् कार्यतत्त्वे कारणतत्त्वान्यनुगतत्वेन प्रविष्टानि घटे मृद्वत्। अविरोधमुपसंहरति॥ ठ॥ पौर्वापर्यम
तोऽमीषां प्रसंख्यानमभीप्सितं। यथा विविक्तं यद्वक्त्रं गृह्णीमो युक्तिसंभवात्॥ ९॥ अतः अमीषां तत्त्वानां पौर्वापर्यं कार
णकार्यत्वं प्रसंख्यानं च न्यूनाधिकमभीप्सितं वादिनां मध्ये यया विवक्षया यद्वक्त्रं यस्य मुखं प्रवर्तते तस्य वीविविक्तं निश्चि
तं वयं गृह्णीमः। उक्तन्यायेन सर्वेषु युक्तेः संभवात्। ननु कार्यकारणतत्त्वानां पृथक्त्वापृथक्त्वविवक्षया भवतु। नाम सं
ख्याभेदः। जीवेश्वरयोस्तु कथं भेदाभेदविवक्षया पंचविंशतिषड्विंशतिपक्षौ प्रवृत्तौ अत आह। अनाद्येति॥ ठ॥ अना
द्यविद्यायुक्तस्य पुरुषस्यात्मवेदनं। स्वतो न संभवादन्यस्तत्त्वज्ञो ज्ञानदो भवेत्॥ १०॥ स्वतो न संभवति। अन्यतस्तु संभव

ता।सच भगवान्सर्वज्ञः परमेश्वरोऽस्माकं भवति। इति षड्विंशतिपक्षाभिप्राय इत्यर्थः। कथं तर्हि पंचविंशतिपक्षस्तत्राह॥ मू॥ पुरुषेश्व
रयोर्यत्र न वैलक्षण्यमण्वपि। तदन्यकल्पनापार्था ज्ञानं च प्रकृतेर्गुणाः॥२१ जीवेश्वरयोर्वैलक्षण्यं विसदृशत्वं नास्ति
द्वयोरपि चिद्रूपत्वात्। अतस्तयोरन्यतमत्परता अन्तु कल्पनाऽपार्था॥ एवं पंचविंशतिपक्षप्रवृत्तिरित्यर्थः। नन्विदमपीश्व
रप्रसादलभ्यज्ञानस्य पृथक्पक्षद्वयमपि न घटते। अत आह। प्रकृतिरिति॥ व्या॥ प्रकृतिर्गुणसाम्यं वै प्रकृते नात्मनो
गुणाः। सत्त्वं रजस्तम इति स्थित्युत्पत्त्यंतहेतवः॥२२ गुणसाम्यं प्रकृतिः। अतस्तद्विशेषरूपा गुणाः स्वच्छा एव। न चात्म
नो जीवस्य अकर्तृत्वात्। तस्य स्थित्यादिहेतुभूतगुणाश्रयत्वानुपपत्तेः॥ व्या॥ सत्त्वं ज्ञानं रजः कर्म तमोऽज्ञानमिहोच्यते॥
गुणव्यतिकरः कालः स्वभावः सूत्रमेव च॥२३ अतः सत्त्वं सत्त्वमयं ज्ञानं प्रकृतेर्गुण इति शेषेणैव संबंधः। नन्वात्मनिव
त्यैकर्मत्वाज्ज्ञानं च तदंतरं स्यात्। न। रजः कर्म रजोवृत्तिः। अज्ञानं च तमसः। अतः कर्माज्ञानयो रजस्तमोद्वारा प्रकृत

त्वेवांतर्भावः। तथापि कालस्वभावयोः स्वचांतरता स्यात्। न। गुणानां व्यतिकरो यस्मात्स ईश्वर एव कालो नाम। स्वभावो ना
मसूत्रं महत्तत्त्वमेव। तस्य सर्वशक्तिमत्त्वात्। तदेवं ज्ञानादीनां यथायथमंतर्भावात्। न पक्षद्वयेऽपि तत्त्ववृद्धिः। एतच्च पक्षांतरे
ऽपि ज्ञेयं। पक्षांतरमुद्भावयति। के ते गुणाः। किंप्रयोजनाः। किंस्वरूपाः। एतत्सर्वं दर्शयन्नर्थान्विवेकादशपंचत्रीन् स्वमतत
च्वतिपादनश्लोके त्रीनिति पदं व्याचष्टे। सत्त्वं रजस्तम इति। मतांतरे कालः सूत्रं पुरुष इति। स्वमते तु गुणानामागमपायि
त्वात् प्रकृतिभेदो विवक्षितः। अतो गुणास्त्रीणि तत्त्वानि अपराणि पंचविंशतिः। स्वोक्तिपक्षद्वयसाधारणानि दर्शयति। पुरु
ष इति सार्धद्वाभ्यां॥ व्या॥ पुरुषः प्रकृतिर्व्यक्तमहंकारो नभोऽनिलः। ज्योतिरापः क्षितिरिति तत्त्वान्युक्तानि मे नव॥२४ व्यक्तं
महत्तत्त्वं नभआदीनि तन्मात्राणि। मे मया। एकादश दर्शयति। श्रोत्रमिति॥ व्या॥ श्रोत्रं त्वग्दर्शनं घ्राणो जिह्वेति ज्ञानशक्त
यः। वाक्पाण्युपस्थपाय्वंघ्रि कर्माण्यंगोभयं मनः॥२५ दर्शनं चक्षुः ज्ञानशक्तयः ज्ञानेंद्रियाणि पंच। वागादि पाय्वंतानि द्वे

क्येनोक्ताः ॥ निःश्वसिश्वेति कर्माणि कर्मेंद्रियाणि पंच । उभयं उभयात्मकं मनः उभयेंद्रियसाधारणमित्यर्थः । अंग हे उद्धव ।
एवमेतान्येकादश । पंच दर्शयति शब्द इति ॥ ब ॥ शब्दः स्पर्शो रसो गंधो रूपं चेत्यर्थजातयः । गत्युक्त्युत्सर्गशिल्पानि कर्माय-
तनसिद्धयः ॥ २६ शब्दादीनि विषयतया परिणतानि पंच महाभूतानि नतु गत्यादीनि श्रवणादिक्रियापरूपत्वेपि ख्यातानि ने-
त्याह । गतीति । गतिश्च उक्तिश्च उत्सर्गश्च शिल्पं च तानि कर्मायतनानां कर्मेंद्रियाणां सिद्धयः फलानि न तत्त्वांतराणीत्यर्थः । तदेवं मत-
त्रितयेतत्त्वसंख्याने इदं निरूपयति वदंत्या गायंतीति यत्सृष्टं । तत्तन्मनतास्य दर्शयति । सर्गेति ॥ ब ॥ सर्गादौ प्रकृतिर्य-
स्य कार्यकारणरूपिणी । सत्त्वादिभिर्गुणैर्धत्ते पुरुषोव्यक्त ईक्षते ॥ २७ कार्याणि षोडश विकाराः । कारणानि महदादीनि
सप्त । तद्रूपिणी सती प्रकृतिः अस्य विश्वस्य सर्गादौ गुणैः स्वाभाव्यं त्यागवत्या धत्ते । उपादानकारणरूपत्वात् । पुरुष-
स्तु अव्यक्तः अपरिणामि निमित्तः । केवलमीक्षते । अतः परिणामिन्याः प्रकृतेः पुरुषो भिन्न इति । तच्चैरारख्यस्य च कार्यस-

तदंतर्भावमभिप्रेत्याह । व्यक्तेति ॥ ब ॥ व्यक्तादयो विकुर्वाणा धातवः पुरुषेक्षया । लब्धवीर्याः सृजंत्यंडं संहताः प्रकृ-
तेर्बलात् ॥ २८ व्यक्तादयो महदादयः प्रकृतेः उत्पन्ना ये धातवः ते विकुर्वाणाः पुरुषेक्षणलब्धवीर्याः संहताः अंडं
सृजंतीत्यन्वयः । प्रकृतेर्बलात् तामाश्रित्येत्यर्थः । एवं च मतमुपसंहृत्य मतांतरेष्वपि सामान्यतो निरूपितां घटनां विशे-
षतश्चात्ययं दर्शयति सप्तैवेति ॥ ब ॥ सप्तैव धातव इति तत्रार्थाः पंच खादयः । ज्ञानमात्मोभयाधारः ततो देहेंद्रिया-
सवः ॥ २९ ज्ञाने जानातीति द्रष्टा जीवः उभयोः दृश्यदृश्ययोः आधारः आत्मेति सप्त । तत्र पृथिव्यादीनां कारणत्वेन खा-
दिष्वंतर्भावः । उभयोरेषामंतर्भावार्थमाह । ततस्तेभ्यः सप्तभ्यो देहेंद्रियासवः कार्याणि जायंते ॥ ब ॥ षडित्यत्रापि भूता-
नि पंच षष्ठः परः पुमान् । तैर्युक्त आत्मसंभूतैः सृष्ट्वेदं समुपाविशत् ॥ ३० षडिति भौतिकस्य चक्षुःश्रोत्रघ्राणत्वक्रसनें-
द्रियस्य भूतांतर्भावं जीवस्य परमात्मांतर्भावमाह । तैर्युक्त इति । स च परः पुमान् तैरात्मसंभूतैः पंचभूतैर्युतः इदं देहं

दिकंसृष्ट्वातस्यस्वयंसमुपाविशत।इत्यस्मिन्कारणेपंचभूतात्मकेभौतिकेंद्रियादीनांमेतत्त्रावोक्तमप्रवेशत्वेनातथ्यः॥ब॥
चत्वार्य्येवेतितत्वानितेजआपोन्नमात्मनः।ज्ञातानितैरिदंजातंजन्मावयविनःखलु॥२२चत्वारिपक्षेतेजःआपःअन्नंपृ
थ्वीआत्मनोज्ञातानिआत्मनासहचत्वारितत्वानितैश्चैवैरिदंजगज्जातंअवयविनोजगतःखलुअवयवेभ्योजन्मभव
तिअंतर्भावार्थमाहतैरिति॥ब॥संख्यानेसप्तदशकेभूतमात्रेंद्रियाणिच।पंचपंचैवमनसाआत्मासप्तदशःस्मृतः॥
२३पंचभूतानिपंचमात्राणि।पंचइंद्रियाणिएकोमनसासहआत्मासप्तदश।आत्मैवसंकल्पयन्मनउच्यते॥ब॥तद
त्षोडशसंख्यानेआत्मैवमनउच्यते।भूतेंद्रियाणिपंचैवमनआत्मात्रयोदश॥२४त्रयोदशपक्षेभूतानितन्मात्रैकीकृता
निपंचैवइंद्रियाणिचतत्स्वकाशकानिपंचैवमनएवैकंइंद्रियाधिष्ठाहआत्माचद्विविधः।जीवात्मापरमात्मा।एवंत्रयो
दश॥ब॥एकादशत्वमात्मासौमहाभूतेंद्रियाणिच।अष्टप्रकृतयश्चैवपुरुषश्चनवेत्यथ॥२५एकादशपक्षेपंचइंद्रिय

जीवमनसोरात्मांतर्भावेनएताचैवैकादश।नवेनवपक्षेअष्टौप्रकृतयःपुरुषश्च।प्राणजिह्वावाकचक्षुःश्रोत्रंमनो
दहत्वगितिविकाशणामंतर्भावः॥ब॥इतिनानाप्रसंख्यानंतत्वानामृषिभिःकृतं।सर्वंन्याय्यंयुक्तिमत्वाद्विदुषां
किमशोभनं॥२६इतिएभिःप्रकारैःतत्वानांनानागणनंऋषिभिःकृतंप्रकृतिपुरुषभेदज्ञापनायेत्यर्थः।ननुएवं
षांकतमःपक्षोग्राह्यःइतिचेत्तत्राह॥सर्वमिति।ननुगुणसाम्यंप्रकृतिःतस्याःसत्वादयोगुणाःनात्मनइति।तत्वयोर्भे
दाप्रतीतेःकथंज्ञातुंशक्यतइतिपृच्छति।प्रकृतेरिति॥ब॥ ॥उद्धवउवाच॥ ॥प्रकृतिपुरुषस्योभयोरप्यथात्मविल
क्षणो।अन्योन्यापाश्रयात्कृष्णदृश्यतेनभिदानयोः॥२७आत्मनाजडाजडस्वभावेनविलक्षणो।अन्योन्यापाश्रयात
परस्परपरिहारेणाप्रतीतेरित्यर्थः।अन्योन्यापाश्रयत्वे[illegible]दाप्रकृताविति॥ब॥प्रकृतौलक्ष्यतेह्यात्माप्रकृतिश्चतथा
त्मनि।एवंमेपुंडरीकाक्षमहांतंसंशयंहृदि।छेत्तुमर्हसिसर्वज्ञवचोभिर्नयनैपुणैः॥२८प्रकृतौतत्कार्येदेहेप्रकृति

आत्मनीति। न ह्यात्मना विना तस्याः प्रतीतिः॥ अहमित्यनेन प्रतीतिर्न देहात्मनोर्भेदोऽस्तीति तस्यार्थः॥ रूढिवन्मानं मंत्रा
यं नयेन युक्त्या नैपुणं प्रावीण्यं येषां तैः अर्दसीयकं॥ तत्र देवमाह वत्स इति॥२७॥ वस्तोज्ञानं हि जीवानां प्रमोषस्तेत्र
शक्तितः॥ त्वमेव ह्यात्ममायाया गतिं वेत्थ न चापरः॥२८॥ हियस्मात् वस्तः वत्समादादेव जीवानां ज्ञानं। प्रमोषं त्वं रा तः
शक्तितः मायातः॥ ननु स्वप्रकाशस्यात्मनः कथं ज्ञानप्रमोषः ज्ञानदाने प्रमोषे वा मम किं प्रयोजनं तत्राह त्वमेवेति।
विकाराविकाराभ्यां नानात्वैकत्वाभ्यां सापेक्षनिरपेक्षाभ्यां प्रकाशाप्रकाशाभ्यां वा यं तं वेदं वक्तुमाह। प्रकृतिरिति॥
२॥ ॥श्रीभगवानुवाच॥ ॥प्रकृतिः पुरुषश्चेति विकल्पः पुरुषर्षभ। एष वैकारिकः सर्गो गुणव्यतिकरात्मकः॥३०॥
हे पुरुषर्षभ यन्महदादिरूपेण परिणमति सा प्रकृतिः यदपरिणामि स पुरुष इति। विकल्पो भेदः तेन इदं एव। कुतः अ
पेक्षायां प्रकृतिः सा देहादिसंघातश्च वैकारिकत्वं तावद्दर्शयिति। एष इति। एष सर्गः सृज्यत इति सर्गो देहादिसंघा

तः वैकारिकः विकारवान्। अत्र हेतुः। गुणव्यतिकरात्मकः गुणक्षोभजन्मा। ननु कथं सा प्रकृतिः परिणमते। कथं नाना
त्वं तत्राह। ममेति॥ ॥ ममांग माया गुणमय्यनेकधा विकल्पबुद्धीः स्वगुणैर्विधत्ते। वैकारिकस्त्रिविधोऽध्यात्ममेकम
थाधिदैवमधिभूतमन्यत्॥३१॥ विकल्पं भेदं तद्बुद्धीश्च स्वगुणैः सत्त्वादिभिर्विधत्ते करोति। ता एव विकल्पबुद्धीर्दर्शयि
ति वैकारिक इति। अनेकधात्वं प्रपंचयति। वैकारिकः अनेकविकारवान्। अपि स्थूलेन मार्गेण तावत् त्रिविधः।
त्रैविध्यमेवाह। अध्यात्म इति। एकं रूपं त्रिधा विनिद्यते तत्राह॥ ॥ दृग्रूपमार्कं वपुरत्र रंध्रे परस्परं सिध्यति न स्वतो
सौ। आत्मा यदेषामपरो य आद्यः स्वयानुभूत्याखिलसिद्धसिद्धिः॥३२॥ असौ प्रपंचो न स्वतः आत्मवत् सिध्यति। कथं तर्हि
अध्यात्मापेक्षया अधिदैवं तदपेक्षया। अध्यात्मं तदुभयापेक्षया। अधिभूतं। तदपेक्षया द्वयं। अत्र दृक् अध्यात्मं। रूपं
अधिभूतं। अत्र रंध्रे चक्षुर्गोलके प्रविष्टमार्कं वपुः अंशोऽधिदैवमिति। सापेक्षप्रकाशतामाह। परस्परमिति। चक्षुर्ध्य

१६९

पंज्ञायते। तदन्यथाऽनुपपत्त्या चक्षुः। तत्प्रवृत्त्यन्यथानुपपत्त्या तदधिष्ठानं देवता। ततश्चक्षुःप्रवृत्तिः। ततो रूपज्ञानं। इत्थं च
मेतत्त्रयं परस्परं सिध्यति। अत्र रं अ इति। दृष्टांतोपयोगितया यत्खे आकाशे अर्को वर्त्तते मंडलात्मा स उच्यते। सि
ध्यति। चक्षुर्विषये रूपे प्रतियोग्यपेक्षाभावमात्रेण उक्तं। तदिदं आत्मा तथैवेति। न इत्यादिना विश्व आत्मनो विवेक उ
क्तः प्राधान्येन भेदमाह। यत् यस्मात्। आत्मा एषाम ध्यात्मादीनामाद्यःकरणं। अतः एकरूपः भिन्नश्च। तस्मादन्यो
ध्यात्मादिभ्यः परो भिन्नः। स्वप्रकाशत्वादपीत्याह। स्वयानुभूत्या स्वतःसिद्धप्रकाशेन अखिलानां सिद्धानां परस्परं प्रका
शकानामपि प्रकाशकः। सर्वेषामपि सामान्यतः चित्प्रकाशविषयत्वात् अत एव तस्य प्रकाशकत्वं सिद्धं। चक्षुषि
दर्शनं त्रैविध्यं। इंद्रियांतरेष्वप्यतिदिशति। एवमिति॥८॥ एवं च त्वगादि श्रवणादि चक्षुर्जिह्वादिनासादिवच्चित्तयुक्तं।
योसौ गुणक्षोभनस्ततो विकारप्रधानमूलान्महतः प्रवृत्तः॥२४॥ अध्यात्मं चक्षुः अधिभूतं रूपं आधिदैविको रविः। एवं य १६९

था चक्षुः तथा त्वगाद्यपि। अधिभूतः त्वक्स्पर्शो वायुरिति। श्रवणं शब्दो दिश इति। जिह्वा रसो वरुण इति। नासा गंधोऽश्वि
नाविति। चित्तेन युक्तमंतःकरणांतरमपि। तत्र चित्तं चेतयितव्यं वासुदेवेति। मनो मंतव्यं चंद्र इति। बुद्धिर्बोद्धव्यं ब्र
ह्मेति। अहंकारो दं कर्त्तव्यं रुद्र इत्येवं त्रिविधं। ननु च पुनरपि वैलक्षण्यमात्रमेवोक्तं। त्रिविधप्रपंचव्यतिरिक्तात्मप्र
सिद्धिः कुतः स्यात्। अहंकारनिवृत्त्या तत्कुतः। त्रिविधविकल्पनिवृत्त्यैवेत्याशयेनाह। योसाविति। योसौ अहं अहंकारः
तमेवाह। गुणक्षोभं करोतीति तथा। ततः परमेश्वरात् कालाध्वनिमित्तात् स्वधानं स्थूलप्रादानं यच्च तस्मान्महतः
प्रवृत्तो विकारः स त्रिवृत् त्रिविधः। मोहमयस्य विकल्पस्य हेतुः। त्रिवृत्त्वमेवाह। अहमिति॥८॥ अहं त्रिवृन्मोहविकल्प
हेतुः वैकारिकस्तामस ऐंद्रियश्च। आत्मापरिज्ञानमयो विवादो [illegible]स्तीति नास्तीति भिदार्थनिष्ठः॥२५॥ वैकारिकादि त्रि
विधो विकल्पः स कुतो निवर्त्तते आत्मापरिज्ञानविलसितत्वात् तदज्ञानेनेत्याशयेनाह। आत्मज्ञानेन नश्यतीति। आ

त्मा ऽपरिज्ञानमयः इति। ननु कथं मोहमयत्वं विकल्पस्याहंकारस्य। केचित्स्वयत्वांगीकारात्तत्राह विवाद इति। अयं
निरर्थनिष्ठो विवादोऽप्यात्मा ऽपरिज्ञानमयश्च त्वयः। यद्वा। आत्मा उपरितो ज्ञानमयः अविवादः विवादगोचरः। न
न्वस्ति नास्ति तत्रापि वादिनां विवादो दृश्यत इति चेत्तत्र। विवादः सर्वो निरर्थनिष्ठ एव। ननु वस्तुमात्रनिष्ठः। अतो वा
दिनां परस्परयुक्तिनिरसनेन दृश्य निराकरणं कुर्वंति। अतो मोहमयत्वं सिद्धमिति। ननु यद्यहंकारो विकल्पश्च नास्ति
अलं तर्हि तन्निवृत्तिप्रयासेन तत्राह। व्यर्थोऽपीति॥ब॥ व्यर्थोऽपि नैवोपरमेत पुंसां मत्तः परावृत्तधियां स्वलोकात॥३५॥ व्य
र्थोऽप्यर्थरहितोऽपि स्वरूपभूतान्मत्तो बहिर्मुखानां नैवोपरमेदहंकारविकल्पः। प्राकृतकृतैः कर्मभिः उच्चनीचदेहे
ष्वतें संसरंतीति। अहो आत्मनः संसरणमेव न घटते। विभुत्वशुद्धत्वादिस्वरूपविरोधात् इति मनसि निधाय पृच्छति।
त्वत्त इति॥ब॥ ॥उद्धव उवाच॥ ॥त्वत्तः परावृत्तधियः स्वकृतैः कर्मभिः प्रभो। उच्चावचान् यथा देहान् गृह्णंति विसृ

जंति च॥३६॥ तन्ममाख्याहि गोविंद दुर्विभाव्यमनात्मभिः। न ह्येतत्प्रायशो लोके विद्वांसः संति वंचिताः॥३८॥ व्यापकस्या
त्मनो देहाद्देहांतरगमनं। अकर्तुः कर्माणि। नित्यस्य च जन्ममरणादीनि कथमिति भावः। एतद्विद्वांसो न संति हि
यस्मात्त्वन्मायया वंचिता मोहिताः। हे गोविंद तत्तस्मात् उपपत्त्यैव ममाख्याहि कथय। लिंगशरीराध्यासेन संबंध
दत इत्यभिप्रायेणोत्तरमाह। मन इति॥ब॥ ॥श्रीभगवानुवाच॥ ॥ ॥मनः कर्ममयं नृणामिंद्रियैः पंचभिर्वृतं। लोकाल्लो
कं प्रयात्यन्य आत्मा तदनुवर्तते॥३९॥ प्रधानत्वेन पंचभिरिति निर्देशो अन्येषामप्युपलक्षणार्थः। देहाद्देहांतरं
प्रयाति। ततोऽन्य एवात्मा तन्मनोऽनुवर्तते। अहंकारेणानुगच्छति। मनसोऽपि स्वदेहवियोगो देहांतरयोगश्च कथं
भवतीति चेत् स्मृतिवियोगयोगाभ्यामिति वक्तुं तयोः कारणमाह। ध्यायमान इति॥ब॥ ध्यायमानोऽनुविषया
न् दृष्टान् वानुश्रुतानथ। उद्यत्सीदत्कर्मतंत्रं स्मृतिस्तदनु शाम्यति॥४०॥ कर्मतंत्रं चात्मनः कर्मोपस्थापितान् अ

त्माऽपरिज्ञानमयः इति। ननु कथं मोहमयत्वं विकल्पस्याहंकारस्य। केचित्स्वयंचांगीकारान्नत्वाद् विवाद इति। अयं
भिदार्थनिष्ठो विवादोऽप्यात्माऽपरिज्ञानमयस्त्वित्यन्वयः। यद्वा। आत्माऽपरितोऽज्ञानमयः अविवादः विवादगोचरः। न
त्वस्ति नास्ति तत्रापि वादिनां विवादो दृश्यत इति चेत्तत्र। विवादः सर्वो भिदार्थनिष्ठ एव। ननु वस्तुमात्रनिष्ठः। अतो वा
दिनः परस्परस्य युक्तिनिरसनेदस्य निराकरणं कुर्वंति। अतो मोहमयत्वं सिद्धमिति। ननु यद्यहंकारो विकल्पश्च नास्ति
अलं तर्हि तन्निवृत्तिप्रयासेन तत्राह। व्यर्थोपीति॥ब॥ व्यर्थोऽपि नैवोपरमेत पुंसां मत्तः परावृत्तधियां स्वलोकात्॥ ३५॥ व्य
र्थोपि अर्थरहितोपि स्वरूपभूतान्मत्तो बहिर्मुखानां नैवोपरमेदहंकारविकल्पः। प्रकृतन्तु तैः कर्मभिः उच्चनीचदेहे
भूते संसरंतीति। अहो आत्मनः संसरणमेव न घटते। विभुत्वशुद्धत्वादिस्वरूपविरोधात् इति मनसि निधाय पृच्छति
वक्ष्यति॥ब॥ ॥उद्धव उवाच॥ ॥त्वत्तः परावृत्तधियः स्वकृतैः कर्मभिः प्रभो। उच्चावचान्यथा देहान् गृह्णंति विसृ

जंति च॥ ३६॥ तन्ममाख्याहि गोविंद दुर्विभाव्यमनात्मभिः। न ह्येतत्प्रायशो लोके विद्वांसः संति वंचिताः॥ ३७॥ व्यापकस्या
त्मनो देहात् देहांतरगमनं। अकर्तुः कर्माणि। नित्यस्य च जन्ममरणादीनि कथमिति भावः। एतद्विद्वांसो न संतीति। हि
यस्मात्तमायया वंचिता मोहिताः। हे गोविंद तत्तस्मात्कृपया त्वमेव ममाख्याहि कथय। लिंगशरीराध्यासेन संबंध
दतश्चेतरमाह। मन इति॥ब॥ ॥श्रीभगवानुवाच॥ ॥ ॥मनः कर्ममयं नृणामिंद्रियैः पंचभिर्युतं। लोकाल्लो
कं प्रयात्यन्य आत्मा तदनुवर्तते॥ ३८॥ प्रधानत्वेन पंचभिरिति निर्देशोऽन्येषामप्युपलक्षणार्थः। देहाद्देहांतरं
प्रयाति। ततोऽन्य एवात्मा तन्मनोऽनुवर्तते। अहंकारेणानुगच्छति। मनसोपि तर्हि देहवियोगो देहांतरयोगश्च कथं
भवतीति चेत्तत्स्मृतिवियोगयोगाभ्यामिति वक्तुं तयोः कारणमाह। ध्यायमान इति॥ब॥ ध्यायमानोऽनुविषया
न्दृष्टान्वाऽनुश्रुतानथ। उद्यत्सीदत्कर्मतंत्रं स्मृतिस्तदनु शाम्यति॥ ३९॥ कर्मतंत्रं चान्मनः कर्मोपस्थापितान् अह

शाननुश्रुतान्वेदोक्तांश्चातन्ननुध्यायन्नथानंतरं ध्यायमानेषु तेषु यदाविर्भवत्पूर्वविषयेषु सीदल्लीयमानं भवति।
तदनंतरं तत्स्मृतिः पूर्वापरानुसंधानं नश्यति। आत्मनोपि तदनुगतस्य स्मृतिः शाम्यति। अत एवं जन्ममरणे च व्याख्या-
विषयेति॥व॥ विषयाभिनिवेशेन नात्मानं यत्स्मरेत्पुनः। जंतोर्वै कस्यचिद्धेतोर्मृत्युरत्यंतविस्मृतिः॥४१ कर्मोपस्था-
पितनिष्पादितदेहाद्यंताभिनिवेशेन आत्मानं पूर्वदेहं पुनर्मनो न स्मरेदिति। यन्मन एव देहाभिनिवेशेन भयशो-
कादेर्दैवादिदहाभिनिवेशान्न वा दुःखादिर्हेतोः पूर्वदेहस्यात्यंतविस्मृतिः। अहंकारनिवृत्तिः तदभिमानिनो जंतोर्जी-
वस्य मृत्युरुच्यते न तु देहवन्नाशः॥व॥ जन्म त्वात्मतया पुंसः सर्वभावेन भूरिद। विषयस्वीकृतं प्राहुर्यथा स्वप्नम-
नोरथौ॥४२ जन्म तु विषयस्य देहस्य आत्मतया स्वीकृतं अभिमानं प्राहुः। न तु देहवदुत्पत्तिः। न च पुत्रादिदेहवत्प्री-
यतिशयमात्रेण। किंतु सर्वभावेन अभेदेन अभिमानमात्रेणोत्पत्तिमरणे दृष्टांतद्वयं यथा स्वप्नस्य मनोरथस्य चेत्यर्थः। १७१

दृष्टांतौ विवृणोति। स्वप्नेति॥व॥ स्वप्ने प्रवर्त्तमाने वै प्राक्तनं न स्मरेत्यसौ। तत्र पूर्वमिवात्मानं पूर्वं चानुपश्यति॥
४३ तत्र प्रवर्त्तमाने स्वप्नादौ पूर्वं चेति अपूर्वमिवेति चान्वयः। पूर्वसिद्धमपि आत्मानं अपूर्वं अद्य जातमिव प-
श्यतीत्यर्थः। उपसंहरति इंद्रियेति॥व॥ इंद्रियायनसृष्ट्येदं त्रैविध्यं भाति वस्तुनि। बहिरंतर्भिदाहेतुर्जनो-
सज्जनकृद्यथा॥४४ इंद्रियाणामयनं मनः तत्सृष्ट्या देहाभिनिवेशेन। या सृष्टिः उत्पत्तिः तया वस्तुनि आत्मनि त-
दभिमानेन इदं त्रैविध्यं उत्तममध्यमनीचत्वं असदेव भातीत्यन्वयः। एवंभूतरागकलुषितांतःकरणो नरो बाह्या-
भ्यंतरभेदहेतुश्च भवति। बाह्यविषयान्सुखादीन्पश्यतीत्यर्थः। असज्जनकृत् दुष्टपुत्रोत्पादकः जनः पिता
स्वयं समोपि पुत्रदोषेण तदरिमित्रादिषु यथा भेदहेतुर्भवति। तद्वदिति तदेवं लोकप्रसिद्धौ जन्ममृत्यू सर्वे-
षां कर्मानुसारेण भवतीति निरूप्य तस्मादप्रत्यक्षावपि तौ जन्ममृत्यू वैराग्याय निरूपयति नित्यदेति॥व॥ नि

यदाह्यंग भूतानि भवंति न भवंति च। कालनद्योघवेगेन सूक्ष्मत्वात्तन्न दृश्यते॥४५ तत्र दृष्टांतमाह। यथेति॥ ब॥
यथार्चिषां स्रोतसां च फलानां वा वनस्पतेः। तथैव सर्वभूतानां वयोवस्थादयः कृताः॥४६ अर्चिषां परिणामादि
भिः स्रोतसां गत्यादिभिः फलानां पाकादिभिः यथावस्थाविशेषाः कृताः। कालेनेति पूर्वश्लोकानुषंगः। आदिशब्देन
तेजो बल कोशलादीनामुपादानं। विमतं प्रतिक्षणोत्पत्तिविनाशवान्। अवस्थाभेदवत्वात् दीपज्वालादिवदित्यनु
मानं। ननु प्रदीपे प्रतिक्षणं भंगे सोयमिति कथं प्रत्यभिज्ञा तद्वदेव सादृश्या। बलं विनीयाह। सोयमिति॥ ब॥
सोयं दीपोर्चिषां यद्वत् स्रोतसां तदिदं जलं। सोयं पुमानिति नृणां मृषा गीर्धीर्मृषायुषां॥४७ सादृश्यादर्चिषामेव
यथा सोयं दीप इति प्रत्यभिज्ञा। यथा स्रोतसां प्रवाहजलानामिव तदिदं जलमिति यथा मृषा। तथा सोयं पुमा
निति धीर्गीश्च मृषा। व्यर्थमायुर्येषामविवेकिनां तेषां भवति ननु कथं देहाध्यासवतः पुंसः कर्मजन्ममरणानि

संति नात्यंचेति व्यवस्था नहि घटते अत्रस्थापि वस्तुस्वदनावादियाह। आद्य इति॥ ब॥ आद्यः स्वकर्मबीजेन जा
यते सोप्ययं पुमान्। म्रियते वामरो भ्रांत्या यथाग्निर्दारुसंयुतः॥४८ अयं पुमान् आद्यः नत्वरण संस्मरः। सो
पि स्वात्मनः कर्मणा बीजभूतेन अजोपि पुमान् जायते। अमरोपि कर्मनाशेन म्रियते। किंतु भ्रांत्या अजन्मापि
जायत इव। अमरोपि म्रियत इव। यथा महाभूततेजरूपोग्निः आकल्पांतमवस्थितो दारुयोगवियोगाभ्यां जन्म
नाशौ प्राप्नोति तद्वत्। न त्वात्मनो जन्मादेरतात्विकत्वे प्रतीयमाने एते कस्य तात्विका घटेरन्निति तत्राह। निषेके
ति॥ ब॥ निषेकगर्भजन्मादि बाल्यकौमारयौवनं। वयोमध्यं जरामृत्युरित्यवस्थास्तनोर्नव॥४९ निषेको जठरे प्र
वेशः। गर्भः तन्मध्ये वृद्धिः। बाल्यं पंचमाब्दांतं। कौमारं आषोडशात्। ततो यौवनमापंचचत्वारिंशतः। ततो मध्यं व
यः आषष्टिवर्षात्। तदनंतरं जरामृत्युश्च तनोर्नवावस्था। नत्वात्मनो देहसंबंधाज्जन्ममरणादीनि इत्युपपादि

तमर्थमुपसंहरति। एतामिति॥ बा॥ एतां मनोरथमयीं ह्यन्यस्योच्चावचां तनूं॥ गुणसंगादुपादत्ते क्वचित्किंचिज्जहाति
च॥५०॥ हस्फुटं अन्यस्य अनात्मनः देहस्य संबंधिनी एतां मनोरथमयीं तनुः अवस्थां गुणसंगात सत्वादिसंपर्कादुपा
दत्ते विवेकात्कश्चित्परमेश्वरानुगृहीतः जहाति त्यजति। ननु कथं जहातीति तत्राह। अवस्थावतो देहस्य ह्यस्थानावस्था
वानिति विवेकज्ञानेन ननु तदानीं जन्ममरणावस्थे जन्ममरणवान् देहो न दृश्यते तत्राह। आत्मन इति॥ बा॥
आत्मनः पितृपुत्राभ्यामनुमेयौ भवाप्ययौ। न भवाप्ययवस्तूनामभिज्ञो द्वयलक्षणः॥५१॥ पितृदेहस्यौर्ध्वदेहिकं
कुर्वता अप्ययदर्शनं पुत्रदेहस्य जातकर्माणि कुर्वन् जन्मदर्शनात् आत्मनः स्वदेहस्यापि भवाप्ययावनुमेयौ न
तुस्तुद्वं च एव दृश्यते सति भवाप्ययतां वस्तूनां देहानामभिज्ञो द्रष्टा अद्वयलक्षणः भवाप्ययधर्मको न भवति ननु त
थादिस्तिति आत्मा किं संघाते वर्तते न वर्तते वा। न चेत् संघातस्यापि जडस्य तस्य सद्भावे न प्रमाणमस्ति। एवं संसारस्य १०३

रूपाभावः। वर्तते चेत्तर्हि तस्यैव भवाप्ययौ। नह्यात्मा भवाप्ययधर्मवान् एतदेव दृष्टांतेन स्पष्टयति तरोरिति॥ बा॥
तरोर्बीजविपाकाभ्यां यो विद्वान् जन्मसंयमौ। तरोर्विलक्षणो द्रष्टा एवं द्रष्टा तनोः पृथक्॥५२॥ तरुशब्देनोद्भि
ज्जमात्रं लक्षणफलपाकतस्य बीजादेरित्यर्थः। यद्वा तरोरेवांशः परिणामो विपाकः बीजाज्जन्म विपाकात्सं
यमं नाशं च विद्वान् तरुस्वामी स विद्वानपि तरोर्विलक्षणो द्रष्टा। एवं तनोर्दृष्टांततः पृथक्। अतस्तत्र वर्तमानो
पि न तद्भवाप्ययाभ्यां संबध्यते। अविवेकिनः संसारं प्रपंचयति। प्रकृतेरिति पंचभिः॥ बा॥ प्रकृतेरेवमात्मानम
विविच्याबुधः पुमान्। तत्त्वेन स्पर्शसंमूढः संसारं प्रतिपद्यते॥५३॥ अबुधः अविवेकी पुमान् तत्त्वेन प्रकृतिपुरुष
स्वरूपेण अविविच्य विवेकी मत्वा स्पर्शसंमूढः स्पर्शो देहाद्यहंभावः तेन। संमूढः सन् संसारं प्राप्नोति स्पर्शेषु
विषयेषु मूढ इति वा। संसारं प्रतिपद्यत इत्युक्तं तदेव गुणभेदेन त्रिविधं तत्रापि तारतम्येन एकैकत्रिविधं

संसारमाहस्वेति॥ब॥सर्वसंगाद्दृष्टीन्देवान्रजस्तोसुरमानुषान्॥तमसावृततिर्यक्तृं[?]भ्रामितोयातिकर्मभिः॥५४नन्वकर्तुरात्मनः कुतः कर्मभिर्भ्रमणं तत्राह॥नृत्यतइति॥ब॥नृत्यतोगायतःपश्यन्यथैवानुकरोति तान्॥एवंबुद्धिगुणान्पश्यन्ननीहोप्यनुकार्यते॥५५नृत्यतोगायतोजनान्पश्यन्यथाअनुकरोति।तत्तत्स्वरतालादिगतिशृंगारकरुणादिरसंचमनस्यनुवर्त्तयति।तथाअकर्त्तापिगुणैर्बलादनुकार्यते।अनेनदृष्टांतेनदृश्यधर्मोद्रष्टरिस्फुरतीतिदर्शितं।उपाधिधर्माध्यारोपदितेऽवसंगासंते।नवध्यकरणेकथमध्यारोपः कार्यति इतिसदृष्टांतमाह॥यथेति॥ब॥यथांभसाप्रचलतातरवोपिचलाइव॥चक्षुषाभ्राम्यमाणेनदृश्यतेभ्राम्यतीव च॥५६यथांभसाप्रचलतातीरस्थाअपितरवोधावंतइवदृश्यंते।जलेप्रतिबिंबिताचाचंचलाइवेति।विषया १७२
द्केनमनसापरिकल्पितास्तएवतेषुविषयेषुलावण्यादयोगुणाःनवस्तुतःसंति।अतोमनोनिबंधनएवसंसारः

इयन्निषेध्यमाहकस्तुणाःग्राह्येवन्नासंतइत्यत्रदृष्टांतमाह॥चक्षुषेति॥भोगस्यापिमिथ्यात्वेदृष्टांतमाह॥यथेति॥ब॥यथामनोरथधियोविषयानुभवोमृषा॥स्वप्नदृष्टाश्चदाशार्ह तथासंसारआत्मनः॥५७यथाएताःप्रसिद्धामनोरथधियःस्वप्नदृष्टाश्चधियोयथामृषा।एवमात्मनोविषयानुभवःसंसारोमृषा।तर्हिकिंतन्निवृत्तिश्रमेणतत्राह॥अर्थेह्यीति॥ब॥अर्थेह्यविद्यमानेपिसंसृतिर्ननिवर्त्तते।ध्यायतोविषयानस्यस्वप्नेह्यर्थागमोयथा॥५८अस्यात्मनः।अतोनोगोह्यमोनकर्त्तव्यइत्याह॥तस्मादिति॥ब॥तस्माडुद्धवमाभुंक्ष्वविषयानसदिंद्रियैः।आत्माग्रहणनिर्भातंपश्यवैकल्पिकंभ्रमं॥५९डुःखप्रतीकारोपिपरित्यज्यपरमेश्वरनिष्ठेनैवभाव्यमित्याह॥क्षिप्तइतिद्वाभ्यां॥ब॥क्षिप्तोवमानितोसद्भिःप्रलब्धोसूयितोथवा॥ताडितःसन्निरुद्धोवावृत्त्यावापरिहापितः॥६०क्षिप्तः आक्षिप्तःउपलब्धःउपहसितःसंनिरुद्धोबद्धास्थापितः॥ब॥निष्ठितोमूत्रितोवाज्ञैर्बहुधैवंप्रकंपितः।श्रेयस्कामःक्रुद्रगत

आत्मनात्मानमुद्धरेत॥ ष्ठीवितः निष्ठीवनविषयीकृतः। मूत्रितः मूत्रेणादिग्धः॥ प्रकंपितः परमेश्वरनिष्ठातः।
कृच्छ्रगतः कष्टं प्राप्तोपि आत्मना बुद्ध्या आत्मानं देहाभिमानिनं उद्धरेत्॥ ब॥ ॥उद्धव उवाच॥ ॥यथैवमनु-
बुध्येयं वद नो वदतां वर। सुदुःसहमिमं मन्ये आत्मन्यसदतिक्रमं॥ १ एवं वक्तुर्यथावदनुबुध्येयं। तथा
नो वद॥ ब॥ विदुषामपि विश्वात्मन् प्रकृतिर्हि बलीयसी। ऋते त्वद्धर्मनिरतान् शांतांस्ते चरणालयान्॥ इदं वि-
श्वात्मन्। त्वद्धर्मनिष्ठान् ऋते विदुषामपि असद्भिः कृतमतिक्रममपराधं दुःसहं मन्ये यतः प्रकृतिः स्वभावः
निरस्य सर्वमिदं देहानेकोस्तस्तु दर्शनं। प्रकाशितरहस्यं तं व्रजामि गुरुमीश्वरं॥ ॥ब॥ ॥ ॥इति श्रीभागवते
महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे द्वाविंशोऽध्यायः॥ ॥ब॥ ॥त्रयोविंशे तिरस्कारसहनोप-
यमीर्यते। भिक्षुगीताप्रकारेण मनसः संयमो धिया॥१ दुर्जनोपद्रवोऽनंतो दुःसहोपि महीयसां। अत्र अनुनिरिध्य-

येः सहनोपायवर्णनं॥२ तत्र तावदस्मिन्नध्याये भिक्षुगीतया मनोविजयः। उत्तरस्मिन् प्रकृतिपुरुषविवेकः
तदुत्तरस्मिन्गुणवृत्तिजयः। चतुर्थेऽध्याये ऐलगीतया विषयसंगत्यागेन सत्संग इति क्रमेणोपाया भगव-
ता वर्ण्यंते। स भावेति॥ ब॥ ॥श्रीशुक उवाच॥ ॥स एवमाशंसित उद्धवेन तद्भक्तमुख्येन दशार्हर्षभेन।
सभाजयन् भृत्यवचो मुकुंदस्तमाबभाषे श्रवणीयवीर्यः॥१ आशंसितः प्रार्थितः भृत्यस्य वचः सत्कुर्वन्॥
तं भृत्यं प्रति आबभाषे। तद्वचः संपूजयति। बार्हस्पत्येति द्वाभ्यां॥ ब॥ ॥श्रीभगवानुवाच॥ ॥बार्हस्पत्य स नास्त्य-
त्र साधुर्वै दुर्जनेरितैः। दुरुक्तैर्भिन्नमात्मानं यः समाधातुमीश्वरः॥२ हे बार्हस्पत्य बृहस्पतेः शिष्य अत्र लो-
के साधुर्नास्ति यो दुर्जनोक्तैर्भिन्नं विक्षिप्तं मनः शमयितुमीश्वरः स्यात्। यस्तु दुर्जनेरितैः दुरुक्तैर्भिन्नमा-
त्मानं समाधातुं नियमितुं ईश्वरः स साधुरित्यन्वयः। दुःसहानि दुर्जनवचनानीत्याह न तथेति॥ ब॥ न तथा

तप्यते विद्धेन तु मर्म्मज्ञेन बाणेर्द्दिमर्मगैः। यथा तुदंति मर्मज्ञास्ते सतां परुषेषवः॥ अन्यथा मर्मज्ञाः मर्मस्थेवनियं छिताः प
रुषोक्तिरूपा इषवः तुदंति व्यथयंति। तथा शरे बाणा न तुदंति। अन्ते सेन्यथा न तप्यत इत्यर्थः। तथापि मया वक्ष्यमाणे
रुपायैः सर्वं सोढुं शक्यमित्युपनिपायेण वइति दासं प्रशंसेति कथयंतीति॥ ब॥ कथयंति मदुक्तं गुणमिति दासमि
दोद्ववातमदुःवर्ण्णयिष्यामि निबोधस्तु समाहितः॥ धमदु यथा भवति तथा गुणमिति दासं गाथां कथयंति॥ ब॥ के
नचिद्भिक्षुणा गीतं परिवृत्तेन दुर्ज्जनैः। स्मरता धृतियुक्तेन विपाकं निजकर्म्मणां॥ एतत् भिक्षुः वृत्तं धनाद्यैः कदर्य्यैश्चि
तस्य धनस्य नाशेन संतप्यमानो निर्विण्णः सन् प्रव्रज्य भिक्षाटने दुर्जनैरभिद्रुतः प्रसन्नोपयोगिनीं गाथामाहेति व ए.द.
दंतस्य चरित्रमाह। अवंतीति॥ ब॥ अवंतिषु द्विजः कश्चिदासीदाढ्यतमः श्रिया। वार्त्तावृत्तिः कदर्य्यस्तु कामी लुब्धोति १९६
कोपनः॥ ६ अवंतिषु मालवदेशेषु वार्त्ता कृषिवाणिज्यादिरूपा वृत्तिर्यस्य। कदर्य्यस्तु स्मृतस्तु क्तः। आत्मानं धर्म्मज्ञैः सं

चपुत्रदारांश्च पीडयन्। देवतातिथिभृत्यांश्च स कदर्य इति स्मृतः॥ इति विन्नवेदाननोगादिरहितः कदर्य इति॥ ब॥
ज्ञातयोतिथयस्तस्य वाङ्मात्रेणापि नार्च्चिताः। शून्यावसथ आत्मापि काले कामैरनर्च्चितः॥ ७ तस्य ये ज्ञातयो बांधवा
अतिथयो धनीनास्य तेन नार्चिता इत्यर्थः। शून्यावसथे धर्महीने गृहे देहे वा॥ ब॥ दुःशीलस्य कदर्यस्य द्रुह्यंते
पुत्रबांधवाः। दाराः दुहितरो भृत्याः विषण्णा नाचरन्प्रियं॥ ८ तस्यैवं यक्षवित्तस्य च्युतस्योभयलोकतः। धर्मकर्मवि
हीनस्य चुक्रुधुः पंचभागिनः॥ ९ यक्षाणां वित्तमिव केवलं रक्षणीयं वित्तं यस्य। पंचभागिनः पंचयज्ञदेवता॥ ब॥ त
दवध्यानविध्वस्तपुण्यस्कंधस्य भूरिद। अर्थोप्यगच्छन्निधनं बह्वायासपरिश्रमः॥ १० तेषां देवादीनामवध्यानमना
दरः तेन विध्वस्तो विशीर्णः पुण्यस्य स्कंधः अर्थलाभमात्रहेतुः तस्य। बह्वायासैः कृष्यादिभिः केवलं श्रमो यस्य। कृ
तो निधनमगच्छन्दाह॥ ब॥ ज्ञातयो जगृहुः किंचित्किंचिद्दस्यव उद्धव। दैवतः कालतः किंचिद्ब्रह्मबंधोर्नृपार्थिवान्॥

॥२१ दैवतः गृहदाहादिना।कालतः निखातादि।नृणां पार्थिवानां दैवं।तस्मात्॥बा॥स एवं द्रविणे नष्टे धर्मकामवि
वर्जितः।उपेक्षितश्च स्वजनैश्चिंतामाप दुरत्ययां॥२२ तस्यैवं ध्यायतो दीर्घं नष्टरायस्तपस्विनः।खिद्यतो बाष्पकंठस्य
निर्वेदः सुमहानभूत्॥२३ नष्टरायः नष्टो राः अर्थो यस्य।स नष्टरायस्तस्य।तपस्विनः संतप्तस्य।निर्वेदो वैराग्यं॥बा॥स
चाहेदमहो कष्टं वृथात्मा मेऽनुतापितः।न धर्माय न कामाय यस्यार्थायास ईदृशः॥२४ मे मया आत्मा देहः वृथैवा
नुतापितः।अनुतापं प्रपंचयति।न धर्मायेत्यादिना।यस्य ईदृशोऽर्थायासः।तेन मया॥बा॥प्रायेणार्थाः कदर्याणां
न सुखाय कदाचन।इह चात्मोपतापाय मृतस्य नरकाय च॥२५ नरकाय चेति।स्वयमप्यर्थे धर्माननुष्ठानात्॥बा॥यशो
यशस्विनां शुद्धं श्लाघ्या ये गुणिनां गुणाः।लोभः स्वल्पोऽपि तान् हंति श्वित्रो रूपमिवेप्सितं॥२६ श्वित्रं श्वेतकुष्टं।निरूप्य
माणेऽर्थेऽनर्थ एवेत्याह।अर्थस्येति॥बा॥अर्थस्य साधने सिद्धे उत्कर्षे रक्षणे व्यये।नाशोपभोग आयासस्त्रासश्चिं

ता भ्रमो नृणां॥२७ सिद्धे अर्थे तस्योत्कर्षे संवर्द्धने नाशोपभोगयोर्द्वंद्वैक्यं।नाशे उपभोगे चेत्यर्थः।साधनोत्कर्षयो
रायासः।न केवलमायासः।त्रासादिपंचदशानर्थानिर्वर्तीत्याह।ततस्त्रासः।चिंता च नाशे भ्रम इति।भ्रमो वै
चित्त्यं॥बा॥स्तेयं हिंसानृतं दंभः कामः क्रोधः स्मयो मदः।भेदो वैरमविश्वासः संस्पर्धा व्यसनानि च॥२८ अर्थप्राप्त्य
र्थं स्तेयादयः षट् अनर्थाः।प्राप्तेऽर्थे स्मयादयो नव।व्यसनानि स्त्रीद्यूतमद्यविषयाणि॥बा॥एते पंचदशानर्था ह्यर्थ
मूला मता नृणां।तस्मादनर्थमर्थाख्यं श्रेयोऽर्थी दूरतस्त्यजेत्॥२९ भेदं वैरं स्पर्धां च प्रपंचयति द्वाभ्यां॥बा॥भिद्यंते
भ्रातरो दाराः पितरः सुहृदस्तथा।एकास्निग्धाः काकिणिना सद्यः सर्वेऽरयः कृताः॥३० भिद्यंते भेदं प्राप्नुवंति।कथंभू
ताः एकाः एकप्राणाः।ते च अतिस्निग्धाः अतिप्रियाश्चेत्यर्थः।अतः काकिणिना अल्पस्वमार्षी विंशतिवराटिका काकिणी
॥बा॥अर्थेनाल्पीयसा ह्येते संरब्धा दीप्तमन्यवः।त्यजंत्याशु स्पृधो घ्नंति सहसोत्सृज्य सौहृदं॥३१ संरब्धाः क्षुपिताः घ्नं

तिहृयास्तं स्यजें रिपूंति वा। तान् इहलोके तावदर्थनिष्ठानामेते अनर्थाः। परलोकेप्यनर्था एवेत्याह। लब्ध्वेति त्रिभिः॥
ब॥ लब्ध्वा जन्मामरप्रार्थ्यं मानुष्यं तद्द्विजाग्र्यतां। तदनादृत्य ये स्वार्थं घ्नंति यांत्यशुभां गतिं॥२२॥ अमरैः प्रार्थ्यं मानुष्यं ज
न्म प्राप्य तत्रापि द्विजाग्र्यतां ब्राह्मण्यं स्वार्थं घ्नंति आत्महितं न कुर्वंति ये ते अशुभां तामसीं गतिं यांति। अमरप्रार्थ्यतां
दर्शयन्नाह। स्वर्गेति॥ ब॥ स्वर्गापवर्गयोर्द्वारं प्राप्य लोकमिमं तु मान्। द्रविणे कोनुषज्जेत मर्त्योनर्थस्य धामनि॥२३॥
लोकं देहं। अनुषज्जेत आसक्तिं कुर्यात्॥ ब॥ देवर्षिपितृभूतानि ज्ञातीन्बंधूंश्च भागिनः। असंविभज्य चात्मानं यक्षवि
त्तः पतत्यधः॥२४॥ ऋषयो मनुष्ययज्ञ ब्रह्मयज्ञे देवपितृभूतानि ज्ञातयः सगोत्राः बंधवो विवाहादिना संबद्धाः। तानन्
यांश्च भागिनः भागादानात्मानं च असंविभज्य अन्नादिभिरसंतर्प्य स्वयं आत्मानमेव तापितः। एवं विमृश्य अनुतप्य
मान आह॥ ब॥ व्यर्थयार्थेहया वित्तं प्रमत्तस्य वयो गतं। कुशला येन सिध्यंति जरठः किंनु साधये॥२५ व्यर्थयार्थेह

या प्रमत्तस्य मम वित्तादि गतमिति शेषः। येन धनेन विवेकिनः कुशलाः सिध्यंति मुच्यंते। जरठो वृद्धः। अन्यमपि वृस
दृशं शोचति कस्मादिति॥ ब॥ कस्मात्संक्लिश्यते विद्वान् व्यर्थयार्थेहयासकृत्। कस्यचिन्मायया नूनं लोको
यं सुविमोहितः॥२६॥ कस्मादेवमनर्थं विद्वानपि संक्लिश्यति कारणं संभावयति। कस्यचिदिति। नूनमयं मोहि
तः क्लिश्यति। किं तु धनादिभिर्भोगादि विवक्षया। अत आह। किमिति॥ ब॥ किं धनैर्धनदैर्वापि किं कामैर्वा कामदै
र्वरुत। मृत्युनाग्रस्यमानस्य कर्मभिर्वोत जन्मदैः॥२७॥ इदानीं संपन्नविवेकः सन्कृष्णमाह। नूनमिति त्रिभिः॥ ब॥
नूनं मे भगवांस्तुष्टः सर्वदेवमयो हरिः। येन नीतो दशामेतां निर्वेदश्चात्मविप्लवः॥२८॥ येन प्रीतेन आत्मनः प्लव उडु
पो निर्वेदश्च भवति स हरिर्मे नूनं प्रीत इति॥ ब॥ सोहं कालावशेषेण शोषयिष्येंगमात्मनः। अप्रमत्तोखिलार्थे
स्वयदि स्यात्सिद्ध आत्मनि॥२९॥ अंगं शोषयिष्यामि। यदि स्यात् कालावशेषः। तदात्मन्येव सिद्धः तुष्टः सन्। अखिलस्वा

थेधर्मादिया धनेषुप्रमत्ताःसन्॥ब॥ तत्रमामनुमोदेरन्देवास्त्रिभुवनेश्वराः॥ मुहूर्तेनब्रह्मलोकंखट्वांगःसमसाध
यत॥३०॥ अनुमोदेरन्नचअनुमादनंकर्तव्यं॥ तथाप्यितिवदं॥३॥ ननुदेवैरनुमोदितोपिजवरःस्वल्पेनकालेनकिं
साधयिष्यसितत्राह॥मुहूर्तेनेति॥ब॥ ॥श्रीभगवानुवाच॥ ॥इत्यभिप्रेत्यमनसाह्यावंत्योद्विजसत्तमः॥ उन्मु
च्यहृदयग्रंथीन्शांतोभिक्षुरभून्मुनिः॥३१॥ अभिप्रेत्यनिश्चित्यआवंत्यःअवंतिदेशोद्भवः॥ हृदयग्रंथीनअहंकार
ममकारान्॥ब॥ सचचारमहीमेतांसंयतात्मेंद्रयानिलः॥ भिक्षार्थंनगरग्रामात्असंगोलक्षितोविशत्॥३२॥ असं
गःआसक्तिशून्यःअलक्षितःअशेषुमनुष्योतयत्॥ब॥ तंवैप्रवयसंभिक्षुमवधूतमसज्जनाः॥ दृष्ट्वापर्यभवन्भद्रब
ह्वीभिःपरिभूतिभिः॥३३॥ प्रवयसंवृद्धं॥ अवधूतंअसंस्कृतगात्रं पर्यभवन्॥ अवमेनिरे॥ दंडजितकाधःपरिभू ए.टी. २१५
तिभिस्तिरस्कारैः॥ परिभवानेवदर्शयति॥ केचिदितिसप्तभिः॥ब॥ केचित्त्रिवेणुंजगृहुःकेचित्पात्रंकमंडलुं॥ पीठं

चैकेक्षसूत्रंचकंथांचीराणिकेचन॥३४॥ प्रदायचपुनस्तानिदर्शितान्याददुर्मुनेः॥ अन्नंचभैक्ष्यसंपन्नंभुंजतोस्य
सरित्तटे॥३५॥ भोभगवन्गृहाणेतिदर्शितानिप्रदायपुनश्चाददुः॥ब॥ मूत्रयंतिचपापिष्ठाःष्ठीवयंतिचमूर्धनि॥ य
तवाचंवाचयंतिताडयंतिनवक्तिचेत्॥३६॥ भिक्षयाप्राप्तेन्नेमूत्रयंति॥ मूर्द्धनिष्ठीवयंति॥ थूत्कारेणश्लेष्माणंप्रक्षि
पंति॥ब॥ तर्जयंत्यपरेवाग्भिःस्तेनोयमितिवादिनः॥ बध्नंतिरज्ज्वातंकेचित्बध्यतांबध्यतामिति॥३७॥ क्षिपंत्येकेवजा
नंतिएषधर्मध्वजःशठः॥ क्षीणवित्तइमांवृत्तिमग्रहीत्स्वजनोज्झितः॥३८॥ क्षिपंतिनिंदंति॥ निंदामेवाह॥ एषधर्मध्वजः॥
त्रिदंडत्रिलिंगोपजीवी॥ शठोलोकवंचकः॥ तदेवाह॥ क्षीणवित्तइति॥ब॥ अहोएषमहासारोधृतिमान्गिरिराडि
व॥ मौनेनसाधयत्यर्थंबकवद्दृढनिश्चयः॥३९॥ महासारःअतिबली॥ब॥ इत्येकेविहसंत्येनमेकेदुर्वातयंतिच॥ तंबबं
धुर्निरुरुधुःयथाक्रीडनकंद्विजं॥४०॥ दुर्वातयंतितदुपर्यधोवायुंमुंचति॥ बबंधुःशृंखलैः॥ निरुरुधुःकारागृहादिषु॥

द्विजंशुकसारिकादियथा॥छ॥ एवंसम्नोतिकंदुःखंदैविकंदैहिकंचयत॥ मोक्तव्यमात्मनोदिष्टंप्राप्तंप्राप्तमबुध
त॥४२॥ नैतिकंदुर्जनादिकृतं॥ दैविकंअतिवृष्ट्यादि॥ दैहिकंज्वरादि॥ दिष्टंमोक्तव्यंअबुध्यत॥ प्राप्तंप्राप्तंअंगीक
रेदित्यर्थः॥छ॥ परिभूतइमांगाथामगायतनराधमैः॥ पातयद्भिःस्वधर्मात्स्वाधृतिमास्थायसात्विकीं॥४२॥ स्वधर्मात्पातय
द्भिःपरिभूतोपिसात्विकींधृतिंशमदमादिंआस्थायस्वधर्मएवस्थितः इमांवक्ष्यमाणांगाथामगायत॥ सात्विकीधृति
श्चाध्यायधार्यतेमनःप्राणेंद्रियक्रियाः॥ योगेनाव्यभिचारेणधृतिःसापार्थसात्विकी॥ तामेवाष्टादशश्लोकींगा
थामाहनायमिति॥छ॥ ॥भिक्षुरुवाच॥ ॥नायंजनोमेसुखदुःखहेतुर्नदेवतात्माग्रहकर्मकालाः॥ मनःपरं
कारणमामनंतिसंसारचक्रंपरिवर्तयेद्यत॥४३॥ अयंजनअधिभूतंभूतानिमेसुखदुःखदोनभवंति॥ देवताइंद्रादि॥
आत्माक्षेत्रज्ञः॥ ग्रहाःआदित्यादयः कर्मपुण्यापुण्यादि॥ कालश्च एतेमेसुखदेतवोनभवंति॥ मनःपरंकेवलंसुख

दुःखयोःकारणंवदंति॥ मनसाह्येवपश्यतिमनसाशृणोतीत्यादिश्रुतिः॥ परिवर्तनप्रकारमाह॥ मनइति॥छ॥ म
नोगुणान्वैसृजतेबलीयः यतश्चकर्माणिविलक्षणानि॥ शुक्लानिकृष्णान्यथलोहितानि तेभ्यःसवर्णाःसृतयोभ
वंति॥४४॥ गुणान्गुणवृत्तीःसृजति॥ ततश्चतेभ्योगुणेभ्यःशुक्लादिसात्विकानिकृष्णानितामसानिलोहितानिरा
जसानि॥ सवर्णाश्चकर्मानुरूपाःसृतयःदेवतिर्यङ्नरादिगतयः॥ तर्हिमनसएवसंसारःस्यात्॥ नात्मनइत्याशंक्या
हअनीहइति॥छ॥ अनीहआत्मामनसासमीहताहिरण्मयोमत्सखउद्विचष्टे॥ मनःस्वलिंगंपरिगृह्यकामान्जुष
न्निबद्धोगुणसंगतोसौ॥४५॥ अयमर्थः॥ अविद्ययामनोध्यासेनइयंआत्मनःसंसृतिर्नतुस्वतः॥ यतस्तद्रहितस्य
ईश्वरस्यसानास्ति॥ किंतुतद्वतोजीवस्यैवेति॥ तदेतदाह॥ मनसासमीहमानेनचेष्टयतासहनियंतृत्वेनवर्तमानो
पिपरमात्माअनीहः तत्क्रियासंगरहितः॥ यतोहिरण्मयः॥ विद्याशक्तिप्रधानः॥ कुतः यतोमत्सखः॥ ममजीवस्यस

खानियंता॥ अतो बुद्धेर्विचेष्टे। अतिरोहितस्थानेन केवलं पश्यतीत्यर्थः। असौ पुनरहंजीवः स्थूलिंगं स्वस्मिन्नात्मनि लि-
गयति॥ घातयति संसारमिति तथा॥ तन्मनः परिगृह्य आत्मत्वेन स्वीकृत्य तस्य मनसो गुणैः कर्मभिः संगतः संबद्धः गु-
णसंगाद्धा कामानदृषन्निबद्ध इति॥ अतो मनोनिग्रहे कृते सर्वं कृतं स्यात्। तं विना तु सर्वं व्यर्थमित्याह। दानमिति
द्वाभ्यां॥ ब॥ दानं स्वधर्मो नियमो यमश्च श्रुतानि कर्माणि च सद्व्रतानि। सर्वे मनोनिग्रहलक्षणांताः परो हि योगो मन-
सः समाधिः॥ ४६ दानं हिरण्यादि। स्वधर्मो नित्यनैमित्तिकः। सद्व्रतान्येकादश्युपवासादीनि। श्रुतानि च यावंति कर्माणि।
एते सर्वे उपायाः मनोनिग्रहः अंतो निष्ठा फलं येषां ते तथा। ननु ज्ञानांगत्वं तेषां प्रसिद्धं तत्राह। मनसः समाधिर्निग्रह ए-
व परो योगः ज्ञानं॥ ब॥ समाहितं यस्य मनः प्रशांतं दानादिभिः किं वद तस्य कृत्यं। असंयतं यस्य मनो विनश्यत् दानादि-
भिश्चेदपरं किमेभिः॥ ४७ अतो यस्य मनः समाहितं भवति तस्य किं कृत्यमस्तीति वदेति। परं प्रत्यक्पदिशन्निव स्वयमेवाह॥ ए॰टी॰ १८१

असंयतं विक्षिप्तं चेतो यस्य॥ विनश्यत् आलस्यादिना लीयमानं चेद्भवेत् तर्हि एभिर्दानादिभिः किमपरं प्रयोजनं स्या-
त् न किंचिदित्यर्थः। तर्हितरेंद्रियजयः प्रयोजनं स्यात्तत्राह। मन इति॥ ब॥ मनोवशेऽन्ये ह्यभवन्स्म देवा मनश्च नान्य-
स्य वशं समेति। भीष्मो हि देवः सहसः सहीयान् युंज्याद्वशे तं स हि देवदेवः॥ ४८ देवाः इंद्रियाणि तद्देवधिष्ठातारो
वा। भीष्मः योगिनामपि भयंकरो मनोलक्षणो देवः कुतः सहसः बलादपि बलीयान्। अतस्तं यो वशवर्तिनं कुर्यात्
स एव देवदेवः सर्वेंद्रियाजेता भवति नान्यः। तथा च श्रुतिः। मनो वशे सर्वमिदं बभूव। नान्यस्य मनो वशमन्विया-
य। भीष्मो हि देवः सहसः सहीयानिति। तन्निग्रहव्यतिरेकेण इतरनिग्रहाय प्रवृत्तान्मूढानुपहस्याह। तमिति॥ ब॥ तं
दुर्जयं शत्रुमसह्यवेगमरुंतुदं तन्न विजित्य केचित्। कुर्वंत्यसद्विग्रहमत्र मर्त्यैर्मित्राण्युदासीनरिपून्विमूढाः॥ ४९
असह्यो रागादिवेगो यस्य तं। अनवरतं अरुंतुदं। अरुर्मर्म तत्तुदति व्यथयतीत्यरुंतुदः। तं न विजित्य अजित्वा तन्नतः

येःकश्चिदस्मिंद्रियुदं।।कुर्वंति तत्र चात्मनुपति क्रोल कुलादीनन्यान्मित्रादीनन्कुर्वंति ते मूढा इत्यर्थः।।ततश्च तेश्चेनेनप्र
कारेण संसारे भ्रमंतीत्याह।।देहमिति।।मू।।देहं मनोमात्रमिमं गृहीत्वा ममाहमित्यंधधियो मनुष्याः।।एषोहमन्यो
यमिति भ्रमेण दुरंतपारे तमसि भ्रमंति।।टी।।मनोमात्रपरिकल्पितमिमं देहमहमिति पुत्रादिदेहं च ममेति गृहीत्वा
च तमसि संसारे।एवं तमन इति।।मू।।जनोस्य हेतुः सुखदुःखयोश्चेत्किमात्मनश्चात्र हि भौमयोस्तत्।जिह्वां क्वचि
त्संदशति स्वदद्भिस्तद्वेदनायां कतमाय कुप्येत्।।टी।।अस्याविवेकिनः जनश्चेत्सुखदुःखयोर्हेतुः तर्हि भौमयोः स्थूल
सूक्ष्मदेहयोः तद्विलक्षणस्य आत्मनः किं च न किंचिदित्यर्थः।सुखदुःखकर्मत्वं तत्कर्तृत्वं चेत्यर्थः।कुत इत्यत आह। ए.टी.७
हि निश्चितं भौमयोः भूविकारयोर्देहयोः ततनत्वात्मनः।अप्रकृतस्याक्रियस्य च दहनादिषु कर्मकर्तृत्वानुपपत्तेः।तथा १८२
पि दुःखमात्मपर्यवसाय्येवेति चेत्।एवमपि परमात्मनः उभयत्राप्येकत्वात् न कोपविषयोस्तीति दृष्टांतेन दर्शय

ति।जिह्वामिति।।मू।।दुःखस्य हेतुर्यदि देवतास्तु किमात्मनस्तत्र विकारयोस्तत्।यदंगमंगेन निहन्यते क्वचित्क्रु
ध्येत कस्मै पुरुषः स्वदेहे।।टी।।यदि देवता इंद्रियाधिष्ठातारः तर्हि भवंतु नाम।तत्रापि आत्मनः किं न।।यतो विका
रयोर्विक्रियमाणयोः देवतयोस्तद्दुःखं।हस्तेन मुखे निहते वा हस्ते दष्टे तदभिमानिनोर्वह्नींद्रियोरेव तत्।न च वि
क्रियस्य अनहंकारस्य चात्मनः।देवतानां च सर्वदेहेष्वभेदात् न कोपविषयोस्तीति स्वदेहदृष्टांतमाह।यदंग
गं देवताधिष्ठानं हस्तमुखादि च तदेव सर्वत्र देवताधिष्ठानरूपत्वविकारत्वं तोदाहरणं।।मू।।आत्मा यदि स्यात्सुख
दुःखहेतुः किमन्यतस्तत्र निजस्वभावः।न ह्यात्मनोन्यद्यदि तन्मृषा स्यात्क्रुध्येत कस्मान्न सुखं न दुःखं।।टी।।आत्मनः
सुखदुःखाद्याकारपरिणामः अतः स एव हेतुर्यदि स्यात् तत्र तस्यान्यतः कर्मादेः किं न किंचिदन्यतो भवतीति यस्मै
क्रुध्येतेत्यर्थः।यतो निजस्वभावः।न चात्मनस्तथा परिणामोन्यनिमित्ततो भवति।अतोऽपि कोपविषय इति चेत्

त्राहानदीति। आत्मव्यतिरिक्तं नस्येवाथ दिष्यात् अस्तीति प्रतीयते। तदितन्मृषेव। अतः कस्माद्धेतोः क्रुध्येत। निज
स्वभाववशेन तदपि नायतः आत्मनि न सुखं न दुःखं। अतो नास्ति निमित्तं॥ ७॥ ग्रहा निमित्तं सुखदुःखयोश्चेत् किमा
त्मनो जन्यजनस्य तेवा। ग्रहैर्ग्रहस्यैव वदंति पीडां क्रुध्येत कस्मै पुरुषस्ततोन्यः॥ ५४ यद्पक्षेप्य जन्यस्य आत्मनः किं।
यतो जन्यत इति जनो देहस्तस्यैव जन्मलग्नापेक्षया द्वादशाष्टमराशिस्था सुखदुःखयोर्निमित्तं भवंति। किंचांत
रिक्षस्थैः ग्रहैः तत्र स्थस्य ग्रहस्यैव पादार्धादिदृष्ट्यादिभेदैः पीडां वदंतीति दैवज्ञाः। ननु यद् कोणादिस्थितग्रहस्य
रोगावस्थग्रहगतेव न पीडा। तत्र ग्रहोत्पन्ने देहे तथाभिमानाद्भवति। अतः पुरुषः ततो ग्रहात् देहाचान्यः क
स्मै क्रुध्येत। यदा ग्रहैः शरीरादिभिः अधिदैवं वर्तमानैः ग्रहस्य च अध्यात्ममिंद्रियाधिष्ठितस्य पीडां वदंति। पुरुषस्तु
ततोन्याध्यात्मसंघातविलक्षणः॥ ८॥ कर्मास्तु देहेः सुखदुःखयोर्वै किमात्मनस्तद्धि जडाजडत्वे। देहस्त्वचित्पुरुषो

यं सुपर्णः क्रुध्येत कस्मै न हि कर्ममूलं॥ ५५ कर्मदेहस्येत् अस्तिच्य हेतु योपगमः। कार्मविनास्ति क्रुतस्य देहत्वमि
तितत्राह। हियस्मात् स्य कर्मणो जडो जडत्वे चितत्वासासासित स्वस्य देहे हन्ति सन्देहः अचितत्वेचेतना स्व
ड्तः अतत्र सत्य प्र हन्तिर्न संभवति। पुरुषस्तु सुपर्णः। शुद्धज्ञानस्वरूपः। अतः कस्मै क्रुध्येत। यतः सुखदुःखयोर्मूल
स्तं कार्मविनास्ति॥ ९॥ कालस्तु देहः सुखदुःखयोश्चेत् किमात्मनस्तत्र तदात्मकतेसो। नाग्नेर्हि तापो न हिमस्य
तस्यात् क्रुध्येत कस्मै न परस्य द्वंद्वं॥ ५६ कालपक्षेपि आत्मनः किं। यतोसौ कालात्मक एव। ब्रह्मांशत्वात्। स्वांश
स्य ग्रतः पीडा नास्ति। यत्र दृष्टांतः। नाग्नेर्हितोः तदंशस्य ज्वालादेस्तापो दाहो नाशो स्ति। तत्रोपाधिरूपतः काष्ठांश
दाहान्नाशः स्यादिति दृष्टांतांतरमाह। हिमस्य तल्लिन्य तदंशस्य तुषारकणस्य नाशकं न स्यात्। किंचा आस्ता
मंशत्वं। वस्तुतः परएवायं न चास्य द्वंद्वं सुखदुःखादिकमस्तीति। तदेवं षडेते हेतवः प्रसिद्धा निरस्ताः। यदि कश्चि

तदेवं तरसुज्ञावयेतत्तदपि वस्तुमहिमाहद्ध्यानसंभवतीत्याह नेति ॥ब॥ न केनचित्क्वापि कथंचनास्य द्वंद्वोपराग
परतः परस्य । यथाहमः संसृतिरूपिणः स्यात् एवं प्रबुद्धो न बिभेति भूतैः ॥५७ ननु अपरोक्षः द्वंद्वः कथं निराक्रियते
तत्राह । यथेति । संसृतिं अविद्यमानामपि स्वरूपयति प्रकाशयतीति तथा । तस्य अहमः अहंकारस्य यथा स्यात् न तथा
परतः परस्यात्मनो द्वंद्वसंबंधः अहंकारनिमित्तो सो न वास्तव इत्यर्थः । एवं प्रबुद्धो यः स भूतैः कृतान् बिभेति । अयो
हमपि अनयैव परात्मनिष्ठया तरिष्यामीत्याह एतामिति ॥ब॥ एतां स आस्थाय परात्मनिष्ठां अध्यासितां पूर्वतमैर्म
हर्षिभिः । अहं तरिष्यामि दुरंतपारं तमो मुकुंदांघ्रिनिषेवयैव ॥५८ सोहमित्यन्वयः । नन्वियं निष्ठा वक्तुं न वेत्ता ए॰टी॰
ह्यमुकं देति प्रव्राजनसहगाथार्थं संक्षेपतो दर्शयति द्वाभ्यां ॥ब॥ निर्विद्य नष्टद्रविणे गतक्लमः प्रव्रज्य गां पर्य १८४
टमान इत्थं । निराकृतो सद्भिरपि स्वधर्माद कंपितो मुं मुनिराह गाथां ॥५९ इत्थं नष्टद्रविणे निर्विद्य गतक्लमः प्र

व्रज्य गां पर्यटन् असद्भिर्निराकृतोपि स्वधर्माद कंपितः सन् अमूं गाथां अगायतेत्यन्वयः ॥ब॥ सुखदुःखप्रदो नान्यः
पुरुषस्यात्मविभ्रमः ॥ मित्रोदासीनरिपवः संसारस्तमसां कृतः ॥६० मित्रोदासीनरिपवः सर्वोपि संसारस्तमस
अज्ञानतः आत्मनो मनसो विभ्रममात्रात् कृतः न तात्विक इत्यर्थः । उक्तं द्वंद्वसहनोपायमुपसंहरति तस्मादिति
॥ब॥ तस्मात्सर्वात्मना तात निगृहाण मनो धिया । मय्यावेशितया युक्तः एतावान् योगसंग्रहः ॥६१ ननु मनोनिग्रह
स्यावश्यं तद्दुःकरं सुकरं कथयेति चेत्तत्राह । य इति ॥ब॥ य एतां भिक्षुणा गीतां ब्रह्मनिष्ठां समाहितः । धारय
न् श्रावयन् शृण्वन् द्वंद्वैर्नैवाभिभूयते ॥६२ मनोनिग्रहाशक्तोपि एतच्छ्रवणादिनिष्ठस्तु तत्फलं प्राप्नोति । द्वंद्वैः सुख
दुःखादिभिर्नाभिभूयते ॥ भिक्षुगीतामिषं कृत्वा अनक्तवित्तगतां हरिः । मोहनिद्रां हरन्नाति परमानंदरूपतः ॥ब॥
॥।॥इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे भिक्षुगीतायां त्रयोविंशोऽध्यायः ॥ब॥ ॥ ॥

चतुर्विंशे तु सांख्येन मनोमोहो निवार्यते। आत्मनः सर्वभावानामागमापायचिंतया॥१ असंदेहं तत्त्वानां अद्वंद्वत्वा
यसंभवं। विनिश्चित्योक्तात्मनः स्वस्थः सांख्यमत्रा दृतच्छते॥२ अद्वितीयात्परमात्मनो मायया प्रकृतिपुरुषद्वारा स
र्वं हि तमुदेति। पुनस्तत्रैव लीयत इत्यनुसंदधानस्य द्वंद्वभ्रमो निवर्तत इति वक्तुं सांख्यं प्राह्नोति॥ब॥ ॥श्री
भगवानुवाच॥ ॥अथ ते संप्रवक्ष्यामि सांख्यं पूर्वैर्विनिश्चितं। यद्विज्ञाय पुमान्सद्यो जह्याद्वैकल्पिकं भ्रमं॥१॥
यान्निरूपितवानुक्तानि तेषामिदानीमुत्पत्तिलयो दर्शयति। अथ शब्देन। पूर्वैः कपिलादिभिः। विनिश्चितं। वैक
ल्पिकं भेदनिमित्तं भ्रमं सुखदुःखादिरूपं॥ब॥ आसीज्ज्ञानमथो ह्यर्थ एकमेवाविकल्पितं। यदा विवेकनिपुणा
आदौ कृतयुगेऽयुगे॥२ अथो शब्दः कार्त्स्न्ये। ज्ञानं द्रष्टा तेन दृश्यः प्रकाश्यः अर्थोऽप्यर्थश्च विकल्पशून्यमेकमेव ब्र
ह्मण्येव लीनमासीदित्यर्थः। कदेत्यपेक्षायां अयुगे युगेऽन्यः पूर्वप्रलय इत्यर्थः। तथा आदौ यत्कृतयुगे तस्मिंश्च ए।० १८५

अन्यदापि यदा विवेकनिपुणा जना भवंति तस्य आदौ प्रलयकाल इत्यर्थः॥ब॥ तन्मायाफलरूपेण केवलं निर्वि
कल्पितं। वाङ्मनोगोचरं सत्यं द्विधा समभवद्बृहत्॥३ तथापि तेषां स्फुरतीति बृहद्ब्रह्म वाङ्मनोगोचरं यथा भवति
तथा मया। फलं तत्प्रकाशः तद्रूपेण मायाविलासरूपेण वा द्विधा अभवत्। अयं भावः। मया ब्रह्मणा निमित्तेन तत
दृहत्त्वं द्विधा समभवत्। कथंभूतं तत् केवलं एकं निर्विकल्पितं भेदशून्यं अत एव अवाङ्मनोगोचरं सत्यं अबा
धितं॥ब॥ तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका। ज्ञानं त्वन्यतमो भागः पुरुषः सोऽभिधीयते॥४ तयोर्द्विधाभू
तयोरंशयोर्मध्ये उभयात्मिका कार्यकारणरूपिणी। जडाजडरूपा वा अभवत्। अनिद्युक्ता बभूव॥ब॥ त
मो रजः सत्त्वमिति प्रकृतेरभवन्गुणाः। मया प्रक्षोभ्यमाणायाः पुरुषानुमतेन वै॥५ मया परमेश्वरेण जीवादृ
ष्टप्रयुक्तया तत्स्पृष्टैः पुरुषानुमतत्वं। यद्वा। क्षोभे प्रवर्तती ईक्षणरूपाया पुरुषावस्थात तदनुमतिनं तद्वारेणैव

र्थः॥ छ॥ तेभ्यः समभवत्सूत्रं महान्सूत्रेणसंयुतः। ततोविकुर्वतोजातोयोऽहंकारोविमोहनः॥ सूत्रंक्रियाशक्ति
मान्प्रथमोविकारः ततोमहान्ज्ञानशक्तिः नचायंमहानेवप्रथमोविकारः। तत्राह। सर्वज्ञानक्रियांगर्भत्वात्सूत्रे
णसंयुतः। नपृथक्। एकमेवतत्त्वंक्रियाज्ञानशक्तिभ्यांद्विधोच्यतइत्यर्थः। जीवस्यभ्रमहेतुःसंजातः॥ छ॥ विकारि
कस्तैजसश्चतामसश्चेत्यहंत्रिवृत्। तन्मात्रेंद्रियमनसांकारणंचिदचिन्मयः॥ ८ यतस्तन्मात्रादीनांकारणं। मनसो
नदेवानामप्युपलक्षणं। चिदचिन्मयः चिदाभासयोगत्वात्। जनयद्भिःस्वरूपद इति जीवोपाधित्वंदर्शितं। यद्यपि तस्मा
द्वाएतस्मादात्मनआकाशःसंभूतइत्यादिश्रुतौ। अन्नमयंहिसौम्यमनइत्यादिश्रुतेश्चप्रथमंभूतानिजायंते तेभ्य
श्चापंचीकृतेभ्यःप्राणादिक्रमेणसमष्ट्यात्मकंलिंगशरीरंपंचीकृतेभ्यश्चब्रह्मांडं। तस्मिंश्चविराजस्वदंतर्यामिलीला
विग्रहःक्षीरशायीश्रीनारायणः। तन्नाभिपद्माच्चविराजश्चभोगविग्रहश्चतुराननः। ततोयथावसरंमन्वादयोजीवा

नांभ्राविर्भावइति। वस्तुतस्तयोस्तथापिचित्ताभिव्यक्तिपूर्वकोऽहंकारः। ततोभूतेंद्रियादिव्यवहारइत्येवंतामहदादिक्रमे
णसृष्टिरुच्यते। तस्माद्द्विविधास्वरूपतिसुरूपात्। त्रिविधप्रपंचोत्पत्तिंदर्शयति। अर्थइति॥ छ॥ अर्थस्तन्मात्रकाज्जज्ञेता
मसादींद्रियाणिच। तैजसाद्देवताआसन्नेकादशचवैकृतात्॥ ९ तन्मात्रकात्शब्दादितन्मात्रकारणात्तामसा
त्द्वारातअर्थेमिद्ग्भूतरूपोजज्ञे। बद्धवद्भूतानामावरणस्वभावत्वात्इंद्रियाणिदशतैजसाद्राजसात्। तेषांप्रवृत्ति
स्वभावत्वात्सात्विकात्देवताः। दिग्वातार्कप्रचेतोऽश्विवह्नींद्रोपेंद्रमित्रकाः। चंद्रश्चेत्येकादश। वशाद्दान्मनश्चतेषांप्र
काशस्वभावत्वात्॥ छ॥ मयासंचोदिताभावाःसर्वेसंहत्यकारिणः। अंडमुत्पादयामासुर्ममायतनमुत्तमं॥ १० ममैवेराज्ञो
तर्यामिणः॥ छ॥ तस्मिन्नहंसमभवमंडेसलिलसंस्थिते। ममनाभ्यामभूत्पद्मंविश्वाख्यंतत्रचात्मभूः॥ ११ सलिलेसं
स्थितिर्यस्य। तत्सलिलसंस्थितिस्तस्मिन्। सलिलसंस्थितावंडेश्रीनारायणरूपोलीलाविग्रहेणसमभवंस्थितइत्यर्थः।

विश्वाख्यं लोककारणं भूतं। तत्र चात्मभूः चतुराननेन योगविग्रहेण आविर्भूत इत्यर्थः॥ ब॥ सोऽसृजत्तपसा युक्तो रजसा मम
दनुग्रहात्। लोकान्सपालान्विश्वात्मा भूर्भुवः स्वरिति त्रिधा॥ ११॥ रजसा युक्तो मदनुग्रहात् तपसा च सृजत। भू
तलादिसहिता। भुवां अंतरिक्षलोकाः। स्वः स्वर्गं महर्लोकादेरप्युपलक्षणं। लोकसृष्टिप्रयोजनमाह। देवानामिति सा
र्द्धेन॥ ब॥ देवानामोक आसीत्स्वर्भूतानां च भुवः पदं। मर्त्यानां च भूर्लोकः सिद्धानां त्रितयात्परं॥ १२॥ स्वः स्वर्गः देवानां स्था
नं। भुवः पदं भुवर्लोकः। त्रितयात्परं महर्जनादि॥ ब॥ अधोऽसुराणां नागानां भूमेरोकोऽसृजत्प्रभुः। त्रिलोक्यां गतयः स
र्वाः कर्मिणां त्रिगुणात्मनां॥ १३॥ भूमेरधः पातालानि इदानीं लोकप्राप्तिसाधनान्याह। त्रिलोक्यामिति। त्रिलोक्यां पाता
लादिसहितायां सर्वेषां कर्मिणां गतिः॥ ब॥ योगस्य तपसश्चैव न्यासस्य गतयोऽमलाः। महर्जनस्तपः सत्यं भक्तियोगस्य
मद्गतिः॥ १४॥ योगादिना तारतम्येन यथोत्तरं महर्लोकादयः। मद्गतिर्वैकुंठलोकः। स च न तु मद्गतिव्यतिरेकेण इतरा गतय

ए॰ १०
१८७

श्चंचलाः वैराग्यार्थमाह॥ ब॥ मया कालात्मना धात्रा कर्मयुक्तमिदं जगत्। गुणप्रवाह एतस्मिन्नुन्मज्जति निमज्जति॥
१५॥ मया कालशक्तिना धात्रा परमेश्वरेण कर्मफलप्रदेन हेतुभूतेन गुणप्रवाहे संसारे उन्मज्जति निमज्जति। आस
त्यलोकं उत्तमां गतिं प्राप्नोति। पुनर्निमज्जति आस्थावरं नीचां गतिं प्राप्नोति। यद्वा सृष्टिसमये प्रकटी क्रियंते। प्रलयेन
पसंह्रियते। सृष्टिस्थितिरूपेणाद्या द्वितीयात्मप्रतिपन्नार्थं प्रतिपादनाय कारणेन कार्यस्य व्याप्तिमाह। अणुरिति॥ ब॥ अ
णुर्बृहत्कृशः स्थूलो यो यो भावः प्रसिध्यति। सर्वोऽप्युभयसंयुक्तः प्रकृत्या पुरुषेण च॥ १६॥ अनयेन संयुक्तो व्याप्तः। तदेवो
नयमाह। प्रकृत्येति। इदानीं कारणं कार्यात्मा तां दर्शयति। यस्त्विति॥ ब॥ यस्तु यस्यादिरंतश्च स वै मध्यं च तस्य सत्। विका
रो व्यवहारार्थो यथा तैजसपार्थिवाः॥ १७॥ यस्य कार्यस्य यः आदिः कारणं अंतः लयस्थानं च तस्य मध्यावस्थास एव। वैभ
सिद्धं भूतसुवर्णादि भिन्न अव्यभिचारित्वात् स एव सत्। तं न रः। अलं तर्हि मिथ्याभूतकार्यसृष्ट्या तत्राह विकार इति। तैज

मा:कुंडलादयः पार्थिवाः घटशरावादयश्च यथेति। कारणब्रह्मव्यतिरेकेण जगन्नास्तीति भावः। नचैवं तद्दृष्टं कार्यं प्रति
महदहादीनामप्याद्यंतरूपत्वात् सत्यता स्यादित्यत आह॥ब॥ यदुपादाय कार्यं पूर्वभावो विकुरुते परं। आदिरंतो यदाय
स्मिन्तत्सत्यमभिधीयते॥१८॥ यदुपादाय उपादानकारणतया स्वीकृत्य पूर्वः कारणरूपो महदादिर्भावः परं
अहंकारादिकं भावं विकुरुते सृजति यथा पिंडो मृदमुपादाय स्वयं निमित्तभूतो घटं सृजति। तद्ब्रह्म एव सत्यमिति श्री
र्वघ्या। तुरवंगः नन्वत्र तद्दिकं कथं मृत्तिकैव सत्यमित्यादिश्रुतेः। तत्राह। आदिरिति। यदा। यत्तयस्यादिः अंतश्च तदा त
त्सत्यमभिधीयते। क्वचित् परमकारणस्यात्मनः सत्यत्वविवक्षयेत्यर्थः। ननु तथापि सर्वविकारमिथ्यात्वे प्रकृतिपुरु
षकालानां पृथक् सत्यत्वमेष्टव्यं। अन्यथा सृष्टेरेवाभावादित्याशंक्य प्रकृतिमाह। प्रकृतिरिति॥ब॥ प्रकृतिर्यस्योपादा
नमाधारः पुरुषः परः। सतोभिव्यंजकः कालो ब्रह्म तत्त्रितयं त्वयं॥१९॥ अयमर्थः। कार्यस्य उपादानं या प्रकृतिः प्रभि

टी० १८८

न्वायश्च तस्याधारः अधिष्ठाता पुरुषः यश्च गुणक्षोभेण अभिव्यंजकः कालः। तत्त्रितयं ब्रह्मरूपोऽहमेव न पृथक्
प्रकृतेः शक्तित्वात् पुरुषकालयोरवस्थारूपत्वात्। एवं तावत्कालयेष्यनिवारित्वात् ब्रह्मैव सत्यमिति वक्तुं त
स्य सृष्टिकारणत्वेनादौ सत्यत्वमुक्तं मध्ये तस्यैव सत्त्वमुपपादयन्नंतेप्यवधित्वेन सत्त्वं दर्शयिष्यन् सर्गप्रवाह
रूपायाः स्थितेरवधिमाह। सर्ग इति॥ब॥ सर्गः प्रवर्त्तते तावत् पौर्वापर्येण नित्यशः। महान् गुणविसर्गार्थः स्थित्यंतो या
वदीक्षणं॥२०॥ पौर्वापर्येण पितृपुत्रादिरूपेण नित्यशः अविच्छेदेन महान् बहुलः। किमर्थं प्रवर्त्तते तत्राह। गुणेषु
देहेषु विविधतया सृज्यत इति गुणविसर्गो जीवः तदर्थं तद्भोगप्रयोजनः। किंपर्यंतं प्रवर्त्तते यावत् स्थितेरंतः सोपि
किमवधिस्तदाह। यावदीक्षणं। परमात्मनस्तावत् प्रलयं निरूपयति॥ब॥ विराण्मयासाद्यमानो लोककल्पविक
ल्पकः। पंचत्वाय विशेषाय कल्पते भुवनैः सह॥२१ विराट् ब्रह्मांडे। मयाकालात्मनाप्याद्यमानः लोकानामब्ध

दः कल्पाः सृष्टिप्रलया विविधाः कल्प्यंते यस्मिन् तां ताचास्य स्मिन् विकल्पयतीति तथा स तथाभूतोपि पंचत्वरूपा
यविशेषविनाशाय कल्पात योग्यो भवति। पंचानां भूतानामेकरूप। तेषां पृथग्भावापत्या नश्यती त्यर्थः। तत्र तस्मा
द्वा एतस्मादात्मनः आकाशः संभूतः। आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी पृथिव्याः ओषधयः ओषधी
भ्योऽन्नं। अन्नात्पुरुषः। इत्युक्तसृष्टिक्रमप्रातिलोम्येन प्रलयमाह। अन्नेति॥७॥ अन्नं प्रलीयते मर्त्यमन्नं धानासु
लीयते। धाना भूमौ प्रलीयंते भूमिर्गंधे प्रलीयते॥२२ मर्त्यशरीरं। येनोपचितं तस्मिन्नन्ने शतवर्षया मनावृष्ट्या क्षीणे
सति तत्रैव लीयत इत्यर्थः। अन्नं धानासु बीजबीजमात्रावशेषं भवतीत्यर्थः। धाना भूमौ उप्ता न प्ररोहंतीत्यर्थः। भू प.टी.०
मिर्गंधे संवर्तकादित्यशोषिता संकर्षणमुखाग्निना दग्धा सती भूतसूक्ष्मगंधमात्रावशेषा भवति॥७॥ अप्सु प्रली १८९
यते गंधः आपश्च स्वगुणे रसे। लीयते ज्योतिषि रसो ज्योती रूपे प्रलीयते॥२३ अप्सु गंधः शतवर्षयानावृष्ट्या शोषमा

नाप्सु लीयते। एवमेवापश्च वायुना निर्भूयमानं रूपमात्रं सत् तस्मिन् लीयते॥७॥ रूपं वायौ स च स्पर्शे लीयते सो
पि चांबरे। अंबरं शब्दतन्मात्रे इंद्रियाणि स्वयोनिषु॥२४ वायुश्च कालप्रेरितेनांबरेण ग्रस्तः स्पर्शमात्रः सन् तस्मि
न्नंबरे। अंबरं भूतादिनाहंकारेण ग्रस्यमानं शब्दतन्मात्रे तदेवं तामसाहंकारकार्यस्य शब्दपर्यंतं लयमुक्त्वा रा
जसाहंकारकार्यस्याप्याह। इंद्रियाणि स्वयोनिषु प्रवर्तकदेवतासु तेषां प्रवृत्तिसाधनत्वात्। तासु लय इ
ति वाचोयुक्तिः। वस्तुतस्तु स्वकारणे राजसाहंकारे एव लयो निद्रेतः॥७॥ योनिर्वैकारिके सौम्य लीयंते मनसी
श्वरे। शब्दो भूतादिमप्येति भूतादिर्महति प्रभुः॥२५ या यानिरिंद्रियगत चादेकत्वमविवक्षितं। योनयो देवतास्तु म
नसि। कृतः ईश्वरे नियंतरि मनो वशेन्द्रियप्रभवं स्मदेवा इत्यकृच्चात इंद्रियलयोक्त एवोत्रापि निप्रायः। मनश्च देवता
निः महद्विकारिके। अहंकारे इत्यर्थः। तामसाहंकारकार्यविशेषितस्य शब्दस्य लयमाह। शब्दो भूतादितामसा

हंकाररूपेति। तस्मिन् लीयत इत्यर्थः। भूतादिरित्युपलक्षणं। त्रिविधमप्यहंकारो महति जडांशं विहाय शक्तिमात्ररू
पो भवति। कथंभूतः प्रसुप्तः समर्थः। सर्वजगन्मोहकत्वात्॥ छ॥ स लीयते महान् स्वेषु गुणेषु गुणवत्तमः। तेऽव्यक्ते संप्र
लीयंते तत्काले लीयतेऽव्यये॥२६ स च महान् स्वकारणेषु गुणेषु ज्ञानक्रियाशक्तिमत्वात्। गुणसमस्वाज्ञावं विहाय
गुणमात्ररूपो भवतीति। ते गुणा अप्यव्यक्ते प्रकृतौ। साम्यावस्थां गच्छंतीत्यर्थः। तदव्यक्तं काले। कालाधीनत्वात्। तेनैकीभूया
वतिष्ठते। अव्यये उपरतहानौ॥ छ॥ कालो मायामये जीवे जीव आत्मनि मय्यजे। आत्मा केवल आत्मस्थो विकल्पाप
यलक्षणः॥२७ मायामये मायाप्रवर्तके ज्ञानमये वा। अत एव जीवे जीवयतीति जीवः। तस्मिन् महापुरुषे। अयं ना एटी॰
वा। विश्वप्रभुर्महापुरुषस्य उपकरणरूपः। कालं स्वयं स्वेन हृज्यस्य तत्तदात्मनावतिष्ठत इति। तदुक्तं सप्तमे का १९०
लं चरंतं सृजतीश आश्रयं प्रधानपुंभ्यां नरदेव सत्यकृदिति। दशमे च। योऽयं कालस्तस्य तेऽव्यक्तबंधो चेष्टामाहुश्चेष्ट

तेयेन विश्वं। निमेषादिर्वत्सरांतो महीयानतं त्वेशानं क्षेमधाम प्रपद्ये। जीवे आत्मनि लीनत्वेन प्रतियोग्यभावात्
परिशिष्टस्वरूपेणावतिष्ठते। आत्मा चात्मस्थ एव। नान्यत्र लीयते। यतः केवलो निरुपाधिः। अत एव। विकल्पाप
यात्। विश्वोत्पत्तिलयाभ्यां लक्ष्यते। अधिष्ठानत्वेन अवधित्वेन चेति तथा। अस्य कथनस्य प्रस्तुतोपयोगमाह। एवमि
ति॥ छ॥ एवमन्वीक्षमाणस्य कथं वैकल्पिको भ्रमः। मनसो हृदि तिष्ठेत व्योम्नीवार्कोदये तमः॥२८ मनसः कथं नेदनिमि
त्तो भ्रमः स्यात्। जातो वा कथं हृदि तिष्ठेत इति। उपसंहरति। एष इति॥ छ॥ एष सांख्यविधिः प्रोक्तः संशयग्रंथिभेदकः।
प्रतिलोमानुलोमाभ्यां परावरदृशा मया॥२९ प्रतिलोमानुलोमाभ्यां। सृष्टिसंहाराभ्यां। परावरदृशा सर्वज्ञेनेत्यर्थः। प्र
श्नमिव येनेदं दर्शितं तत्त्वमात्मनः। सांख्यं प्रज्ञानतस्तस्मै हरये गुरवे नमः॥१॥ ॥छ॥ ॥ इति श्रीभागवते महापु
राणेकादशस्कंधे भगवदुद्धवसंवादे चतुर्विंशोऽध्यायः॥ ॥छ॥ ॥ पंचविंशे त्वथ नैर्गुण्यप्रतिपत्त्यै निरूप्यते।

विन्नप्रनवसत्वादिगुणवृत्तिरनेकधा॥१॥प्रकृतिपुरुषविवेकज्ञानवतोपियावत्प्रपन्नविशेषेणगुणत्रयवृत्तिज
योनस्यात्तावत्तद्वंधोपरमः॥अतस्तज्जयोपायकथनायगुणस्वरूपनिरूपणार्थमाह।गुणानामितिद्वा
॥ ॥श्रीभगवानुवाच॥ ॥गुणानामसमिश्राणांपुमान्येनयथाभवेत्।तन्मेपुरुषवर्येदमुपधारयशंसतः॥१॥सहि
मिश्रीभूयवर्त्तमानाःसमिश्राःनसमिश्राअसमिश्राःतेषांविभक्तानांमध्येयेनगुणेनयथायादृशोभवेत्तदिदं
कथ्यंयतोमत्तोनिबोधेत्यर्थः।तत्रसत्ववृत्तीराह॥शमोदमइति॥द्वा॥शमोदमस्तितिक्षेक्षातपःसत्यंदयास्मृतिः।तु
ष्टिस्त्यागोऽस्पृहाश्रद्धाह्रीःदयादिःस्वनिर्वृतिः॥२॥तितिक्षाक्षमा।ईक्षाविवेकः।तपःस्वधर्मवर्त्तित्वं।स्मृतिःपूर्वापर एटीए
नुसंधानं।तुष्टिर्यथालाभसंतोषः।अनसूयता।त्यागोद्यशीलत्वं।अस्पृहावैराग्यं।ह्रीःअकर्मणिलज्जा।दया १९१
अकोपनता।आदिशब्देनआर्जवविनयादि।स्वनिर्वृतिःआत्मरतिः।रजसोवृत्तीराह।कामइति॥द्वा॥कामईहाम

विहितकर्मर्थियारः।स्तुब्धइतिदस्तृष्णास्तंभआशीर्भिदासुखं।मदोत्साहोयशःप्रीतिर्हास्यंवीर्यंबलोद्यमः॥३॥कामो
विषयाभिलाषः।मदोदर्पः।तृष्णालाभेप्यसंतोषः।स्तंभः अनम्रता।आशीर्धनाद्यभिलाषेणदेवताप्रार्थनं।भिदा
मन्यःइतिभेदबुद्धिः।सुखंविषयभोगः।मदोत्साहःमदेनयुद्धाद्यभिनिवेशः।यशःप्रीतिः।स्तुतिप्रियता।हास्यंउप
हासः।वीर्यंप्रभावाविष्कारः।बलेनउद्यमः।तमोवृत्तीराह।क्रोधइति॥द्वा॥क्रोधोलोभोऽनृतंहिंसायाच्ञादंभःक्ल
मःकलिः।शोकमोहौविषादार्त्तीःनिद्राशाभीरनुद्यमः॥४॥क्रोधःअसहिष्णुत्वं।लोभोव्ययेपराङ्मुखता।अनृतंअशा
स्त्रीयभाषणं।हिंसाप्राणिद्रोहः।याच्ञाप्रार्थना।दंभःधर्मध्वजित्वं।क्लमःश्रमः।कलिःकलहः।शोकमोहौअनुशो
चनं।भ्रमःइतिकर्त्तव्यतामौढ्यं।विषादार्त्तीदुःखदैन्ये।निद्रातंद्री।आशाइदंमेभविष्यतीत्यपेक्षा।भीःभयं।अनुद्य
मोजाड्यं॥द्वा॥सत्वस्यरजसश्चैतास्तमसश्चानुपूर्वशः।वृत्तयोवर्णितप्रायाःसन्निपातमथोशृणु॥५॥अनुपूर्वशः

क्रमेण एताः श्लोकत्रयोक्ताः वर्णितप्रायाः अन्यास्त्रयस्तूह्या इति भावः । विरक्तानां गुणानां वृत्तयो वर्णिताः मिश्राणामाह
त्रिभिः ॥ सन्निपात इति ॥ ब ॥ सन्निपातस्त्वहमिति ममेत्युद्धवया मतिः ॥ व्यवहारः सन्निपाते मनोमात्रेन्द्रियासुभिः ॥ इत्यहं
ममेति विमता बुद्धिः सर्ववृत्तिसामानाधिकरण्यदर्शनात् सन्निपातजत्वं । कामी क्रोधी इत्यादि तथा ममशांतिरस्मिकामः क्रोध
इत्यादि द्रष्टव्यं । तत्पूर्वकः सर्वोऽपि व्यवहारश्च सन्निपातकार्यमित्याह ॥ व्यवहार इति । अत्र हेतुः । मनश्च मात्राणि च असवश्च
तैः मनआदीनां सात्त्विकनामसराजसत्वात् व्यवहारः सन्निपातज इति भावः । पुनरपि व्यवहारः सन्निपातो दर्शयति धर्मेति
वाक्यां ॥ ब ॥ धर्मे चार्थे च कामे च यदासौ परिनिष्ठितः ॥ गुणानां संनिकर्षोऽयं श्रद्धारतिधनावहः ॥ ७ असौ पुरुषो यदा धर्मादि एटी
षु परिनिष्ठितो भवति तदा अयं त्रिषु निष्ठा तच्च तथा चमाह । श्रद्धारतिधनानि । सत्त्वरजस्तमोमयान्यावहतीति तथा ॥ ध १९२
र्मनिष्ठायामेव सन्निपातं दर्शयति प्रवृत्तीति ॥ ब ॥ प्रवृत्तिलक्षणे निष्ठा पुंसो यर्हि गृहाश्रमे स्वधर्मे चानुतिष्ठेत गुणानां स

मितिर्हि सा ॥ ८ प्रवृत्तिलक्षणे काम्ये धर्मे यदा पुंसो निष्ठा भवति तथानुमानं यदा गृहाश्रम एवासक्तः सन् तिष्ठेत । अनु
पश्चात् स्वधर्मे नित्ये नैमित्तिके तिष्ठेत् सापि समितिः सन्निपातः । दिय स्मात् काम्यकर्म रजः सत्त्वं तमोमया इत्यर्थः । तदे
वं मिश्रामिश्रगुणवृत्तीः प्रदर्श्य इदानीमनुमानं येन यथा भवेदिति यदुक्तं तद्दर्शयति । पुरुषमिति त्रिभिः ॥ ब ॥ पुरुषं स
त्त्वसंयुक्तमनुमीयाच्छमादिभिः । कामादिभी रजोयुक्तं क्रोधाद्यैस्तमसा युतं ॥ ९ यदा भजति मां भक्त्या निरपेक्षः स्वक
र्मभिः । तं सत्त्वप्रकृतिं विद्यात्पुरुषं स्त्रियमेव वा ॥ १० यदा आशिष आशास्य मां यजेत स्वकर्मभिः । तं रजःप्रकृतिं विद्या
त् हिंसामाशास्य तामसं ॥ ११ हिंसां शत्रुमरणादिकमाशास्य यो मां भजति तं तामसं विद्यात् । एते गुणैरेवं भूतो भ
वतीति तात्पर्यार्थः । ननु तथापि गुणवशेन कर्तृत्वाविशेषात् कथं विशेषेण सत्त्वस्थं जीवस्य भवेत्का । यतो मां वारं
वारं भजेऽभ्यच्यते । तत्राह । सत्त्वमिति ॥ ब ॥ सत्त्वं रजस्तम इति गुणा जीवस्य नैव मे । चित्तजा यैस्तु भूतानां सज्जमानो नि

बध्यते॥१२॥जीवंबध्नन्मोहकृतः।यतश्चित्तजाजीवोपाधयोवित्तेषुनिबध्यन्ते।अतस्तैःसएवबध्यते।कीदृशाः।भूतानां
देहरूपाणांअन्येषांचमध्येसज्जमानाः।अदृढत्वनासक्तमानो।गुणानियंत्रत्वेनसृष्ट्यादिकर्त्रापिनियुक्ताः।अतोम
हानविशेषइतिभावः।यदाभूतानामपंचीकृतानांयकार्यभूतंवित्तंअन्नमयंहिसोम्यमनइतिश्रुतेः।तत्सजनवात्।च
तोयद्वितस्याजीवस्योपाधिरिति।अध्यस्यमानं।तदेवंमिश्रामिश्रगुणकार्याणिप्रदर्श्यइदानींएकैकगुणोद्रेककार्याणिदर्शय
ति।यदेतिसप्तदशभिः॥टी॥यदेतरौजयेत्सत्त्वंभास्करंविशदंशिवं।तदासुखेनयुज्येतधर्मज्ञानादिभिःपुमान्॥१३॥यदा
पुमानितरौरजस्तमोप्रयत्नविशेषेणजयेत।अभिभवेत।कथंभूतंसत्वं।भास्करं।प्रकाशकं।विशदंस्वच्छंविशदंशि ए०टी०
वंशांतं।शिवत्वविशदत्वभास्करत्वानियथाक्रमंसुखधर्मज्ञानहेतुत्वेनयुज्येत।आदिशब्दात्शमदमादिभिश्च॥टी॥यदा १९३
जयेत्तमःसत्वंरजःसंगंभिदाबलं।तदादुःखेनयुज्येतकर्मणायशसाश्रिया॥१४॥तमःसत्त्वंचकर्मभूतंरजः।कर्तृभूतंसंगं

संगहेतुः।भिदाभेदहेतुः।बलंप्रवृत्तिस्वभावं।अतःसंगहेतुत्वात्यशसाश्रियावयुज्येत।तत्कामःपुमान्भवतीत्यर्थः।
भिदाहेतुत्वात्दुःखेनयुज्येत।द्वितीयार्धेभयंभवतीतिश्रुतेः।बलत्वात्कर्मयुज्येत।तत्कामःपुमान्भवतीत्यर्थः॥टी॥
यदाजयेद्रजःसत्त्वंतमोमूढंलयंजडं।युज्यतेशोकमोहाभ्यांनिद्रयाहिंसयाशया॥१५॥यदारजःसत्वंचकर्मभूतंतमःक
र्तृयजेत।तदाशोकमोहादिनायुज्यात।मूढंविवेकभ्रंशकं।लयं।आवरणात्मकं।अतोमूढत्वात्शोकमोहहिंसाभिः।लय
त्वान्निद्रया।जडत्वात्उद्यमाभावेनकेवलमाशयायुज्येतेतिद्रष्टव्यं॥टी॥यदाचित्तंप्रसीदेतइंद्रियाणांचनिर्वृतिः।दे
हेभयंमनोसंगंतत्सत्वंविद्धिमेपदं॥१६॥यचित्तंप्रसीदेत।स्वच्छंभवेत।इंद्रियाणांचनिर्वृतिःउपरतिः।तत्रदामसदंमदुपलब्धि
स्थानं।सत्वप्रधानंविद्धि॥टी॥विकुर्वन्क्रिययाचाधीरनिर्वृतिश्चचेतसां।गात्रास्वास्थ्यंमनोभ्रांतंरजएतैर्निशामय॥१७
यदामनःक्रियया विकुर्वन्विकारंप्राप्नुवन्आधीरभवति।असमंताद्धिर्बुद्धिर्यस्य।चेतसांबुद्धीन्द्रियाणांचनिर्वृत्तिःमात्रा

णिकर्मेंद्रियाणितेषांअवस्थां॥विकाराधिक्यं॥मनोभ्रांतं॥चंचलं॥तदारजः॥उत्कटंनिशामयजानीहि॥ब॥सीदच्चित्तंविली
यतेचेतोग्रहणेऽक्षमं॥मनोनष्टंतमोग्लानितमस्तदुपधारय॥१८ यदासीदत्तिरोभवत्चेतसोग्रहणेचिदाकारपरिण
मेऽक्षमंसत्।चित्तंविलीयेत।मनोपिसंकल्पात्मकंनष्टंलीनं।तमोऽज्ञानंग्लानिर्विषादश्चभवति।तत्तदातातमउत्कटं
उपधारयविजानीहि॥ब॥एधमानेगुणेसत्त्वेदेवानांबलमेधते।असुराणांचरजसितमस्युद्धवरक्षसां॥१९ इंद्रियाणि
वनिवृत्तिप्रवृत्तिमोहरूपाणिवानिदेवासुररक्षांसि।गुणोत्कर्षतोदेहावस्थाभेदंदर्शयति॥ब॥सत्त्वाज्जागरणंविद्याद्रज
सास्वप्नमादिशेत्।प्रस्वापंतमसाजंतोः॥तुरीयंत्रिषुसंततं॥२०प्रसंगान्निर्गुणावस्थामाह।तुरीयंचतुर्थमवस्थांतरंनाम ए०टी०प
त्रिषुजागरणादिषुसंततमनुगतएकरूपंआत्मतत्त्वमेवेत्यर्थः॥गुणोत्कर्षवशेनतत्तत्कर्मफलनिष्ठांदर्शयति।उपरीति॥ १९५
ब॥उपर्युपरिगच्छंतिसत्त्वेनब्राह्मणाजनाः॥तमसाधोधआमुख्याद्रजसांतरचारिणः॥२१ ब्राह्मणाःवेदार्थनिष्ठानानि

युक्ताः।आब्रह्मणइतिपाठेब्रह्मलोकमभिव्याप्येत्यर्थः।आमुख्यान्स्थावरान्अभिव्याप्यअंतरचारिणमनुष्याएवंभवं
ति।देहाक्रांतिकालेनगुणोत्कर्षफलमाह।सत्त्वेति॥ब॥सत्त्वेप्रलीनाःस्वर्यांतिनरलोकंरजोलयाः।तमोलयास्तुनि
रयंयांतिमामेवनिर्गुणाः॥२२सत्त्वेप्रवृद्धेसतिप्रलीनामृताः।रजोलयारजसिप्रवृद्धेसतिलयोयेषांते।एवंतमोलयाइत्य
र्थः।इदानींगुणोत्कर्षकृतमेवतत्फलसाधनकर्मत्रिविधमाह।मदर्पणमिति॥ब॥मदर्पणंनिःफलंवासात्त्विकंनिज
कर्मतत्।राजसंफलसंकल्पंहिंसाप्रायादितामसं॥२३मदर्पणंमत्प्रीत्युद्देशेनकृतंनिष्फलंकेवलंदासभावेनैवकृतं
यन्निजंकर्मनित्यादितत्सात्त्विकं।फलंसंकल्प्यतेयस्मिन्तत्।हिंसाप्रायंहिंसोद्देशेनकृतंहिंसाबाहुल्यंवा।आदिशब्दा
द्दंभमात्सर्यादिकृतंतत्।इदानींसगुणनिर्गुणभेदेनज्ञानादीनांचातुर्विध्यमाह।कैवल्यमिति॥ब॥कैवल्यंसात्त्विकंज्ञा
नंरजोविकल्पिकंतुयत्।प्राकृतंतामसंज्ञानंमन्निष्ठंनिर्गुणंस्मृतं॥२४कैवल्यंदेहात्मादिव्यतिरिक्तात्मज्ञानंवैकल्पिकं

देहादिविषयं।यत्तज्जः राजसं प्राकृतं बालमूकादिज्ञानतुल्यं।मन्निष्ठं परमेश्वरविषयं।वासेपि त्रैगुण्यमाह।वनमिति।
बा॥वनं तु सात्विको वासो ग्रामो राजस उच्यते।तामसं द्यूतसदनं मन्निकेतं तु निर्गुणं॥२५ वनं विविक्तत्वात् सात्विको वास
भगवन्निकेतं तु साक्षात्तदाविर्भावात् निर्गुणं स्थानं कर्त्तृत्रैविध्यमाह।बा॥सात्विकः कारकोऽसंगी रागांधो राजसः स्मृतः।
तामसः स्मृतिविभ्रष्टो निर्गुणो मदपाश्रयः॥२६ कारकः कर्त्ता असंगी अनासक्तः।रागांधः अत्यभिनिवेशवान्।स्मृतिविभ्र
ष्टः अनुसंधानशून्यः।मदपाश्रयः।मदेकशरणः।स हि निरहंकारित्वान्निर्गुणः।श्रद्धायां त्रैविध्यमाह।सात्विकीति।बा॥सा
त्विक्याध्यात्मिकी श्रद्धा कर्मश्रद्धा तु राजसी।तामस्यधर्मे या श्रद्धा मत्सेवायां तु निर्गुणा॥२७ अधर्मे धर्म इति या श्रद्धा।आहारे ए.टी.०
त्रैविध्यमाह।पथ्यमिति।बा॥पथ्यं पूतमनायस्तमाहार्यं सात्विकं स्मृतं।राजसं चेंद्रियप्रेष्टं तामसं चार्त्तिदाशुचि॥२८ १९५
पथ्यं हितं परिणामे सुखकरं।पूतं शुद्धं।स्वधर्मतः प्राप्तं।अनायासं अनायासतः प्राप्तं।आहार्यं भक्ष्यभोज्यादि।इंद्रियाणां प्रे

ष्टं कटुम्ललवणादि।आर्त्तिदं अशुचि दैन्यकरमशुद्धं च।व्रतशस्त्यादात्मनिवेदितं निर्गुणमिच्य।निश्चेतं॥बा॥सात्विकं
सुखमात्मोत्थं विषयोत्थं तु राजसं।तामसं मोहदैन्योत्थं निर्गुणं मदपाश्रयं॥२९ आत्मोत्थं सुखं।मदपाश्रयं मद्भक्तिज
यं।उक्तं शेषार्थं देहद्भूतं त्रैगुण्यमुपसंहरति।द्रव्यमिति द्वाभ्यां॥बा॥द्रव्यं देशः फलं कालो ज्ञानं कर्म च कारकः।श्रद्धा
वस्थाकृतिर्निष्ठा त्रैगुण्यः सर्व एव हि॥३० द्रव्यं पथ्यपूतादि।देशो वनग्रामादिः।फलं सात्विकं सुखमित्यादि।कालः यदा
भजेत मां भक्त्या।यदेतरोऽजयेदित्यादिना।ज्ञानं कैवल्यं सात्विकं ज्ञानमित्यादिः।कारकः सात्विकः।कारकोऽसंगीत्यादि।श्रद्धा सा
त्विक्याध्यात्मिकीत्यादिः।अवस्था सत्वाज्जागरणादिमित्यादिना।आकृतिः उपर्युपरि गच्छतीत्यादिनोक्ता देवादिरूपा।निष्ठा स
त्वे प्रलीना स्वर्यांतीत्यादिनोक्ता स्वर्गादिः।एवं सर्वोप्येवं च भावः॥त्रिगुण एव त्रिगुणात्मकः॥बा॥सर्वे गुणमया भावाः पुरुषाव्य
क्तधिष्ठिताः।दृष्टं श्रुतमनुध्यातं बुद्ध्या वा पुरुषर्षभ॥एताः संसृतयः पुंसो गुणकर्मनिबंधनाः॥३१ या वेताः पुरुषाव्यक्तयोर्धि

ष्ठिता अधिष्ठिताः ते सर्वे भावा गुणमयाः ॥ तत्प्रपंचः । दृष्टं श्रुतमिति । इदानीमुक्तेभ्यो गुणानां संसारहेतुत्वमनुवदन् तन्निर्जयान्मो
क्षमाह । एता इति सार्द्धेन ॥ ३ ॥ एताः संसृतयः पुंसो गुणकर्मनिबंधनाः । येनेमे निर्जिताः सौम्य गुणा जीवेन चित्तजाः ।
भक्तियोगेन मन्निष्ठो मद्भावाय प्रपद्यते ॥ ३१ ॥ येन निर्जिताः स पश्चाद्विविक्तेन भक्तियोगेन मन्निष्ठः सन् मद्भावाय मोक्षा
य प्रपद्यते योग्यो भवति । तस्माद्विविक्तेनेदमेव युक्तमित्याह । तस्मादिति ॥ ३ ॥ तस्माद्देहमिमं लब्ध्वा ज्ञानविज्ञान
संभवं । गुणसंगं विनिर्धूय मां भजेत विचक्षणाः ॥ ३२ ॥ ज्ञानविज्ञानयोः संभवो यस्मिन् । तमिमं नरदेहं । भजनप्रकारमाह
निःसंग इति सार्द्धेन ॥ ३ ॥ निःसंगो मां भजेद्विद्वानप्रमत्तो जितेंद्रियः । यया भक्त्यानपायिन्या सर्वान्कामानुपाश्रितो ॥ ३३ ॥ एदी०
रजस्तमश्चाभिजयेत्सत्त्वसंसेवया मुनिः ॥ सत्त्वं चाभिजयेद्युक्तो निरपेक्षः प्रशांतधीः ॥ ३४ ॥ सत्त्वं संसेवया सात्त्विकान्येव सेवे १९६
त इत्याह । सत्त्वविवृद्धये इति प्रागुक्त्या ॥ निरपेक्ष्येण उपशमात्मकेन सत्त्वेनैव । एवं च सति मां प्राप्नोतीत्याह । संपद्यत इति ।

॥ ३ ॥ संपद्यते गुणैर्मुक्तो जीवो जीवं विहाय मां । जीवो जीवेन निर्मुक्तो गुणैश्चाशयसंभवैः ॥ मयैव ब्रह्मणा पूर्णो बहिर्नां
तरश्चरेत ॥ ३५ ॥ जीवं जीवत्वकारणं लिंगशरीरं । मां प्राप्य पुनः संसारस्त्याह । जीव इति ॥ ३ ॥ न बहिर्विषयानो
गेन । नांतरः तत्स्मरणेन ॥ ३ ॥ गुणस्तता गुरुसंसारणप्रजामजितपुण्यकथाकथनादिभिः । भुंजतन्निरसेन विवे
किनो न दिग्गतः सुलभेन ज्ञानुरी हृशं ॥ ३ ॥ ॥ ॥ इति श्रीभागवते महापुराणे एकादशस्कंधे श्रीकृष्णोद्धवसंवादे गु
णवृत्तिनिरूपणं नाम पंचविंशोऽध्यायः ॥ ॥ ३ ॥ ॥ षड्विंशे योगनिष्ठाया विघ्नातो दुष्टसंगतः । साधुसंगेन तन्निष्ठा
परकोऽपेति वर्ण्यते ॥ १ ॥ योगिनो योगविघ्नः दुःसंगतः संभवेदिति । स यथा तन्निरस्य स्थिरैलगीतं वितन्यते ॥ २ ॥ निःसंगो
मां भजेद्विद्वानप्रमत्तो जितेंद्रियः । इत्युक्तं । तत्र विपक्षेऽनर्थं कथयिष्यन् जीवन्मुक्तस्यापि तद्दुःसंगो दुर्निवार इत्ययं
स्यादित्याशंक्योक्तानुवादपूर्वकं परिहरति सार्द्धाभ्यां ॥ ३ ॥ ॥ श्रीभगवानुवाच ॥ ॥ मल्लक्षणमिमं कायं लब्ध्वा मद्

१८८

मर्म्रास्थिता॥ आनंदं परमात्मानमा[त्म]स्थं समुपैति मां॥१॥ मल्लक्षणं मत्स्वरूपं लक्ष्यते येन तमिमं नरदेहं लब्ध्वा म
द्धर्मे स्ति किल लक्षणो आस्थितः मनुष्यात्मन्येव नियं हृद्येन स्थितं परमानंदमद्रूपमात्मानं मां समुपैत्य सम्यक् प्राप्नो
ति॥ न विविक्तस्तस्य विषयसंगो नामास्तीत्याह॥ गुणमय्येति॥ ब॥ गुणमय्या जीवयोन्या विमुक्तो ज्ञाननिष्ठया॥ गुणेषु
मायामात्रेषु दृश्यमानेष्ववस्तुतः॥ वर्तमानोपि न पुमान्युज्यतेऽवस्तुभिर्गुणैः॥२॥ गुणमयी या जीवयोनिः जीवोपाधिः
स्तया विमुक्तः गुणेषु वर्तमानोपि तैर्न युज्यते संगं न प्राप्नोति॥ अत्र हेतुः॥ अवस्तुभिः न च वस्तुभिरयन्ते युज्यमाना द
श्यंते॥ तत्राह॥ अवस्तुत्वेन दृश्यमानेषु तथापि संगं विसृज्येदित्याह॥ ब॥ संगं न कुर्यादसतां शिश्नोदरतृपां क्वचि ए२।०
त्॥ तस्यानुगस्तमस्यंधे पतत्यंधानुगांधवत्॥३॥ असतां लक्षणमाह॥ शिश्नोदरे तर्पयंतीति शिश्नोदरतृपः ते १८७
षां॥ क्वचित्कदाचिदपि॥ आस्तां तावद्बहूनां संगः॥ किंतु तस्यैकस्याप्यनुगः अनुवर्ती सन्॥ अंधं मनुगच्छति योंध

स्वहत्॥ अथेति द्वाभ्यामाह॥ ब॥ ऐलः सम्राडिमां गाथामगायत बृहच्छ्रवाः॥ उर्वशीविरहान्मुह्यन्निर्विण्णः शोकसं
गमे॥४॥ ऐलः पुरूरवाः सम्राट् चक्रवर्ती॥ बृहच्छ्रवाः कीर्तिर्यस्य सः॥ उर्वशीविरहात्प्रथमं मुह्यन् पश्चात् कुरुक्षेत्रे तां
समागम्य गंधर्वदत्तेनाग्निना देवानिष्ट्वा गत्वा नरुर्वशीलोकं प्राप्य शोकापगमे सति॥ ततो निर्विण्णः सन्निमां गाथाम
गायतेति नवमस्कंधानुसारेण द्रष्टव्यं॥ तस्य प्राक्तनीं मोहावस्थामाह॥ त्यक्त्वेति॥ ब॥ त्यक्त्वात्मानं व्रजंतीं तां नग्न उन्म
त्तवन्नृपः॥ विलपन्नन्वगाज्जाये घोरे तिष्ठेति विक्लवः॥५॥ घोरे तिष्ठेति॥ हे जाये मनसा तिष्ठ घोरे वचांसि मिश्राणि क्षणं वा
वदैहि॥ न नौ मंत्रा अनुदिताः सन्तः ते मयस्करन्परतरे चनाहन्नित्येवं मंत्रैर्विलपन्॥ वैक्लव्ये कारणमाह॥ कामानिति॥ ब॥
कामानतृप्तोनुजुषन् क्षुल्लकान्वर्षयामिनीः॥ न वेद यांतीर्नायांतीरुर्वश्याकृष्टचेतनः॥६॥ वर्षाणि यामिनीः रात्रीः यांतीः अ
पयांतीः॥ आयंतीः आगामिनीः॥ आकृष्टा चेतना यस्य सः॥ तस्य गंधर्वलोकं प्राप्तस्य बहुकालमुर्वशीसंयोगानंतरं निर्विण्ण

षपूगाथामाहाष्टादशभिः॥ तत्राष्टभिस्तुतापः प्रपंच्यते। अहो इति॥ बा॥ ॥ऐल उवाच॥ ॥अहो मे मोहविस्तारः काम
कश्मलचेतसः॥ देव्या गृहीतकंठस्य नायुःखंडा इमे स्मृताः॥७ यतो मया इमे अहोरात्ररूपा आयुःखंडाः न स्मृताः॥
तदेवाह॥ नाहमिति॥ बा॥ नाहं वेदाभिनिर्मुक्तः सूर्योवाभ्युदितोऽमुया॥ मुषितो वर्षपूगानां बताहानि गतान्युत॥८
अभिनिर्मुक्तः अयिरममाणः प्रस्तंगतः अभ्युदितो वा सूर्य इति अमुया उर्वश्या वंचितः। बत खेदे। उत अपि। वर्षपूगाना
मपिगतान्यहानि न वेदेति॥ बा॥ अहो मे आत्मसंमोहो येनात्मा योषितां कृतः॥ क्रीडामृगश्चक्रवर्ती नरदेवशिखाम
णिः॥९ येन संमोहेन। आत्मा देहः। क्रीडामृगोऽधीनः॥ नत्नुप्रणयक्षपितायाअन्नुनयार्थमधीनतायुक्तैवा॥ सम्राट्॥ नन्वत्र ए०टी०
तदस्तीत्याह॥ बा॥ सपरिच्छदमात्मानं हित्वा तृणमिवेश्वरं॥ यांतीं स्त्रियं चान्वगमं नग्न उन्मत्तवद्रुदन्॥१० सपरिच्छदं रा १९८
ज्यादिसहितं॥ ईश्वरं चक्रवर्तिनं तृणमिव त्यक्त्वा यांतीमपि अन्वगमं अनुगतोऽस्मि॥ किंच॥ ममप्रभावाद्यभिमानो नष्ट

इत्येवेत्याह॥ बा॥ कुतस्तस्यानुभावः स्यात्तेज ईशत्वमेव वा॥ योऽन्वगच्छं स्त्रियं यांतीं खरवत्पादताडितः॥११ कुतः। तस्य
मे तेजो बलं। खरो यथा पादताडितोऽपि खरीमनुगच्छति तद्वत्। एवंभूतस्य सर्वसाधनं व्यर्थमित्याह॥ किमिति॥ बा॥ किं
विद्यया किं तपसा किं त्यागेन श्रुतेन वा॥ किं विविक्तेन मौनेन स्त्रीभिर्यस्य हृतं मनः॥१२ त्यागेन सन्न्यासेन। विविक्तेन एकां
तसेवया। मौनेन वाङ्नियमेन। अत्र तत्र सन्न्यासमात्मानं निंदति द्वाभ्यां॥ स्वार्थस्येति॥ बा॥ स्वार्थस्याकोविदं धिङ्मां मूर्खं पंडितमा
निनं॥ योऽहमीश्वरतां प्राप्य स्त्रीभिर्गोखरवज्जितः॥१३ अकोविदमज्ञातारं। गोखरवत् गोरिव खर इवेति॥ बा॥ सेवतो वर्ष
पूगान्मे उर्वश्या अधरासवं॥ न तृप्यत्यात्मभूः कामो वह्निराहुतिभिर्यथा॥१४ अधरासवं सेवमानस्य आत्मभूः मनसिभूर्न
तुनरुद्धवन्॥ एवमष्टभिर्निर्वेदो निरूपितः॥ इदानीं तस्य विवेकमाह॥ पुंश्चल्येति द्वाभ्यां॥ बा॥ पुंश्चल्यापहृतं चित्तं को न्व
न्यो मोचितुं प्रभुः॥ आत्मारामेश्वरमृते भगवंतमधोक्षजं॥१५ अयं भावः। कर्मनिर्दिष्टानिष्टादुःखमेव प्राप्तोऽस्मि॥ अतः परमे

श्वरमेव न जेयमिति। परमेश्वरप्रसादं विना देवैरुपदिष्टादपि वेदवाक्यान्मोहो न निवर्त्तत इत्याह। बोधितस्यापी
ति।। ब।। बोधितस्यापि देव्या मे स्ववक्त्रवाक्येन दुर्मतेः। मनोगतो महामोहो नापयात्यजितात्मनः।।२६।। देव्यानुवर्ण्यासू
क्तवाक्येन यथार्थवचनेन। दुर्मतेर्वामामार्गगामाप्रपन्नो मायावाहकाः सो अशिवासनः रूप। नाविद्येऽणानिसस्थानिसंगतिसो
लाहकाणां हृदयाच्चेतान्यनेन। पुंश्चल्यापहृतं चित्तमित्यादिना तस्यात्र उपकारो। को नु स्मृतः। इदानीमिमेवायमपरा
धइत्याह। किमेतयेति।। ब।। किमेतया नोपहृतं तेरह्या वा सर्पचेतसः। रज्जुस्वरूपाविदुषो यो द्वय्यदजितेन्द्रियः।।२७।। नात्र
स्माकं कामिना एतया किं। अपहृतं न किंचिदपि। यथा रज्जुस्वरूपाविदुषो रज्जुं दृष्टुं पुंसः तस्यां सर्पकल्पनया खिद्यते ८१।०
पि रह्मा किं अपहृतं किमनापहृतं तद्वत्। यस्मात् तयोर्द्वयमेवं न तत्। स एवाजितेन्द्रियत्वादपराधीत्यर्थः। ननु तथापि सोऽगंध्या १९९
त्मादिगुणैः संमोहः। लं मिथ्याशंक्यते पित्रा परिकल्पिता एतावेवेत्याह चतुर्भिः। काथमिति।। ब।। कायं मलीमसः का

यो देहोऽगंधस्याप्यात्मको शुचिः। कगुणाः सोमनस्या याद्य धासो विद्ययान्नतः।।२८ मलीमसः अतिमलिनः। सुमनोऽकुसुमाना
मिवगंधसो कमा यदि सो मनस्यं। शोभनमनो नावो वा। ममत्वमपि तस्यां परिकल्पितमेवेत्याह।। ब।। पित्रोः सक्किंतु नायर्यया
स्वामिनोग्नेः श्वगृध्रयोः। किमात्मनः किंसुहृदामिति योनावसीयते।।२९ पित्रोः सत्किं कायः। जनकत्वात्। नु इति वितर्के। भा
र्यया वा भोगप्रदत्वात्। अत्रान्तु पयुक्तमपि एतत्न्यायवल्लभ्यत्वाडुक्तं। स्वामिनो वा। अधीनत्वात्। अग्नेर्वा। अंते दुग्धृतदाहुति
त्वात्। श्वगृध्रयोर्वा। भक्ष्यत्वात्। किंवा आत्मनः। तत्र तन्नाशे नानोगित्वात्। सुहृदांवा। उपकारित्वात्। एवं योनानिश्चीय
ते।। ब।। तस्मिन्कलेवरेऽमेध्ये तुच्छनिष्ठे विषज्जते। अहो सुभ्रूः सुनसं सुस्मितं च मुखं स्त्रियः।।३०।। तुच्छान्तमितिदिग्ध्यम लक्षणा
निष्ठा अंतो यस्य तस्मिन् कलेवरे प्रियत्वेन गृहीता। विषंगमेवाह। अहो इति। सुनसं शोभननासिकं। अतो गुणारोपेणार
ममाणामाहस्वीः। त्वमसिमाइत्याह।। ब।। त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंहतौ। विण्मूत्रपूयैरमतां क्रिमीणां कियदंतरं।

॥२१त्वगादिसंहितोतत्संघातेतदाह।विण्मूत्रादिसंहतोरमतांकृमीणांवा॥बा॥अथापिनोपसज्जेतस्त्रीषुस्त्रैणेषुचात्मवित्
विषयेंद्रियसंयोगान्मनःक्षुभ्यतिनान्यथा॥२२यद्येष्येवेषीनस्थिताएवस्त्रियःअथापिनोपसज्जेत।तत्रचलोकनादिनापि
संगंनकुर्यात्।अर्थावितविवेकी।अत्रहेतुः।विषयेति।ननुकश्चिन्निमीलितनयनादेरपिमनःक्षोभोदृश्यते।सत्यं।सोपिद्व
र्दर्शनादिकंविनानभवतीत्याह।अदृष्टादिति॥बा॥अदृष्टादश्रुताद्भावान्नभावउपजायते।असंप्रयुंजतःप्राणान्
शाम्यतिस्तिमितंमनः॥२३भावावासदायति।भावोमनःक्षोभः।अतःप्राणानिंद्रियाणि।असंप्रयुंजतःनियच्छतः॥स्तिमि
तंनिश्चलंसत्॥बा॥तस्मात्संगोनकर्तव्यःस्त्रीषुस्त्रैणेषुचेंद्रियैः।विदुषामप्यविश्रब्धःषड्वर्गःकिमुमादृशां॥२४इंद्रियैः ए०टी०
सह॥अविश्रब्धःअविश्वसनीयः।मादृशांअविवेकिनां।फलितमाहद्वाभ्यांएवमिति॥बा॥ ॥श्रीभगवानुवाच॥ ॥ २००
एवंप्रगायन्नरदेवदेवःसउर्वशीलोकमथोविहाय।आत्मानमात्मन्यवगम्यमांवैउपारमज्ज्ञानविधूतमोहः॥२५द

पेषुदेवेषुनदीव्यतीतितथा॥बा॥ततोदुःसंगमुत्सृज्यसत्सुसज्जेतबुद्धिमान्।संतएतस्यछिंदंतिमनोव्यासंगमुक्ति
भिः॥२६मुक्तिभिर्हेतोरितितीर्थदेवादिसंगादपिसत्संगःश्रेयानितिदर्शयति।सतांलक्षणमाह॥संतइति॥बा॥संतो
ऽनपेक्षानिःसंगामच्चित्ताःसमदर्शिनः॥निर्ममानिरहंकारानिर्द्वंद्वानिःपरिग्रहाः॥२७विशेषणाष्टकस्ययथेष्टंहेतुम
त्वावा।नचतेषूपदेशापेक्षापिकेवलंतत्सन्निधिरेवतारयतीत्याह।तेष्वितिसप्तभिः॥बा॥तेषुनित्यंमहाभागमहाभा
गेषुमत्कथाः।संभवंतिहितानृणांजुषतांप्रपुनंत्यघं॥२८तायेशृण्वंतिगायंतिह्यनुमोदंतिचादृताः।मत्पराःश्रद्दधानाश्च
भक्तिंविंदंतितेमयि॥२९श्रवणादिभिरेवमत्पराःश्रद्धानाश्चसंतोभक्तिंविंदंति॥बा॥भक्तिंलब्धवतःसाधोःकिमन्यद
वशिष्यते।मय्यनंतेगुणेब्रह्मण्यानंदानुभवात्मनि॥३०यथोपश्रयमाणस्यभगवंतंविभावसुं।शीतंभयंतमोप्येति
साधून्संसेवतस्तथा॥३१विभावसुमग्निंसेवमानस्य।अप्येतिनश्यति।तथाकर्मादिजाड्यं।आगामिसंसारभयं।त

न्मूलमज्ञानं च नश्यतीत्यर्थः॥ ब॥ निमज्ज्योन्मज्जतां घोरे भवाब्धौ परायणं। संतो ब्रह्मविदः शांता नौर्दृढेवाप्सु मज्जतां।
॥ ३२॥ निमज्ज्योन्मज्जतामुच्चावचयोनीर्गच्छतां। परायणं परमाश्रयः॥ ब॥ अन्नं हि प्राणिनां प्राण आर्तानां शरणं त्वहं॥
धर्मो वित्तं नृणां प्रेत्य संतोऽर्वाग्बिभ्यतोऽरणं॥ ३३॥ किंच। यथान्नमेव प्राणाः जीवानां यथाहमेव यथा शरणं। धर्म एव यथा प्रे
त्य परलोके वित्तं। तथा संत एवार्वाक् संसाराद्यातनाद्बिभ्यतः पुंसः अरणं शरणं। किंच॥ ब॥ संतो दिशंति चक्षूंषि ब
हिरर्कः समुत्थितः। देवता बांधवाः संतः संत आत्माहमेव च॥ ३४॥ संतश्चक्षूंषि सम्यग्ज्ञाननिमित्तानि। अर्कः पुनः सम्य
गुपस्थितो बहिर्दृष्ट्येकमेव चक्षुरित्यर्थः। अध्यायार्थमुपसंहरति। वैतसेन इति॥ ब॥ वैतसेनस्ततोऽप्येवमुर्वश्या लो एटी०
कनिःस्पृहः। मुक्तसंगो महीमेतामात्मारामश्चचार ह॥ ३५॥ पशुक्रमभावेनोपवनं प्रविष्टस्य वीतासेनाम्न्याः श्रीभावप्र २०१
शायस्य स्त्रीभावं प्राप्तस्य पुत्रो वैतसेनः पुरूरवाः एवमुक्तप्रकारेणोर्वश्या लोकात् स्थानात् अवलोकनाद्वा निःस्पृ

हः ततोऽपि संगादपि हेतोर्मुक्तसंगः सन्नात्मारामो भूत्वा यथेष्टं चचारेति॥ ब॥ ॥ ॥ इति श्रीभागवते महापुराणे
एकादशस्कंधे भगवदुद्धवसंवादे ऐलगीतं नाम षड्विंशोऽध्यायः॥ ॥ ब॥ ॥ सप्तविंशे क्रियायोगः संक्षिप्तश्च प्र
सादकः॥ सर्वकामाप्तिहेतुश्च सांगः प्रोक्तः समासतः॥ २॥ रागाद्याकुलचित्तानां कृतासंगादिसंभवः॥ इति ब्रह्मा
र्चनं नदमनुस्मृत्यानुपृच्छति॥ २ क्रियायोगमिति॥ ब॥ ॥ उद्धव उवाच॥ ॥ क्रियायोगं समाचक्ष्व भवदाराध
नं प्रभो॥ यस्मात्त्वां ये यथार्चंति सात्वताः सात्वतर्षभ॥ १॥ भवदाराधनं रूपं। यस्मादिति करणाधिष्ठानादिप्रश्नः। सर्वस्मा
रणकारणं निमित्तं वा अवस्था विशिष्टा वा त। यथेति कस्मिन्नधिकरणे केन प्रकारेणेति प्रश्नः॥ येऽधिकारिणः सा
त्वताः भक्ताः स्युः पुनर्विशिष्य तः प्रश्ने कारणमाह। वदन्ति॥ ब॥ एतद्वदंति मुनयो मुहुर्निःश्रेयसं नृणां। नारदो भग
वान्व्यासः आचार्योऽङ्गिरसः सुतः॥ २॥ एतच्च द्वयोर्नं परं निःश्रेयसकरं वदंति। आंगिरसः सुतो बृहस्पतिः॥ ब॥ निःसृतां वे

मुखांभोजाद्यदाह भगवानजः। पुत्रेभ्यो भृगुमुख्येभ्यो देव्यै च भगवान्भवः ॥३॥ निःसृतं त्वयोपदिष्टमित्यर्थः। देव्यै पार्व
त्यै ॥ढ॥ एतद्वै सर्ववर्णानामाश्रमाणां च संमतं। श्रेयसामुत्तमं मन्ये स्त्रीशूद्राणां च मानद ॥४॥ सर्ववर्णानां त्रैवर्णिकानां
॥ढ॥ एतत्कमलपत्राक्ष कर्मबंधविमोचनं। भक्ताय चानुरक्ताय ब्रूहि विश्वेश्वरेश्वर ॥५॥ विश्वेश्वरा ये तेषामीश्वर ॥ढ॥ ॥
श्रीभगवानुवाच ॥ ॥ न ह्यंतोऽनंतपारस्य कर्मकांडस्य चोद्धव। संक्षिप्तं वर्णयिष्यामि यथावदनुपूर्वशः ॥६॥ कर्मकांडस्य
पूजाविधानस्य। नास्त्यंतः। तात ग्रंथः पारं चानुष्ठानतो यस्य तस्य ॥ढ॥ वैदिकस्तांत्रिको मिश्र इति मे त्रिविधो मखः। त्रया
णामीप्सितेनैव विधिना मां समर्चयेत् ॥७॥ वैदिक एव मंत्रे वैदिकान्येवांगानि च यस्मिन्स पुरुषसूक्तादिः स वैदिकः। एवं तांत्रि ए टी०
कोऽपि मिश्रोऽष्टाक्षरादिः। मखः पूजा। यदा त्रैवर्णिको यजेत् तदा विशेषमाह ॥ढ॥ यदा स्वनिगमेनोक्तं द्विजत्वं प्राप्य पूरुषः। य २०२
था यजेत मां भक्त्या श्रद्धया तन्निबोध मे ॥८॥ यदा गर्भाष्टमैकादशद्वादशादिकाले स्वनिगमेन स्वाधिकारप्रवृत्तेन वेदेनोक्तं द्वि

जत्वमुपनयनं ॥ढ॥ अर्चायां स्थंडिले वाग्नौ सूर्ये वाप्सु हृदि वा द्विजे। द्रव्येण भक्तियुक्तोऽर्चेत् स्वगुरुं माममायया ॥९॥ अर्चायां प्र
तिमादौ। स्नानविशेषमाह ॥ढ॥ पूर्वं स्नानं प्रकुर्वीत धौतदंतोंगशुद्धये। उभयैरपि च स्नानं मंत्रैर्मृद्ग्रहणादिभिः ॥१०॥ उभ
यैर्वैदिकैस्तांत्रिकैश्च मंत्रैः ॥ढ॥ संध्योपास्त्यादिकर्माणि विधिना चोदितानि मे। पूजां तैः कल्पयेत्सम्यक्संकल्पः कर्मपावनीं।
॥११॥ किंच संध्योपास्त्यादीनि कर्माणि चोदितानि मत्कल्पेन विहितानि यस्माद्यानि तैः सह मे पूजां कुर्यात्। न तु तानि परित्यजे
दित्यर्थः। सम्यक् परमेश्वरविषय एव संकल्पो यस्य तथाभूतः सन्। कर्मपावनीं कर्मनिर्हारिणीं। अर्चाभेदेनाह ॥ढ॥ शैली दा
रुमयी लौही लेप्या लेख्या च सैकती। मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता। चलाचलेति द्विविधा प्रतिष्ठा जीवमंदिरं ॥
१२ शैली शिलामयी। लौही सुवर्णादिमयी। लेप्या मृच्चंदनादिमयी। हृदि पूजायां मनोमयी। केषांचित्तिष्ठत्यस्यामिति प्रति
ष्ठा प्रतिमैव। जीवस्य भगवतो मंदिरं। यद्वा। प्रतिष्ठया कलान्यासेन भगवन्मंदिरं भवतीति। प्रतिमाभेदेन विशेषमाह। साद्वैन ॥

॥ब॥ उद्वासावाहने न स्तः स्थिरायामुद्धवार्च्चने॥ अस्थिरायां विकल्पः स्यात् स्थंडिले तु भवेद् द्वयं॥ स्नपनं त्वविलेप्यायामन्यत्र परि
मार्ज्जनं॥१४॥ उद्वासो विसर्ज्जनं। अस्थिरायामर्च्चने विकल्पः शालिग्रामे न कुर्यात्। सैकतायां कुर्यात्। अन्यत्र कुर्यान्न वेति॥
अविलेप्यायां मृन्मयलेख्यव्यतिरिक्तायां। अन्यत्र विलेप्यायां लेख्यायां च परिमार्ज्जनमेव। इदानीं सकामनिःकामभेदेन वि
शेषमाह। द्रव्यैरिति॥ब॥ द्रव्यैः प्रसिद्धैर्मद्यागः प्रतिमादिष्वमायिनः। भक्तस्य च यथालब्धैर्हृदि भावेन चैव हि॥१५॥ प्रकर्षेण सि ॥१॥
द्धैः शोभनैः। अमायिनः निःकामस्य भक्तस्य तु यथालब्धैः। यत्र चंदनादि सर्वथा न लभ्यते तत्र हृदि भावेन भावनया यदा। हृ
दि चेन्मद्यागः तदा भावेन मनोमयैर्द्रव्यैरित्यर्थः। अधिष्ठानभेदेन प्रधानोपचारमाह॥ स्नानेति॥ब॥ स्नानालंकरणं प्रे ए॰टी॰
ष्ठमर्च्चायामुद्धवार्च्चने। स्थंडिले तत्त्वविन्यासो वह्नावाज्यप्लुतं हविः। सूर्ये चाभ्यर्हणं प्रेष्ठं सलिले सलिलादिभिः॥१६॥ तत्त्वविन्या २०३
सः यथास्वमंगप्रधानदेवतानां तत्तन्मंत्रैः स्थापनं। अभ्यर्हणं उपस्थानार्घ्यादि। सलिलादिभिः तर्पणादिना यजनं। सर्वप्रसाध

रणमाह। श्रद्धयेति॥ब॥ श्रद्धयोपाहृतं प्रेष्ठं भक्तेन मम वार्य्यपि। गंधो धूपः सुमनसो दीपोऽन्नाद्यं च किं पुनः। भूर्य्यप्यभक्तोपहृतं
न मे तोषाय कल्पते॥१८॥ एवमधिकारादिव्यवस्थामुक्त्वेदानीं पूजाप्रकारमाह। शुचिरिति॥ब॥ शुचिः संभृतसंभारः प्राग्
दर्भैः कल्पितासनः। आसीनः प्रागुदग्वार्च्चेदर्च्चायामथ संमुखः॥१९॥ संभृताः संभाराः पूजासाधनानि येन सः। प्रागग्रैर्दर्भैः य
द्वा प्रागेव संभृतः संभारः सन्नासीनः सन्नासीनः पश्चात्संभारार्थं वारंवारमुत्तिष्ठेदित्यर्थः। प्राङ्मुख उदङ्मुखो वा आसीनः
अर्च्चायां तु स्थिरायां तु संमुखः अर्च्चाभिमुख उपविष्टः सन्॥ अथ अनंतरं॥ब॥ कृतन्यासो मदर्च्चां च पाणिना निमृजेद्बुधः। क
लशं प्रोक्षणीयं च यथावदुपसाधयेत्॥२०॥ पूर्वादिनमस्कारस्वकं यथोपदेशं तस्मिन् कृतन्यासः। कृतो मूलमंत्रेण न्यासो
यस्यां तां मम अर्च्चां अभिमृजेत्। निर्माल्याद्यपकर्षणादिना शोधयेत्। कलशं स्नानार्थं। प्रोक्षणीयं प्रोक्षणार्थं उदकपात्रं। उ
पसाधयेत् चंदनपुष्पादिभिः संस्कुर्यात्॥ब॥ तदद्भिर्देवयजनं द्रव्याण्यात्मानमेव च। प्रोक्ष्य पात्राणि त्रीण्यद्भिस्तैस्तैर्द्रव्यैश्च

साधयेत्॥१९॥ तदद्भिः प्रोक्षणीयाद्भिः। देवयजनं द्रव्यजातं स्थापनं। पाद्याद्यर्थं त्रीणि पात्राणि कलशोदकैः पूरितानि
तैस्तैर्द्रव्यैः साधयेत्। तत्र पाद्यादि द्रव्याणि। पाद्यैः श्यामाकदूर्वाब्जविष्णुक्रान्तादिरिष्यते। गंधपुष्पाक्षतयवकुशाग्रति
लसर्षपाः दूर्वा चेति क्रमादर्घ्ये द्रव्याष्टकमुदीरितं। जातीलवंगकंकोलैर्मतं माचमनीयकमिति॥७॥ पाद्याद्याचमनीया
र्थं त्रीणि पात्राणि देशिकैः। हृदाद्याख्यचिशिखया गायत्र्या वाभिमंत्रयेत्॥२०॥ तानि च पात्राणि यथाक्रमं देशिकः पूजकः
हृदयादिमंत्रैर्गायत्र्या वा सर्वाण्यभिमंत्रयेत्॥७॥ पिंडे वाह्निसंस्थे हृत्पद्मस्थां परां मम। प्राणं जीवकलां ध्यायेत् ना
दांतसिद्धभाविताम्॥२१॥ तदनंतरं पिंडे देहे वा वह्निसंस्थे इति कोष्ठगतेन वायुना शोषिते आधारगतेन अग्निना दग्धे तु २१०
न ललाटस्थचंद्रमंडलामृतप्लावनेन अमृतमये जाते तस्मिन्। हृत्पद्मस्थां परां श्रेष्ठां जीवकलां श्रीनारायणमूर्तिं ध्याये २०५
त्। कथंभूतां। नादांतेसिद्धभाविताम्। प्रणवस्याकारोकारमकारबिंदुनादाः पंचांशाः तत्र नादांते सिद्धैर्ध्यातां। तथा

च श्रुतिः। यो वेदादौ स्वरः प्रोक्तो वेदांते च प्रतिष्ठितः। तस्य प्रकृतिलीनस्य यः परः स महेश्वरः इति॥७॥ तयात्मभूतया पिं
डे व्याप्ते संपूज्य तन्मयः। आवाह्यार्चादिषु स्थाप्य न्यस्तांगं मां प्रपूजयेत्॥२२॥ तयात्मभूतया स्वेनैव नचिंतितया अमृत
मये पिंडे दीपेन प्रभया गृहमिव व्याप्ते तस्मिन्नेवादीयमानैरुपचारैः संपूज्य तन्मयः सन्नर्चादिषु आवाह्य स्थापनमुद्रया
स्थापयित्वा। कथं प्रपूजयेत्तदाह॥ पाद्येति द्वाभ्यां॥७॥ पाद्योपस्पर्शदक्षिणादीनुपचारान्प्रकल्पयेत्। धर्मादिभिश्च नवभिः
कल्पयित्वासनं मम॥२३॥ पद्ममष्टदलं तत्र कर्णिकाकेसरोज्ज्वलं। उत्तान्यां वेदतंत्राख्यां मह्यं मूलनयसिद्धये॥२४॥ धर्मादिभि
र्ममासनं तत्र आसनमध्ये च पद्मं कल्पयित्वा वेदतंत्राख्यां उन्नयसिद्धये मह्यं पाद्यादीनुपचारान्प्रकल्पयेदित्यन्वयः। उप
स्पर्श आचमनं। अर्हणं अर्घ्यं। उन्नयसिद्धये वेदतंत्रोक्त भुक्तिमुक्तिप्राप्तये। अयमर्थः। धर्मज्ञानवैराग्यैश्वर्याण्यासनपर्यंक
स्याग्नेयादिषु चतुःकोणपादाः। अधर्मादीनि पूर्वादिदिक्षु पात्राणि। सत्त्वादयस्त्रयो गुणाः पट्टिकाः। तत्र पूर्वादिक्रमेण। मध्ये च वि

मलोकर्षण्णीज्ञानक्रियायोगाप्रह्वीसत्येशानुग्रहेतिनवशक्तयः।एवंयथोपदेशंधर्मादिभिर्नवभिःशक्तिभिश्चासनंक
ल्पयित्वेति।कर्णिकाकेसरेष्वत्रसूर्यादिमंडलेभ्योहृत्कमलमित्यर्थः।आयुधादिपूजामाह।सुदर्शनमितित्रिभिः॥ब॥
सुदर्शनंपांचजन्यंगदासिशार्ङ्गधनुर्हलान्।मुशलंकौस्तुभंमालांश्रीवत्संचानुपूजयेत्॥२५॥तत्राद्यस्त्रांगमित्यंगावरण
पूजाप्रवृत्ता।आसनेनैवशक्त्यावरणमप्युक्तं।ततःसुदर्शनादीनिमुशलांतान्यायुधान्यष्टदिक्षु।कौस्तुभमालाश्रीवत्सा
नुरसि॥ब॥नंदंसुनंदंगरुडंप्रचंडंचंडमेवच।महाबलंबलंचैवकुमुदंकुमुदेक्षणं॥२६॥नंदादीन्पार्षदानष्टदि
क्षु।गरुडंपुरतः॥ब॥दुर्गांविनायकंव्यासंविष्वक्सेनंगुरून्सुरान्।स्वेस्वेस्थानेत्वभिमुखान्पूजयेत्प्रोक्षणादिभिः
॥२७॥दुर्गादीन्कोणेषुगुरूंश्चवामतः।सुरानिंद्रादिलोकपालान्पूर्वादिदिक्षु।एवमेतान्देवस्याभिमुखान्प्रोक्षणादि
भिरर्घ्यादिभिःपूजयेदित्यर्थः।पाद्यादीन्युपचारान्स्वकल्पयेदित्युक्तं।तानेवगुणविधिभिःप्रपंचयति।चंदनेतिषड्भिः॥ब॥ ए०८।० २०५

चंदनोशीरकर्पूरकुंकुमागुरुवासितैः।सलिलैःस्नापयेन्मंत्रैर्नित्यदाविभवेसति॥२८॥मंत्रानाह॥ब॥सुवर्णघर्मानुवाके
नमहापुरुषविद्यया।पौरुषेणापिसूक्तेनसामभिर्नीराजनादिभिः॥२९॥सुवर्णघर्मानुवाकःसुवर्णघर्मंपरिवेदस्वेनमित्या
दि।महापुरुषविद्या।जितंतेपुंडरीकाक्षनमस्तेविश्वभावन।सुब्रह्मण्यनमस्तेस्तुमहापुरुषपूर्वजेति।पौरुषंसूक्तंसह
स्रशीर्षेत्यादि।राजनादीनिसामानि॥इंद्रंनरोनेमधिताहवंतइत्यस्यामृचिगीतानि।आदिशब्देनरोहिणादीनि।वस्त्राद्यु
पचारैरलंकारलक्षणंगुणंविधत्ते।वस्त्रेति॥ब॥वस्त्रोपवीताभरणपत्रस्रग्गंधलेपनैः।अलंकुर्वीतसप्रेममद्भक्तोमांयथो
चितं॥३०॥पत्राणिकपोलवक्षआदिषुलिखिताःपत्रभंगयः।मद्भक्तोऽत्रसप्रेमयथाभवतितथायथोचितमलंकुर्वीतेत्य
र्थः।सर्वसाधारणंश्रद्धालक्षणंगुणंविधत्ते।पाद्यमिति॥ब॥पाद्यमाचमनीयंचगंधंसुमनसोक्षितान्।धूपदीपोपहाराणि
दद्यान्मेश्रद्धयार्चकः॥३१॥नैवेद्येविभवलक्षणंविधत्ते।गुडपायसेति॥ब॥गुडपायससर्पींषिशष्कुल्यापूपमोदकान्।संया

वहविष्णुपांश्च नैवेद्यं सति कल्पयेत॥२२ शाकं ल्यः तैलपक्कविशेषाः। आपूपाः मंडूकानां समूहाः। चूर्णा। व्यंजनानि। सतिवि
भवेइतिशेषः कालभेदेन गुणान्विधत्ते। अभ्यंगेति॥७॥ अभ्यंगोन्मर्दनादर्शदिंधातव वा निषेवनं। अन्नाद्यं गीतनृत्यादि पर्वणि
ष्वकस्त्रथान्वहं॥२३ अभिषेचनं पंचामृतस्नपनं। अन्नाद्येति। अन्नं तोज्यं आद्यं नस्त्यं पर्वणि एकादश्यादौ। अन्वहं प्रत्यहं वा॥ विना
दिसतीति फलत्रयस्त्रार्थिनः। अथाव पि पूजाप्रकारमाह॥७॥ विधिना विहिते कुंडे मेखलागर्त्तवेदिनि। अग्निमाधाय परि
तःसमूहेत्पाणिनोदितं॥२४ विधिना गृह्योक्तप्रकारेण। मेखलादि निरूपलक्षिते। वेदिके निर्मिते। तदुक्तं। विस्तारोछ्राय
तस्मिन्ने मेखलाश्चतुरंगुला। हस्तमात्रो नवेजन्तः सयो निर्वेदिका तथेत्यादि। उदितप्रज्वलितमग्निं परितः समूहेत एकत्र मे एटी०
लयेत॥७॥ परिस्तीर्याथ पर्युक्ष्य हेतुवधाय यथाविधिः। प्रोक्षण्यासाद्य द्रव्याणि प्रोक्ष्याग्नावावहेत मां॥२५ अर्चाध्याय। अन्वाधा २०६
यपयोगीनि आसाद्य निधाय प्रोक्षण्या प्रोक्षणीयपात्रोदकेन प्रोक्ष्याग्नौ मां ध्यायेत॥७॥ तप्तजांबूनदप्रख्यं शंखचक्रगदांबु

जैः। लसच्चतुर्भुजं शांतं पद्मकिंजल्कवाससं॥२६ शंखादिनिरूहत्सं तः शोभमानो श्चचारो भुजायस्य तं॥७॥ स्फुरत्कि
रीटकटककटिसूत्रवरांगदं। श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमालिनं॥२७ स्फुरंतिकिरीटादीनि यस्य तं॥७॥ ध्यायन्न
भ्यर्च्य दारूणि हविषाभिघृतानि च। प्रास्याज्यभागावाघारौ दत्वा चाज्यप्लुतं हविः॥२८ हविषा घृतेन अभिघृतानि संसिक्ता
नि दारूणि शुष्काः समिधः प्रास्य प्रक्षिप्य। आघारो इति संज्ञकौ यागापवमाज्यभागौ च दत्वा तदथ्याश्राकृती डिवेयर्थः। तत्राघा
रौ प्रजापतये स्वाहा इति चोत्तरदक्षिणापरिधिसंधिमारभ्याग्निमध्यादापरे ध्यंतं घृतस्य धारणरूपौ। आज्यभागौ। अग्नये स्वाहा
सोमाय स्वाहेत्येवं होमरूपौ॥७॥ जुहुयान्मूलमंत्रेण षोडशर्च्चावदानतः। धर्मादिभ्यो यथान्यायं मंत्रैः स्विष्टकृतं बुधः॥२९
मूलमंत्रेण अष्टाक्षरादिना। तथा षोडशर्च्चोऽयस्मिन् तेन पुरुषसूक्तेन च। अवदानतः प्रत्यृचं आकृतिग्रहणेनेत्यर्थः। पुरु
षसूक्तेनाराधनपक्षे स्नपन मूलमंत्रः तेन प्रत्यृचमवदानतो होम इति मंत्रैः स्वाहांतैर्नाममंत्रैः यथान्यायं पूजाक्रमेणाव

अग्नये स्विष्टकृते स्वाहेत्येवं स्विष्टकृतं हुत्वा ॥ब॥ अभ्यर्च्याथ नमस्कृत्य पार्षदेभ्यो बलिं हरेत् । मूलमंत्रं जपेद्ब्रह्म स्मरन्नारायणा
त्मकं ॥४० ततो वह्निस्थं भगवंतं अभ्यर्च्य अथ नमस्कृत्य पार्षदेभ्यो नंदादिभ्यो अष्टसु दिक्षु बलिं हरेत् । ततः पूजास्थानमागत्य देव
स्याग्रे समुपविश्य यथाशक्ति मूलमंत्रं जपेत् । ततोऽनंतरं भगवतो भोजनसमाप्तिं ध्यात्वा ॥ब॥ दत्वाचमनमुच्छेषं विष्वक्से
नाय कल्पयेत् ॥४१ मुखवासं सुरभिमत्तांबूलाद्यमथार्हयेत् ॥४१ आचमनं दत्वा उच्छेषं नैवेद्यभागं विष्वक्सेनाय कल्पयित्वा
ततः सुरभिमत्सुरभिमत्तांबूलाद्यमुखवासं दत्वा अथ पुनरप्यर्हयेत् पुष्पांजलिना पूजयेत् ॥ब॥ उपगायन्गृणन्नृत्य
न्कर्माण्यभिनयन्मम । मत्कथाः श्रावयन्शृण्वन्मुहूर्तं क्षणिको भवेत् ॥४२ अभिनयन् स्वाभिन्नाविष्कुर्वन् । क्षणिकः वैय
र्थ्यं परित्यज्य लब्धावसरो भवेत् ॥ब॥ स्तवैरुच्चावचैः स्तोत्रैः पौराणैः प्राकृतैरपि । स्तुत्वा प्रसीद भगवन्निति वंदेत दंडवत् ॥४४
स्तोत्राणां भेदं दर्शयति । पौराणैः प्राकृतैरिति । कथं प्रणमेदित्यपेक्षायामाह । शिर इति ॥ब॥ शिरो मत्पादयोः कृत्वा बाहुभ्यां

च परस्परं । प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात् ॥४५ बाहुभ्यां दक्षिणोत्तराभ्यां परस्परं मम दक्षिणोत्तरौ पादौ गृह
त्वा ॥ यद्वा ॥ पृष्ठतः परस्परं निबद्धाभ्यां कृतापराधएव प्रपन्नमित्यादि विज्ञप्य प्रणमेत् । ततः शेषाग्रहणपूर्वकं विकल्पिको
द्वासनप्रकारमाह ॥ब॥ इति शेषां मया दत्तां शिरस्याधाय सादरं । उद्वासयेच्चेदुद्वास्यं ज्यो... र्ज्योतिषि तत्पुनः ॥४६ इति
अनायैव प्रार्थनया शेषां निर्माल्यं मया दत्तां ध्यात्वा । शिरस्याधाय धृत्वा । यदि उद्वासयेत् तर्हि प्रतिमायस्थं ज्योतिः तत्पुनः हृत्पद्म
स्थज्योतिषि वोद्वास्यं उद्वासनीयं तदनुज्ञया पश्चात्स्वयं भुंजीतेति । एतेष्वधिष्ठानेषु किं मुख्यमित्यपेक्षायामाह । अर्चा
ति ॥ब॥ अर्चादिषु यदा यत्र श्रद्धा मां तत्र चार्चयेत् । सर्वभूतेष्वात्मनि च सर्वात्माहमवस्थितः ॥४७ यदा यत्र श्रद्धा तदा तत्र
न त्वधिष्ठाने मुख्यत्वं । कुतः यतः सर्वभूतेष्विति ॥ब॥ एवं क्रियायोगपथैः पुमान्वैदिकतांत्रिकैः । अर्चन्नुभयतः सिद्धिं मत्तो विंद
त्यभीप्सितां ॥४८ उभयतः इहामुत्र च । समर्थं प्रत्याह । मदर्चामिति त्रिभिः ॥ब॥ मदर्चां संप्रतिष्ठाप्य मंदिरं कारयेद्दृढं । पुष्पोद्या

२०८

नानि रम्याणि पूजायात्रोत्सवाश्रितान् ॥४९॥ पूजादीनां प्रवाहार्थं महापर्वस्वथान्वहं । क्षेत्रापणपुरग्रामान् दत्वा मत्सार्ष्टितामि
यात् ॥५०॥ पुष्पोद्यानानि कारयेत् । पूजायात्रोत्सवाश्रितान् पूजा प्रत्यहं । यात्रा विशिष्टपर्वणि बहुजनसमागमः । उत्सवः वसंता
दिमहोत्सवः तदाश्रितान् क्षेत्रादीन् दत्वा । पूजायात्रोत्सवाश्रितानित्यस्य विवरणं । पूजादीनामिति । प्रवाहार्थं संततानुवृत्त्य
र्थं । मत्सार्ष्टितां मत्समानामैश्वर्यं प्रतिष्ठादीनां यथासमस्तानां फलमाह । प्रतिष्ठयेति ॥ब॥ प्रतिष्ठया सार्वभौमं सद्मना भुव
नत्रयं । पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामियात् ॥५१॥ मत्साम्यतां मया साम्यमित्यर्थः । सकामं प्रत्युक्तं । अहैतुके तु फलं प्र १०
याह । मामेवेति ॥ब॥ मामेव निरपेक्षेण भक्तियोगेन विंदति । भक्तियोगं स लभत एवं यः पूजयेत मां ॥५२॥ अहैतुके तु भक्तियोग ए
व कथं भवति । तदाह । भक्तियोगमिति । हेतुः फलमुक्तं । अपहर्तारं निंदति । य इति ॥ब॥ यः स्वदत्तां परैर्दत्तां हरेत सुरविप्रयोः
वृत्तिं स जायते विड्भुग्वर्षाणामयुतायुतं ॥५३॥ विड्भुक् विष्ठाभोजी कृमिः । कर्तुर्यत्फलं तदेवान्येषामित्याह । कर्त्तुरिति ॥ब॥ कर्त्तुश्च

॥३ सारथेर्हेतोरनुमोदितुरेव च । कर्मणां भागिनः प्रेत्य भूयो भूयसि तत्फलं ॥५४॥ सारथेः सहकारिणः । हेतोः प्रयोजकस्य । अ
नुमोदितुश्च प्रत्येकं तत्फलमित्यन्वयः । कुतः । यतः कर्मणामेते भागिनः भागार्हाः । तत्रापि विशेषमाह । भूयसि कर्मणि सार
थ्यादेश्च भूयः अधिकं फलमिति ॥ब॥ पयःपत्रादिमात्रेण पूजितो यः परं पदं । प्रागेव दिशति प्रीतः स कृष्णः शरणं मम ॥१॥
॥ ॥ब॥ ॥इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे भगवत्पूजानिरूपणं नाम सप्तविंशोऽध्या
यः ॥ ॥ब॥ ॥अष्टाविंशे त्वयः पूर्वं विस्तरेणोपवर्णितः । ज्ञानयोगः पुनः सोऽसौ समाकृष्य निरूप्यते ॥१॥ इदानीं मतिविस्तरे
णोक्तं ज्ञानयोगं संक्षेपेण वक्तुमाह ॥ब॥ ॥श्रीभगवानुवाच ॥ ॥परस्वभावकर्माणि न प्रशंसेन्न गर्हयेत् । विश्वमेका
त्मकं पश्यन् प्रकृत्या पुरुषेण च ॥१॥ परेषां स्वभावान् शांतघोरादीन् कर्माणि च । तत्र हेतुः । विश्वमिति । विपक्षे दोषमाह ॥प
रेति ॥ब॥ परस्वभावकर्माणि यः प्रशंसति निंदति । स आशु भ्रश्यते स्वार्थादसत्यभिनिवेशतः ॥२॥ स्वार्थात् ज्ञाननिष्ठालक्षणा

२०९

त्। असति मिथ्याभूते द्वैतेऽभिनिवेशात्। भ्रंशमेव दृष्टांततो दर्शयति॥ ब॥ तैजसे निद्रयापन्ने पिंडस्थो नष्टचेतनः। मायां प्राप्नोति मृ
त्युं वा तद्वन्नानार्थदृक्पुमान्॥ ३॥ तैजसे राजसाहंकारकार्ये इंद्रियगणे निद्रया। आपन्ने अभिनिवृत्ते सति पिंडस्थो जीवः केवलं मनो
मात्रेण मायां स्वप्नरूपां प्राप्नोति। ततो मनस्यपि लीने नष्टचेतनः सन् मृत्युं वा मृत्युतुल्यां सुषुप्तिं वा प्राप्नोति यथा तद्वदेव नानार्थ
दृक्। द्वैताभिनिवेशाद्विक्षेपं लयं च प्राप्नोतीति॥ द्वैतासत्यतया स्तुतिनिंदयोर्निर्विषयत्वं प्रपंचयति सार्द्धैः षड्भिः॥ ब॥ किं भद्रं
किमभद्रं वा द्वैतस्यावस्तुनः कियत्। वाचोदितं तदनृतं मनसा ध्यातमेव च॥ ४॥ अवस्तुनो द्वैतस्य मध्ये किं भद्रं किं वात्राभद्रं वा
कियद्भद्रं कियद्वात्राभद्रमित्यर्थः॥ अवस्तुत्वमेवाह। वाचेति बाह्येंद्रियोपलक्षणं। वाचा उदितं उक्तं चक्षुरादिभिश्च यद्गृ २०९
ह्यं तदनृतमिति। नन्वेवं सति देहादिभावानामप्यसत्त्वात् कथं भयहेतुत्वं। तत्र सदृष्टांतमाह॥ ब॥ छायाप्रत्याह्वयाभासा
असंतोऽप्यर्थकारिणः। एवं देहादयो भावा यच्छंत्यामृत्युतो भयं॥ ५॥ छायाप्रतिबिंबं। प्रत्याह्वयः प्रतिध्वनिः। आभासः शु

॥श्री॥

क्तिरजतादिः। एते यथा असंतोऽप्यर्थकारिणो भवंति। आमृत्युतः मृत्युमभिव्याप्य। यद्वा। मृत्युर्लयः। यावत्तज्ज्ञानेन न लीयते।
तावत्पर्यंतमित्यर्थः। ननु सृष्ट्यादिश्रुतिभिरेवाद्वैतं निरूपितं कथमसत्यं स्यात्तत्राह। आत्मैवेति द्वाभ्यां॥ ब॥ आत्मैव तदिदं
विश्वं सृज्यते सृजति प्रभुः। त्रायते त्राति विश्वात्मा ह्रियते हरतीश्वरः॥ ६॥ त्रायते पाल्यते। त्राति पालयति॥ ब॥ तस्मान्न
ह्यात्मनोऽन्यस्मादन्यो भावो निरूपितः। निरूपितेयं त्रिविधा निर्मूला भातिरात्मनि॥ ७॥ अन्यस्मात् सृष्ट्यादिव्यतिरिक्तात्। त्रिवि
धाऽध्यात्मादिरूपाः। भातिः प्रतीतिः। ननु निर्मूलं कथं प्रतीयते। तत्राह। इदमिति॥ ब॥ इदं गुणमयं विद्धि त्रिविधं मायया
कृतं। एतद्विद्वान्मदुदितं ज्ञानविज्ञाननैपुणं। न निंदति न च स्तौति लोके चरति सूर्यवत्॥ ८॥ ज्ञानविज्ञानयोर्नैपुणं निष्ठां। सूर्य
वत्समो भूत्वा। एतस्मिन्निष्ठाप्राप्त्युपायमाह। प्रत्यक्षेणेति॥ ब॥ प्रत्यक्षेणानुमानेन निगमेनात्मसंविदा। आद्यंतवदसत्
ज्ञात्वा निःसंगो विचरेदिह॥ ९॥ यदाद्यंतवत् तद्द्वैतं तदसदिति ज्ञात्वा निःसंगो विचरेत्। आद्यंतवत्त्वे प्रमाणानि। प्रत्यक्षेण घटादि।

अनुमानेनसावयवत्वेनदृश्यंपृथिव्यादि।निगमेनअप्रथ्यस्तमाकाशादि।आत्मसंविदास्वानुभवेनसर्वंदृश्यमाद्यंतवत्असच्च
तिष्ठाच॥ननुविविच्यात्मसंविदासर्वंदृश्यमसदित्युच्यतेतर्ह्यात्मास्वप्रकाशोदेहादिश्चेतत्वजडमिश्रकंस्यात।तथाचसति।
संसारप्रतिभासोनघटेतेतिचोद्यमितिनैवेति॥ब॥ ॥उद्धवउवाच॥ ॥नैवात्मनोनदेहस्यसंसृतिर्द्रष्टृदृश्ययोः॥अना
त्मस्वदृशोरीशकस्यस्यादुपलभ्यते॥१०अनात्मस्वदृशोःजडाजडयोः।अत्रहेतुः।द्रष्टृदृश्ययोः।माभूत्तद्वयोरपि।तत्राह।उपल
भ्यतइति।एतत्प्रपंचयति।आत्मेति॥ब॥आत्माव्ययोऽगुणःशुद्धःस्वयंज्योतिरनावृतः।अग्निवद्दारुवदचिद्देहःकस्येहसंसृ
तिः॥११अव्ययत्वादिपंचविशेषणैर्नाशादिरागादिगुणयाऽगुणाःज्ञानपरिच्छेदानामसंभवंदर्शयति।देहदेहमचेतयथेष्टं ए०ध्या०
अचित्जडः।अयंभावः।यथैवाग्निदारुणोःदेहेनानुपलंभेपिदारुप्रकाशमेव।अग्निश्चप्रकाशकः।तथादेहात्मनोरपीति २२०
नसंसृतिस्तयोरस्यतस्याअपिघटतइतिसत्यंतथापितयोरविवेकएवसंसारालंबनमित्याह।पंचभिः।यावदिति॥ब॥।

॥ ॥श्रीभगवानुवाच॥ ॥यावद्देहेंद्रियप्राणैरात्मनःसन्निकर्षणं।संसारःफलवांस्तावदपार्थोप्यविवेकिनः॥१२स
न्निकर्षणंसंबंधः।ननुअसंगस्यकुतःसंबंधस्तत्राह।अविवेकिनःअज्ञानस्यतस्यार्थः।ननुस्वप्रकाशस्यकथमज्ञानतःसं
सारःतत्राह।अर्थेहीति॥ब॥अर्थेह्यविद्यमानेपिसंसृतिर्ननिवर्त्तते।ध्यायतोविषयानस्यस्वप्नेऽनर्थागमोयथा॥१३अस्या
त्मनः।ननुकथंविध्यानतोविषयस्फूर्तिर्जीवन्मुक्तस्यापिअनिवारेय्यैनिर्मोक्षप्रसंगःस्यात्तत्राह।यथाहीति॥ब॥यथाह्यप्र
तिबुद्धस्यप्रस्वापोबह्वनर्थभृत।सएवप्रतिबुद्धस्यनैवमोहायकल्पते॥१४प्रस्वापःस्वप्नः।बह्वननर्थानिबिभ्रन्निभिलाती
तितथा।अहंकारादिलक्षणादहादेसंनिकर्षएवसंसारालंबनमित्यन्वयव्यतिरकाभ्यांदर्शयति॥ब॥शोकहर्षभयक्रोध
लोभमोहस्पृहादयः।अहंकारस्यदृश्यंतेजन्ममृत्युश्चनात्मनः॥१५सुखदुःखादौतेषामदर्शनात्।अहंसुखीतिवाच्चेतन्यंसुख
तिप्रतीत्याबाध्यदृश्यत्वात्सुखादीनांकृशत्वादिवत्दृष्टधर्मत्वाच्चानुपपन्नेरितिभावः।ननुयद्यहंकारस्यसंसारःतर्हिमुक्ति

रयितश्चैवेति मुक्तावहंकारावशेषः। प्रसज्येत। तत्राह। देहेति॥ ब॥ देहेंद्रियप्राणमनोभिमानो जीवोंतरात्मा गुणकर्ममू
र्तिः। सूत्रंमहानित्युरुधेवगीतः संसारआधावति कर्मतंत्रः॥२६ देहादिष्वभिमानोयस्य सः आत्मैव तेषामंतःस्थो जीवः अ
तएवगुणकर्ममयी मूर्तिर्यस्य सः। अतएव च सूत्रमोपाधिनिबद्धः। अथ सूत्रादिशब्दैर्गीतः संसारेपरमेश्वराधीनः सर्वतोधावति
अतोनायंदोषइतिभावः। तदेवमहंकारस्ततं बंधमुपपाद्येदानींज्ञानेन तन्निवृत्तौ मुक्तिः स्यादत आह। अमूलमिति॥ ब॥ अमूलमतद्ब
हुरूपरूपं मनोवचःप्राणशरीरकर्मः। ज्ञानासिनोपासनया शितेन छित्वा मुनिर्गां विचरेदतृष्णः॥२७ वस्तुतो मूलरहितं। अज्ञात
स्तुबहुनामरूपैरूपितं प्रकाशितं। ऐंद्रजालिकतुल्यमितिवा। किंतत्। तदाह। मनइति। मनआदीनां द्वंद्वः यद्वा। मनआदि
भुक्तियतश्चाहंकारणं। गुरूपासिनया निशीतेन खड्गेन छित्वा। तदेवज्ञानस्वरूपसाधनफलैर्निरूपयति। ज्ञानमिति॥
ब॥ ज्ञानंविवेको निगमस्तपश्च प्रत्यक्षमैतिह्यमथानुमानं। आद्यंतयोरस्य यदेवकेवलं कालश्च हेतुश्च तदेवमध्ये॥२८

विवेकोज्ञानं। साधनान्याह। निगमोवेदः। तपः स्वधर्मः। प्रत्यक्षं स्वानुभावः। ऐतिह्यं उपदेशः। अनुमानं तर्कः। फलमा
ह। आद्यंतयोर्यदस्यजगतः मध्येपि तदेवकेवलं अद्वितीयं न तु जगदिति। किंतत्। कालः कलयति प्रकाशयतियः तथा
हेतुःकारणं च यत् तदेव। एतदुक्तं भवति। यदस्य विश्वस्य विश्वस्यकारणं प्रकाशकं च ब्रह्म तदात्मकमेवेतं तत् न ततः पृथ
गित्येवं निश्चयफलो निगमादिसाधनैर्ज्ञायिते यो विवेकस्तत्ज्ञानमिति। तत्र नानाभेदव्यवहारालंबनस्यापि विश्वस्यका
रणमात्रात्मकत्वे सदृष्टांतमाह। यथेति॥ ब॥ यथाहिरण्यं सुकृतं पुरस्तात्पश्चाच्च सर्वस्य हिरण्मयस्य। तदेवमध्ये व्य
वहार्यमाणं नानापदेशैरहमस्य तद्वत्॥२९ सुकृतं सुष्ठु कुंडलादिरूपेण विरचितं यद्धिरण्यं। कीदृशं। हिरण्मयस्य
कुंडलादेरुत्पत्तेः पुरस्तान्नाशाच्च पश्चाद्यदस्ति। कटककुंडलाद्यमित्यादिनानाव्यपदेशैर्व्यवहार्यमाणमपि
तदेव यथा। तद्वदस्यविश्वस्य कारणभूतोहमेव नानाव्यवहारालंबनेन तु मत्तः पृथग्विश्वमिति। तदेवं कार्यस्य कारण

मात्रात्मकता सूक्ष्मप्रकाशस्य प्रकाशकात्मतामाह। विज्ञानमिति॥ ब॥ विज्ञानमेतत्त्रियवस्थमंग गुणत्रयं कारणका
र्यकर्तृ। समन्वयेन व्यतिरेकतश्च येनैव तुर्येण तदेव सत्यं॥ २०॥ त्रियवस्थं यकारस्य पृथक्त्वात्वस्थं दोष्टुशोयन। जाग्रदा
दिव्यवस्थं यद्विज्ञानं मनः। तदवस्था कारणं भूतं च यद्गुणत्रयं। यच्च कार्यकारणकर्तृकारणमध्यात्मं। कार्यमधिभूतं। क
र्तृ अधिदैवं। एवं गुणत्रयं कार्यभूतं त्रिविधं जगत्। एतद्येन तुर्येण सामान्यज्ञानमात्रेण समन्वयेन भवति यनानुगतं प्र
काशत इत्यर्थः। तदेवांते मनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति। तथा चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो
पि मनो विदु रित्यादिश्रुतेः॥ ननु विशेषज्ञानव्यतिरेकेण न तुर्यं नामोपलभामहे। तत्राह। व्यतिरेकतश्च समाध्यादौ य एद।०
दर्शितदेव सत्यमिति। एवं कालत्रयेऽप्यव्यभिचारेण सत्यत्वमुक्तं। व्यभिचारिणस्त्वसत्यतामाह। न यदिति॥ ब॥ न यत् २१२
पुरस्तादुत यन्न पश्चान्मध्ये च तन्न व्यपदेशमात्रं। भूतं प्रसिद्धं च परेण युज्यं ते तदेव तत्स्यादिति मे मनीषा॥ २१॥ भूतं कार्यं पु

रस्तादुत्पत्तेर्न भवति। यच्च पश्चान्नाशात् मध्येऽपि च तन्न पृथक् नास्ति। किं तु व्यपदेशमात्रं नाममात्रं कृतं यत् परेण अ
न्येन भूतं ज्ञातं प्रसिद्धं प्रकाशितं च तत्। तदेव कारणप्रकाशकतावन्मात्रं स्यात् न पृथक् इति मे मनीषा बुद्धिः। वाचा
रंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं। सर्वं खल्विदं ब्रह्मेत्यादिश्रुतेः॥ कारणप्रकाशव्यतिरेकेण च कार्यप्रका
शस्यैवानुपलंभादिति भावः। एवं सामान्यतः कार्यप्रकाशयोः कारणप्रकाशकाभ्यामभेदं उक्त्वा द्युप्रभृते तद
नयविवेकपूर्वकं प्रपंचस्य ब्रह्माभेदमाह। अविद्यमान इति॥ ब॥ अविद्यमानोऽप्यवभासते यो वैकारिको राजस
एष सर्गः। ब्रह्म स्वयं ज्योतिरतो विभाति ब्रह्मेंद्रियार्थात्मविकारचित्रं॥ २२॥ यो वैकारिकः विकारसमूहः एष प्राग
विद्यमानः राजसः सर्गः रजो द्वारेण ब्रह्मकार्यभूत इत्यर्थः। अवभासतेऽपि ब्रह्मप्रकाशेनेत्यर्थः। ब्रह्म तु स्वयम
तः सिद्धं न तु कार्यमित्यर्थः। ज्योतिश्च प्रकाशकमित्यर्थः। अतः कारणात् इंद्रियाणि च अर्थास्तन्मात्राणि च आत्मा मन

श्चदेवानामध्यक्षपलक्षणां॥ विकाराः पंचभूतानि। एवं चित्रं ब्रह्मैव भातीति। उपसंहरति॥ ब॥ एवं स्फुटं ब्रह्मविवेकहेतुभिः प
रापवादेन विशारदेन। छित्वात्मसंदेहमुपारमेत स्वानंदतुष्टोऽखिलकामुकेभ्यः॥ २३॥ एवं निगमतः प्रपंच्यैतिह्यानुमा
नैः स्फुटं यथा भवति। तथा विवेकहेतुभिः। तथा परस्य देहादेरपवादेन आत्मनिरासतो वा। कीदृशेन। विशारदेन निपुणे
न। स्वरूपनिमित्तभूतेनेति वा। आत्मविषयं संदेहं छित्वा स्वानंदतुष्टः सन्नखिलेभ्यः कामुकेभ्यः इंद्रियादिभ्य उपारमेत
निःसंगो भवेत्। परापवादं प्रपंचयति॥ ब॥ नात्मा वपुः पार्थिवमिंद्रियाणि देवा ह्यसुर्वायुर्जलं हुताशः। मनोऽन्नमात्रं धि
षणा च सत्त्वमहंकृतिः खं क्षितिरर्थसाम्यं॥ २४॥ वपुरात्मा न भवति पार्थिवत्वात् घटवत्। तथा इंद्रियाणि तदधिष्ठातारो देवा ए२।०
श्चासवः प्राणाश्च मनश्च धिषणा बुद्धिश्च सत्त्वं चित्तं च अहंकृतिरिति एते आत्मा न भवंति। कुतः। अन्नमात्रं। अन्नोपष्टंभत्वा २१३
त् शरीरवत्। वायुर्जलं वायुश्च जलं च हुताशश्च तेजः खं च क्षितिरिति पंच भूतानि अर्थाः शब्दादयः साम्यं प्रकृतिश्च नात्मा।

जडत्वात् घटवदिति। यद्वा। दिक्शब्देनानुमानांतराणि सूचितानि। तद्यथा। इंद्रियाण्यात्मा न भवंति तैजसत्वात् प्रदी
पवत्। देवा आत्मा न भवंति वैकारिकत्वात् मनोवत्। प्राणश्च वायुत्वात् बाह्यवायुवत्। भूतान्यात्मा न भवंति जडत्वा
त् घटवदित्यादि एवं विवेकज्ञानवतो मुमुक्षोर्नेंद्रियादिभिस्तो गुणदोषसंबंध इत्याह। समाहितैरिति॥ ब॥ समाहितैः कः
करणैर्गुणात्मभिर्गुणो भवेन्मत्सुविविक्तधाम्नः। विक्षिप्यमाणैरुत किं नु दूषणं घनैरुपेतैर्विगतै रवेः किं॥ २५॥ मत्सु विविक्त
धाम्नां मम सुष्ठु विविक्तं धाम स्वरूपं येन तस्य। प्रकाशकस्य प्रकाश्य गुणदोषा न भवंतीति रविदृष्टांतेनोक्तं। असंगत्व
वेनावस्थितस्य न केऽपि गुणदोषा इत्याकाशदृष्टांतेनाह। यथेति॥ ब॥ यथा नभो वाय्वनलांबुभूगुणैर्गतागतैर्वर्त्तुगुणैर्न
सज्जते। यथाक्षरं सत्त्वरजस्तमोमलैरहंमतेः संसृतिहेतुभिः परं॥ २६॥ वाय्वादीनां शोषणदहनक्लेदनरजोधूसरत्वादिभिः
गतागतैः आगमापायिभिः ऋतुगुणैः शीतोष्णादिभिर्वा। अहंमतेः अहंकारात् परमक्षरं संसृतिहेतुभिर्न युज्यते। यद्वा। अ

हंकारस्य संसृतेर्हेतुरिति मुक्तवत्सम्यक्ज्ञानी न यथेष्टमाचरेदित्याह द्वाभ्यां। तथापीति॥ब॥ तथापि संगः परिवर्जनीय
गुणेषु मायारचितेषु तावत्। मत्क्रियोगेन दृढेन यावद्रजो निरस्तं तमनःकषायः॥२७ गुणेषु विषयेषु। रजः रागः। मनः
कषाय इति ढिनिरस्ततामाह। एतदेव दृष्टांतेनोपपादयति। यथेति॥ब॥ यथामयो साधुचिकित्सितो नृणां पुनः पुनः संत
दति प्ररोहयन्। एवं मनोपक्व कषायकर्म कुयोगिनं विध्यति सर्वसंगं॥२८ नृणामामयो रोगः। असाधु सम्यक् यथा भवति। अ
पक्वकषायकर्म अपक्वाः अदग्धाः कषाया रागादयः तन्मूलानि कर्माणि च यस्मिन् तत्। अत एव सर्वसंगं सर्वेषु पुत्रादिषु
सज्जमानं मनः कुयोगिनं असम्यक्ज्ञानिनं विध्यति। भ्रंशयति। ननु कथं विद्विषयसंग यदि योगभ्रंशः स्याद्दलं तदिसापाये
न योगमार्गेण। तत्राह। कुयोगिन इति॥ब॥ कुयोगिनो ये विहितान्तरायैर्मनुष्यभूतैस्त्रिदशोपसृष्टैः। तत्प्राक्तनाभ्यास
बलेन भूयो युंजंति योगं न तु कर्मतंत्रं॥२९ मनुष्यभूतैर्बंधुशिष्यादिरूपैः त्रिदशैरुपसृष्टैः प्रारितैः। तथा चक्रतिः। तस्म

न्नदेषन प्रियं यदेतन्मनुष्या विद्धरिति। कर्मतंत्रं न कुर्वतीत्युक्तं। तत्र हेतुमाह। करोतीति॥ब॥ करोति कर्म क्रियते च जंतु
केनाप्यसौ चोदित आनिपातात्। न तत्र विद्वान् प्रकृतौ स्थितोपि निवृत्ततृष्णः स्वसुखानुभूत्या॥३० विदुषोन्योसौ जंतुः देहए
वनाजनादि कर्म करोति। क्रियते विक्रियते च तेन कर्मणा पुण्याद्यपि प्राप्नोतीत्यर्थः। केनापि संस्काराचोदितः सन्नादि
निपातान्मरणपर्यंतं कर्म करोति विद्वांस्तु प्रकृतौ देहे स्थितोपि कर्मणि न विक्रियते निरहंकारित्वाद्धर्मविषदादिभिः संसा
रं न प्राप्नोतीत्यर्थः। आस्तां तावद्देहादिककर्मनिर्विकारत्वं कायतो देहमप्यसौ न पश्यतीत्यर्थः। तिष्ठंतमिति॥ब॥ तिष्ठंतमा
सीनमुत व्रजंतं शयानमुक्षंतमदंतमन्नं। स्वभावमन्यत्किमपीहमानमात्मानमात्मस्थमतिर्न वेद॥३१ उक्तं तमन्वयं
तं। स्वभावप्राप्तमन्यदपि दर्शनस्पर्शनादि ईहमानं कुर्वंतं। आत्मानं देहं। नन्विंद्रियवतः सर्वथा कथमदर्शनं भवति।
तत्राह। यदि स्मेति॥ब॥ यदि स्म पश्यत्यसदिंद्रियार्थं नानानुमानेन विरुद्धमन्यत्। न मन्यते वस्तुतया मनीषी स्वाप्नं यथोत्थाय

तिरोदधानं॥२१ यद्यप्यसतां बहिर्मुखानामिंद्रियाणामर्थं पश्यति तथापि नात्मानं मिथ्याध्यवसायात्मानेन विरुद्धं बाधितं स्य
तत्त्वग्रहादात्मव्यतिरिक्तं मनीषी वस्तुतया न मन्यते। स्वापादुत्थायप्रतिबुध्य संस्कारमात्रेण स्वाप्नं विषयं स्फुरेत्तं अतएव स्वयमे
व तिरोभवेत्तं यथा तद्वत्। तदेवमात्मा न विक्रियत इत्युक्तं। नचैतदनुपपन्नं बद्धावस्थायां दृश्यमानत्वात् मुक्तावस्थायां च दृश्य
माणत्वात्। नहि ब्रीहयोऽवघातेन ब्रीहिभावव्यागतस्तंडुलीभावेन दृश्यमाणा न विक्रीयंते। तत्राह। पूर्वमिति॥२॥ पूर्वं दृष्ट
तं गुणकर्मवित्त मज्ञानमात्मन्यविविक्तमंग। निवर्तते तत्तु नरीक्षयेव न दृश्यते नापि विसृज्य आत्मा॥२२॥ बंधावस्थायां गुण
कर्म निश्चित्रज्ञानं देहेंद्रियादिलक्षणं आत्मन्यध्यासेनाविविक्तं दृष्टं तमासीत्। तदेव पुनर्ज्ञानेन निवर्तते। आत्मा न केना एटाव
पि निरूपेण दृश्यते नापि युज्यते। अयं भावः। मुक्तेः क्रियाफलत्वे तावदात्मविकारः तस्याध्यारोपिताज्ञानमात्रनिवृत्तिरूपत्वात् २२०
नात्मसंस्पर्शित्वं बंधमोक्षयोः अतो न विकार इति। एतदेव दृष्टांतेन स्पष्टयति। यथेति॥३॥ यथा हि मानो रुदयोन्न चक्षुषां तमो

विधत्ते स्वान्न तु संविधत्ते। एवं समीक्षा निपुणा सतीमे हत्यात्ममिश्रं गुरुषस्य बुद्धेः॥२४ ननु पूर्वमेव सतश्च टादि पुनर्विधत्ते
करोति। समीक्षा आत्मविद्या। आत्मनो निर्विकारतां प्रपंचयति॥३॥ एष स्वयंज्योतिरजोऽप्रमेयो महानुभूतिः सकला
नुभूतिः। एकोऽद्वितीयो वचसां विरामो यन्नेषिता वागमनश्चरंति॥२५ एष इत्यनेनापरोक्षतया निर्दिष्टस्यात्मनः प्रा
ग्निवारयति। स्वयंज्योतिरित्यज्ञानमलापाकरणं विज्ञप्तिं अज इत्युत्पत्तिं। अप्रमेय इति ज्ञानलक्षणा निश्चयेन ध्येयेन न
संस्कारं। महानुभूतिरिति देशकालपरिच्छेदाभावेनाप्ति। वृद्धिविपरिणामापक्षयनाशान्। स्वयंज्योतिष्ट्वादेहेतुः॥
सकलानुभूतिरिति। एकोऽद्वितीय इति विवेकारहेतोरन्यस्याभावान्नकोपि विकार इति दर्शयति। ननु श्रुतिविषयस्य
कथं स्वयंज्योतिष्ट्वादित्याह। वचांसि विरामेऽगोचरत्वेन निवृत्तो सर्वा। तथा च श्रुतिः। यतो वाचो निवर्तंते अप्राप्य मन
सा सहेति। तत्र हेतुः। येन इषिताः प्रेरिताः। तथा च श्रुतिः। केनेषितं पतति मनः केन प्राणः। प्रथमः प्रैति युक्तः। केनेषितां

वाचमेमां वदंति चक्षुः श्रोत्रे क उ देवो युनक्ति। श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स प्राणस्य प्राणं चक्षुषश्चक्षुरिति। श्रु
द्वितीयः च मुपपादयितुं भेदस्यावास्तवत्वमाह। एतावानिति॥ ब॥ एतावानात्मसंमोहो यद्विकल्पस्तु केवले। आत्मन्नृते
स्वमात्मानमवलंबो न यस्य हि॥ २६ केवले अद्वितीये आत्मन्यात्मनि विकल्प इति यत् एतावान् सर्वोऽप्यात्मनो मनसः संमो
हः भ्रमः। यतः स्वमात्मानं ऋते विना यस्य विकल्पस्य अवलंब आश्रयो नास्ति। रजतभ्रमस्येव शुक्तिं विना नेह नानास्ति किंचन।
इंद्रो मायाभिः पुरुरूप ईयते इत्यादिश्रुतेरियमर्थः। केचित्तु नः प्रत्यक्षादिप्रतीतस्य प्रपंचस्य बाधायोगात् वेदांतानां चकर्म
र्थकर्तृप्रतिपादनपरत्वेनार्थवादत्वात् द्वैतं सत्यमिति मन्यंते। तन्मतमनूद्य दूषयति। यदिति॥ ब॥ यन्नामाकृतिभिर्ग्राह्यं पं
चवर्णमबाधितं। व्यर्थेनाप्यर्थवादोऽयं द्वयं पंडितमानिनां॥ २७ नामाकृतिभिः नामरूपोपलक्षणं पंचवर्णं पंचभूतात्मकं
कार्यं द्वैतं यत् तदबाधितं इति पंडितमानिनां अत्र वयमेव पंडिता इत्यभिमानवतां वेदांतेष्वयमर्थवाद इति प्रतीतिः न तत्त्ववि

प०टी० २१६ २०

दां। यतः व्यर्थेनापि विनाप्यर्थेन साधयतीति। तथा हि। न तावद्विध्येकवाक्यत्वं तेषामस्ति यतोऽर्थवादत्वं स्यात्। न चाकर्तृ
त्वोक्तपरमानंदरूपात्मप्रतिपादनं कर्मविधिशेषतां भजते। न चाबाधितत्वं द्वैतस्य नामरूपात्मकत्वादाद्यंतवत्त्वात् पंच
वर्णात्मकत्वात् स्वप्नवदित्यनुमानेन वाचारंभणं विकारो नामधेयं इत्यादिश्रुतिभिश्च बाधितत्वादिति। तदेवं ज्ञानयो
गं सपरिकरं निरूप्येदानीं तन्निष्ठस्य विघ्नप्रतीकारानाह। योगिन इति त्रिभिः॥ ब॥ योगिनोऽपक्वयोगस्य युंजतः का
य उत्थितैः उपसर्गैर्विहन्येत तत्रायं विहितो विधिः॥ २८ योगं युंजतः कायः यद्यंतरा एवोत्पन्नैः उपसर्गैः रोगाद्युप
द्रवैः अभिभूयेत। विधिः प्रतीकारः॥ ब॥ योगधारणया कांश्चित् आसनैर्धारणान्वितैः। तपोमंत्रौषधैः कांश्चिदुप
सर्गान्विनिर्दहेत्॥ २९ योगधारणया सोमसूर्यादिधारणया संतापशैत्यादीन्। आसनैर्वा युक्तधारणान्वितैः वाता
दिरोगान्। तपोमंत्रौषधैः पापग्रहसर्पादिकृतान्॥ ब॥ कांश्चिन्ममानुध्यानेन नामसंकीर्तनादिभिः। योगेश्वरानुवृ

२९६
२१०

स्यावा हन्यादशुभदान्भृशं॥४०॥ योगेश्वरानुवृत्त्या दंभमानादीन्हन्यात्॥ अन्ये तु देहसिध्यर्थमेवेतत्सर्वं कुर्वंतीति तद्दूष
यति॥ब॥ केचिद्देहमिमं धीराः सुकल्पं वयसि स्थिरं॥ विधाय विविधोपायैरथ युंजंति सिद्धये॥४१॥ केचित्तु नरेतरैर्दूष्यो
पायैर्देहमेव सुकल्पं जरारोगादिरहितं वयसि तारुण्ये स्थिरं च कृत्वा परकायप्रवेशादिसिध्यये॥ तत्कारणमाहृणा पंयोगयु
ज्यंति॥ न तज्ज्ञाननिष्ठारूपं॥ब॥ न हि तत्कुशलादृत्यं तदायासो ह्यपार्थकः॥ अंतवत्त्वाच्छरीरस्य फलस्येव वनस्पतेः॥४२॥
कुशलैः प्राज्ञैरादरणीयं न भवति॥ वनस्पतिर्वृक्षास्तस्य फलस्येव शरीरं तु फलवन्नश्वरमित्यर्थः॥ ननु कविज्ञसमाध्यंगत्वेनापि
प्राणायामादियोगे क्रियमाणे जरारोगाद्यभावो दृश्यते॥ सत्यं॥ तथापि समाधिमुत्सृज्य न तत्र सज्जेतेत्याह॥ योगमिति॥
॥ब॥ योगं निषेवतो नित्यं कायश्चेत्कल्पतामियात्॥ तच्छ्रद्दध्यान्न मतिमान्योगमुत्सृज्य मत्परः॥४३॥ ततो देहसिद्धिं
श्रद्दध्यात्तन्न विश्वसेत्॥ तदेवं विघ्नप्रतीकारैर्योगिं कुर्यादित्युक्तं॥ मद्भजनाच्च न विघ्नशंकापीत्याह॥ योगचर्यामिति॥ब॥

योगचर्यामिमां योगी विचरन्मदपाश्रयः॥ नांतरायैर्विहन्येत निःस्पृहः स्वसुखानुभूः॥४४॥ विचरन्नाचरन्॥ स्वसुखेन
अनुभूयैः अनुभूतिर्यस्य सः॥ स्पृहामूला हि विघ्नाः सा च मदपाश्रयस्य निवर्त्तते॥ अतोंतरायैरविहतः स्वानंदरूपो
भवतीति॥ब॥ समाहृत्य योगं तु समस्तोपनिषद्रसं॥ सख्ये सुख्यतमां भक्तिं मुक्तेभ्य उद्धवं रूपादिशत्॥१॥ ॥ब॥ ॥
इति श्रीभागवते महापुराणे एकादशस्कंधे श्रीकृष्णोद्धवसंवादे ज्ञानयोगनिरूपणं नामाष्टाविंशोऽध्यायः॥ ॥
ऊनत्रिंशे तु यः पूर्वं विस्तरेण निरूपितः॥ भक्तियोगस्तमेवाह स्वभक्ताय समासतः॥१॥ अतिक्लेशमेवालस्य योगं संगेक
संपदि॥ सुखोपायं पुनः पृच्छत्कृष्णमुद्धवः परिपृच्छति॥२॥ ॥उद्धव उवाच॥ ॥सुदुस्तरामिमां मन्ये योगचर्यामना
त्मनः॥ यथांजसा पुमान्सिध्येत्तन्मे ब्रूह्यंजसाच्युत॥१॥ अनात्मनः अवशीकृतमनसः॥ अंजसा अप्रयासेन यथा सिध्ये
त् तत्तथा अंजसा सुबोधं यथा तथा ब्रूहि॥ सुदुःकरतां प्रपंचयति॥ प्रायस इति॥ब॥ प्रायसः पुंडरीकाक्ष युंजंतो योगि

नोमनः।विषीदंत्यसमाधानान्मनोनिग्रहकर्शिताः॥२मनोदुर्जंतोनिग्रहंकृतः।विषीदंतिक्लिश्यंति।कुतः।असमाधाना
त्।अनिग्रहात्।कथंचिन्मनसोनिग्रहेचकर्शिताःश्रांताःसंतः॥२॥अथातआनंददुघंपदांबुजंहंसाःश्रयेरन्नरविंदलो
चन।सुखंतुयोगेश्वरयोगकर्मभिस्त्वन्माययामीविहितानमानिनः॥३यस्मादेवंविषीदंतिअथातःअतएवहंसाःसारासा
रविवेकचतुराःतेतुआनंददुघंसमस्तानंदपरिपूरकंतवपदांबुजमेवसुखंयथाभवति।तथानुनिश्चितंश्रयेरन्।भवेतो
अमीतुत्वन्माययाविहिताः।का।योगायोगकर्मभिः।मानिनःसंतोनश्रयंति।यद्वा।अमीचकृतकाःत्वन्माययानविहिताःअतएव
योगकर्मभिःत्वचामानिनोनभवंति।अन्येतुत्वन्माययामोहिताःसंतोवयंयोगज्ञाःवयंकर्मकुशलाइतिकेवलंगर्वितोभ एटी०
वंतिनतुसुखंतत्यर्थः।नन्वकृताःस्तुतस्यसादेनकृताथाभवंतितन्नातिचित्रमित्याह।किमिति॥४॥किंचित्रमच्युततवैत २१८
दशेषबंधोदासेष्वनन्यशरणेषुयदात्मसात्वं।योरोचयत्सहमृगैःस्वयमीश्वराणांश्रीमत्किरीटतटपीडितपादपीठः॥४॥अन

न्यशरणेषुदासेषुतवात्मसात्वंयत्यथानंदगोपीबलिप्रभृतिषुएतत्किंचित्रंनाश्चर्यमित्यर्थः।यतोयोभवान्श्रीराम
रूपेणमृगैर्वानरैःसहसख्यादिकंसख्यमिति।यावत्अरोचयत्प्रीत्याकृतवान्।कथंभूतः।ईश्वराणांब्रह्मादीनांयानिश्री
मंतिकिरीटानितेषांतटान्यग्राणि।तैःपीडितंविलुठितंपादपीठंयस्यस्वयंतथाभूतोपिसन्।अतस्त्वांपरित्यज्यकोनामा
न्यंसंश्रयेदित्याह।तंत्वेति॥५॥तंत्वाखिलात्मदयितेश्वरमाश्रितानांसर्वार्थदंस्वकृतविद्विसृजेतकोनु।कोवाभजेत्कि
मपिविस्मृतयेऽनुभूत्यैकिंवाभवेन्नतवपादरजोजुषांनः॥५॥एतंएवंभूतंत्वांकोनुविसृजेत्।कथंभूतः।स्वकृतवित्बलि
प्रह्लादादिषुत्वयाकृतमनुग्रहंजानन्।यद्वा।स्वस्मिन्नेवंतर्यामितयाकृतमुपकारंविद्वान्।तदेवाह।अखिलात्मदयि
तेश्वरंअखिलस्यजगतःआत्मानंचेतयितारंआत्मत्वादेवदयितंप्रेष्ठंसुसेव्यंईश्वरत्वादवश्यंभजनीयं।किंच।आश्रिता
नांसर्वार्थदं।तद्धिकिंफलोद्देशेनाहंसेवेय।नहिनहि।किमपिअतितुच्छंस्वर्गादित्वयादत्तमपिकोवाभजेत्सेवेत।कथं

भूतंतत्रयःकेवलंभूत्यैइंद्रियभोगाय।अनुअनंतरंचतद्विस्मृतयेभवति।यद्वा।त्वद्व्यतिरिक्तंकिमपिदेवतांतरंधर्मज्ञानादिसा
धनंवाभूत्यैऐश्वर्यायसंसारस्यविस्मृतयेमोक्षायवाकोभजेत।नकोपि।ननुतदाराधनेविनाभोगमोक्षादिफलंकथंस्या
त्तत्राह।किंवेति।तदुक्तं।यावैसाधनसंपत्तिःपुरुषार्थचतुष्टये।तया विनातदाप्नोतिनरोनारायणाश्रयइति।आमंत्र्य
भजनत्वान्न।त्वत्तोपकारस्यत्वय्यात्मनिवेदनेनैवसर्वेनिःतिर्नाप्यथेयाह।नैवेति।।ब।।नैवोपयंत्यपचितिंकवयस्तवेश
ब्रह्मायुषापिकृतमृद्धमुदःस्मरंतः।योंतर्बहिस्तनुभृतामशुभंविधुन्वन्नाचार्यचैत्यवपुषास्वगतिंव्यनक्ति।।इअपचितिंप्रत्युप
कारंआनृण्यमितियावत्।कवयोब्रह्मविदोपिनैवप्राप्नुवंति।यतःकृतमुपकारंस्मरंतःऋद्धमुदःउपचितपरमानंदाः एटी०
उपकारमेवाह।योंतर्बहिराचार्यचैत्यवपुषागुरुरूपेणअंतश्चैत्यवपुषाअंतर्यामिरूपेणअशुभंविषयवासनाविधुन्वन् २१८
निरस्यन्स्वगतिंनिजंस्वरूपंप्रकटयति।तस्यतव।।ब।। ।।श्रीशुकउवाच।। ।।इत्युद्धवेनात्यनुरक्तचेतसापृष्टोजग

क्रीडनकःस्वशक्तिः।गृहीतमूर्तित्रयईश्वरेश्वरोजगादसप्रेममनोहरस्मितः।।७ईश्वरेश्वरश्चेद्देव।जगत्क्रीडनकंक्रीडो
पकरणंयस्यसः।ननुजगत्स्रष्टृत्वादिनाब्रह्मेशादयः।क्रीडंति।तत्राह।स्वशक्तिभिःसत्त्वादिभिर्गृहीतमूर्तित्रयंयेनसः।
सप्रेमप्रेमसहितंमनोहरंस्मितंयस्यसः।सप्रेमयथातथाजगादेतिवा।।ब।। ।।श्रीभगवानुवाच।। ।।हंततेकथयि
ष्यामिममधर्मान्सुमंगलान्।यान्श्रद्धयाचरन्मर्त्योमृत्युंजयतिदुर्जयं।।८हंतेतिसंहर्षसंबोधनं।सुमंगलान्सुख
रूपान्।मृत्युंसंसारं।दुर्जयमन्यैरुपायैः।धर्मानेवाह।कुर्यादितित्रयोदशभिः।।ब।।कुर्यात्सर्वाणिकर्माणिमदर्थंश
नकैःस्मरन्।मय्यर्पितमनश्चित्तोमद्धर्मात्ममनोरतिः।।९मांस्मरन्शनकैरसंरंभतःकुर्यात्।तदाह।मयीति।अर्पितेम
नश्चित्तेसंकल्पविकल्पानुसंधानात्मकेयेनसः।अतएवमद्धर्मेष्वेवात्ममनसोरतिर्यस्यसः।।ब।।देशान्पुण्यान्संश्रये
तमद्भक्तैःसाधुभिःश्रितान्।देवासुरमनुष्येषुमद्भक्ताचरितानिच।।१०पुण्यदेशलक्षणं।मद्भक्तैरिति।देवादिषुयेम

ष्कास्तेषामाचरितानि कर्माणि चाश्रयेत्॥ टी॥ पृथक्सत्रेण वा मह्यं पर्वयात्रामहोत्सवान्। कारयेन्नृत्यगीतादिमहारा
जविभूतिभिः॥ ११ सत्रेण संभूय वा॥ अंतरंगां भक्तिमाह। मामिति त्रिभिः॥ टी॥ मामेव सर्वभूतेषु बहिरंतरपावृतं। ईक्षे
तात्मनि चात्मानं यथा खममलाशयः॥ १२ सर्वभूतेषु आत्मनि च आत्मानं ईश्वरं स्थितं मामेव ईक्षेत। ननु कथमेकस्य स
र्वत्रवृत्तिः। तत्राह। बहिरंतः पूर्णमित्यर्थः। तत्कुतः। अपावृतं अनावरणं। तदपि कुतः। यथा खं असंगत्वादित्यर्थः॥ टी॥ इति
सर्वाणि भूतानि मद्भावेन महाद्युते। सभाजयन्मन्यमानो ज्ञानं केवलमाश्रितः॥ १३ हे महाद्युते अतिप्राज्ञ। अतिअनेक
प्रकारेण केवलं ज्ञानं ज्ञानरूपां दृष्टिमाश्रितः सन् सर्वाणि भूतानि मद्भावेन मन्यमानः सभाजयन् पंडितो यत इत्यकत्तरोगाच्च एटी
यः। ननूत्तमाधमेषु एकरूपेण सभाजनमपांडित्यं स्यात्। उच्यते जात्यतिक्रमादित्याशंक्य तामेव ज्ञानदृष्टिं प्रपंचयति। ब्रा २२०
ह्मण इति॥ टी॥ ब्राह्मणे पुक्कसे स्तेने ब्रह्मण्येऽर्के स्फुलिंगके। अक्रूरे क्रूरके चैव समदृक्पंडितो मतः॥ १४ विषमेष्वपि समदृक्

समं मामेव पश्यन्। विषममेव च तद्दर्शयति। ब्राह्मणे पुक्कस इति जातितो वैषम्यं। पुक्कसोंत्यजातिविशेषः। स्ते
ने ब्रह्मस्वहारिणि। ब्रह्मण्ये ब्राह्मणेभ्यो दातरीति कर्मतः। अर्के विस्फुलिंग इति गुणतः। अक्रूरे शांते क्रूरे च तीव्र
भावतः। नास्तीश्वरे दृष्टिं कुर्वतः सद्यः फलविशेषमाह। नरेष्विति॥ टी॥ नरेष्वभीक्ष्णं मद्भावं पुंसो भावयतोऽचिरात्।
स्पर्धासूयातिरस्काराः साहंकारा वियंति हि॥ १५ समोत्तमहीनेषु स्पर्धादयः स्वस्मिन्नहंकारश्चाहि निश्चितं वियंति नश्यं
ति। ततोंतर्यामीश्वरदृष्ट्या सर्वान्प्रणमेदित्याह। विसृज्येति॥ टी॥ विसृज्य स्मयमानान्स्वान्दृशं व्रीडां च दैहिकीं। प्रण
मेद्दंडवद्भूमावाश्वचांडालगोखरं॥ १६ स्मयमानान् हसतः स्वान् सखीन्। तथा दैहिकीं दृशं अहमुत्तमः सन्नीच इति
दृष्टिं तया हेयया व्रीडा लज्जा तां च विसृज्य श्वचांडालादीनभिव्याप्य प्रणमेत्। एवं पंचभिः श्लोकैरुक्तायाः समदृष्टे
रवधिमाह द्वाभ्यां। यावदिति॥ टी॥ यावत्सर्वेषु भूतेषु मद्भावो नोपजायते। तावदेवमुपासीत वाङ्मनःकायवृत्तिभिः॥ १७

२१

सर्वंब्रह्मात्मकंतस्यविद्ययात्ममनीषया।परिपश्यन्नुपरमेत्सर्वतोमुक्तसंशयः॥१८ तस्यएवंकुर्वतःपुंसःसर्वंब्रह्मात्मक
मेवभवति।कुतः आत्मविषयासर्वत्रेश्वरदृष्टिर्यायाविद्यातया।अतःपरितोषंब्रह्मैवपश्यन्सर्वतःक्रियमाणादुपरमेत।
किमयमेवोपायः अन्योपिवाद्योपीश्यपेक्षायांसंतिबहवःसमीचीनःत्वयमेवेत्याह।अयंहीति॥टी॥अयंहिसर्वकल्पानां
सध्रीचीनोमतोमम।मद्भावःसर्वभूतेषुमनोवाक्कायवृत्तिभिः॥१९ भगवद्धर्मलक्षणोपायस्यसमीचीनत्वमेवोपपादय
तिद्वाभ्यां।नहीति॥टी॥नह्यंगोपक्रमेध्वंसोमद्धर्मस्योद्धवाण्वपि।मयाव्यवसितःसम्यङ्निर्गुणत्वादनाशिषः॥२० अंगहे
उद्धव।अनाशिषोनिःकामस्यउपक्रमेसतिअण्वपिईषदपिविगुण्यादिनिनाशोनास्त्येव।यतोमयैवनिर्गुणत्वाद्द्ययंधर्मः एटी
सम्यग्व्यवसितोनिश्चितः।नत्वन्यवादिमुखेनकथित।किंचयोयइति॥टी॥योयोमयिपरेधर्मःकल्प्यतेनिःफलायचेत्।त २२१
दायासोनिरर्थःस्याद्भयादेरिवसत्तम॥२१ अयमर्थः।किंवक्तव्यंमद्धर्मस्यनध्वंसइति।यतोलौकिकोपियोयोनिरर्थःव्य

थःआयासःसोपिमयिपरेनिष्फलायचेत्कल्प्यते।निःकामतयाअर्पितश्चेत्।तर्हिसएवधर्मःस्यात्।निरर्थयासेदृष्टांत।
यथाभयशोकादेर्हेतोःपलायनादिक्लेशस्तद्वत्।अतोमद्भजनमेवबुद्धेर्विवेकस्यमनीषायाश्चातुर्यस्यचफलमि
त्याह।एषेति॥टी॥एषाबुद्धिमतांबुद्धिर्मनीषाचमनीषिणां।यत्सत्यमनृतेनेहमर्त्येनाप्नोतिमामृतं॥२२ तामेवदर्शय
ति।सत्यंस्तंतंच।मामांअनृतेनअसत्येनमर्त्येनविनाशिनामनुष्यदेहेनइहअस्मिन्नेवजन्मनिप्राप्नुवंतीतियत्सेवबु
र्मनीषाचेति।बुद्धिर्विवेकःमनीषाचातुर्यं।महाप्रकरणार्थमुपसंहरति।एषनइति॥टी॥एषतेभिहितःकृत्स्नोब्रह्म
वादस्यसंग्रहः।समासव्यासविधिनादेवानामपिदुर्गमः॥२३ अभीक्ष्णशस्तेगदितंज्ञानंविस्पष्टयुक्तिमत्।एतद्वि
ज्ञायमुच्येतपुरुषोनष्टसंशयः॥२४ किंच।आस्तांतावत्ज्ञानं।एतदनुसंधानकथनपठनश्रवणपराणामप्येतदेव
फलंभवतीत्याहद्वाभ्यां।सुविविक्तमिति॥टी॥सुविविक्तंतवप्रश्नंमयैतदवधारयेत्।सनातनंब्रह्मगुह्यंपरंब्रह्माधि

गछति॥२५॥स्तु विविक्तं दत्तोत्तरं। एतत् व्याख्यानमपि यो वधारयेत् अनुमेदध्यात्। ब्रह्मलोकं वेदेपि दृश्यं॥ब॥यएतन्मम
भक्तेषु संप्रदध्यात् सुपुष्कलं। तस्याहं ब्रह्मदायस्य दास्याम्यात्मानमात्मना॥२६॥सुपुष्कलं यथा भवति तथा॥ब्रह्मदाय
स्य ब्रह्म ददातीति तथा॥तस्य ज्ञानोपदेष्टुः॥ब॥यएतज्ञमधियीत पवित्रं परमं शुभं। विमुच्येता दुःखेभ्यो ज्ञानदीपेन दर्शयिन्
॥२७॥समधीयीत नश्चेः पठेत्। परमं शुभं विशेषेषामपि ज्ञो धकं द्दजयेत् तत्र शुध्येत्॥ब॥यएततश्रद्धयानित्यमध्यगः शृणुयान्नरः
मयि न क्तिं परां कुर्वन् कर्मभिर्न स बध्यते॥२८॥सम्यक् ज्ञानानुत्पत्तौ पुनरुपदेक्ष्यामीत्याशयेन पृछति। अपीति॥ब॥अपिक
ध्ववत्त्वया ब्रह्मसर्वस्वमुपधारितं। अपि ते विगतो मोहः शोकश्चासौ मनोभव॥२९॥अपि किं। उपधारितमाकल्पयाद्वा। नैव ए०ग०
दिति॥ब॥नैव त्वया दांभिकाय नास्तिकाय शठाय च। अशुश्रूषोरभक्ताय दुर्विनीताय दीयतां॥३०॥शठाय तं च काय॥ब॥ २२२
एते दोषा वै विद्यन्ते यत्र ब्राह्मणाय प्रियाय च। माधवेशु च ये ब्रूयाद्भक्तिः स्याच्छूद्रयोषितां॥३१॥शूद्राणां च योषितां च यदि भक्तिः

स्यात् तदर्हि ब्रूयात्। अतस्तासामप्यधिकार इत्यर्थः। एतत् ज्ञानेन च पुमान् कृतार्थो भवतीत्याह। नैतदिति॥ब॥नैतद्विज्ञाय जि
ज्ञासोस्ति तथ्यमवशिष्यते। पीत्वाब्धौ पूषममृतं पीतव्यं नावशिष्यते॥३२॥अत्र दृष्टांतमाह। पीत्वेति। पीयूषं स्वादु। न तु भे
ति बह्वि ज्ञेयानि तत्तत्फलसाधनानि। सत्यं। सत्यभक्तानां। भक्तस्य सर्वमहमेव। अतो मदेकशरणो भवेत्याह। ज्ञानइति
॥ब॥ज्ञाने कर्मणि योगे च वाणिज्ये दंडधारणे। यावानर्थो नृणां तात तावान्मे दं चतुर्विधः॥३३॥ज्ञानदो यावानर्थमादि लक्षणो
यथातुर्विधोर्थः तावान् सर्वोपि तदहमेव। तत्र ज्ञाने मोक्षः। कर्मणि विहितधर्मः स्वाभाविके उकामः। योगे चाणिमादि सिद्धयः
वाणिज्ये अल्पाद्यावर्थः दंडनीतौ ताविध्वयमिति। सिद्धेश्वर्ये पिकामांतर्गतत्वाच्चातुर्विध्यं। कृतइत्यत आह। मर्त्य इति॥ब॥
मर्त्योयदा त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मे। तदामृतत्वं प्रतिपद्यमानो मया भूयाय च कल्पते वै॥३४॥यदा
त्यक्तसमस्तकर्मा स्मिन्मे निवेदितात्मा भवति। तदा असौ मे विचिकीर्षितः विशिष्टं कर्तुं इष्टो भवति। ततश्च अमृतत्वं मोक्षं प्रा

तिपद्यमानो मयात्मनुयाय मदैक्याय मज्ञमानैश्वर्यो विति यावत्। कल्पते योग्यो भवति॥ विधुवं॥ब॥ ॥श्रीशुक उवा
च॥ ॥स एवमादर्शितयोगमार्गस्तदुत्तमश्लोकवचो निशम्य। बद्धांजलिः प्रीत्युपरुद्धकंठो न किंचिदूचेश्रुपरिप्लुता
क्षः॥३५ आदर्शितो योगमार्गो यस्मै सः॥ब॥ विष्टभ्य चित्तं प्रणयावघूर्णं धैर्येण राजन्बहु मन्यमानः। कृतांजलिः प्राह
यदुप्रवीरं शीर्ष्णा स्पृशंस्तच्चरणारविंदं॥३६ प्रणयेनावघूर्णं डुलितं चित्तं धैर्येण विष्टभ्य बहु मन्यमानः आत्मानं कृतार्थं
मन्यमानः॥ब॥ ॥उद्धव उवाच॥ ॥विद्रावितो मोहमहांधकारो य आश्रितो मे तव संनिधानात्। विभावसोः किं नु स
मीपगस्य शीतं तमो भीः प्रभवंत्यजाद्य॥३७ मे मया यो मोहः आश्रितः आसीत्। स तव संनिधानेनैव विद्रावितः। प्रभवंति किं
नु बाधंते समर्था भवंति। अजाद्य ब्रह्मणोपि जनक॥ब॥ प्रत्यर्पितो मे भवतानुकंपिना भृत्याय विज्ञानमयः प्रदीपः॥ हि
त्वा कृतज्ञस्तव पादमूलं कोन्यं समीयाच्छरणं त्वदीयं॥३८ किंच यद्यपि तव संनिधानादेव गतः। तथापि अनुकंपिना भवता

विज्ञानमयप्रदीपश्च प्रत्यर्पितः स्वमायया पहृतः पुनः समर्पितः। अतस्तव कृतज्ञः यस्त्वया कृतमनुग्रहं जानाति स
कोन्य त्वदीयं पादमूलं हित्वा अन्यच्छरणं समीयात् आश्रयेत। किंच॥ब॥ वृक्णश्च मे सुदृढः स्नेहपाशो दाशार्हवृष्ण्यं
धकसात्वतेषु। प्रसारितः सृष्टिविवृद्धये त्वया स्वमायया ह्यात्मसुबोधहेतिना॥३९ दाशार्हादिषु त्वयाय स्वमायया
स्नेहपाशः प्रसारितः स त्वयैवात्मतत्त्वज्ञानशस्त्रेण वृक्णः छिन्नः। एवं यद्यपि त्वया बहुकृतं तथापि एतावत्प्रार्थये इ
त्याह। नमोस्त्विति॥ब॥ नमोस्तु ते महायोगिन्प्रपन्नमनुशाधि मां। यथा त्वच्चरणांभोजे रतिः स्यादनपायिनी॥४० अ
नुशाधि अनुशिक्षयं। अनुशासनीयमाह। यथेति। मुक्तावप्यनपायिनी॥ तदुक्तमामित्यंगीकृत्य तथापि मयादिष्टो लो
कसंग्रहणार्थमेतावत्कुर्यादित्याह। गच्छेति॥ब॥ गच्छोद्धव मयादिष्टो बदर्याख्यं ममाश्रमं। तत्र मत्पादतीर्थोदे स्नानोपस्प
र्शनैः शुचिः॥४१ आदिष्टो नियुक्तः॥ब॥ ईक्षयालकनंदाया विधूताशेषकल्मषः। वसानो वल्कलान्यंग वन्यभुक्सुखनिः

स्पृहः॥४२॥ स्नानादेः पूर्वमेव मत्या दत्तीर्थे दिककृताया अलकनंदाया गंगाया ईस्या। वसानः परिदधानः॥ ॥ तितिक्षुर्द्वंद्वमा
त्राणां सुशीलः संयतेंद्रियः शांतः समाहितधिया ज्ञानविज्ञानसंयुतः॥४३॥ द्वंद्वमात्राणां शीतोष्णादिविषयाणां॥ सुशीलः
आर्जवादिस्वभावः॥ ॥ मत्तोनुशिक्षितं यत्ते विविक्तमनुभावयन्। मयावेशितवाक्चित्तो मद्धर्मनिरतो भवान्। अतिव्रज्य
गतीस्तिस्रो मामेष्यति ततः परं॥४४॥ तेन त्वया विविक्तं सुविचारितं। तिस्रः गुणात्मिका गतीरतिक्रम्य॥ ॥ ॥श्रीशुक उवाच॥
स एवमुक्तो हरिमेधसोद्धवः प्रदक्षिणं तं परिसृत्य पादयोः। शिरो निधायाश्रुकलाभिरार्द्रधीर्न्यषिंचदद्वंद्वपरोप्युपक्रमे॥४५॥
हरिमेधसः संसारं हरति मेधा यस्य तेन श्रीकृष्णेन। अद्वंद्वपरोपि सुखदुःखनिर्मुक्तोपि। उपक्रमे निर्गमनसमये। किंच॥ ॥
सुदुस्त्यजस्नेहवियोगकातरो न शक्नुवंस्तं परिहातुमातुरः। कृच्छ्रं ययौ मूर्धनि भर्तृपादुके बिभ्रन्नमस्कृत्य ययौ पुनः पुनः
॥४६॥ सुदुस्त्यजः स्नेहो यस्मिन् तेन वियोगात् कातरो भीतः अत एव तं परिहातुमशक्नुवन् आतुरो विकलः सन् कृच्छ्रं कष्टं

...रा॥

ययौ प्रापीत ततश्च भर्तुः पादुके ते नैव कृपया दत्ते मूर्ध्नि बिभ्रत् अतिनिर्बंधरूपया तदाज्ञया तं पुनः पुनः नमस्कृत्य ययौ।
अत्र च पृष्ठतो ऽवगमनं भर्तुः पादुके ते नैव विश्लेषणात् नमस्कृत्यादि तृतीयस्कंधोपक्रमोक्तानुसारेण बदरिकाश्रमं गच्छन्
भगवतः प्रभासयात्रा सुप्रक्रम्य यत्नैः पृष्ठतो गतः सन् उपसंहृतनिजकुलं भगवंतमेकांते दृष्ट्वा तत्कालप्राप्तेन मैत्रे
येण सह पुनः कृपया दिष्टं तत्त्वमाकलय्य तदाज्ञातो ययाविति द्रष्टव्यं॥ ॥ ततस्तमंतर्हृदि संनिवेश्य गतो महाभा
गवतो विशालां। यथोपदिष्टां जगदेकबंधुना तपः समास्थाय हरेरगाद्गतिं॥४७॥ विशालायां बदरिकाश्रमं गतः सन् ह
रेर्गतिमाप। कथंभूतां जगदेकबंधुना यथोपदिष्टां। तदामृतत्वं प्रतिपद्यमानो मयात्मभूयाय च कल्पते वै। अतिव्रज्य
गतीस्तिस्रो मामेष्यति ततः परमित्येवमुक्तप्रकारं॥ ॥ य एतदानंदसमुद्रसंभृतं ज्ञानामृतं भागवताय भाषितं। कृ
ष्णेन योगेश्वरसेवितांघ्रिणा सच्छ्रद्धयासेव्य जगद्विमुच्यते॥४८॥ आनंदसमुद्रो भगवद्भक्तिमार्गः तस्मिन् संभृतं एकी

२२५

सतेएतयः मद्बुद्ध्याद्यामेथ्येईषदपि सेविद्या वर्त्तते स विमुच्यत इति किं वक्तव्यं। तत्संगेन जगदपि विमुच्यत इत्यर्थः। एवं त्व
तोपदेशं जगद्गुरुं प्रणमति। भवभयमिति॥ ॥ भवभयमपहंतुं ज्ञानविज्ञानसारं निगमकृदुपजह्रे भृंगवद्वेदसारं। अ
मृतमुपदधितश्चापाययद्भृत्यवर्गान्पुरुषमृषभमाद्यं कृष्णसंज्ञं नतोस्मि॥ ४९॥ भवः संसारः भयं च जरारोगनिमित्तं तदप
यं निहतानां च भृत्यवर्गाणां यथायोग्यमपहंतुं यो मृतद्वयमुपजह्रे उद्धृतवान् तदाह। वेदसारमेकं। किं तत् ज्ञानविज्ञा
नरूपं च तत्सारं श्रेष्ठं वा भृंगवत्। भृंगो यथा पुष्पमकोपयन्नेवामृतमुपहरति तथापि स्वयं स्वकृतवेदानुसारेणैव। अद
र्शितश्चैकं। तत्त्वोभयं यथायथं भृत्यवर्गानपाययत् तं नतोस्मि॥ ॥ येनानुकंपितं विश्वमुद्धवप्रश्ननिर्णयैः। तं वंदेप एटी
रमानंदं नंदनंदनरूपिणं॥ १॥ ॥ ॥ ॥ इति श्रीभागवते महापुराण एकादशस्कंधे श्रीकृष्णोद्धवसंवादो ना २२५
मैकोनत्रिंशोऽध्यायः॥ ॥ ॥ ॥ त्रिंशे तु प्रागुपक्षिप्तमौशलं तत्छलतो हरिः। स्वधर्मं गंतुमिच्छन्स्वं संजहार निजं

कुलं॥ १॥ विरागाय तु रागयोरनुपक्षिप्तं हि मौशलं। कथावसाने तत्रैव विशेषं परिहृच्छति॥ २॥ तत इति त्रिभिः॥ ॥ ॥
राजोवाच॥ ॥ ततो महाभागवते उद्धवे निर्गते वनं। द्वारवत्यां किमकरोद्भगवान्भूतभावनः॥ १॥ ब्रह्मशापोप
संसृष्टे स्वकुले यादवर्षभः। प्रेयसीं सर्वनेत्राणां तनुं स कथमत्यजत्॥ २॥ ब्रह्मशापोपसृष्टे स्वकुले सति श्रयं नावः
न हि भगवति शापः प्रभवति। यावद्वांतु करणात्सोपि कथं विन्माच्यः अतः किमकरोदिति तदेव तदुक्तं कथमत्यज
दिति। सर्वनेत्राणामिति सर्वेंद्रियोपलक्षणं। तत्प्रपंचयति प्रत्याक्रष्टुमिति॥ ॥ प्रत्याक्रष्टुं नयनमबला यत्र लग्नं न
शेकुः कर्णाविष्टं न सरति ततो यत्सतामात्मलग्नं। यच्छ्रीर्वाचां जनयति रतिं कीर्त्यमानां कवीनां दृष्ट्वा जिष्णोर्युधि रथगतं
यच्च तत्साम्यमीयुः॥ ३॥ यस्मिन्रूपे लग्नं नयने यस्मिन्परावर्त्तयितुमबला न शेकुः। यच्च कर्णरंध्रेण प्रविष्टं सतामात्म
निलग्नं लिखितमेव तिष्ठति। ततो न सरति न निर्गच्छति यच्च श्रीः शोभा कीर्त्यमाना कवीनां वाचां रतिमुत्तमां विशेषं ज

नयति। तेषां मानं जयत्सुज्यतां जनयतीति किमु वक्तव्यं। यच्च विलोकरूपं जिह्मो रज्जुं नष्टं रथे स्थितं दृष्ट्वा युधिष्ठिरा तस्मा
न्मुंसारूपं इद्युः प्राप्ताः। तत्केन रूपेणाग्रज दिव्यत्वयः॥छ॥ ॥श्रीशुक उवाच॥ ॥दिवि भुव्यन्तरिक्षे च महोत्पातान् स
मुत्थितान्। दृष्ट्वासीनान् सुधर्मायां कृष्णः प्राह यदूनिदं॥४ दिवि सूर्यपरिवेषादीन्। भुवि भूकंपादीन्। अंतरिक्षे दिग्दाहा
दीन्महोत्पातान् स्वयमेवोत्पादितवान् दैत्यैः प्रतिकारान्॥छ॥ ॥श्रीकृष्ण उवाच॥ ॥एते घोरा महोत्पाता द्वार्वत्यां यम
केतवः। मुहूर्त्तमपि न स्थेयमत्र नो यदुनंदनाः॥५ यमस्य केतवो ध्वजा इव मृत्युसूचका इत्यर्थः। नः अस्माभिः॥छ॥ स्त्रियो
बालाश्च वृद्धाश्च शंखोद्धारं व्रजंत्वितः। वयं प्रभासं यास्यामो यत्र प्रत्यक्सरस्वती॥६ प्रत्यक्पश्चिमवाहिनी॥छ॥ तत्राभिषिच्य
शुचय उपोष्य सुसमाहिताः। देवताः पूजयिष्यामः स्नपनालेपनार्हणैः॥७ ब्राह्मणांश्च महाभागान् कृतस्वस्त्ययना वयं।
गोभिर्हिरण्यवासोभिरिभाश्वरथवेश्मभिः॥८ अभिषिच्य स्नात्वा ब्राह्मणैः कृतशांतिकाः संतः गवादिभिः पूजयिष्या

मः॥छ॥ विधिरेष ह्यरिष्टघ्नो मंगलायनमुत्तमं। देवद्विजगवां पूजा भूतेषु परमो भवः॥९ विधिः प्रकारः। मंगलायनं
च। किंच। देवद्विजगवां पूजा। भवः उद्भवहेतुः। देवलोके परमउद्भवो भविष्यतीति भावः॥छ॥ ॥श्रीशुक उवा
च॥ ॥इति सर्वे समाकर्ण्य यदुवृद्धा मधुद्विषः। तथेति नौभिरुत्तीर्य प्रभासं प्रययू रथैः॥१० मधुद्विषो वाक्यमा
कर्ण्य तथेत्यभिनंद्य। उत्तीर्य समुद्रं॥छ॥ तस्मिन्भगवतोद्दिष्टं यदुदेवेन यादवाः। चक्रुः परमया भक्त्या सर्वश्रेयोपबृं
हितं॥११ सर्वश्रेयोपबृंहितमित्यत्र संधिरार्षः। भगवता तु रक्केरपि सार्वैः श्रेयोभिः सहितं चक्रुः॥छ॥ ततस्तस्मिन्महापा
नं पपुर्मैरेयकं मधु। दिष्टविभ्रंशितधियो यद्द्रवैर्भ्रश्यते मतिः॥१२ पीयत इति पानं। मैरेयकं मदिराविशेषं। मधुरसं॥
दिष्टेन दैवेन विभ्रंशितधियः। नष्टान्यथा तस्मिन्स्थाने तदुचितमिति भावः। यस्य द्रवैः रसैः॥छ॥ महापानाभिमत्तानां वी
राणां दृ[illegible]सां। कृष्णमायाविमूढानां संघर्षः सुमहानभूत्॥१३ कृष्णमायाविमूढानामिति मुख्यो हेतुः। संघर्षक

२२७ हा ॥ ठ ॥ युयुधुः क्रोधसंरब्धा वेलायामाततायिनः । धनुर्भिरसिभिर्भल्लैर्गदाभिस्तोमरर्ष्टिभिः ॥ १४ ततो युयुधुरित्या ॥ ठ ॥ प
ताकैः रथकुंजरादिभिः खरोष्ट्रैर्गोभिर्महिषैर्नरैरपि । मिथः समेत्याश्वतरैः सुदुर्मदा न्यहनञ्छरैर्दद्भिरिव द्विपा वने ॥
१५ पतंत्यः ध्वजस्थाः ततः श्वलेयुः पताकायेषु तैस्थादिभिर्मिथः समेत्य तस्य प्रपंचः ॥ प्रक्रमेण्याद्विनाशिनः ॥ ठ ॥ प्रद्युम्नसां
बौ युधि रूढमत्सरावक्रूरभोजावनिरुद्धसात्यकी । सुभद्रसंग्रामजितौ सुचारुगदौ सुमित्रासुरथौ समीयतुः ॥ १६ ॥
सुचारुगदौ श्रीकृष्णस्य त्रातिकः पुत्रश्चापरस्तौ । सुमित्रासुरथावितिदेयमाणौ अन्यरथानामावाकथित ॥ ठ ॥ अन्ये च
ये वै निशठोल्मुकौ सहस्रजिच्छतजिद्भानुमुख्याः । अन्योन्यमासाद्य मदांधकारिता जघ्नुर्मुकुंदेन विमोहिता भृशं ॥ १७ एटी
मदांधेन मदतमसा बलात्कारिताः ॥ ठ ॥ दाशार्हवृष्ण्यंधकभोजसात्वता मध्वर्बुदा माथुरशूरसेनाः । विसर्जनाः कुकु २२७
राः कुंतयश्च जघ्नुर्मिथस्तेस्तु विसृज्य सौहृदं ॥ १८ दाशार्हादयो नवतत्र देशीयाः । अर्बुदा माथुराः शूरसेनाश्च तन्नदेशीयाः ॥

पुरा०

॥ ठ ॥ पुत्रा अयुध्यन् पितृभिर्भ्रातृभिश्च स्वस्रीयदौहित्रपितृव्यमातुलैः । मित्राणि मित्रैः सुहृदः सुहृद्भिर्ज्ञातीस्त्वहन् ज्ञाय
त एव मूढाः ॥ १९ भ्रातृभिश्चेति भ्रात्रादिशब्दानां प्रतियोगिबाधित्वात् भ्रातरो मातुला इत्यादि ज्ञेयं । मित्रैश्च मित्राणि चाहन्
हंतवः ॥ ठ ॥ शरेषु हीयमानेषु भज्यमानेषु धन्वसु । शस्त्रेषु क्षीयमाणेषु मुष्टिभिर्जह्रुरेरकाः ॥ २० धन्वसु धनुःषु जह्रुः
जगृहुः ॥ ठ ॥ ता वज्रकल्पा ह्यभवन् परिघा मुष्टिना भृताः । जघ्नुर्मिथस्तैः कृष्णेन वार्यमाणास्तु तं च ते ॥ २१ परिघा लोहदंडाः ॥
भृताः धृताः तं च श्रीकृष्णमपि ॥ ठ ॥ प्रत्यनीकं मन्यमाना बलभद्रं च मोहिताः । हंतुं कृतधियो राजन्नापन्ना आततायिनः
॥ २२ प्रत्यनीकं प्रतिपक्षं ॥ ठ ॥ ततस्तावपि संक्रुद्धावुद्यम्य कुरुनंदन । एरकामुष्टिपरिघौ चरंतौ जघ्नतुर्युधि ॥ २३ एकमुष्टि
रूपौ परिघावुद्यम्य ॥ ठ ॥ ब्रह्मशापोपसृष्टानां कृष्णमायावृतात्मनां । स्पर्धा क्रोधः क्षयं निन्ये वैणवोऽग्निर्यथा वनं ॥ २४ स्प
र्धानिमित्तः क्रोधः कुलक्षयं निन्ये ॥ ठ ॥ एवं नष्टेषु सर्वेषु कुलेषु स्वेषु केशवः । अवतारितो भुवो भार इति मेनेऽवशेषितः ॥ २५ ॥

२२८ रामःसमुद्रवेलायां योगमास्थाय पौरुषं। तत्याज मानुषं लोकं संयोज्यात्मानमात्मनि॥२६ पौरुषं योगं परमपुरुषध्यान
लक्षणं। तमेवाह। संयोज्येति। मानुषं लोकं स्थूलेकिं मनुष्यरूपतां वा॥ ब॥ रामनिर्याणमालोक्य भगवान्देवकीसुतः। नि
षसादधरोपस्थे ह्यसीमासाद्य पिप्पलं॥२७ धरोपस्थे भूतले॥ ब॥ बिभ्रच्चतुर्भुजं रूपं भ्राजिष्णुप्रभया स्वया। दिशो वितिमिराः
कुर्वन्विधूम इव पावकः॥२८ भ्राजिष्णुरूपं तदेवानुवर्णयति। श्रीवत्सांकमिति चतुर्भिः॥ ब॥ श्रीवत्सांकं घनश्यामं तप्तहाट
कवर्चसं। कौशेयांबरयुग्मेन परिवीतं सुमंगलं॥२९ सुंदरस्मितवक्त्राब्जं नीलकुंतलमंडितं। पुंडरीकाभिरामाक्षं स्फुरन्मक
रकुंडलं॥३० सुंदरस्मितं वक्त्राब्जं यस्मिन्न तत् पुंडरीकवदभिरामे सुंदरे अक्षिणी यस्मिन्न तत॥ ब॥ कटिसूत्रब्रह्मसूत्रकि एदी॰
रीटकटकांगदैः। हारनूपुरमुद्राभिः कौस्तुभेन विराजितं॥३१ वनमालापरीतांगं मूर्तिमद्भिर्निजायुधैः। कृत्वोरौ दक्षिणे पा २२८
दाब्जमासीनं पंकजारुणं॥३२ वनमालया परीतान्यंगानि यस्मिन्न तत्। निजायुधैश्च परीतांगं पंकजारुणं वामं पादं दक्षिणे ऊ

पुरा॰

पा॰

रौ कृत्वा आसीनं रूपं बिभ्रत॥ ब॥ मुशलावशेषायःखंडः कृतेषु लुब्धको जरः। मृगाकारं तच्चरणं विव्याध मृगशंकया॥३३ ज
रानामकश्चित्लुब्धको मृगः। आयुः मृगस्यास्यमिवाकारो यस्य तं चरणं॥ ब॥ चतुर्भुजं तं पुरुषं दृष्ट्वा स कृतकिल्बिषः। भी
तः पपात शिरसा पादयोरसुरद्विषः॥३४ अजानता कृतमिदं पापेन मधुसूदन। क्षंतुमर्हसि पापस्य उत्तमश्लोक मेनघ॥३५
यस्यानुस्मरणं पुंसामज्ञानध्वांतनाशनं। वदंति तस्य ते विष्णो मायाऽसाधु कृतं प्रभो॥३६ तन्माशु जहि वैकुंठ पाप्मानं मृ
गलुब्धकं। यथा पुनरहं त्वेवं न कुर्यां सदतिक्रमं॥३७ ब्रह्मशापहतमेतत् न तवापराध इति वेदत आह॥ ब॥ यस्यात्म
योगरचितं न विदुर्विरिंचिरुद्रादयोऽस्य तनयाः पतयो गिरां ये। त्वन्मायया पिहितदृष्टय एतदंजः किं तस्य ते वयमसद्गतयो
गृणीमः॥३८ यस्य तव आत्मयोगरचितं स्वाधीनमायारचितं। विरंचितस्य तनयाः रुद्रादयश्च ये वाचो गिरां पतयो वेद
ह्यस्ताः तपि न विदुः तस्य ते अचिंत्यामायायस्य एतद्ब्रह्मशापादिकं जसा साकल्येन असद्गतयः पापयोनयो वयं किं गृणी

२२९ मः अतस्त्वदास्तां।यांस्तुमोऽजहीतिभावः॥ब॥ ॥श्रीभगवानुवाच॥ ॥माभैर्जरेत्वमुत्तिष्ठकामएषकृतोहिमे।याहित्वं
मदनुज्ञातःस्वर्गंसुकृतिनांपदं॥३८इत्यादिष्टोभगवताकृष्णेनेच्छाशरीरिणा।त्रिःपरिक्रम्यतंनत्वाविमानेनदिवंययौ।
॥३९इच्छाशरीरिणेत्यस्यायंभावः।शुद्धसत्वमयींनिजांमूर्त्तिंस्थितांदर्शयितत्यरिस्थ्या।एवंक्रीडनमाचमिति।एतदेवस्फु
टीकरिष्यति।देवादयोब्रह्ममुख्याइत्यादिना॥ब॥दारुकःकृष्णपदवीमन्विच्छन्नधिगम्यतां।वायुंतुलसिकामोदमा
घ्रायाभिमुखंययौ॥४०तंतत्रतिग्मद्युभिरायुधैर्वृतंह्यश्वत्थमूलेकृतकेतनंपतिं।स्नेहप्लुतात्मानिपपातपादयोरथा
दवप्लुत्यसबाष्पलोचनः॥४१तंपतिंदृष्ट्वापादयोर्निपपात॥ब॥अपश्यतस्त्वच्चरणांबुजंप्रभोदृष्टिःप्रनष्टातमसिप्र ए॰टी॰
विष्टा।दिशोनजानेनलभेचशांतिंयथानिशायामुडुपेप्रनष्टे॥४२इतिब्रुवतिसूतेवैरथोगरुडलांछनः।खमुत्पपा २२९
तराजेंद्रसाश्वध्वजउदीक्षतः॥४३उदीक्षमाणस्यसूतस्यसतः॥ब॥तमन्वगच्छन्नस्त्राणिविष्णुप्रहरणानिच।तेनातिविस्मितात्मानं

...पराे॥

...शरिण्या देवयितं य...

सूतमाह जनार्दनः॥बी॥४३॥ ॥श्रीभगवानुवाच॥ ॥गच्छद्वारवतींसूतज्ञातीनांनिधनंमिथः।संकर्षणस्यनिर्याणंबंधुभ्योब्रू
हिमद्दशां॥४४निर्याणंयोगमार्गेण।मद्दशामितिछाशरीराभिप्रायेण॥ब॥द्वारकायांचनस्थेयंभवद्भिश्चसबंधुभिः।म
यात्यक्तांयदुपुरींसमुद्रःप्लावयिष्यति॥४५स्वंस्वंपरिग्रहंसर्वमादायपितरौचनः।अर्जुनेनाविताःसर्वइंद्रप्रस्थंगमि
ष्यथ॥४६अविताःरक्ष्यमाणाः।इंद्रप्रस्थंगमिष्यंति।तायति।वृंदीतिशेषेणान्वयः॥ब॥त्वंतुमद्धर्ममास्थायज्ञाननिष्ठउपे
क्षकः।मन्मायारचितामेतांविज्ञायोपशमंव्रज॥४७मन्मायारचितामेतांविज्ञायेतिनिजश्रीमूर्त्तेरंतर्धानात्हयाशोकंमा
कुर्वित्यर्थः॥ब॥ ॥श्रीशुकउवाच॥ ॥इत्युक्तस्तंपरिक्रम्यनमस्कृत्यपुनःपुनः।तत्पादौशीर्ष्ण्युपाधायदुर्मनाःप्रययौ
पुरीं॥४८कुलस्यनष्टत्वाद्दुर्मनाः॥ब॥ ॥इतिश्रीभागवतेमहापुराणेएकादशस्कंधेयदुकुलनिर्वाणंनामत्रिं
शोध्यायः॥ ॥ब॥ ॥एकविंशेस्वकंधामजगामभगवानितः।तमेवानुययौप्रीत्यावसुदेवायदत्ततः॥१देवानय

२३० द्वविधस्यात्मोद्भयो देवाविक्षायतानां श्रीब्रह्मसंस्वेच्छयाधामस्वतन्वैव समाविशत ॥१॥ ॥श्रीशुक उवाच॥ ॥अथत
त्रागमद्ब्रह्मा भवान्या च समं भवः ॥ महेंद्रप्रमुखा देवा मुनयः सप्रजेश्वराः ॥२॥ मुनयः सनकादयः ॥ प्रजेश्वरा मरी
च्यादयः ॥२॥ पितरः सिद्धगंधर्वविद्याधरमहोरगाः ॥ चारणायक्षरक्षांसि किंनराप्सरसो द्विजाः ॥३॥ द्विजा गरुडलोकनि
वासिनः पक्षिणः मित्रादयो वा ॥३॥ द्रष्टुकामा भगवतो निर्याणं परमोत्सुकाः ॥ भगवतो निर्याणं द्रष्टुकामाः संतः पर
मोत्सुका अत्रागमन् ॥ तेषामौत्सुक्यं जनमहोत्सवमाह ॥ गायंतश्चेति सार्द्धेन ॥३॥ गायंतश्च गृणंतश्च शौरेः कर्माणि जन्म च
ववृषुः पुष्पवर्षाणि विमानावलिभिर्नभः ॥ कुर्वंतः संकुलं राजन् भक्त्या परमया युताः ॥४॥ भगवान् पितामहं वीक्ष्य विभूतीरा एटी
त्मनो विभुः ॥ संयोज्यात्मनि चात्मानं पद्मनेत्रे न्यमीलयत ॥ पविभूतीः इंद्रादींश्च ॥ पद्मनेत्रे न्यमीलयदित्यग्रायं भावः सर्वब्रह्मा २३०
दिभिः सलोकाल्लोकपालान्नः पाहि विकुंठ किंकरानिति प्रार्थितं वा इदानीं स्वलोकं प्रति नेष्ये मागत चात्तवकुष्ठ च तेषु

ऽपराः॥

दाक्षिण्याद्वैचर्यिकं समाधिमिव कुर्वन्नेत्रे न्यमीलयदिति। योगिनामिव स्वच्छंदमृत्युक्रमं वारयति। लोकाभिराममिति
॥४॥ लोकाभिरामां स्वतनुं धारणाध्यानमंगलं ॥ योगधारणयाग्नेय्या। दग्ध्वाधामाविशत्स्वकं ॥ इत्ययमर्थः। योगिनो हि स्व
च्छंदमृत्यवः स्वतनुमाग्नेय्या योगधारणया दग्ध्वा लोकांतरं प्रविशंति। भगवांस्तु न तथा॥ किंतु। अदग्ध्वैव स्वतनुं सहित एव
स्वधामा विकुंठाख्यमविशत्। तत्र हेतुः। लोकानामभिरामः। अभितो रमणं स्थितिर्यस्यां तां। जगदाश्रयत्वेन जगतोऽपि दाह
प्रसंगादित्यर्थः॥ किंच। धारणाया ध्यानस्य च मंगलं शोभनं विषयः इतरथा तयोर्निर्विषयत्वं स्यात्। दृश्यते चाद्याप्युपासका
नां तथैव तद्रूपस्य साक्षात्कारफलप्राप्तिश्चेति। इच्छाशरीराणि प्रायेण वा यथाश्रुतमेवास्तु। तत्रापि लोकाभिरामामित्यादि
विशेषणानामानर्थक्यप्रसंगात्। तत्र महद्भ्यास्तिरोधाय निर्गतश्चैव सांप्रतं। तदा तु स्वं स्वमेव लोकमागमिष्यतीति संभ्रम
ण देवादिरिक्षितः। सर्वतोऽदृष्ट्वेनादत्तपुष्पवृष्ट्यादिमहोत्सवो नवदिव्याद्व। दिवीति॥५॥ दिवि दुंदुभयो नेदुः पेतुः सुमनस

२३१ ध्यरवात्। सत्यं धर्मो धृतिर्भूमिः कीर्तिः श्रीश्चानुतं ययुः ॥७ भूमेः सकाशाद्भगवंतं श्रीकृष्णमनुययुः ॥ब॥ देवादयो ब्रह्ममुख्या नि
विशंतं स्वधामनि। अविज्ञातगतिं कृष्णं ददृशुश्चाति विस्मिताः ॥८ तदा श्रीकृष्णेंतर्हिते सति कुतो गत इति वितर्कयंतो पि ब्र
ह्ममुख्या देवादयः स्वधामनि विशंतं कृष्णं न ददृशुः। तत्र हेतुः। अविज्ञातगतिमिति। क्वचित्क्वचिद्ददृशुश्च। ततो ऽतिविस्मिता
बभूवुरित्यर्थः। अविज्ञातगतित्वं दृष्टांतेन स्पष्टयति ॥ब॥ सौदामिन्या यथाकाशे यांत्या हित्वाभ्रमंडलं। गतिर्न लक्ष्यते मर्त्यै
स्तथा कृष्णस्य दैवतैः ॥९ सौदामिन्या गतिर्यथा मर्त्यैर्न लक्ष्यते दैवैस्तु लक्ष्यते। तथाभ्रमंडलं हित्वा गच्छतः श्रीकृष्णस्य गतिः ए१०
दैवैरपि न लक्षिता। किंतु तत्पार्षदैरेवेत्यर्थः ॥ब॥ ब्रह्मरुद्रादयस्ते तु दृष्ट्वा योगगतिं हरेः। विस्मितास्तां प्रशंसंतः स्वं स्वं लोकं २३१
ययुर्मुदा ॥१० प्रथमे श्लिष्टा दृष्टांतेन स्पष्ट अभिप्रायो परिज्ञानेन शुक्रः रुष्टं दृष्ट्वा पुनस्तमेवार्थं प्रपंचयति। राजन्निति त्रि
भिः ॥ब॥ राजन्परस्य तनुभृज्जननाप्ययेहा मायाविडंबनमवेहि यथा नटस्य। सृष्ट्वात्मनेदमनुविश्य विहृत्य चांते संहृ

२३४ महापुराणे श्रीभा[illegible] ह्रां सं[illegible]
युगे क[illegible]
त्य चात्ममहिम्नोपरतः स आस्ते ॥११ परस्य सर्वकारणस्य तनुभृतां यादवादिभृज्जननाप्ययेहाः आविर्भाव तिरोभावचेष्टाः
मायया अनुकरणमात्रमवेहि। नटो यथा अविकृत एव नानारूपैर्जन्मादीन्विडंबयते तद्वत्। आस्तां तावद्यादवादिषु
जन्मादिशंका। यतो विश्वसर्गनिरोधादिष्वथ सा वविकृत एवास्त इत्याह। सृष्ट्वेति। आत्मना स्वयमेवेदं जगत्सृष्ट्वा च तया
मिवचेनानुविश्य तत्र विहृत्य क्रीडित्वा अंते तत्प्रलये संहृत्य च आत्ममहिम्ना स्वमहिम्नानुपरतः सन्नास्ते। न पुनरस्य यामंतद्यथा य
तोस्मिन्नेवावतारे तत्प्रभावो निरतिशयो दृष्ट इत्याह। मर्त्येनेति ॥ब॥ मर्त्येन यो गुरुसुतं यमलोकनीतं त्वां चानयच्छरण
दः परमास्त्रदग्धं। जिग्येंतकांतकमपीशमसावनीशः किं स्वावने स्वरनयन्मृगयुं सदेहं ॥१२ यमेन स्वलोकं प्रतिनीतं
गुरुसुतं मर्त्येन तेनैव शरीरेण य आनयत् आनीतवान्। शरदः शरणागतरक्षकः। त्वां च ब्रह्मास्त्रदग्धं योरक्षितवान् य
श्च अंतकानामंतकमपि ईशं श्रीरुद्रं बाणसंग्रामे जितवान्। मृगयुं लुब्धकं सदेहं तेनैव देहेन स्वः स्वर्गं अनयत् निन्ये। अ

२३२ सोप्यावनेश्वरस्तोर्धनीशः असमर्थः किं। ननु यदि समर्थः तर्हि किं चिरकालमत्रैव तेन वपुषा किमिनातिष्ठत्तत्राह। तथापीति
।।ब।। तथाप्यशेषस्थितिसंभवाप्ययेष्वनन्यहेतुर्यदशेषशक्तिधृक्। नैच्छत्प्रणेतुं वपुरत्रशेषितं मर्त्येन किं स्वस्थगतिं प्रदर्श
यन्।।२३ यद्यपि उक्तप्रकारेणाशेषस्य जगतः स्थित्यादिषु अनन्यहेतुः निरपेक्ष एव कारणं। यद्यस्मादशेषशक्तिविधृक्। त
थापि यादवानेव संहृत्य निजं वपुः अवशेषितं अवशिष्टं प्रणेतुं कर्तुं नैच्छत्। किंतु स्वयामवलोकमत्यजत्। तत्र हेतुः। मर्त्यदे
हेन किं विकार्यमिति स्वस्थानामात्मनिष्ठानां दिव्यां गतिमेव प्रकृष्टां दर्शयन्। अन्यथा तेपि दिव्यां गतिमनास्थाय योगबलेन देह ए०टी०
सिद्धिं विधाय चिरं स्थेयं यतेरन् तन्मा भूदित्येतदर्थमिति भावः।।ब।। य एतां प्रातरुत्थाय कृष्णस्य पदवीं परां। प्रयतः कीर्त्तये २३२
द्भक्त्या तामेवाप्नोत्यनुत्तमां।।२४ एतां उक्तप्रकारां पदवीं गतिं। तदेवं भगवता स्वलोकं गच्छता वसुदेवादीनामपि तत्प्राप्तये
य उपायस्थितिस्तत्रासीत्तमाह। दारुक इत्यादिना।।ब।। दारुको द्वारकामेत्य वसुदेवोग्रसेनयोः। पतित्वा चरणावस्रैर्न्यषि

ञ्चत्कृष्णविच्युतः।।२५ कथयामास निधनं वृष्णीनां कृत्स्नशो नृप। तच्छ्रुत्वोद्विग्नहृदया जनाः शोकविमूर्छिताः।।२६
ततस्त्वरिता जग्मुः कृष्णविश्लेषविह्वलाः। व्यसवः शेरते यत्र ज्ञातयो घ्नंत आननं।।२७ देवकी रोहिणी चैव वसुदेवस्त
थाहुकः। कृष्णरामावपश्यंतः शोकार्ता विजहुः स्मृतिं।।२८ कृष्णरामौ मृतावपश्यंतः।।ब।। प्राणांश्च विजहु
स्तत्र भगवद्विरहातुराः। उपगुह्य पतींस्तात चितामारुरुहुः स्त्रियः।।२९ रामपत्न्यश्च तद्देहमुपगुह्याग्निमाविशन्।
वसुदेवपत्न्यस्तद्गात्रं प्रद्युम्नादीन्हरेः स्नुषाः। कृष्णपत्न्योविशन्नग्निं रुक्मिण्याद्यास्तदात्मिकाः।।३० अर्जुनः प्रेयसः स
ख्युः कृष्णस्य विरहातुरः। आत्मानं सांत्वयामास कृष्णगीतैः सदुक्तिभिः।।३१ सदुक्तिभिः सत्याः अवितथा उक्तयो येषु तैः
नाहं प्रकाशः सर्वस्य योगमायासमावृतः। मूढोयं नाभिजानाति लोको मामजमव्ययमित्यादिभिः।।ब।। बंधूनां नष्टगो
त्राणामर्जुनः सांपरायिकं। हतानां कारयामास यथावदनुपूर्वशः।।३२ नष्टगोत्राणां नष्टसंततीनां। सांपरायिकं

२३३ पिंडोदकादि ॥ ब ॥ द्वारकां हरिणा त्यक्तां समुद्रोऽप्लावयत्क्षणात् । वर्जयित्वा महाभाग श्रीमद्भगवदालयं ॥ २३ नित्यं सं-
निहितस्तत्र भगवान्मधुसूदनः । स्मृत्याशेषाशुभहरं सर्वमंगलमंगलं ॥ २४ स्त्रीबालवृद्धानादाय हतशेषान्धनंज-
यः । इंद्रप्रस्थं समाविश्य वज्रं तत्राभ्यषेचयेत् ॥ २५ श्रुत्वा सुहृद्वधं राजन्नर्जुनात्ते पितामहाः । त्वां तु वंशधरं कृत्वा ज-
ग्मुः सर्वे महापथं ॥ २६ आदितश्चारभ्य श्रीकृष्णचरितकीर्त्तनस्य फलमाह । य इति द्वाभ्यां ॥ ब ॥ य एतद्देवदेवस्य विष्णोः
कर्माणि जन्म च । कीर्त्तयेच्छ्रद्धया मर्त्यः सर्वपापैः प्रमुच्यते ॥ २७ इत्थं हरेर्भगवतो रुचिरावतारवीर्याणि बालचरिता-
नि च शंतमानि । अन्यत्र चेह च श्रुतानि गृणन्मनुष्यो भक्तिं परां परमहंसगतौ लभेत ॥ २८ शंतमानि परममंगलानि ॥ ए० टी०
परमहंसगतौ श्रीकृष्णे ॥ ब ॥ एवमेकादशस्कंधभावार्थस्य प्रदीपिका । स्वाज्ञानध्वांतभीतेन श्रीधरेण प्रकाशिता २३३
॥ १ ॥ क्वेदं नानानिगूढार्थं श्रीमद्भागवतं क्व तु । मंदबुद्धिरहं क्वैष प्रेम किं किं न कारयेत् ॥ २ ॥ ॥ ब ॥ इति श्रीभागवते

श्रीटी

२३४ महापुराणे अष्टादशसाहस्र्यां संहितायां एकादशस्कंधे श्रीकृष्णांतर्द्धानं नामैकत्रिंशोऽध्यायः ॥ ॥ ब ॥ ॥ श्रीः ।
समाप्तोऽयमेकादशस्कंधः संपूर्णः ॥ ब ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ ब ॥ श्रीरस्तु ॥ ॥ ब ॥ लेषकपाठकयोः शुभं भू-
यात् ॥ ॥ ब ॥ ॥ यावल्लवणसमुद्रो यावन्नक्षत्रमंडितो मेरुः । यावच्चंद्रादित्यौ तावदिदं पुस्तकं जयतु ॥ ब ॥ ॥
संवत् १७४५ वर्षे पौषशुदि ४ रवौ लिखितोऽयमेकादशस्कंधः ॥ ॥ यादृशमिति न्यायान्न मे दोषः ॥ ॥ ॥ ब ॥
॥ ब ॥ ॥ ब ॥ ॥ ब ॥ ॥ ब ॥ ॥ ब ॥ ॥ ब ॥ ॥ ब ॥ ॥ ब ॥ ॥ ब ॥ ॥ ब ॥ ॥ ब ॥ ॥ ब ॥ ब

श्रीः

